N. A.

Shiva rahasya Pt 7 (Purvardha) Sect. 2

शिवरहस्य सप्तमांश (पूर्वार्ध) भाग-2

Sanskrit

Paper - Handwritten

1977 Sambat (97 years old)

93 Folio

15"x9"

Complete

मयाकृतानिपापानिज्ञात्वैवादरपूर्वकं॥९०॥अद्यपीतंमयामद्यं ज्ञात्वामादकमित्यपि॥ अन्यच्चमादकंद्रव्यंस्वेच्छयाभक्षितंमुदा॥९१॥
अद्यैवयुवतीमात्तासम्यगालिंगितामया॥मातृयोनौततोधा स्यां द्रेतः सेककृतोमुदा॥९२॥ दृष्ट्वामांमास्तिताविप्रमात्संगमतत्परं॥निवा
रयितुमुद्युक्तःसपितापिमयाहतः॥९३॥ मद्यपेनमयाद्यैवबहवोब्राह्मणाहताः॥ हताब्राह्मणपत्न्याश्चगर्भिण्यःपतिदेवताः॥९४॥ दोग्ध्रीसमू
होनिहतःकश्चिदद्यैवसत्वरं॥कश्चिदश्वसमूहोपिनिहतःसत्वरंमया॥९५॥ एतादृशस्यपापस्यनिष्कृतिस्यात्कथंद्विज॥ वेदतत्वंविचार्यैव
वप्रायश्चित्तंवदस्वमे॥ इतितद्वचनंश्रुत्वासविप्रोवेदवित्तमः॥ प्रायश्चित्तजेगादैवंपापनिर्मूलनक्षमं॥९७॥ ॥द्विजउवाच॥ ॥विभूतिधार
णंकृत्वाशिवैकशरणोधुना॥सर्वाघौघनिवृत्यर्थैरुद्रमावर्त्तयद्विज॥९८॥शिवमंत्रसमुद्रोयंरुद्राध्यायःशिवात्मकः॥अतस्तद्रुद्रपाठेननश्य
त्यघकुलंक्षणात॥९९॥नामैकमपिरुद्रस्यसर्वपापविनाशकं॥ स्वर्गापवर्गफलदंशैवजप्तंनसंशयः॥१००॥ कृत्वाप्यघकुलंनित्यंशिवै
कशरणोद्विज॥यदिरौद्रंजपेन्मंत्रंसर्वपापैःप्रमुच्यते॥१॥रुद्रस्मरणमात्रेणमहापातककोटयः॥ विनश्यंत्यनलाक्रांताःशलभाइव
तत्क्षणे॥२॥तावदेवहिपापानियावन्नस्मर्यतेशिवः॥ स्मृतेशिवेपातकानिविनश्यंतिबहून्यपि॥३॥तावदेवहिपापानिविनश्यंतिशि
वस्मृते॥सत्यमेतत्पुनः सत्यमितिजाबालवादिनः॥४॥ प्रज्वलद्वन्हिपतिताजीवंतिशलभायदि॥ तदापिशिवभक्तेषुनाधितिष्ठतिपा
तकं॥५॥अशैवायेभविष्यंतितेमहापातकालयाः॥ पापानिस्वालयंत्यक्त्वातिष्ठंतिनकदाचन॥६॥ पुण्यालयेषुशैवेषुपुण्यान्येवव
संत्यतः॥नतिष्ठंत्येवशैवेषुपातकानिविरोधतः॥७॥ पुण्यैकनिलयःशैवोनाश्रयःपुण्यपापयोः॥ पुण्यपापाश्रयेनैकस्तेजस्तिमिरयो
रिव॥८॥यदायत्रोज्वलंतेजोनतत्रतिमिरंतदा॥ ततोयदायत्रपुण्यंतदातत्रनपातकं॥९॥ पुण्यैकनिलयाःशैवाःसर्वदापितथासति
॥नतिष्ठंत्येवशैवेषुपातकानिकदाचन॥१०॥ शैवेनचेत्कृतंपापंतत्तुसद्योविनश्यति॥ तस्यपातकसंबधोनकदापिध्रुवंध्रुवं॥११॥काशि
नासंग्रहीतस्यजलस्यक्षरणंयथा॥तथाशैवकृताघानिक्षरंत्येवक्षणेक्षणे॥१२॥नकाशिसंग्रहीतांभःक्षरणायोघमेयथा॥ तथाशैव

कृताघानामपिनाशायनोद्यमः॥१३॥अयत्नेनैवनष्टेषुपातकेषुकिमुद्यमैः॥उद्यमस्तत्रयत्नैवसंमतायत्नसाध्यता॥१४॥अद्यप्रभृत्ययोवि
प्रशैवोभूत्वाशिवंयज॥शिवःशैवकृतांपूजांनित्यंगृह्णातिसादरं॥१५॥शैवोभूत्वाबिल्वपत्रैर्यःपूजयतिशंकरं॥सर्वपापविनिर्मुक्तोभुक्तिंमु
क्तिंचविंदति॥१६॥शिवलिंगार्चनेनैवतुष्टोभवतिशंकरः॥संतुष्टःपार्वतीनाथःप्रयच्छत्येववांछितं॥१७॥शिवलिंगार्चनेयोग्यःशैवएवत
थासति॥शैवोभूत्वामहादेवंपूजयस्वप्रयत्नतः॥१८॥शिवपूजांकुरुप्रीत्यापातकेभ्योभयंत्यज॥कर्मणामनसावाचाभवानीरमणंभज॥
॥१९॥कुरुश्रौतंप्रयत्नेनकेवलंभस्मधारणं॥भस्मनोद्धूल्यसर्वांगंकुरुरुद्राक्षधारणं॥२०॥रुद्रमावर्त्तयप्रीत्यारुद्रध्यानपुरःसरं॥स्वप्ने
पिमायजारुद्रंसर्वथाकिमुतान्यदा॥२१॥इत्युक्तंतद्वचःश्रुत्वासविप्रःसत्वरंद्विजाः॥नत्वातत्वविदेतस्मैहृष्टचित्तोबभूवहि॥२२॥ततःस्ना
त्वासतत्रैवसम्यगुद्धूल्यभस्मना॥त्रिपुंड्रधारणंचक्रेकेवलंश्रुतिचोदितं॥२३॥रुद्राक्षधारणंचक्रेतदनंतरमास्तिकः॥चक्रेततःपरंभ
क्त्यारुद्राध्यायानुवर्त्तनं॥२४॥ततःपरंतच्छरीरात्पापानिविविधान्यपि॥काकरूपंसमासाद्यनिर्गतानिद्विजोत्तमाः॥२५॥संदग्धपक्षास्ते
काकादग्धतुंडाःसहस्रशः॥निर्गतास्तच्छरीरात्तेदृष्टाःसर्वैरपिद्विजाः॥२६॥सदृष्ट्वातादृशान् पापान्काकरूपेणनिर्गतान्॥अतिसंतुष्टहृ
दयोरुद्रमावर्त्तयत्पुनः॥२७॥सतदाप्रभृतिप्रीत्यारुद्रावर्त्तनतत्परः॥रुद्रैकशरणोभूत्वारुद्रमेवसमर्चयत्॥२८॥नास्तिरुद्रजपादन्योजपो
मोक्षप्रदायकः॥साक्षान्मोक्षप्रदोयस्माद्रुद्राध्यायजपोद्विजाः॥३०॥रुद्रैकशरणोभूत्वायोरुद्रमनुवर्त्तयेत्॥सवंद्यःसर्वदास्माभिःब्रह्मोपें श्रीशिव
द्रादिभिस्तथा॥३१॥रुद्रावर्तनशीलोयःशिवैकशरणोद्विजः॥सकृतानंतपापोपिनपापफलमश्नुते॥३२॥रुद्रावर्त्तनशीलायेरुद्रैकपर १
देवताः॥तेभूगतादेवास्ते तास्तेपूजनीयामुहुर्मुहुः॥३३॥मंत्ररत्नाकरंरुद्रंयोनित्यमनुवर्त्तयेत्॥सतरत्येवसंसारंसत्यमित्यस्तिहिश्रुतिः॥
॥३४॥श्रीरुद्रमंत्ररत्नानिरुद्राध्यायेवसंत्यतः॥तद्रत्नमालामुक्तयर्थंकंठेधार्यामुमुक्षुभिः॥३५॥उद्धूल्यभस्मनांगानिकृत्वारुद्राक्षधारणं॥
जपनीयःप्रयत्नेननित्यंश्रीरुद्रसंनिधौ॥३६॥किंजप्येनामृतीभूयादितिप्रश्नःश्रुतिश्रुतः॥तत्रैवशतरुद्रेणेत्युत्तरंचश्रुतिश्रुतं॥३७॥तद्रुद्र

नामधेयानिरुद्रस्थान्यन्यगानिच।।अमृतस्यैवनामानितानितन्नेतिहिश्रुतेः।।३८।।रुद्र एवामृतःप्रोक्तोतदन्येतुमृताःस्मृताः।।अमृतोरुद्र
एवेतिश्रुतिजाबालचोदिता।।३९।। वाजिपेयादियागानामनंतानांचयत्फलं।। ततोनंतगुणंपुण्यंप्राप्यंरुद्रावर्तनात्।।४०।। एकैकोयोरुद्रमंत्रो
रुद्राध्यायगतोद्विजाः।।तत्प्रभावोखिलैर्वेदैरपिनज्ञायतेध्रुवं।।४१।। एकस्यरुद्रमंत्रस्यप्रभावश्चेन्नबुध्यते।। रुद्राध्यायप्रभावस्तुवेदैर्ज्ञेयःकथं
भवेत्।।४२।।रुद्राध्यायप्रभावस्तुज्ञायतेशूलपाणिनातदन्यैर्ब्रह्मविष्णवाद्यैर्वेदैश्चनहिबुध्यते।।४३।।रुद्राध्यायस्वरूपस्यरुद्रस्यपरमात्मनः।।प्रभावो
निगमेनापिनविज्ञातोद्विजोत्तमाः।।४४।। प्रभावंशांकरंज्ञातुंयततेनिगमाःसदा।। तथापिनिगमैर्विप्राःसनविज्ञायतेध्रुवं।।४५।।अयंशंकरनिक्षेपोरु
द्राध्यायोद्विजोत्तमः।।अक्षयोयंहिनिक्षेपोजन्मोक्षस्यफलप्रदः।।४६।।अन्येतुधननिक्षेपाःसर्वथैवक्षयिष्णवः।।श्रीरुद्राध्यायनिक्षेपःक्षयिष्णु
र्नभविष्यति।।४७।।श्रीरुद्राध्यायनिक्षेपःसेव्यश्शैवैर्मुमुक्षुभिः।।श्रीरुद्रमंत्ररत्नानांनिलयोयंयतोद्विजाः।।४८।।शिवलिंगार्चनंकार्यंरुद्राध्याय
नपूर्वकं।।स्वर्गापवर्गफलदंवैदिकंपापनाशनं।।४९।।शिवलिंगार्चनादन्योधर्मोनास्तिद्विजन्मनां।।सत्यमेतत्पुनःसत्यमुधृत्यभुजमुच्यते।।
।।५०।।सृष्टाभगवतापूर्वंअश्वत्थाशूलपाणिना।। तयैवमोहिताःकेचिन्नकुर्वंतिशिवार्चनं।।५१।।अश्वत्थाशिवपूजायांयस्ययस्यभविष्यति।।त
स्यतस्यकुलंसर्वंचंडालकुलमुच्यते।।५२।। उद्धूलनादावश्वत्थायस्ययस्यभविष्यति।।तस्यतस्य०।।५३।।अश्वत्थायस्ययस्यास्तिकेवलेभस्मधार
णे।।तस्यतस्य०।।५४।।अश्वत्थायस्ययस्यास्तिशुद्धेरुद्राक्षधारणे।।तस्यतस्य।।५५।।अश्वत्थायस्ययस्यास्तिकेवलेशंकरार्चने।।तस्यतस्य०।।
।।५६।।अश्वत्थायस्ययस्यास्तिरुद्राध्यायानुवर्त्तने।।तस्यतस्यकुलंसर्वं०।।५७।।अश्वत्थायस्ययस्यास्तिपंचाक्षरजपेतथा।।तस्यतस्यकुलंसर्वं
चंडालकुलमुच्यते।।५८।।अश्वत्थायस्ययस्यास्तिशिवनामानुकीर्तने।।तस्य०।।५९।।अश्वत्थायस्ययस्यास्तिशिवतीर्थनिषेवणे।।तस्य०।।६०।।अश्व
त्थायस्ययस्यास्तिशिवनैवेद्यभोजने।।तस्य०।।६१।।अश्वत्थायस्ययस्यास्तिशिवक्षेत्रानुसेवने।।तस्य०।।६२।।अश्वत्थायस्ययस्यास्तिशिवनिर्माल्य
धारणे।।तस्य०।।६३।।अश्वत्थायस्ययस्यास्तिमहादेवकथाश्रुतौ।।तस्य०।।६४।।अश्वत्थायस्ययस्यास्तिमहादेवनिरीक्षणे।।तस्य०।।६५।।अश्वत्था
यस्ययस्यास्तिमहादेवाभिमर्शने।।तस्य०।।६६।।अश्वत्थायस्ययस्यास्तिमहादेवाभिषेचने।।तस्य०।।६७।।अश्वत्थायस्ययस्यास्तिमहादेवाभि

श्री॰शि॰र॰ ७

२

वादने॥तस्य॰॥६८॥अश्रध्दायस्ययस्यास्तिमहादेवगुणश्रुतौ॥तस्य॰॥६९॥अश्रध्दायस्ययस्यास्तिमाहेश्वरजनार्दने॥तस्य॰॥७०॥शिवार्चनादाव
श्रध्दायःकरिष्यतिमूढधीः सवंशकोटिसंयुक्तो नरकेषुपतिष्यति॥७१॥अश्रध्दाभगवतासृष्टापार्वतीपतिनापुरा॥सायेनसंश्रिताश्रध्दासधन्यः
सबुधोत्तमः॥७२॥शंकराराधनेश्रध्दासहसानभविष्यति॥साचेद्भवतिभाग्येनससभाग्योनसंशयः॥७३॥नित्यमव्यभिचारेणश्रध्दाचेत्तगि
रिशार्चने॥तीर्णएवेतिविज्ञेयस्तूर्णसंसारसागरः॥७४॥शंकराराधनश्रध्दानाल्पस्यतपसः फलं॥ परंत्वनल्पतपसः साफलंसत्यमुच्यते॥७५॥
येनयागाःकृताःपूर्वं वाजपेयादयस्सदा॥तस्यैवभवतिश्रध्दाश्रीमहादेवपूजने॥७६॥कृतानियेनसत्सात्रेमहादानानिसंततं॥तस्यैवभवति
श्रध्दाश्रीमहादेवपूजने॥७७॥कृतंयेनप्रयत्नेनशिवतीर्थाटनंमुदा॥तस्यैव॰॥७८॥कृतानियेनधर्मार्थंतटाकादीनिसादरं॥तस्यैव॰॥७९॥ये
नयत्नेनबहुधाकृतंपृथ्वीप्रदक्षिणं॥तस्य॰॥८०॥भोजिताःकोटिशोयेनशिवक्षेत्रेद्विजोत्तमाः॥तस्यैव॰॥८१॥तोषिताःकोटिशोयेनरत्नव-
स्त्रादिभिर्द्विजाः॥तस्यै॰॥८२॥रक्षिताःकोटिशोयेनभयग्रस्तामहापदि॥तस्यै॰॥८३॥पूजिताःकोटिशोयेनशिवैकपरदेवताः॥तस्यैवभवतिश्र
ध्दाश्रीमहादेवपूजने॥८४॥शिवश्रध्दाकामधेनुःसैवकल्पतरुर्द्विजाः॥शिवश्रध्दैवशैवानांचतुर्वर्गफलप्रदा॥८५॥नयस्यास्तिशिवेश्रध्दासतुचं
डालयोनिजः॥सत्यमेतत्पुनःसत्यमितिजामितिजाबालबादिनः॥८६॥शिवश्रध्दाभगवतीसर्वकामफलप्रदा॥बहुपुण्यतपोलभ्यापुण्यराशिस
माश्रया॥८७॥भगवत्यंबिकानाथेश्रध्दायस्यास्त्यनन्यगा॥नतस्मादपरोधन्यः सत्यंसत्यंनसंशयः॥८८॥भगवान्पार्वतीनाथःसादरंयेनचिंत्यते॥ पूज्यते॥
नतस्मादपरोधन्यःसत्यंसत्यंनसंशयः॥८९॥भगवान्पार्वतीनाथःसादरंयेनचिंत्यते॥नतस्मादपरोधन्यस्सत्यंसत्यंनसंशयः॥९०॥शैवाभ
वतियावतस्तावंतोगतकल्मषाः॥तएवधन्याःपूज्याश्चसत्यंसत्यंनसंशयः॥९१॥यःकरोत्यतियत्नेनकेवलंभस्मधारणं॥सपूजनीयोरत्ना श्रीशिव
द्यैरुमापतिरिवध्रुवं॥९२॥यःकरोत्यतियत्नेनकेवलंशिवपूजनं॥सपूजनीयोरत्नाद्यैरुमापतिरिवध्रुवं॥यःकरोत्यतियत्नेनकेवलंशिवचिं २
तनम्॥सपूजनीयो॰॥९४॥यस्तुभोजयतेभक्त्याशैवंक्षीरादिसाधनैः॥तेनसाक्षान्महादेवोभोजितःपार्वतीप्रभुः॥९५॥यत्रभुंक्तेमहाशैवो
तत्रभुंक्तेशिवस्वयं॥शिवाभ्यांभुज्यतेयत्रतत्रभुंक्तेजगत्त्रयं॥९६॥पुराकश्चिद्द्विजवरोदेग्ध्रीरक्षणतत्परः॥चकारपोषणंनित्यंगवामेवत्

णादिभिः॥९७॥ तेनैकंनार्मदंलिंगंस्थूलंसंपादितंमुदा॥ सनित्यंनार्मदंलिंगंपूजयामाससादरं॥९८॥ सघृतक्षीरमधुभिर्नार्मदंलिंगमुत्तमं॥अ
सेचयत्प्रयत्नेनरुद्रमावर्त्तयन्मुदा॥९९॥अभिषिच्यप्रयत्नेनबिल्वपत्रैर्नवारुणैः॥संपूज्यपूजयामासकुसुमैर्विविधैरपि॥१००॥गोघृताक्तै
र्गुग्गुलैश्चधूपयित्वामहेश्वरं॥सहस्रंघृतदीपांश्चमहेशायसमर्पयत्॥१॥क्षीरान्नंसघृतंनित्यंनैवेद्यंसमहेश्वरे॥ दधिखंडान्वितंचान्नंनि
वेदयतिशंकरे॥२॥ दधिक्षीरघृताप्लुष्टमन्नंशिवनिवेदितं॥ दत्वाशंकरभक्तेभ्यःस्वयंभुंक्तेततःपरं॥३॥सद्दृष्ट्वाभस्मनिरतंकेवलंशांकरार्च
नं॥तस्मैददातिसघृतंक्षीरान्नमतियत्नतः॥४॥सद्यस्तप्तघृताप्लुष्टंक्षीरमादायसादरं॥संपूज्यशिवभक्तेभ्योददातिप्रीतिपूर्वकं॥५॥दीपा
न्करोतिसततंशांकरःसशिवालये॥गोघृतेनमहादेवंसनित्यमभिषिंचति॥६॥एवंसदधिदुग्धाद्यैरभिषिंच्यमहेश्वरं॥शैवांश्चदधिदुग्धाद्यैः
संतोषयतिसादरं॥७॥नभोज्यंतेयदाशैवास्तेनक्षीरादिसाधनैः॥तदानभुज्यतेतेनकृत्वापिशिवपूजनं॥८॥कदाचित्तेनविप्रेणनप्रापःशोक
रोजनः॥तदातेनक्षुधार्त्तेनस्थितमासायमास्तिकाः॥९॥ततसाक्षान्महादेवःस्वयमेवांबिकपतिः॥वृधब्राह्मणरूपेणगतस्तद्द्विजसंनिधिं॥
॥१०॥ततस्तंशांकरंदृष्ट्वाक्षुधार्तंभुक्ततालुकं॥उवाचवचनंमंदंतद्धैर्यंज्ञातुमीश्वरः॥११॥ ॥शिवउवाच॥ ॥भुंक्ष्वविप्रक्षुधार्त्तेनकिमर्थंस्थी
यतेत्वया॥ दत्वाशिवायनैवेद्यंमाविलंबंकुरुद्विज॥१२॥ ॥द्विजउवाच॥ ॥नमोजितोमहादेवोःशैवरूपोमयाद्विज॥अभोज्यशैवंक्षीराद्यै
र्भोक्तव्यंस्यात्कथंवद॥१३॥भुंक्तेशांकररूपेणशंकरोनान्यथाद्विज॥अतःशैवमभोज्याहंनभोक्ष्येसत्यमुच्यते॥१४॥मरणंवाभवत्वद्यक्षुधार्त
स्यममाधुना॥तथाप्यहंनभोक्ष्यामिक्षीरेणाभोज्यशांकरं॥१५॥ ॥शिवउवाच॥ ॥यादृशंतादृशंविप्रभोजयस्वाधुनाद्विज॥भुंक्ष्वत्वम
पियत्नेनमौर्ख्यंमाकुरुसर्वथा॥१६॥ ॥द्विजउवाच॥ ॥मयासंपादितागावःपोषिताश्चप्रयत्नतः॥अयंप्रयासःसर्वोपिशांकरार्थमयाकृतः॥
॥१७॥शैवमेवाज्यदुग्धाद्यैर्भोजयिष्येप्रयत्नतः॥नदास्येसमशैवायक्षीरान्नंक्लेशसाधितं॥१८॥शिवनिष्ठंभोजयिष्येशूद्रमप्यहमादरात्॥अशै
वान्नैवयत्नेनभोजयिष्येद्विजानपि॥१९॥शूद्रोपिशांकरःपूज्यःशिवपूजापरायणः॥अशांकरब्राह्मणोपिपूजनीयोनसर्वथा॥२०॥अशांकर
स्यविप्रस्यदर्शनेपातकंयतः॥ ततःकदापितत्पूजानकर्त्तव्यैवसर्वथा॥२१॥अशांकरोयतोनित्यंमहापातकसंश्रयः॥अतःकदापितत्पूजाविहि

श्रीशंकर॰७ तानद्विजन्मनां॥२२॥ देयमन्नं स्वसूकराय शुनकायाथवाद्विजाः॥ अशांकरायविप्रायनान्नं देयं कदाचन॥२३॥ अशांकराययोदद्यान्मोहेनान्नं क
३ दाचन॥ ससर्वथान्नदानस्यन प्राप्नोतिफलं ध्रुवं॥२४॥ अशांकरंद्विजं दृष्ट्वाभानुंयदिन पश्यति॥ चांद्रायणंततः कार्यमन्यथानारकीभवेत्॥२५॥
इतितद्वचनंश्रुत्वाशिवसंतुष्टमानसः॥स्वस्वरूपंकृपासिंधुर्दर्शयामाससत्वरं॥२६॥ उमासंश्लिष्टवामांगं चंद्रशेखरमीश्वरं॥ दृष्ट्वाप्रहृष्टहृद
यःस्तुष्टावाष्टविधाकृतिं॥२७॥ ॥द्विजउवाच॥ ॥नमस्तेपृथिवीरूपनमस्तेजलरूपिणे॥ नमस्तेजलरूपायवायुरूपायतेनमः॥ नमआकाश
रूपायसूर्यरूपायतेनमः॥२८॥ नमश्चंद्रस्वरूपायनमोयज्वस्वरूपिणे॥ नमः सर्वस्वरूपायव्यापकायनमोनमः॥२९॥ नमस्त्रिशूलहस्तायनमः
परशुधारणे॥ नमोविधूतपापायगौरीनाथायतेनमः॥३०॥ नमश्चंद्रकिरीटायपरमायनमोनमः॥ नमोवेदस्वरूपायनीरूपायनमोनमः॥३१॥ नमो
वेदांतवेद्यायनमोवैद्यायतेनमः॥ निष्कलायनमस्तेस्तुनिर्गुणायनमोनमः॥३२॥ नमःशांतायतेशंभोनिरवद्यायतेनमः॥ निरंजननमस्तेस्तुनि
ष्प्रपंचनमोनमः॥३३॥ निर्लिप्तायनमस्तेस्तुनिराधारायतेनमः॥ निरीशायनमस्तेस्तुसर्वेशायनमोनमः॥३४॥ नमोज्ञानस्वरूपायज्ञानातीताय
तेनमः॥ नमोज्ञानैकगम्यायज्ञानगम्यायतेनमः॥३५॥ विष्णुपित्रेनमस्तुभ्यंब्रह्मपित्रेनमोनमः॥ इंद्रपित्रेनमस्तुभ्यंसर्वपित्रेनमोनमः॥३६॥ न
मःकल्याणरूपायनमःकल्याणदायते॥ नमःपरमरूपायपरमानन्दरूपिणे॥३७॥ सच्चिदानंदरूपायनमस्तेसर्वसाक्षिणे॥ नमोयज्ञरूपाययज्ञ स्व
कर्मफलप्रद॥३८॥ नमस्तेकरुणासिंधोकरुणाभूर्त्तयेनमः॥ अनंतसोमसूर्याग्निप्रतिमायनमोनमः॥३९॥ अनंतामेयकल्याणगुणपूर्णायतेनमः॥
सर्वज्ञायनमस्तेस्तुभक्ताभीष्टप्रदायच॥४०॥ भूतभावनभूतेशनमस्तेभूतवत्सल॥ भूतव्रतप्रियश्रीमन्नमस्तेभूतिभूषण॥४१॥ भूतिभूषितभक्तेष्ट श्रीशिव
भूतिदानविचक्षण॥ अभयप्रदविश्वात्मन् वरदामरपूजित॥४२॥ विष्णुपूजितपादाब्जप्रसीदगिरिजापते॥ इतिस्तुत्वामहादेवंपूजयित्वाचयत्न ३
तः॥४३॥ प्रणम्यबहुधातस्थौकृतांजलिपुटोद्विजाः॥ ततःपरंमहादेवस्तमुवाचकृपानिधिः॥ मत्तोवरंवृणीष्वेतिस्मितपूर्वंतदाद्विजाः॥४४॥ ॥
द्विजउवाच॥ ॥ दृष्टमद्यमहादेवतवपादांबुजंमयाकृतार्थंमभवज्जन्ममममसांबकृपानिधे॥४५॥ महादेवकृपासिंधोतवपादांबुजेसदा॥ अच
चलाममास्त्वीशभक्तिरव्यभिचारिणी॥४६॥ तवपादांबुजंत्यक्त्वामनोमायातुमेप्रभो॥ त्वय्येवास्तुमनोनित्यंकृपामूर्त्तेमहेश्वर॥४७॥ त्वामेव

चिंतयामीशत्वदन्यंनैवचिंतये॥ त्वमेवदेवतंशंभोममसत्यंनसंशयः॥४८॥ चक्षुःपश्यतुमेनित्यंशिवलिंगंसमर्चितं॥ श्रुणोतुश्रोत्रमनिशं
सदाशिवकथांमम॥४९॥ जिव्हाममकरोत्वीशशिवनामानुकीर्तनं॥ रुद्राघ्रातंममाघ्रातुघ्राणमेतत्त्रिलोचन॥ करोतुममहस्तोयंशिवलिंगस्य
पूजनं॥ चिंतयत्वनिशंचेतोममेशचरणांबुजं॥५१॥ सदाशैवव्रतेष्वेवभक्तिरस्तुममेश्वर॥ अशांभवव्रतेश्रद्धाममास्तुकदाचन॥५२॥ मद्वंशजाभवं
त्वीशशिवैकपरदेवताः॥ मद्वंशजानामस्त्वीशत्वयिभक्तिरनन्यगा॥५३॥ कुर्वंतुमत्कुलोत्पन्नाः केवलंभस्मधारणं॥ कुर्वंतुमत्कुलोत्पन्नाःस
दारुद्राक्षधारणं॥५४॥ कुर्वंतुमत्कुलोत्पन्नाःकेवलंशिवपूजनं॥ कुर्वंतुमत्कुलोत्पन्नाःकेवलंशिवकीर्तनं॥५५॥ कुर्वंतुमत्कुलोत्पन्नाःकेवलंशैव
पूजनं॥ कुर्वंतुमत्कुलोत्पन्नाःशैवमेवव्रतंसदा॥५६॥ नयस्यत्वयिगौरीशेभक्तिरव्यभिचारिणी॥ माभूयान्मत्कुलेजन्मतादृशस्यदुरात्मनः॥५७॥
नयस्यव्यभिचारेणशिवलिंगार्चनेमतिः॥ माभूयान्मत्कुलेजन्मतादृशस्यदुरात्मनः॥ नयस्याव्यभिचारेणशिवमंत्रजपेमतिः॥ माभूयान्म०॥५९॥
नयस्यांव्यभिचारेणभक्तिःशिवकथाश्रुतौ॥ माभूया०॥ ६०॥ नयस्याव्यभिचारेणभक्तिःशिवनिरीक्षणे॥ माभूयान्म०॥ ६१॥ नयस्याव्यभिचारेण
भक्तिःशर्वाभिमर्शने॥ माभूया०॥ नयस्याव्यभिचारेणभक्तिःशंकरकीर्त्तने॥ माभूयान्म०॥ ६२॥ नयस्यभक्तिरनिशंकेवलेभस्मधारणे॥ माभूया
न्म०॥ ६३॥ नयस्यभक्तिरनिशंकेवलेभस्मगुंठने॥ माभूया०॥ ६४॥ नयस्यभक्तिरनिशंश्रुधेशुद्धेरुद्राक्षधारणे॥ माभूयान्म०॥ ६५॥ नयस्य
भक्तिरनिशंशिवतीर्थनिषेवणे॥ माभूया०॥ ६६॥ नयस्यभक्तिरनिशंशिवनैवेद्यभोजने॥ माभूयान्म०॥ ६७॥ नयस्यभक्तिरनिशंशिवभक्त
जनार्चने सोमवारव्रतादिषु॥ माभूया०॥ ६८॥ नयस्यभक्तिरनिशंशिवभक्तजनार्चने॥ माभूयान्म०॥ ६९॥ नयस्यभक्तिरनिशंरुद्राध्यायानु
वर्त्तने॥ माभूयान्म०॥७०॥ नयस्यभक्तिरनिशंश्रौतेशिवषडक्षरे॥ माभूयान्म०॥७१॥ नयस्यभक्तिरनिशंकाशीक्षेत्रेशिवात्मके॥ माभूयान्म०
॥७२॥ योचेहंकरुणासिंधोवरांतरमनुत्तमं॥ वरदोसीतिभगवन्यतःश्रुतिषुसंश्रुतः॥७३॥ तनुत्यागोममास्त्वीशशिवस्मरणपूर्वकं॥
तच्छिवस्मरणंभूयाच्छिवपूजापुरःसरं॥७४॥ भस्मरुद्राक्षभूषस्यकृतलिंगार्चनस्यमे॥ षडक्षरंचजपतोममास्तुमरणंशिव॥ ७५॥
मद्वंशजानांसर्वेषांशिवस्मरणपूर्वकं॥ मरणंभवतुश्रीमंस्तवैवकृपयाशिव॥७६॥ अशैवजननीमास्तुमत्कुलस्त्रीमहेश्वर॥ वंध्या

२अशैवजलपानंचमास्तुमत्कुलजन्मनां॥

वासाभवत्वीशनष्टमर्भाथवास्तुवा॥७७॥अशैवोयदिजातस्यांतत्क्षणेसतुम्रीयतां॥तदुत्तरक्षणेनेशम्रीयतांसतुसर्वथा॥७८॥अशैवैःसह
संबंधोमास्तुमत्कुलजन्मनां॥अशैवभोजनप्रीतिर्मास्तुमत्कुलजन्मनां॥७९॥मद्वंशजानांसर्वेषांशिवपूजारतात्मनां॥ ८०॥अशैवेपुल्कसेम्लें
समबुध्धिःप्रजायतां॥ प्रीतिर्नास्तियथाम्लेंछेचंडालेपुल्कसेतथा॥ ८१॥अशैवेषुतथाप्रीतिर्मास्तुमत्कुलजन्मनां॥इतितद्याचितान्सर्वान
वरान्दत्वामहेश्वरः॥ परीक्ष्यतस्यभक्तिंचतत्रैवांतर्दधेशिवः॥ततःशैवान्भोजयित्वाविप्रःक्षीरघृतादिभिः॥८३॥ भुक्त्वास्वयंचसंतुष्टःस्वंकृ
तार्थममन्यत॥अतःशिवःशिवरताननुगृह्णातिसादरं॥ ८४॥ तस्माद्द्विजध्वमनिशंशिवमेवातियत्नतः॥धर्तव्यंभस्मसततंकर्तव्यंशिवपू
जनं॥मर्त्तव्यंचशिवक्षेत्रेप्राप्तव्यंशोकरंपदं॥शिवःसर्वसुराधीशःस्मर्त्तव्यःसततंबुधैः॥ ८६॥ ध्येयश्चसततंसांबोभुक्तिमुक्तिफलार्थिभिः॥
शिवेत्यादीनिनामानिपंचप्रातःप्रयत्नतः॥८७॥जपनीयानिविप्रेंद्राभस्मधृत्वायथाविधिः॥ शिवःसदाशिवःसांबोमहेशश्चंद्रशेखरः॥८८॥
एतानिपंचनामानिरहस्यानिद्विजोत्तमाः॥ इमानिपंचनामानिरहस्यानिद्विजोत्तमाः॥ इमानिपंचनामानिपार्वतीस्वयमन्वहं॥ ८९॥जपति
प्रीतहृदयाशिवप्रीत्यर्थमादरात्॥सद्योजातादयोमंत्राःप्रातःकालेप्रयत्नतः॥९०॥जपनीयाकृतेदित्योमंत्राश्चप्रीतिपूर्वकं॥ ॥महादेवः॥ ॥
इतितेमुनयःसर्वेविष्णुप्रभृतयःसुराः॥ततोवृध्याचलाधीशंसंपूज्यकुसुमादिभिः॥९१॥मदेकशरणास्तत्रतस्थुःसऋषयःसुराः॥गौत
मोपिऋषीन्सर्वान् उपविश्ययथाक्रमं॥९२॥काशीमिमामवापेमेऋषिभिःशांभवैः सह॥द्वात्रिंशल्लक्षममलाःशांभवास्तत्परायणाः॥
॥९३॥शिवेकाशीमिमांप्रापुर्भुक्तिमुक्तिफलप्रदां॥श्रीवृध्याचलवासेनयत्पुण्यंसमुपार्जितं॥९४॥तेनपुण्यप्रभावेनकाशींप्रापुरिमांद्वि
जाः॥वृध्याचलशमाश्रित्ययेतिष्ठंतिमचर्दकाः॥९५॥तेषांनिर्दग्धपापानांकाशीप्रितिर्भविष्यति॥श्रीमद्वृध्याचलेशंनवजलसहितैः
कामलैर्बिल्वपत्रैर्भक्त्यासंपूजयंतःससुरमुनिगणाःसावधानेननित्यं॥ध्यायंतोमामुमेशंनिरवधिविभवंब्रह्मविष्ण्वादिवंद्यंश्रृण्वंतोना
मशैवंशिवजनकथितंतस्थुरत्रंतहृष्टाः॥९६॥ ॥इतिश्रीशिवरहस्येसप्तमांशेउग्राख्येपूर्वार्धेवृध्याचलमहिमानुवर्णनंनामत्रयोविं
शोध्यायः॥२३॥ ॥श्रीउग्रायनमः॥ ॥श्रीशिवउवाच॥ ॥चिदंबराभिधंक्षेत्रंशिवक्षेत्रंमनुत्तमं॥तदप्येकंममस्थानंममप्रियक

रंशिवे ॥१॥ वसामितत्रसततंब्रह्मविष्ण्वादिपूजितः ॥ तत्रमांमुनयः सर्वेसेवंते प्रत्यहंशिवे ॥ २ ॥ तास्मिन्नेवशिवस्थानेकोटिशः संतिशांकराः ॥ त
त्ररम्याणितीर्थानिसंतिपापहराणिच ॥ ३ ॥ रुद्राक्षवनमस्त्येकंतत्रपापभयापहं ॥ तत्रबिल्ववनंचास्तिसर्वदावैनवपल्लवं ॥ ४ ॥ नित्यंशिवकथा
लापाजायंतेतत्रवल्लभे ॥ शिवैकशरणाएवतत्रसंतिममप्रियाः ॥ ५ ॥ सदामद्दासक्तचित्ताः सदामत्पूजनप्रियाः ॥ सदामदेकशरणाःस
दामदुपपातकाः ॥ ६ ॥ केचिद्वदंतिमामीशंगौरीनाथेतिसादरं ॥ गौरीनाथेतिनाम्नैवपूजयंतीमुहुर्मुहुः ॥ ७ ॥ केचिद्वदंतिमामीशंशिवेत्य
निशमादरात् ॥ तन्नाम्नैवनमःपूर्वंयांतेनाभ्यर्च्चयंतिमां ॥ ८ ॥ केचिद्वदंतिमामीशंशंकरेत्यनिशंमुदा ॥ तन्नाम्नैवनमःपूर्वंयांतेनाभ्यर्च्चयं
तिमां ॥ ९ ॥ केचिद्वदंतिमामीशंचंद्रचूडेतिसादरं ॥ तन्नाम्नै० ॥ १० ॥ केचिद्वदंतिमामीशंविश्वनाथेतिसादरं ॥ तन्नाम्नै० ॥ ११ ॥ केचिद्वदंति
मामीशंउमानाथेतिसादरं ॥ तन्नाम्नै० ॥ १२ ॥ यावंतः संतिविप्रेंद्रानित्यंश्रीमच्चिदंबरे ॥ तावंतः शिवशर्वेशमहादेवेतिवादिनः ॥ १३ ॥ मन्ना
मचिन्हिताएवसंतिश्रीमच्चिदंबरे ॥ मन्नायाऽअमृतपाः सर्वेश्रीचिदंबरवासिनः ॥ १४ ॥ भस्मोद्धूलितसर्वांगाः त्रिपुंड्रांऽकितमस्तकाः ॥ रु
द्राक्षमालाभरणाः श्रीचिदंबरवासिनः ॥ १५ ॥ श्रीमच्चिदंबरेतीर्थेयावंतः संतिसाधवः ॥ तावंतोप्यर्चयेऽत्यार्येमामेवाव्यभिचारतः ॥ १६ ॥
शै अमिताः संतिसैवेंद्रानित्यंश्रीचिदंबरे ॥ चिदंबरस्थशैवानांनसंख्याविद्यतेशिवे ॥ १७ ॥ श्रीगंगाभिधंतीर्थंतत्रास्त्येकंवरानने ॥ तत्रस्नात्वा
नरः सद्योमुच्यतेपापकोटिभिः ॥ १८ ॥ आर्द्रायांपापयुक्तायांतत्रस्नात्वायथातथा ॥ दत्वासुवर्णंशैवायमुच्यतेभवबंधनात् ॥ १९ ॥ शिवगंगा
त्तटेरम्येनाट्यस्थलमुमेस्तिमे ॥ तत्रनाट्यंप्रयत्नेनक्रियतेतवसंनिधौ ॥ २० ॥ श्रीमद्दभ्रसभानाथंनृत्यमानंमहेश्वरं ॥ ब्रह्मविष्ण्वादयोदेवाः सेवंते
प्रत्यहंशिवे ॥ २१ ॥ नृत्यमानमुमेनित्यंमहातांडवनायकं ॥ दृष्ट्वामांदूरतोदेवास्तिष्ठंत्येवहिकंपिताः ॥ २२ ॥ स्वर्गादिकान्सप्तलोकान्भूरादीनपि
सर्वतः ॥ समावृत्यमयातत्रकृतंनित्यंमनोरमे ॥ २३ ॥ तत्रलिंगंममास्त्येकंश्रीमदभ्रसभास्थले ॥ तद्विलोकनमात्रेणनपुनर्भवबंधनं ॥ २४ ॥ आर्द्रायां
तस्यलिंगस्यदर्शनंयः करिष्यति ॥ समहापापराशिभ्योमुच्यतेनात्रसंशयः ॥ २५ ॥ यन्मेमूलेश्वरंलिंगंमूलस्थानाभिधंशिवे ॥ यन्मूलंसर्वजग
तामुलत्वादेश्वकारणं ॥ २६ ॥ मूलस्थानेश्वरंदृष्ट्वापातार्द्रासोमवासरे ॥ बिल्वपत्रैः समभ्यर्च्यमद्रूपंप्राप्नुयान्नरः ॥ २७ ॥ मूलेश्वरंसमभ्यर्च्यज

 त्वा पंचाक्षरं ततः ॥ रुद्राध्यायं च जप्त्वा वै मम सायुज्यमाप्नुयात् ॥ २८ ॥ तत्र द्वादशसाहस्रं जप्त्वा पंचाक्षरं शिवे ॥ ब्रह्महत्यादि पापेभ्यो मुच्यते नात्र संशयः ॥
 ॥ २९ ॥ तत्र कृष्णतिलमात्रं वासोदकं शिवे ॥ यो दद्याच्छिवभक्ताय समुक्तो भवति ध्रुवं ॥ ३० ॥ पुरा मलयदेशस्थो धर्मज्ञ इति भूपतिः ॥ धनं संपाद्य बहुधा प्राप
श्रीमच्चिदंबरं शिवतीर्थे ततः स्नात्वा राजा भस्मविभूषणः ॥ मूलेश्वरं समभ्यर्च्य बिल्वपत्रादिभिर्मुदा ॥ ३२ ॥ चक्रे रत्नतुलां तत्र सभार्यो धनिनां वरः ॥ संपूज्य
गंधपुष्पाद्यैः पुष्पैश्च स शिवार्चकान् ॥ ३३ ॥ ददौ बहूनि रत्नानि शंकरेभ्यो विचक्षणः ॥ दुकूलानि ददौ प्रीत्या कंचुकानि च सादरं ॥ ३४ ॥ ततो मां पूजया
मास शिवे तांडवनायकं ॥ रत्नपुष्पैर्हेमपुष्पैर्बिल्वपत्रैश्च कोमलैः ॥ ३५ ॥ ततः स कारयामास रत्नमंडपमुत्तमं ॥ नानारत्नसमाकीर्णं रत्नस्तंभविरा
जितं ॥ ३६ ॥ ततः स कारयामास रत्नप्रासादमुत्तमं ॥ सहस्रद्वारसंकीर्णं नानागोपुरसंकुलं ॥ ३७ ॥ तत्प्रसादस्य शृंगाणि सत्यलोकमतीत्य च ॥ गतानि त
त्प्रभाजालैर्निष्प्रभो भूद्दिवाकरः ॥ ३८ ॥ तत्रैव वृषभस्तंभः कश्चिद्धेमकृतः शिवे ॥ स तु रत्नसमाकीर्णो नानालिंगसमावृतः ॥ ३९ ॥ एतादृशैर्नृपैस्तत्र
बहुभिर्बहुधा शिवे ॥ कारितानि शिवस्थानान्यतिरम्याणि सादरं ॥ ४० ॥ चिदंबरे यः प्रविष्टः समदेकपरायणः ॥ भक्त्या करोति मां पूजां अनन्यशर
णः शिवे ॥ ४१ ॥ शिव शंभो महेशेति शब्दः श्रीमच्चिदंबरे ॥ सर्वैरप्युच्यते नित्यं सोत्साहं भूतिभूषणैः ॥ ४२ ॥ नश्रुतं ऽशिवनामान्यन्नाम श्रीमच्चि
दंबरे ॥ नोच्यते शिवनामान्यच्छ्रीचिदंबरवासिभिः ॥ ४३ ॥ कुर्वंति गंधपुष्पाद्यैर्भस्मरुद्राक्षभूषणाः ॥ पूजामेव्यभिचारेण ममैव श्रीचिदंबरे ॥ ४४ ॥
चिदंबरेति यन्नाम संतारं मम शोभने ॥ तज्जप्यते प्रयत्नेन तत्रस्थैर्मुक्तिकांक्षिभिः ॥ ४५ ॥ पुरा वैकुंठभुवने विष्णुं मल्लिंगपूजकं ॥ विलोक्य प्राह व 
चनं लक्ष्मीर्विनयसंयुता ॥ ४६ ॥ ॥ लक्ष्मीरुवाच ॥ ॥ आदिविष्णो महाशैव शिवलिंगार्चनप्रिय ॥ शिवतीर्थाटनं कर्तुं प्रीतिर्जाता ममाधुना ॥ ४७ ॥ 
विष्णो तवापि ताशंभुः पार्वतीप्राणवल्लभः ॥ चकार पार्वतीत्युक्तो विहारं कुत्र कुत्र वा ॥ ४८ ॥ यत्र यत्र शिवस्थानं तत्र तत्र जनार्दन ॥ कर्तव्यमिति यत्नेन श्री
महादेवपूजनं ॥ ४९ ॥ संनिवेश्य महादेवो रत्नसिंहासने शिवां ॥ चकार तांडवं यत्र तत्र गंतव्यमस्ति मे ॥ ५० ॥ अन्यान्यपि शिवक्षेत्राण्यनंतं हं मुक्तिदानि मे ॥
सेवनीयानि यत्नेन संपूज्यानि च सादरं ॥ ५१ ॥ शिवक्षेत्रनिवासेन जायते पापसंक्षयः ॥ पुण्यवृद्धिश्च भवति शिवक्षेत्रे शिवार्चनात् ॥ ५२ ॥ दुर्लभं हि शिव
क्षेत्रं शिवभक्तिश्च दुर्लभा ॥ शिवक्षेत्रनिवासोपि दुर्लभो मुक्तिदायकः ॥ ५३ ॥ पुण्यवृद्धिकरं श्रोतं शिवक्षेत्रे शिवार्चनं ॥ तद्भूरि पुण्यतपसा लभ्यते नात्र सं

शयः॥५४॥ यःकरोतिशिवक्षेत्रेशिवलिंगार्चनंमुदा॥ सधन्यइतिवेदोपिवदत्येवमुहुर्मुहुः॥५५॥ शिवलिंगार्चनंपुण्यंश्रौतंयत्रक्वचित्कृतं॥ तत्कृतंचेच्छि
वक्षेत्रेकिंवक्तव्यंवदस्वमे॥५६॥ मुक्त्यर्थिभिर्मुनिवरैःभूतिरुद्राक्षभूषणैः॥ स्थीयतेहिशिवक्षेत्रेशिवपूजापरायणैः॥५७॥ सर्वदापिशिवक्षेत्रेवासंकुर्व
तियेजनाः॥ शिवैकशरणास्संतस्तेधन्यानात्रसंशयः॥५८॥ शिवैकरतचित्तानांशिवक्षेत्रनिवासिनां॥ महद्भाग्यंमहद्भाग्यंभाग्यस्यांतोनविद्यते॥ ५९॥
शिवक्षेत्रेकृतंपूर्वंत्वयापिशिवपूजनं॥ अतएवत्वयाप्राप्तंविष्णुत्वमिदमीश्वरात्॥ ६०॥ विष्णुत्वस्थैर्यसिध्यर्थंपुनःपुनरपीश्वरं॥ पूजयस्वातियत्नेनशिवक्षे
त्रेयथाविधि॥ ६१॥ शिवैकशरणोभूत्वाशिवक्षेत्रेशिवंयज॥ शिवक्षेत्रेकृतापूजायतोनंतफलप्रदा॥ ६२॥ ॥ श्रीमहादेवउवाच॥ ॥ इतितद्वचनंश्रु
त्वाविष्णुःसंतुष्टमानसः॥ श्रीमच्छिवेंद वरंप्रापलक्ष्म्यायुक्तोवराननै॥ ६३॥ ददर्शतत्रशैवेंद्रान्विष्णुर्भस्मविभूषणान्॥ रुद्राक्षभूषणान्भूतधान् त्रिपुंड्रां
कितमस्तकान्॥ ६४॥ शिवनामजपासक्तांश्छिवलिंगार्चनप्रियान्॥ व्याघ्रचर्मपरीधानान्शिवतीर्थतटेस्थितान्॥ ६५॥ शिवतीर्थेततःस्नात्वाविष्णुर्ल-
क्ष्मीसमन्वितः॥ त्रिपुंड्रधारणंचक्रेभस्मोद्धूलनपूर्वकं॥ ६६॥ रुद्राक्षधारणंचक्रेततोजाबालमंत्रवित्॥ ततःतीर्थस्थितान्शैवान्पूजयामासकेशवः॥
॥ ६७॥ ततःसबिल्वपत्राद्यैर्हेमपुष्पैश्चकेशवः॥ पूजयामासमांभक्त्याप्रणामांश्चचकारसः॥ ६८॥ पूजयामासमांलक्ष्मीस्तत्रःसर्वसुरोत्तमे॥ रत्न
मंदारकुसुमैर्बिल्वपत्रैश्चकोमलैः॥ ६९॥ पंचाक्षरजपंचक्रेततोविष्णुर्यथाविधि॥ पंचाक्षरजपंचक्रेलक्ष्मीश्चविधिपूर्वकं॥ ७०॥ तदानीमागताः
धृ सर्वेब्रह्मेंद्रप्रमुखाःसुराः॥ तेपिस्नात्वाभस्मधृत्वापूजांचक्रुर्ममप्रिये॥ ७१॥ ततःसमागतादेविशैवाविष्णुदिदृक्षवः॥ विष्णुरप्यागतांस्छैवान्
पूजयामाससादरं॥ ७२॥ ततस्तेशांकराविष्णुंशिवपूजापरायणं॥ शैवबुध्याप्रयत्नेनपूजयामासुरंबिके॥ ७३॥ ततस्तमूचिरेविष्णुंशैवंतेशां
शांकराःशिवे॥ शिवतत्वंवदस्वेतिविष्णुःशैवानुवाचच॥ ७४॥ ॥ विष्णुरुवाच॥ ॥ शिवतत्वंशिवेनैवज्ञायतेपरमात्मना॥ तत्तत्वज्ञानमेत
स्यकथंममभविष्यति॥ ७५॥ ज्ञातंचेच्छांकरंतत्वंसद्योमोक्षोभविष्यति॥ कथंस्यात्तादृशंभाग्यंममसंसारिणोधुना॥ ७६॥ यदासंसारविच्छित्ति
र्भविष्यतिशिवाज्ञया॥ तदाज्ञातमितिज्ञेयंतत्वज्ञानंतुशांकरं॥ ७७॥ अधुनातत्कथंज्ञेयंशिवतत्वंमयाद्विजाः॥ ज्ञास्यतेभूरितपसाशिवतत्वंशिवा
र्चकाः॥ ७८॥ वेदैरपिनविज्ञातंशिवतत्वंतथासति॥ कथंज्ञेयंमयातत्वंशिवस्यपरमात्मनः॥ ७९॥ परंतुवेदविहितंमहादेवस्यपूजनं॥ क्रि

यतेबिल्वपत्राद्यैर्यथाशक्तिमयासदा॥८०॥नःकरिष्यतियःपूजांमहादेवस्यसादरं॥सयातिनरकंघोरमितिजाबालवादिनः॥८१॥शिवपूजाविधा
नंचमयानज्ञायतेद्विजाः॥तथापिक्रियतेनित्यंमहादेवस्यपूजनं॥८२॥यथाकथंचित्कर्त्तव्यंनित्यंशंकरपूजनं॥नज्ञातोविधिरित्येतन्नत्याज्यंशंकरा
र्चनं॥८३॥कृत्वानित्यंप्रयत्नेनकेवलंभस्मधारणं॥बिल्वपत्रादिभिर्नित्यंकर्त्तव्यंशिवपूजनं॥८४॥शिवमाद्रैरनार्द्रैर्वाबिल्वपत्रैःप्रयत्नतः॥संपू
ज्यमुच्यतेपापैरनंतैरपिसर्वथा॥८५॥क्रियतेयेनसततंकेवलंभस्मधारणं॥तेनाधिकारिणाकार्यंबिल्वपत्रैःशिवार्चनं॥८६॥नित्यमव्यभिचारेण
यःकुर्याच्छिवपूजनं॥ससर्वपापनिर्मुक्तःशिवरूपंप्रयास्यति॥८७॥भक्तिश्रद्धासमेतेनभस्मनिष्ठेनसादरं॥पूजितःपार्वतीनाथोददातिपरमांगतिं॥
॥८८॥यःकरिष्यतियत्नेनकेवलंशंकरार्चनं॥तेनलब्धामुक्तिकांतासत्यंसत्यंनसंशयः॥८९॥शिवलिंगार्चनेनैवसंतुष्टःपार्वतीपतिः॥पुरामह्यं
ददौविप्राविष्णुत्वंकरुणानिधिः॥९०॥ददौततःपरंमह्यंवैकुंठमपिशंकरः॥सुदर्शनाभिधंचक्रंददौमह्यंततःपरं॥९१॥मोक्षदानसमर्थस्यशिवस्य
परमात्मनः॥इदंविष्णुत्वदातृत्वंनचित्रइतिमन्महे॥९२॥यस्मैहृष्टोमहादेवस्तस्मैसगिरिजापतिः॥ददातिभुक्तिंमुक्तिंचस्वतंत्रःकरुणाकरः
॥९३॥शंकराराधनेनैवबहवोमुनिपुंगवाः॥शिवस्वरूपमापन्नाःशिवैकपरदेवताः॥त्रिकालमप्रमादेनकर्तव्यंशंकरार्चनं॥अन्यथापतितोभूयादि
तिजाबालवादिनः॥९५॥त्रिकालमप्रमादेनकर्त्तव्यंभस्मधारणं॥अन्यथाप०॥९६॥कर्त्तव्यंसततंविप्रैर्नित्यंरुद्राक्षधारणं॥अन्यथा०॥९७॥त्रि
कालमप्रमादेनकर्त्तव्यंशिववंदनं॥अन्यथा०॥९८॥त्रिकालमप्रमादेनकर्त्तव्यंशिवचिंतनं॥अन्यथा०॥त्रिकालमप्रमादेनकर्तव्यंशिवकीर्तनं
॥अन्यथापतितोभूयादितिजाबालवादिनः॥१००॥शिवनामसुधापानंयेकुर्वंतिशिवार्चकाः॥नमस्तेभ्योनमस्तेभ्योनमस्तेभ्योनमोनमः॥१॥
येकुर्वंतिप्रयत्नेनकेवलंभस्मधारणं॥नमस्तेभ्यो०॥२॥येकुर्वंतिप्रयत्नेनसदारुद्राक्षधारणं॥नमस्तेभ्यो०॥३॥येकुर्वंतिप्रयत्नेनकेवलं
शिवपूजनं॥नमस्तेभ्यो०॥४॥येकुर्वंतिप्रयत्नेनकेवलंशिववीक्षणं॥नमस्तेभ्यो०॥५॥येकुर्वंतिप्रयत्नेनकेवलंशिवचिंतनं॥नमस्ते
भ्यो०॥६॥येकुर्वंतिप्रयत्नेनकेवलंशिवकीर्तनं॥नमस्तेभ्योनमस्तेभ्योनमस्तेभ्योनमोनमः॥७॥भवत्यनल्पतपसाश्रद्धाशंकर
पूजने॥ततोनल्पतपोमूर्त्तिःशांकरःपूज्यएवमे॥८॥प्रतिक्षणंबिल्वपत्रैःपूजनीयोमहेश्वरः॥रुद्राक्षधारणंकृत्वाभस्मोद्धूल

नपूर्वकं ॥ ९ ॥ वृथानस्याद्यथास्वस्यजीवनंशैवपुंगवाः ॥ तथाप्रतिक्षणंकार्यंबिल्वपत्रैःशिवार्चनं ॥ १० ॥ दुर्लभंजीवनंपुंसामतएवप्रतिक्षणं ॥ शि
वपूजेवकर्त्तव्याभस्मधारणपूर्वकं ॥ ११ ॥ शिवान्यदेवपूजातुदुःखसंसारकारणं ॥ अतोन्याराधनंत्यक्त्वाकर्त्तव्यंशंकरार्चनं ॥ १२ ॥ द्विजैरहर्निशं
कार्यंशंकराराधनंद्विजाः ॥ एवंसुरैश्चकर्त्तव्यमन्यैरपिमुमुक्षुभिः ॥ १३ ॥ अशक्तैःप्रतिदंडंवाकर्त्तव्यंशंकरार्चनं ॥ नित्यंप्रतिमुहूर्तेवाकर्त्तव्यंशंकरा
र्चनं ॥ १४ ॥ प्रहरेप्रहरेवापिकर्त्तव्यंशिवपूजनं ॥ नलंघनीयःप्रहरःशिवपूजांविनाद्विजैः ॥ भस्मनागांनिसंमृज्य प्रहरे प्रहरेद्विजैः ॥ बिल्वपत्रादि
भिर्नित्यंकर्त्तव्यंशिवपूजनं ॥ १६ ॥ यामादौयाममध्येवायामांतेवाशिवार्चनं ॥ कर्त्तव्यमतियत्नेनसर्वपापक्षयार्थिभिः ॥ १७ ॥ चत्वारोयामिनीयामा
दिनयामाश्चशांकराः ॥ तेषुसर्वेषुयामेषुकर्त्तव्यंशिवपूजनं ॥ १८ ॥ रात्रौदिवाचसर्वांगंभस्मनोद्धूल्यसादरं ॥ प्रहरे प्रहरेकार्यंश्रीमहादेवपूजनं ॥
॥ १९ ॥ यःकरिष्यतियत्नेनप्रतियामेशिवार्चनं ॥ तस्यपुण्यफलंवक्तुंममशक्तिर्नसर्वथा ॥ २० ॥ यःकरिष्यतियत्नेनशिवपूजांप्रतिक्षणं ॥ तस्यपु
ण्यफलंवक्तुंनशक्तानिगमाअपि ॥ २१ ॥ एषांबाह्योपचारेषुशक्तिर्नैवभविष्यति ॥ तैर्मानसोपचारैर्वाकर्त्तव्यंशिवपूजनं ॥ २२ ॥ अनंतवाजपे
यादियागानांयत्फलंद्विजाः ॥ ततोनंतगुणंपुण्यंशिवपूजाविधेःफलं ॥ २३ ॥ महादानानियावंतितेषांयावत्फलंश्रुतं ॥ ततोनं० ॥ २४ ॥ तपांस्यु
ग्राणियावंतितावतांयत्फलंश्रुतं ॥ ततोनंत० ॥ २५ ॥ पौंडरीकादियागानांस्वर्गमात्रंफलंद्विजाः ॥ शिवार्चनंतुवेदोक्तंचतुर्वर्गफलप्रदं ॥ २६ ॥ धर्मा
र्थकाममोक्षास्तुप्राप्तव्याशिवपूजया ॥ अतःशिवार्चनफलंकेनसाम्यंप्रयास्यति ॥ २७ ॥ शिवार्चनेननश्यंतिब्रह्महत्यादिकोटयः ॥ नश्यत्येका
ब्रह्महत्यावाजिमेधेनचद्विजाः ॥ २८ ॥ शिवस्मरणमात्रेणविनश्यंत्यघकोटयः ॥ तेननश्यंतिकिंविप्राःसद्यःशंकरपूजया ॥ स्वर्गापवर्गफल
दंवैदिकंशंकरार्चनं ॥ तन्नयागादिसदृशंयतःस्वर्गापवर्गदं ॥ ३० ॥ शिवनामाग्निमात्रेणदह्यंचेत्पापकाननं ॥ शिवार्चनेनतद्दग्धंनभविष्यति
किंद्विजाः ॥ ३१ ॥ पुराकश्चनराजाभूत्सामंतनृपमर्दनः ॥ अधर्मप्रभवःक्रूरोयमवत्क्रूरशासनः ॥ ३२ ॥ भुत्क्वायुवत्यस्तेनैवस्वदेशब्राह्मणःस्त्रि
यः ॥ तेनतद्भोगसक्तेनब्राह्मणाबहवोहताः ॥ ३३ ॥ यावंतस्तेननिहताब्राह्मणाधर्मतत्पराः ॥ तेषांसंख्यापिशेषैर्वेंद्रैःकर्त्तुमेवनशक्यते ॥ ३४ ॥
सययौप्रत्यहंमद्यंमद्यपानरतैःसह ॥ ब्रह्मस्वहरणंतेनकृतमेवमुहुर्मुहुः ॥ ३५ ॥ एतादृशःसपापिष्टःकदाचिद्विपिनंययौ ॥ सगत्वातु

मृगान्क्षुत्क्षुधान्जघानाधर्मतत्परः॥३६॥ ततोवनगजास्तेननिहताबहवोद्विजाः॥ वनगावश्चनिहतागवयाश्चामिताद्विजाः॥३७॥ हरिण्योहरिणाश्चान्ये
निहताःतेनपापिना॥ पक्षिणोनिहतास्तेनबहवोगरुडादयः॥३८॥ एवमासायमुद्वृत्तोहत्वाजीवान्यथेच्छया॥ एवावस्त्तेगतेराजासतत्रोवासकान
ने॥३९॥ तत्ररात्रौयथाकामंकृत्वादुर्मांसभक्षणं॥ पपौमद्यंततःपापीमद्यपानरतैःसह॥४०॥ ततःसमद्यपोराजाबभूवमदनातुरः॥ ततःस
मानयामासवनस्थांऋषिकन्यकां॥४१॥ दृष्ट्वासयुवतींपुष्टामादायऋषिकन्यकां॥ यथेच्छमुपभुक्त्वातांतत्याज्यऋषिकन्यकां॥४२॥ ततःसु
द्य — श्वापदुर्वृतःसराजामद्यपावृतः॥ मद्यंपीत्वैवबहुधाकृत्वामांसस्यभक्षणं॥४३॥ ततःसमुत्थितोवायुर्नानापत्रनिशातनः॥ ततःसमुत्थितोरा
जानिद्रांत्यक्त्वासमद्यपः॥४४॥ तदानीमागतोमृत्युःसर्परूपंसमाश्रितः॥ तेनसर्पेणदष्टश्चसराजामद्यपप्रियः॥४५॥ ततोवायुसमानीताद
वभस्मकणाद्विजाः॥ अतिश्वेताःस्वतःक्षुद्राःपेतुर्भूपतिविग्रहे॥४६॥ ततोवायुसमानीतंबिल्वपत्रंतदाद्विजाः॥ पपाततस्यभूपस्यमद्य
पस्यैवमूर्धनि॥४७॥ सबिल्वपत्रंतरसावामहस्तेनमद्यपः॥ गृहीत्वापातयामासाब्रि(?)मेतदितिविस्मितः॥४८॥ ततस्तत्पतितंलिंगेबिल्वपत्रम
नुत्तमे॥ तल्लिंगंनार्मदंविप्राःसर्वपापभयापहं॥४९॥ पुराकश्चिद्द्विजवरःशिवपूजापरायणः॥ नार्मदान्येवलिंगानिपूजयित्वास्थितःस
दा॥५०॥ सवनेसंचरन्विप्रोनार्मदंलिंगमुत्तमं॥ विस्मृत्यैवययौतत्रतत्तत्रैवस्थितंद्विजाः॥५१॥ मृत्युरूपेणसर्पेणदष्टस्तत्रसभूप
तिः॥ प्राणान्जहौततस्तत्रयमदूताःसमागताः॥५२॥ तदामयागतंतत्रब्रह्मादिविबुधैःसह॥ क्वगमिष्यत्ययंपापीद्रष्टव्यइतिसत्वरं॥
॥५३॥ तदानीमागताःशीघ्रंविप्राःशंकरकिंकराः॥ मयासमर्चिताःस्तत्रसर्वेशंकरकिंकराः॥५४॥ ततःपरंयमभटास्तंबध्वागंतुमुद्य
ताः॥ ततःप्रहृष्टवदनास्तानूचुःशिवकिंकराः॥५५॥ ॥शिवदूताऊचुः॥ ॥नन्वेयोयंभवद्भिस्तुनेयोस्माभिरयंनृपः॥ भवद्भिर्न श्रीशिव ७
यनोयोगःकर्तव्योनात्रसर्वथा॥५६॥ इत्युक्तंतद्वचःश्रुत्वाकश्चिद्यमभटस्तदा॥ यमायेदंसमाख्यातुंवृत्तांतंत्वरयाययौ॥५७॥ ततस्तद्व
चनंश्रुत्वायमःसत्वरमुत्थितः॥ चित्रगुप्तेनसहितःसत्वरंप्रापतद्वनं॥५८॥ ततोमदर्चितान्क्षुत्क्षुधान्दृष्ट्वाशैवांस्तदायमः॥ पूजया
मासयत्नेनततोमामपिसादरं॥५९॥ ततःपरमुवाचेदंशैवान्प्रतिवचोयमः॥ प्रणम्यदंडवद्भूमौनतमूर्धाकृतांजलिः॥६०॥ ॥

यमउवाच॥ ॥ दृष्टमद्यप्रसंगेनशैवानांरूपमुत्तमं॥यद्दर्शनेनननश्यंतिपापानिविविधान्यपि॥ ६१॥त्रिपुंड्रांकितफालान्मंविभूतिकृत
वर्मणां॥रुद्राक्षभूषणानांचदर्शनंवःशुभप्रदं॥ ६२॥शिवार्चनैकनिरतःशैवोयस्तस्यदर्शनं॥विनानभूरिभाग्येनसत्यमेवोच्यते
मया॥ ६३॥यवसीकृतवैकुंठान्विष्णुत्वविगतस्पृहान्॥पश्यंतिशांकरान्धन्यान्भूरिपुण्यालयाजनाः॥ ६४॥एकस्यशांकरस्यापिद
र्शनंपापनाशकं॥अनंतपुण्यफलदंपुण्योपचयकारणं॥ ६५॥ बहूनांभवतामद्यशांकराणांमहात्मनां॥दर्शनंजातमधुनाकृतकृत्यो
स्म्यहंध्रुवं॥ ६६॥विष्णुरप्यभवत्धन्योविष्णुनाद्ययुतोधुना॥कृतंयत्नेनभवतांशैवानांपूजनंमुदा॥ ६७॥ क्वभवंतःक्ववाविष्णुः
क्वविष्णोःशैवदर्शनं॥अद्यविष्णुकृतंपुण्यंपरिपक्वमभूत्ध्रुवं॥ ६८॥ शैवानांदर्शनंक्वास्तिशिवसंनिधिवर्त्तिनां॥अद्यप्रसंगाद
भवच्छ्रीमतांदर्शनंहरेः॥ ६९॥विष्णोर्ममापिसुकृतफलोन्मुमभूत्ध्रुवं॥यतोद्यदर्शनंजातंशैवायामावयोर्द्वयोः॥ ७०॥शिवत
त्वंनजानेहंवस्तुतःशैवपुंगवाः॥भवद्भिः ज्ञायतेतत्वंशिवसंन्निधिवर्त्तिभिः॥ ७१॥कथंवाश्रीमहादेवोजंतून्तारयतिप्रभुः॥किं
मस्तितारकंरूपंतत्केनापिनबुध्यते॥पुराऽनेनतपस्तप्तंविष्णुनायत्नपूर्वकं॥ तथापिशांकरंतत्वंनज्ञातंविष्णुनाध्रुवं॥ ७२॥
ब्रह्मणापितपस्तप्तंतथान्यैरमरैरपि॥नज्ञातंशांकरंतत्वंवेदैरपिशिवार्चकः॥ ७४॥अस्तिमोक्षप्रदोधर्मोबहुधाश्रुतिचोदितः॥
सतुमोक्षप्रदोधर्मःपूजैवकेवलं॥ ७५॥सापूजावेदविहितासाक्षान्मोक्षप्रदायिनी॥नततोस्त्यधिकोधर्मःसाक्षान्मोक्षप्रदाय
कः॥ ७६॥तथाचानेनकृतंमोक्षदंशिवपूजनं॥एनंनेतुंशिवेनाद्यभवंतःप्रेषिताःकथं॥ ७७॥प्रायोनेनकृतोधर्मःशिवपूजात्मको
ध्रुवं॥अन्यथाश्रीश्रीमहेशेनभवंतःप्रेषिताःकथं॥ ७८॥ येतत्कृतानांपापानामंतोनास्तीत्थाप्ययं॥भवद्भिर्नीयतेशैवैब्रह्मविष्णवा
दिपूजितेः॥ ७९॥ महेशप्रेषितैरेवभवद्भिरयंमीदृशः॥नीयतेकिमुयद्वाऽयं स्वंतएवाद्यनीयते॥ ८०॥नीयतेयंभवद्भिश्चेच्छि
वेनाप्रेषितैरपि॥तथापिनीयतास्वेच्छंमयातुनानिर्वार्यते॥ ८१॥भीतिरस्त्येवसततंशांकरेभ्योममध्रुवं॥ततोनिवारणंकर्तुंमम
शक्तिर्नसर्वथा॥ ८२॥ताडितोयमहाविष्णुर्भवद्भिर्विधिरप्ययं॥इंद्रापिताडितःपूर्वंशैवपूजापराङ्मुखः॥ ८३॥विष्णुब्रह्मादयो

श्रीशिवर०७ देवास्ताडयंतेयैरनाकुले॥ तैरहंगणनीयः किंभवद्भिः शिवकिंकरैः॥ ८५॥ व्यत्यासः क्रियते यैस्तु लोकत्रिलीलया॥ तैरहंगणनीयः किं०॥ ८५॥ उ.स.पू.
८ येरयत्नेनमुक्तावल्समुद्राश्चुलुकीकृताः॥ तैरहं०॥ येरयत्नेनगिरयः पुराचूर्णीकृतामुदा॥ तैरहं०॥ ८७॥ येरयत्नेनलीलार्थमिंदुः कंदुकव
कृतः॥ तैरहं०॥ ८८॥ यैरयत्नेनविष्णवाद्याश्चक्रवद्भ्रामिताः पुरा॥ तैरहं०॥ ८९॥ येरयत्नेनविष्ण्वाद्याः समुद्रे पातितामुदा॥ तैरहंगणनीयः
किं०॥ ९०॥ यैरयत्नेनवैकुंठेवैकुंठालतितोजले॥ येरयत्नेनविष्णुत्वंशिवाद्दापयितुंक्षमे॥ ९१॥ तैरहंगणनीयः किंभवद्भिः शिवकिंकरैः
येरयत्नेनवैकुंठोवैकुंठालतितोजले॥ येरयत्नेना० इत्युक्तंतद्वचः श्रुत्वासुमुखोनामशांकरः॥ ९२॥ स्मितपूर्वमुवाचेदंयमंप्रतिवचोद्वि
जाः॥ ॥ सुमुखउवाच॥ ॥ कृतान्यनेनपापानिसत्यंनास्त्यत्रसंशयः॥ यमैतत्कृतपापानांगणनापिनदृश्यते॥ अनेननार्मदेलिंगेबि
ल्वपत्रंनिपातितं॥ ९४॥ तदुत्तरक्षणेनैवत्यक्तमत्रैवमुद्गलं॥ शिवंसंपूज्यबिल्वेननर्मदालिंगसन्निधौ॥ ९५॥ त्यक्तंशरीरमेतेनभूपा
लेनसभस्मना॥ पश्यैदंनार्मदंलिंगंबिल्वपत्रसमन्वितं॥ ९६॥ मृतंचपश्यराजानंशिवलिंगस्यसंनिधौ॥ एतादृशंकथंनेयोयमाद्य
नरकंप्रति॥ ९७॥ एतस्यनरकावासः सर्वथानभविष्यति॥ शिवलिंगंसमभ्यर्च्यभस्मधारणपूर्वकं॥ ९८॥ यस्त्यजेन्मुद्गलंमर्त्यः स
यातिशिवसंनिधिं॥ अत्राद्यागतमस्माभिः शंकरप्रेषितैर्यम॥ ९९॥ शंकराज्ञांनिवास्माभिर्यमक्वापिनगम्यते सर्वसाक्षीकृपासिंधुः सर्व
ज्ञः पार्वतीपतिः॥ १००॥ सर्वंजानात्यतः सर्वेशिवेनप्रेषितावयं॥ शिवार्चनंविनामोक्षोनास्तीतियदुदीरितं॥ १॥ तत्तथैवनसंदेहः श्रु श्रीशिव
तिः सानान्यथाध्रुवं॥ यः कृतामिलपापोपिबिल्वपत्रेणशंकरं॥ २॥ पूजयित्वामृतोजंतुः समोक्षमधिगच्छति॥ यथानश्यंतिगिरयः क्षणे ८
नप्रलयाग्निना॥ ३॥ तथानश्यंतिपापानिबिल्वपत्रशिवार्चया॥ अमंत्रंवासमंत्रंवाबिल्वपत्रंमृतिक्षणे॥ ४॥ शिवलिंगेविनिक्षिप्यशि
वेलीनोभविष्यति॥ शिवलिंगार्चनंकालामृत्यव्यवहितक्षणे॥ ५॥ भवेद्यदितदामुक्तिर्भवत्येवनसंशयः॥ किंचास्यकालपश्यांगंदवभस्म
कणांकितं॥ ६॥ भस्मांकितशरीरस्यकथंस्यान्नरकेस्थितिः॥ ॥ विष्णुरुवाच॥ ॥ इतितद्वचनंश्रुत्वादृष्ट्वाभस्मांकितंनृपं॥ ददर्श
शिवलिंगंचबिल्वपत्रसमन्वितं॥ ततोयमोबिल्वपत्रैर्नार्मदंलिंगमुत्तमं॥ ८॥ पूजयित्वानमस्कारांश्चकारचयथाविधि॥ ननामदंडव

ड्रूमौततः सशिवकिंकरान्॥ ९॥ भूयोभूयः कंपमानः कृतांजलिपुटोयमः॥ ततस्तमर्चयामास नृपं भस्मं कणांकितं॥ १०॥ ततोयामपिसंपूज्यय
मस्तस्थौकृतांजलिः॥ ततोविमानेसंवेश्य तमेवनृपतिंतदा॥ ११॥ प्रतस्थिरे च मुदिताः सर्वेशंकरकिंकराः॥ भूपतिर्भस्मयोगेनाशिवलिंगार्चनेन च॥
॥ १२॥ ध्वस्तपापः शिवंप्रापसत्वरंशैवपुंगवाः॥ यमोपिस्वालयंप्रापस्वभटैः सहसंयुतः॥ १३॥ शिवलिंगार्चन फलंसंस्तुवन्प्रीतिपूर्वकं॥ अतएवकृपासिंधु
र्देवदेवोत्तमः शिवः॥ १४॥ पूजनीयः प्रयत्नेनसर्वदामुक्तिकांक्षिभिः॥ महेशात्परो देवोनास्तिमुक्तिप्रदोद्विजाः॥ १५॥ अतोमुक्त्यर्थिभिर्नित्यं पूजनीयः
सदाशिवः॥ सर्वमन्यपरित्यज्यशिवंकरः॥ १६॥ ध्येयइत्याहवेदोपिस्वयमथर्वणोद्विजाः॥ निधनेत्वादिभिर्मन्त्रैर्नमोंतैरघनाशकैः॥ १७॥ शिवपूजेव
सततंकर्त्तव्यामुक्तिकांक्षिभिः॥ यथाशिवार्चनंनित्यंसर्ववेदोपपादितं॥ १८॥ तथाशिवान्यदेवार्चानाहिवेदोपपादिता॥ चकारचोपसंहारंसम्यगाथ
र्वणीश्रुतिः॥ १९॥ सर्वमन्यत्परित्यज्यशिवोध्येयइतिद्विजाः॥ योवैरुद्रः सभगवानित्याद्यैःप्रत्यहंशिवः॥ २०॥ स्तोतव्योतिप्रयत्नेनमुक्त्यर्थिभिर
नाकुलैः॥ योवैरुद्रः सभगवानितिवेदः पुनःपुनः॥ २१॥ भगवान्रुद्रएवेतिवैकारेणाहशंकराः॥ भ्रांत्यापियेवदिष्यंतिरुद्रोनभगवानितिदैवैवत
न्मुखेविष्टवेदमार्गप्रवर्त्तकैः॥ भ्रांत्यापितिरुद्रान्योभगवानिति॥ २३॥ दैवैवतन्मु०॥ भगवान्रुद्रएवेतिनवदिष्यंतियेजडाः॥ दैवैवत०॥ २४॥
वदंतियेशिवान्योपिध्येयइत्यपितेजडाः॥ २६॥ कलौभ्रांताभविष्यंतिवादिष्यंतिचयेजडाः॥ रुद्रान्योप्यस्तिभगवानितिमायावि
मोहिताः॥ २७॥ द्विजजन्मापिसंप्राप्यकलौकलिविमोहिताः॥ नकरिष्यंतिनिर्भाग्याः केवलंभस्मगुंठनं॥ २८॥ द्विजजन्मापिसं
प्राप्यकलौकलिविमोहिताः॥ नकरि० भस्मधारणं॥ २९॥ द्विजजन्मा०॥ नकरि० शुध्धरुद्राक्षधारणं॥ ३०॥ द्विजजन्मा०॥ नकरि०
लंशिवपूजनं॥ ३१॥ द्विजजन्मापिसंप्रा०॥ नकरिष्यं० केवलंशिवचिंतननं॥ ३२॥ द्विजजन्मा०॥ नकरि० लंशिवकीर्तनं॥ ३३॥ द्विज
जन्मा०॥ नकरिष्यं० लंशिववंदनं॥ ३४॥ रुद्रान्योप्यस्तिभगवानितिमायाविमोहिताः॥ येवदिष्यंतितेसर्वेवेदबाह्याः कुयोनिजाः
॥ ३५॥ ध्येयः शिवातिरिक्तोपितिष्ठतीतिविमोहिताः येवदिष्यंतितेसर्वेवेदबाह्याः कुयोनिजाः॥ ३६॥ पूज्यः शिवातिरिक्तोपि
तिष्ठतीतिविमोहिताः॥ येवदिष्यंते०॥ ३७॥ सेव्यः शिवातिरिक्तोपि०॥ येवदिष्यंतिते०॥ ३८॥ चिंत्यः शिवातिरिक्तोपितिष्ठ०॥
येवदिष्यंतितेसर्वेवेदबाह्याकुयोनिजाः॥ ३९॥ स्तुत्यः शिवातिरिक्तोपितिष्ठतीतिविमोहिताः॥ येवदिष्यंतितेसर्वेवेदबा

 ह्याः कुयोनिजाः॥४०॥ वेद्यः शिवातिरिक्तोपितिष्ठतीतिविमोहिताः॥ येवदिष्यंतितेसर्वे०॥४१॥ सर्वश्रुतिश्रुतंनित्यंकेवलंशिव 
पूजनं॥ नकरिष्यंतितेसर्वे०॥४२॥ सर्वश्रुतिश्रुतंनित्यंकेवलंशिवचिंतनं॥ नकरिष्यंति०॥४३॥ सर्वश्रुतिश्रुतंनित्यंकेवलंशिववंद
नं॥ नकरिष्यंतितेसर्वे०॥४२॥ सर्वश्रुतिश्रुतंनित्यंकेवलंभस्मधारणं॥ नसर्वश्रुतिश्रुतंनित्यंकेवलंभस्मगुंठनं॥ नकरिष्य०॥४४॥
सर्वश्रुतिश्रुतंनित्यंश्रुभरुद्राक्षधारणं॥ नकरिष्यं०॥४५॥ सर्वश्रुतिश्रुतंनित्यंशिवतीर्थाभिषेचनं॥ नकरिष्यंतियेमूढास्तेसर्वेंऽप्य
त्यजाःस्मृताः यः पिबेदल्पमप्यंबुत्यक्त्वाभस्मानुलेपनं॥ समद्यपोभवत्येवजन्मजन्मांतरेद्विजाः॥४७॥ यः पिबेदल्पमप्यंबुत्य
क्त्वारुद्राभिवादनं॥ समद्यपो०॥४८॥ यः पिबेदल्पमप्यंबुत्यक्त्वारुद्राक्षधारणं॥ समद्यपो०॥४९॥ यः पिबेदल्पमप्यंबुत्यक्त्वामृत्युं
जयार्चनं॥ समद्यपो०॥५०॥ यः पिबेदल्पमप्यंबुत्यक्त्वारुद्राक्षाभिवादनं॥ समद्यपो०॥५१॥ यः पिबेदल्पमप्यंबुत्यक्त्वाश्रीरुद्र
द चिंतनं॥ समद्यपो०॥५२॥ यः पिबेदल्पमप्यंबुशिवमंत्रजपंविना॥ समद्यपोभवत्येवजन्मजन्मांतरेद्विजाः॥५३॥ योभुंक्तेस्वल्प
मप्यन्नंत्यक्त्वाभस्मानुलेपनं॥ सविष्टायांकृमिर्भूत्वाजन्मजन्मेनितिष्ठति॥५४॥ योभुंक्तेस्वल्पमप्यन्नंत्यक्त्वारुद्राक्षधारणं॥
सविष्टायां०॥५५॥ योभुंक्तेस्वल्पमप्यन्नंत्यक्त्वामृत्युंजयार्चनं॥ सविष्टायां०॥५६॥ योभुंक्तेस्वल्पमप्यन्नंत्यक्त्वारुद्राभिवंदनं॥
सविष्टायां०॥५७॥ योभुंक्तेस्वल्पमप्यन्नंत्यक्त्वाश्रीरुद्रचिंतनं॥ सविष्टायां०॥५८॥ योभुंक्तेस्वल्पमप्यन्नंशिवमंत्रजपंविना॥ 
सविष्टायां०॥५९॥ यद्येकस्मिंदिनेयेननकृतंशिवपूजनं॥ द्वादशाब्दंव्रतकार्यंतदातेनयथाविधि॥ शिवलिंगंप्रयत्नेननार्चयि 
ष्यंतियेद्विजाः॥ तेभविष्यंतिचंडालाजन्मजन्मन्यसंशयं॥६१॥ विभूतिधारणंश्रौतंनकरिष्यंतियेद्विजाः॥ तेभविष्य०॥६२॥
रुद्राक्षधारणंनित्यंनकरिष्यंतियेद्विजाः॥ तेभविष्यंति०॥६३॥ पंचाक्षरंजपंनित्यंनकरिष्यंतियेद्विजाः॥ तेभविष्यं०॥६४॥ रुद्रा
ध्यायजपंनित्यंनकरिष्यंतियेद्विजाः॥ तेभविष्यंति०॥६५॥ प्रणामान्श्रीमहेशायनकरिष्यंतियेद्विजाः॥ तेभविष्यंति०॥६६॥
शिवस्तुतिंप्रयत्नेननकरिष्यंतियेद्विजाः॥ तेभविष्यंतिचंडालाजन्मजन्मन्यसंशयं॥६७॥ शिवध्यानंप्रयत्नेननकरिष्यं
तियेद्विजाः॥ तेभवि०॥६८॥ शिवसेवांप्रयत्नेनकरिष्यंतियेद्विजाः॥ तेभवि०॥६९॥ सोमवारव्रतंश्रौतंनकरिष्यंतियेद्वि

जाः ॥ तेभवि० ॥ ७० ॥ शिवरात्रिव्रतंश्रौतंनकरिष्यंतियेद्विजाः ॥ तेभवि० ॥ ७१ ॥ कालाष्टमीव्रतंश्रौतंनकरिष्यंतियेद्विजाः ॥ तेभविष्यंति चंडालाजन्मजन्म
न्यसंशयः ॥ ७२ ॥ पुराकश्चिद्भूद्विप्रोहिमवद्गिरिसंनिधौ ॥ तेनवेदोदितंमुख्यंनकृतंभस्मधारणं ॥ ७३ ॥ रुद्राक्षधारणंतेननकृतंविधिबोधितं ॥ तेनैवनकृतंश्रौ
तंकेवलंशंकरार्चनं ॥ ७४ ॥ ततः सविजहौप्राणान्कदाचिज्वरकर्शितः ॥ ततोनीतोयमभटैः सएवनरकालयः ॥ ७५ ॥ यमभृत्यसमानीतंद्विजंवीक्ष्ययमस्त
तः ॥ चित्रगुप्तमुवाचायंकोवाकीदृशइत्यपि ॥ ७६ ॥ ॥ चित्रगुप्तउवाच ॥ ॥ अयंदुर्ब्राह्मणस्वामिन्ननेनद्विजन्मना ॥ नकृतंवेदविहितंकेवलंभस्मधा
रणं ॥ ७७ ॥ स्वर्गापवर्गदंनित्यंवेदवेदांतसंस्तुतं ॥ शिवलिंगंबिल्वपत्रैरनेननसमर्चितं ॥ ७८ ॥ अयंशिवान्यदेवानांकुर्वन्नभ्यर्चनंसदा ॥ नित्यंशिवान्य
देवानांस्तुतिंकृत्वास्थितोयम ॥ ७९ ॥ पातनीयः प्रयत्नेननरकेऽस्मिन्नयमीदृशः ॥ विलम्बोनैवकर्तव्यः क्षणमात्रमपिध्रुवं ॥ ८० ॥ किंचायंतप्तमुद्रांस्तप्तमु
द्रांकितैः सह ॥ आलापभोजनादीनिकुर्वन्नेवस्थितः पुरा ॥ ८१ ॥ भुंक्तेभोजयतेस्वीयान्दिवसेसोमवासरे ॥ नक्तभोजननिष्ठास्यनैवासीत्सोमवास
रे ॥ ८२ ॥ ललाटादौमृदानित्यमूर्ध्वपुंड्रंकरोतियः ॥ भक्तिंचकारमूढोयंऊर्ध्वपुंड्रधरेष्वपि ॥ ८३ ॥ अयमेतादृशोविप्रः पालनीयोनसर्वथा ॥ पातयस्वावि
लम्बेननरकेष्वतियत्नतः ॥ ८४ ॥ ताडनीयोभर्जनीयः पाचनीयोयमीदृशः ॥ अयंतप्तकटाहेषुस्थापनीयः पुनः पुनः ॥ ८५ ॥ ऊर्ध्वपुंड्रंसमानास्त्रैः
संतप्तैरतिदारुणैः ॥ ताडनीयः क्रूरघोरैः ललाटादिषुसत्वरं ॥ ८६ ॥ संतप्तलोहमुद्राभिर्भुजयुग्मेपिसत्वरं ॥ मुहुर्मुहुस्ताडनीयोरक्षणीयोनसर्व
था ॥ ८७ ॥ श्रद्धानास्यभवच्छ्रौतेकेवलेभस्मधारणे ॥ रुद्रमूलनत्रिपुंड्राभ्यांनैवास्यालंकृतातनुः ॥ ८८ ॥ रुद्राक्षारुद्ररूपायेतेनानेनधृतायम ॥ एत
स्यनाभवच्छ्रद्धाकेवलेशिवपूजने ॥ ८९ ॥ शिवलिंगार्चनंत्यक्त्वायोभुंक्तेब्राह्मणोपिसन् ॥ सपतत्येवनरकेब्रह्मकल्पशतद्वयं ॥ ९० ॥ त्रिपुंड्रधारणं
त्यक्त्वायोभुंक्तेब्राह्मणोपिसन् ॥ सपतत्येवनरकेब्रह्मकल्पशतद्वयं ॥ ९१ ॥ रुद्राध्यायजपंत्यक्त्वायोभुंक्तेब्राह्मणोपिसन् ॥ सपत० ॥ ९२ ॥ पंचाक्ष
रजपंत्यक्त्वायोभुंक्तेब्राह्मणोपिसन् ॥ सपत० ॥ ९२ ॥ अयंत्वतीयपापिष्ठोभुक्त्वाघोरांचयातनां ॥ अनंतब्रह्मकल्पांतेनरकान्निर्गमिष्यति ॥ ९३ ॥
ततोयमेवविष्टायांक्रिमिरूपोभविष्यति ॥ क्रिमिजन्मानिविष्टायांभविष्यंत्यस्यभूरिशः ॥ ९४ ॥ अशौवोयंततोलब्ध्वाजन्मगार्धभयोनिषु ॥
ततः प्राप्यमनेनैवजन्मस्वधमयोनिषु ॥ ९५ ॥ ततः प्राप्यमनेनैवजन्मचंडालयोनिषु ॥ पुनः पुनः प्राप्यमस्यजन्मचंडालयोनिषु ॥ ९६ ॥ चंडाल

जन्मविच्छेदस्त्वेतस्यनभविष्यति॥सत्यमेतत्पुनःसत्यमितिजाबालवादिनः॥ ५१॥ अशैवानरकेस्थित्वाबहुकालंप्रपीडिताः॥ततोभवंतिचंडालाः
प्रतिजन्मनिसर्वथा॥२॥चंडालजन्मप्राप्यापिपतित्वानरकेपुनः॥पुनर्भवतिचंडालःपुनःप्राप्नोतियातनां॥३॥अशैवोयमघोरेषुनरकेष्वविलंबितः॥
पातनीयःप्रयत्नेनघोरेषुविविधेष्वपि॥४॥ इतितद्वचनंश्रुत्वायमःक्रोधाकुलेक्षणः॥ उवाचवचनंशीघ्रंदूतान्प्रतिबलान्वितान्॥५॥
यमउवाच॥ ॥तप्तलोहकटाहेषुसस्थाप्येनमशांकरं॥आदौसंताडयित्वाशुदूताःसंतप्तकर्कशैः॥६॥संतप्तलोहपिंडैश्चताड
यंतुततःपरं॥संतप्तलोहमुद्गराभिस्ताडयंतुःततःपरं॥७॥तप्तस्तंभेषुबध्वैनंताडयंतुततःपरं॥प्रज्वलद्वह्निकुंडेषुपातयं
तुततःपरं॥८॥ततःपरंपातयंतुरेतःकुंडादिषुक्रमात्॥दुःखमस्मैप्रयच्छंतुसावधानेनसर्वथा॥९॥एतदुःखप्रदानार्थंदुता 
नामयुतंसदा॥तिष्टत्वितिप्रयत्नेनतप्तमुद्गरसंयुतं॥१०॥प्रतिक्षणंप्रयत्नेनस्वस्वशक्त्यनुरोधतः॥भवद्भिर्दीयतांदुःखमशै
वायदुरात्मने॥११॥प्रतिक्षणमयंदुःखंयथाप्राप्नोतिभूरिशः॥तथाभवद्भिःकर्त्तव्यंसंनद्धैःशस्त्रसंयुतैः॥१२॥अलस्यंयदि
मध्येस्याद्भवतांक्रूरकर्मणां॥तदाहंप्रेषयिष्यामिदूतानन्यान्बलान्वितान्॥१३॥भवद्भिर्यावदालस्यंतावद्यत्नपुरःसरं॥दुःखंप्र
देयमेतस्मैसंतप्तशरपाणिभिः॥१४॥ ॥विष्णुरुवाच॥ ॥इत्युक्तंतद्वचःश्रुत्वायमदूतायमाज्ञया॥बहुदुःखंददुस्तस्मैबलमानविजृंभिताः 
॥१५॥अद्यापिनरकेघोरेविप्रःशिवपराङ्मुखः॥तिष्ठत्यनेकधादुःखंससंप्राप्यप्रतिक्षणे॥१६॥ब्राह्मणोपिस्वयंयस्याच्छिवपूजापराङ्मुखः॥तस्ये 
वनरकेघोरेनित्यमवस्थानंभविष्यति॥१७॥तस्यैवघोरनरकेवसतोद्विजन्मनः॥ब्रह्मकल्पशतंजातमशैवस्यदुरात्मनः॥१८॥अतःशंकरपूजा
यांनिष्ठायस्यनजायते॥तस्येवंनरकावासोभवत्येवनसंशयः॥१९॥एकेनबिल्वपत्रेणपूजितःपरमेश्वरः॥ददातिमुक्तिंपरमांततःपूज्योमहेश्वरः
॥२०॥मुक्तिंददातिपरमांयःसकृत्स्मरणादपि॥सशिवःसर्वदासेव्योमनोवाक्कायकर्मभिः॥२१॥येनार्चयतिभालाक्षंमन्मेवाक्कायकर्मभिः॥तेदुर्भगा
इतिज्ञेयानतेभ्योन्येतुदुर्भगाः॥२२॥यःसर्वदामहादेवंनाराधयतिसादरं॥सदुर्भगइतिज्ञेयोजन्मजन्मांतरेद्विजाः॥२३॥यःसर्वदामहादेवंनस्म
रिष्यतिसादरं॥सदुर्भगइतिज्ञेयोजन्मजन्मांतरेद्विजाः॥२४॥यःसर्वदामहादेवंनपश्यत्यर्चितंमुदा॥सदुर्भगइतिज्ञेयोजन्मजन्मांतरेद्विजाः॥

॥२५॥ यःसर्वदाशिवकथांनशृणोतिशिवप्रदां॥समहादेवंनपश्यत्यर्चितंमुदा॥सदुर्भगइतिज्ञेयो०॥२६॥ यःसर्वदाशिवरतंनतोषयतिसा
दरं॥सदुर्भग०॥२७॥यःसदोत्धूलनंश्रौतंनकरिष्यतिसादरं॥सदुर्भगइति०॥२८॥ यःसर्वदाललाटादौत्रिपुंड्रंनकरिष्यति॥सदुर्भग०॥२९॥
नकरिष्यतियोनित्यंकंठेरुद्राक्षधारणं॥सदुर्भग०॥३०॥धन्यास्तएवयेनित्यंपूजयंतिमहेश्वरं॥नमहेशार्चकेभ्योन्येधन्याःसत्यंब्रवीम्यहं॥३१॥
धन्यास्तएवयेनित्यंचिंतयंतिसदाशिवं॥नसांबचिंतकेभ्योन्येधन्याःसत्यंब्रवीम्यहं॥३२॥धन्यास्तएवयेनित्यंप्रस्तुवंतिशिवंमुदा॥नशिवस्त
वकेभ्योन्येधन्याःसत्यंब्रवीम्यहं॥३३॥धन्यास्तएवयेनित्यंभस्मोत्धूलनतत्पराः॥नभस्मोत्धूलकेभ्योन्येधन्याःसत्यंब्रवीम्यहं॥३४॥धन्यास्तए
वयेनित्यंत्रिपुंड्रांकितमस्तकाः॥नत्रिपुंड्ररतेभ्योन्येधन्याःसत्यंब्रवीम्यहं॥३५॥धन्यास्तएवयेनित्यंगलेरुद्राक्षभूषणाः॥नरुद्राक्षगलेभ्योन्येधन्याः
सत्यंब्रवीम्यहं॥३६॥ यस्यब्राह्मण्यमारभ्यब्राह्मण्यमनुवर्तते॥तस्यैवशिवपूजायांनिष्टाभवतिशाश्वती॥३७॥यस्यब्राह्मण्यमारभ्यब्राह्मण्यमनुवर्त्त
ते॥तस्यैवभवतिश्रद्धाकेवलेभस्मधारणे॥३८॥यस्यब्राह्मण्यंमारभ्यब्राह्मण्यमनुवर्तते॥तस्यैवोत्धूलनेभक्तिरविछिन्नाभविष्यति॥३९॥ यस्यब्राह्मण्य
मारभ्यब्राह्मण्यमनुवर्त्तते॥तस्यैवभवतिश्रद्धाप्युत्यरुद्राक्षधारणे॥४०॥दधीचिगौतमादीनांशापदग्धानयेद्विजाः॥तेषांभवतिविश्वासोविभूत्युत्धूलना
दिषु॥४१॥यःकरिष्यतियत्नेनकेवलंभस्मधारणं॥तस्यैवजननीधन्यासुभगाचपतिव्रता॥४२॥यःकरिष्यतियत्नेनकेवलंशिवपूजनं॥तस्यैव०॥४३॥यः
करिष्यतियत्नेनकेवलंशिवचिंतनं॥तस्यैवजी०॥४४॥यःकरिष्यतियत्नेनकेवलंशिवकीर्तनं॥तस्यैव०॥४५॥यःकरिष्यतियत्नेनकेवलंशिववंदनं॥तस्यै
वजननीधन्यासुभगाचपतिव्रता॥४६॥नयेनक्रियतेनित्यंकेवलंभस्मधारणं॥तन्मातादुर्भगादुष्टाजारजाव्यभिचारिणी॥४७॥नयेनक्रियतेनित्यंकेव
लंशिवपूजनं॥तन्माता०॥४८॥नयेनक्रियतेसांबेभक्तिरव्यभिचारिणी॥तन्माता०॥४९॥नयस्यजायतेत्र्यक्षेदेवदेवोत्तमत्वधीः॥तन्माता०॥५०॥नयस्य
जायतेत्र्यक्षेब्रह्मादिजनकत्वधीः॥तन्माता०॥५१॥नयस्यजायतेत्र्यक्षेसर्वव्यापकतामतिः॥तन्माता०॥५२॥नयस्यजायतेत्र्यक्षेसर्वमुक्तिप्रदत्वधीः॥
तन्माता०॥५३॥नयस्यजायतेत्र्यक्षेसर्वलोकेश्वरत्वधीः॥तन्माता०॥५४॥नयस्यजायतेत्र्यक्षेपरंब्रह्मेतिधीःसदा॥तन्माता०॥५५॥नयस्यजायते
त्र्यक्षेशाश्वतत्वमतिःसदा॥तन्माता०॥५६॥नयस्यजायतेत्र्यक्षेसुराराध्यत्वधीःसदा॥तन्माता०॥५७॥नयस्यजायतेत्र्यक्षेस्वतःशुद्धत्वधीःसदा॥ न

न्माता०॥५८॥ नयस्यजायतेत्र्यक्षेपतितोद्धारकत्वधीः॥ तन्माता०॥५९॥ नयस्यजायतेत्र्यक्षेसर्वपूतत्वधीस्सदा॥ तन्माता०॥६०॥ नय
स्यजायतेत्र्यक्षेपरमेशत्वधीः सदा॥ तन्मातादुर्भगादुष्टाजारजाव्यभिचारिणी॥ ६१॥ सर्वदेवोत्तमेनित्येभगवत्यंबिकापतौ॥ शिवमाया
मोहितानामन्यथाजायतेमतिः॥ ६२॥ नशिवादधिकोदेवःशिवेनसदृशोथवा॥ वयंतुब्रह्मवैष्णवाद्याः सर्वेपिशिवकिंकराः॥ ६३॥ शिवान्याः
संतियेदेवास्तेवैशंकरकिंकरा॥ अतः परंशिवादन्यः कः शिवादधिकोभवेत॥ ६४॥ शिवेनसदृशोप्यन्योनास्त्येवास्मासुसर्वथा॥ क
थंशिवेनसदृशावयंशंकरकिंकराः॥ ६५॥ अस्मास्वन्यतमंयस्तुशिवेनसदृशंवदेत्॥ सभविष्यतिचंडालोजन्मजन्मनिसर्वथा॥
॥६६॥ अस्मास्वन्यतमंयस्तुशंकरादधिकंवदेत्॥ सभविष्यतिचंडालोनरकेचाधिगच्छति॥ ६७॥ यदिमार्त्तंडसदृशः खद्योतोल्पो
भविष्यति॥ तदाप्यल्पोमहानज्ञोनशिवेनसमोद्विजाः॥ ६८॥ मृगेंद्रसदृशश्श्वेत्स्याच्छ्वापुरीषेकभक्षकः॥ तदाप्यल्पोमहानज्ञो
नशिवेनसमोद्विजाः॥ ६९॥ सुपर्णसदृशश्श्वेत्स्यान्मशकोव्रणदूषितः॥ तदाप्यल्पो०॥ ७०॥ सोमादहंसमुत्पन्नोनसोमादधिको
ध्रुवं॥ नभविष्याम्यहंविप्राः सोमेनसदृशोपिवा॥ ७१॥ जातः सोमान्महादेवादहंसोमसमः कथं॥ नाधिकः कोपिजनकाज्जन्य
स्तत्प्रसादपूजकं॥ ७२॥ सोमः पवतइत्यादिऋक्ष्वंत्रेरंबिकापतिः॥ मत्यादीनांतुसर्वेषांजनितेत्युच्यतेद्विजाः॥ ७३॥ मध्येमध्येपित
द्वाक्येजनितेत्यनुवर्तनं॥ लोकभ्रांतिनिवृत्यर्थमितिविज्ञायतेमया॥ ७४॥ अतोमतिप्रभृतयोमदंताः सोमसंभवाः॥ अयमर्थस्तुनि
र्णीतोवेदेनैवयथार्थतः॥ ७५॥ केचिद्वदंतिमामीशंकेचिद्देहात्मवादिनः॥ तेसर्वेपिपतिष्यंतिनरकेषुनसंशयः॥ ७६॥ ईशोनित्यो
विभुःकर्त्ताशिवएवनचापरः॥ सत्यमित्याहजाबालस्तत्कथंचान्यथाभवेत्॥ ७७॥ भावरूपस्यजन्यस्यविनाशप्रतियोगिनः॥
कथंवास्यान्ममेशत्वंघोरसंसारवर्तिनः॥ ७८॥ अहंयथासोमजन्यस्तथाब्रह्मापिसोमजः॥ एवमिंद्रस्तदन्येचसोमजन्यानसं
शयः॥ ७९॥ उमयासहितःसोमःसतुसांबःसदाशिवः॥ सएवभगवान्नान्यः सएवेश्वरउच्यते॥ ८०॥ शिवान्यं ईश्वरंमला

भ्रांतास्तिष्ठंतिमांसदा॥ तेषांसंसारविछेदः कदापिनभविष्यति॥ ८१॥ ईशानःसर्वविद्यानामित्यारभ्यसदाशिवो॥ इतिवाक्यंनयैर्दृष्टंतेमामीशाविदुर्जडाः
तानिवाक्यानिदृष्ट्वापिशिवमाययाविमोहिताः॥ मामीशमाहुःदुर्वृत्ताःवेदबाह्याःकुमार्गगाः॥ येवदिष्यंतिमामीशंतेसर्वेशिववंचिताः॥ तेषामघोरनरका
निर्गमोनभविष्यति॥ ८४॥ एवंशिवान्यदेवेषुब्रह्मादिष्वपिमोहतः॥ ईशत्वंयोविजानातिससंसारीभविष्यति॥ ८५॥ ईश्वरोहंयदितदाजन्योहंस्यांकथंद्विजाः॥
जन्यत्वंवेदएवोक्तंममश्रीरुद्रपारगाः॥ ८६॥ शिवएवेश्वरस्तस्माच्छिवान्योन्यु नेश्वरोध्रुवं॥ सएवमोक्षदस्तस्मात्तत्पूजामोक्षसाधनं॥ ८७॥ अतोमोक्षा
र्थिभिर्नित्यंशंकरस्यैवपूजनं॥ कर्त्तव्यमतियत्नेनमनोवाक्कायकर्मभिः॥ ८८॥ पुराकश्चिद्द्विजोनित्यंस्वमातृगमनप्रियः॥ भिल्लवेषंसमाश्रित्यवनमा
श्रित्यसंस्थितः॥ ८९॥ तेनभुक्ताश्चसततंवनस्थाऋषिकन्यकाः॥ तेनैवद्रव्यलोभेनब्राह्मणाबहवोहताः॥ ९०॥ ततःकदाचित्तेनैवकुंडिनीनगरेगतं॥
तत्रदृष्ट्वाराजपत्नीतेनैवहिदुरात्मना॥ ९१॥ ततःसराजपत्नींतांयुवतीमतिसुंदरीं॥ दृष्ट्वैवंनेतुमुद्युक्तोविवेशनृपमंदिरं॥ ९२॥ ततोजघानराजानंअशस्त्रे
शयनस्थितं॥ ततःसनेतुमुद्युक्तस्तामुवाचवचस्तदा॥ ९३॥ एहिशीघ्रंवनंयामोनानापुष्पसमन्वितं॥ मधुमांससमाकीर्णंविजनंवायुसेवितं॥ ९४॥ इत्यु
क्त्वातांसमादायययौसवनभूमिकां॥ तत्ररेमेतयासाकंमधुमांसादिभक्षकः॥ ९५॥ कुंडिनीनाथपुत्रस्तंश्रुत्वास्वपितृनाशकं॥ चकारहंतुमुद्योगंबलवीर्यसम
न्वितः॥ ९६॥ ततःससबलस्सायंप्रविवेशवनंनृपः॥ ततस्तमागतंदृष्ट्वासविप्रोभूद्भयान्वितः॥ ९७॥ ततःसरात्रावत्युच्चंबिल्ववृक्षंभयानकं॥ आरुरो
हातियत्नेनराजपत्नीसमन्वितः॥ ९८॥ ततःसऽनिद्रासंवीतोनिद्रानाशार्थमुद्यतः॥ छित्वैकैकंबिल्वपत्रंपातयंस्ततरौस्थितः॥ ९९॥ तत्पातितानिपत्राणि
शिवलिंगस्यमूर्धनि॥ पतितान्यतिरम्याणिसर्वाण्यपिशिवार्चकाः॥ १००॥ ससायंकालमारभ्यबिल्वपत्रैःसदाशिवं॥ अरुणोदयपर्यंतंपूजयामासभा
ग्यवान्॥ १॥ ससोमाकृष्णभूताभूत्सातिथिस्तस्यभागतः॥ तस्यांतिथौबिल्वपत्रैस्तेनशंभुःप्रपूजितः॥ २॥ अरण्येसंचरन्राजातस्यांरात्रावितस्ततः॥
जातेऽरुणोदयेविप्रास्तत्रभूयःसमागतः॥ ३॥ तंविलोक्यसभूपालस्ततोवृक्षोपरिस्थितः॥ क्रुद्धःसजगृहेशार्ङ्गधनुर्विद्याविशारदः॥ ४॥ मुमोचास्त्राणि
नृपतिर्द्विजमुद्दिश्यवीर्यवान्॥ मुक्तानितानिशस्त्राणिनगतान्येवतंप्रति॥ ५॥ ससैन्येनापिशस्त्राणिततस्त्यक्तानिभूरिशः॥ नतान्यपिद्विजस्यांगेपतिता
निशिवार्चकाः॥ ६॥ ततःसविस्मितोराजाकोयंवृक्षोपरिस्थितः॥ मनुष्योनायमित्येवंमत्वातूष्णींस्थितस्तदा॥ ततःसविस्मितोराजाससैन्यःस्वपुरींययौ
॥ द्विजोपिविस्मितःप्रापभुवंराज्ञीसमन्वितः॥ ८॥ ततःसराज्ञीमवदत्किंमेतदितिविस्मितः॥ एतस्मिन्नंतरेकालेद्विजमेकंददर्शसः॥ ९॥ जगादत

श्रीशिवर०७ स्मैवृत्तांतंततःसर्वमशेषतः॥तच्छ्रुत्वाबिल्वपत्राणिदृष्ट्वावाचमुवाचसः॥१०॥बिल्वपत्राणिरम्याणिपातितान्यत्रकेनवा॥शिवलिंगेकिम
१२ त्रास्तीत्यतिविस्मितमानसः॥११॥ततस्तद्वचनंश्रुत्वातमुवाचद्विजोत्तमं॥मयैवपातितानीतिराजपत्न्यासहेतिसः॥सददर्शततोलिंगंबिल्वमू
लसमन्वितं॥बिल्वपत्रसमाक्रांतंनार्मदंमुक्तिदायकं॥१३॥ततस्तंप्रत्युवाचेदंवचनंद्विजसत्तमः॥कृतांजलिपुटोभूत्वाप्रणम्यचपुनःपुनः
॥१४॥ ॥द्विजउवाच॥ ॥बिल्वपत्रैर्महादेवस्त्वयासंपूजितोद्विज॥अतस्तानिनलग्नानिशस्त्राणितवविग्रहे॥१५॥किमत्रचित्रंविप्रा
स्तिश्रीमृत्युंजयपूजकः॥मुच्यतेनात्रसंदेहःकालमृत्युभयादपि॥१६॥बिल्वपत्रैर्महादेवंयोर्चयिष्यातितंप्रति॥कालमृत्युर्नयात्येवकिमुताह्य
पमृत्यवः॥१७॥तुष्टोभवतिगौरीशोयत्रकुत्रापिपूजितः॥बिल्वपत्रैर्बिल्वमूलेपूजितःकिमुतप्रभुः॥१८॥एतादृशःस्थलेनित्यंयःपूजयति
शंकरं॥तस्याभीष्टानिसर्वाणिभवंत्येवनसंशयः॥१९॥बिल्वमूलेमहादेवंलिंगरूपिणमव्ययं॥पूजयंत्यतियत्नेनऋषयोबलवादिनः॥
बिल्वमूलेमहादेवंशिवेकशरणोद्विजः॥बिल्वपत्रैःसमभ्यर्च्यमोक्षंप्राप्नोत्यसंशयं॥२१॥अनंतपुण्यफलदंबिल्वमूलेशिवार्चनं॥सत्यमि
त्याहभगवान्स्वयमेवमहेश्वरः॥२२॥यत्फलंप्राप्यतेमर्त्यैरन्यत्रशिवपूजया॥ततोनंतगुणंपुण्यंबिल्वमूलेशिवार्चनात्॥२३॥येनार्चि
तोबिल्वमूलेमहादेवोमुहुर्मुहुः॥तेनसंप्राप्यतेकाशीश्रीमद्विश्वेश्वरालया॥२४॥येनजप्तोबिल्वमूलेश्रीमत्पंचाक्षरस्सदा॥तेनसंप्राप्य
तेकाशीश्रीमद्विश्वेश्वरालया॥२५॥येनजप्तोबिल्वमूलेरुद्राध्यायश्रुतिश्रुतः॥तेनसं०॥२६॥येनसंपूजितोबिल्वैर्बिल्वमूलेमहेश्वरः॥ श्रीसांब
तस्याविमुक्तेमरणंभविष्यतिनसंशयः॥२७॥सार्द्राभूतापालयुक्ताकृष्णासोमान्विताऽस्तिया॥तस्यांरात्रौबिल्वमूलेसिद्धिदंशंकरार्चनं १२
॥२८॥पुरास्वरूपकोनामकश्चिच्छंकरकिंकरः॥लीलार्थंसंचरन्लोकान्ब्रह्मलोकंययौमुदा॥२९॥तदाब्रह्मान्यसंसक्तःशंकरंनावलो
कयन्॥तदाक्रोधसमाविष्टोबभूवशिवकिंकरः॥३०॥ततःसपातयामासब्रह्मलोकाच्चतुर्मुखं॥ब्रह्मलोकाधिपत्यंचस्वयमेवचकार
सः॥३१॥ततोरण्येदुःखयुक्तःसंचरन्दुःखितोविधिः॥मुनिवृंदसमाक्रांतंरेवातीरंगतोद्विजाः॥३२॥पुण्यतोयसमाक्रांतांना
नामुनिजनावृतां॥ददर्शनर्मदांब्रह्मापरब्रह्मस्वरूपिणीं॥३३॥संवृत्तांऋषिकन्याभिश्चक्रवाकनिषेवितां॥तीरबिल्वतरुच्छायाशी
तलोदकसंवृतां॥३४॥विंध्यनिर्झरसंयुक्तामयुक्तामघसंश्रितैः॥प्रयुक्तपूजापुष्पाढ्यांवियुक्तोपलशैवलां॥३५॥अनंतालिंगसं

युक्तामाह्लिंगानांकितांतरां॥ लिंगांतरांतरांताताममनंतानंतसेवितां॥३६॥शूलहस्तेश्वरंनामक्षेत्रमेकमपश्यत॥ततोददर्शतत्रैवबिल्ववृक्षांशिवप्रियं
॥३७॥ ततोददर्शशैवेंद्रान्भस्मोद्धूलितविग्रहान्॥त्रिपुंड्रफालान ऽमलान्शिवपूजापरायणान्॥३८॥शिवनामांकितानन्यान्शिवनामजपोत्सु
कान्॥ रुद्राक्षमालाभरणांस्त्यक्तसंगानकल्मषान्शूलकुंडे ततः स्नात्वा भस्मधृत्वायथाविधिः॥ पूजयामासबिल्वाद्यैःशूलहस्तेश्वरं विधिः॥४०॥ततो
जजापपरमंशैवंपंचाक्षरंविधिः॥ ततः प्रणम्यबहुधातुष्टावगिरिजापतिं॥४१॥ ततः समुपविष्टंतंचिंताव्याकुलचेतसं॥ दृष्ट्वाचतुर्मुखंशैवाःपप्रच्छुर्ग
तकल्मषाः॥४२॥ ॥शांकराःऊचुः॥ ॥क्षेत्रमेतत्त्वयाप्राप्तंसर्वपापविनाशकं॥प्राप्यापिशांकरंक्षेत्रंकिंचिंतयसिचेतसि॥४३॥रुद्रक्षेत्रमिदंब्रह्म
न्रुद्रभक्तनिषेवितं॥अरुद्रमुद्रारहितंरुद्रभक्तेष्टकामदं॥४४॥ ॥विप्रउवाच॥ ॥ इतितद्वचनंश्रुत्वास्ववृत्तांतंयथाक्रमं॥विधिर्निवेदयामा
सशांकरेभ्यस्तदाद्विज॥४५॥ततस्तमूचुस्तंशैवाजाबालश्रुतिपारगाः॥अत्रबिल्वतरोर्मूलेपूजयस्वमहेश्वरं॥४६॥बिल्वमूलेसमभ्यर्च्यशंकरं
लोकशंकरं॥सुखंसंप्राप्यतेसर्वैरितिवेदःस्वयंयतः॥४७॥वेदार्थोज्ञायतेसर्वस्त्वयातश्चतुरानन॥कथंवाकुरुषेचिंतांजहिचिंतांशिवार्चक॥४८॥
इतितद्वचनंश्रुत्वाविधिःसंतुष्टमानसः॥शिवंबिल्वतरोर्मूलेसमर्चयितुमारभे॥संस्थाप्यनार्मदंलिंगंबिल्वमूलेचतुर्मुखः॥पूजयामासविधिवद्धृ
त्वाभस्मयथाविधि॥५०॥नवबिल्वदलैःशुद्धैःप्रत्यहंनार्मदेश्वरं॥पूजयामासयत्नेनबिल्वमूलेचतुर्मुखः॥५१॥एवंवर्षत्रयंतेनकृतंशंकरपूजनं॥नि
राहारेणविधिनाशंकरासक्तचेतसा॥५२॥ ततः सशांकरस्तत्रविचरन्समुपागतः॥तंदृष्ट्वादूरतोब्रह्माननामाभ्यर्च्यचादरात्॥५३॥ततःसशांक
रस्तस्मैप्रसन्नोब्रह्मणेतदा॥सत्यलोकाधिकारत्वंददौसंतुष्टमानसः॥५४॥शांकरःशांकरंरूपंसमाश्रित्यस्वलीलया॥ निग्रहानुग्रहवशान्कुरु
तेसर्वदाजनान्॥५५॥शांकराणांतुयद्रूपंतद्रूपंशंकरस्यहि॥अतःप्रयत्नतः पूज्याःशांकराःशिवतत्परैः॥५६॥ तास्मिन्तुष्टेमहादेवःस्वयंतु
ष्टोभविष्यति॥यस्मिन्रुष्टेस्वयंरुष्टःसपूज्यःशांकरोजनैः॥५७॥एतादृशःशांकरोयंसंतुष्टश्चतुराननं॥प्रेषयामासतद्देशात्सत्यलोका
यसादरं॥५८॥ततःसशांकरस्तत्रबहुकालंस्थितोमुदा॥पूजितःशांकरैर्नित्यंतत्रस्थैःशिवकिंकरैः॥५९॥ततःप्रहृष्टवदनंतमेवशिवकिंकरं॥
संपूज्यशांकराःसर्वेपप्रच्छुर्धर्मसंहितां॥६०॥ ॥शांकराऊचुः॥ ॥किंवाप्रत्यहिकंकर्मद्विजानामेवशांकर॥यदकृत्वाद्विजोभूयात्पातकीतद्व
दस्वनः॥६१॥सुरूपकशिवकिंकरउवाच॥ ॥द्विजानांप्रथमोधर्मःकेवलंशिवपूजनं॥तथैवपरमोधर्मःकेवलंभस्मधारणं॥६२॥कालत्रये

 पिकर्त्तव्यंकेवलंशंकरार्चनं॥ मध्येमध्येपितत्कार्यंभस्मधारणपूर्वकं॥६३॥रात्रावपिप्रयत्नेनकर्त्तव्यंशंकरार्चनं॥यतःप्रशस्तमित्याहुर्निशिशंकरपू 
जनं॥६४॥अहोरात्रंप्रयत्नेनकेवलंशंकरार्चनं॥द्विजैःकार्यंविधानेनभस्मधारणपूर्वकं॥६५॥क्षणमात्रमपिव्यर्थंयथानैवभविष्यति॥तथाकर्त्तव्य
मनिशंद्विजैःशंकरपूजनं॥६६॥शिवार्चनंतपोयोगोदानंधर्माःशिवार्चनं॥शिवार्चनंदमःशांतिःस्नानंसंध्याशिवार्चनं॥६७॥शिवार्चनेकृतंयेनतपस्ते
नकृतंसदा॥योगाभ्यासःकृतस्तेनकृतंयेनशिवार्चनं॥६९॥शिवार्चनंकृतंयेनधर्मस्तेनकृतःसदा॥शिवार्चनंकृतंयेनयागास्तेनकृताःसदा॥७०॥बिल्वप
त्रैःप्रयत्नेनकर्त्तव्यंशंकरार्चनं॥प्रधानंसाधनंयस्माद्बिल्वपत्रंशिवार्चने॥७१॥अधिकारीभस्मधारीशैवएवशिवार्चने॥महादेवार्चनेविप्रास्तदन्ये
नाधिकारिणः॥७२॥शिवःशैवकृतांपूजांगृण्हातिशिवयासह॥शिवःशैवेष्वतिस्नेहंकरोतिभगवान्यतः॥शैवेभ्यएवभगवान्पार्वतीरमणःशिवः॥द
दातिमुक्तिंनान्येभ्यःकल्पांतेपिद्विजोत्तमाः॥७४॥नित्यमव्यभिचारेणयःपूजयतिशंकरं॥सएवशैवस्तेनैकमुक्तिःसंप्राप्यतेद्विजाः॥७५॥शिवान्यसु
रमभ्यर्च्यमुक्त्यर्थीयोभविष्यति॥सभोजनंविहायापिक्षुधांतिमभिवांछति॥७६॥मर्त्यानांभोजनाभावेक्षुधांतिर्नयथातथा॥महादेवार्चनाभावेमोक्ष
नभविष्यतिध्रुवं॥७७॥मोक्षकर्त्तामहादेवोमोक्षदानातएवसः॥शिवान्योमोक्षदोनास्तिसत्यंसत्यंवदाम्यहं॥७८॥सर्वेश्वरंमहादेवंयोनार्चयतिसा
दरं॥तस्यमुक्तिर्द्विजश्रेष्ठाःकल्पांतेपिनसर्वथा॥७९॥शिवचिंतनशीलस्यशैवस्यैवमहात्मनः॥मुक्तिर्भवतिनान्यस्यकल्पांतेपिद्विजोत्तमाः॥८०॥
विभूतिधारणंकृत्वायःपूजयतिशंकरं॥नित्यमव्यभिचारेणतस्यमुक्तिर्भविष्यति॥८१॥यःपूजयेन्महादेवंशैवोभूत्वायथाविधि॥तस्यैवमुक्तिरित्या 
हनंदिकेशःशिवार्चकः॥८२॥तथाचशंकरस्यैवपूजाकार्यामुमुक्षुभिः॥सत्यमेतत्पुनःसत्यंसत्यंसत्यंनसंशयः॥८३॥भस्मनोद्धूलनंकार्यंत्रिपुं 
ड्रंचयथाविधि॥रुद्राक्षधारणंकार्यंकार्यंशंकरपूजनं॥८४॥पंचाक्षरजपःकार्योरुद्राध्यायजपस्तथा॥कर्त्तव्यंशंकरध्यानंस्मर्त्तव्यंनामशंकरं॥
॥८५॥वक्तव्यंविश्वनाथेतिस्तोतव्यःपार्वतीपतिः॥श्रोतव्यंशंकरस्तोत्रंकर्त्तव्याचशिवस्तुतिः॥८६॥कर्त्तव्यःशंकरैस्नेहःकर्त्तव्यंशंकरार्चनं॥
शंकरैःसहसंलापःकर्त्तव्यःप्रीतिपूर्वकं॥८७॥शंकरेषुपरित्याज्यंकपटेनानुवर्त्तनं॥शंकरेषुपरित्याज्यंनैष्ठुर्येणानुवर्त्तनं॥८८॥दृष्ट्वैवशंकरा
न्छीघ्रमभ्युत्थायाभिवादयेत्॥मृदूनिवचनान्येवंवक्तव्यानिशिवार्चके॥८९॥गृहेचेदागतःशैवःशीघ्रमुत्थायसादरं॥जानुभ्यामवनिंगत्वा
कर्त्तव्यमभिवादनं॥९०॥मधुपर्कादिकंकार्यंतदनंतरमादरात्॥विभूतिबिल्वपत्राद्यैःकर्त्तव्यंशैवपूजनं॥शैवमभ्यागतंदृष्ट्वायोभिनंदतिस

त्वरं॥सशांकरइतिज्ञेयस्तस्यमुक्तिःकरेस्थिता॥९२॥शैवमभ्यागतंसम्यक्‌यःपूजयतिसत्वरं॥सशांकरंइतिज्ञे॥९३॥शैवंक्षीरान्नमध्वाज्यै
र्भक्त्यायोभोजयिष्यति॥सशांकरं०॥९४॥शैवंवस्त्रसुवर्णाद्यैयस्तोषयतिसादरं॥सशांकरं०॥९५॥शायनासनगंधाद्यैयःस्तोषयतिशांकरं॥स
शांकरइतिज्ञेयस्तस्यमुक्तिःकरेस्थिता॥९६॥रुद्राक्षमुक्तामालाद्यैर्यस्तोषयतिशांकरं॥सशांकरइतिज्ञेयतस्यमुक्तिःकरेस्थिता॥९७॥नंदंतिपितरस्त
स्ययस्यभक्तिःशिवार्चके॥नंदंतिपितरस्तस्यशांकरेगृहमागते॥९८॥शैवोगच्छतिपुण्येनयदायस्यगृहेतदा॥सपुण्यकालोविज्ञेयःश्राद्धकालःस
एवहि॥९९॥शैवेसमागतेभक्त्याश्राद्धंकार्यंप्रयत्नतः॥तृप्ताभवंतिपितरस्तेनश्राद्धेनसंततं॥१००॥तदादिनत्रयंऽज्ञेयंविषुवंचतदायनं॥तदाग्रह
णकालोपियदाशैवःसमागतः॥१॥शैवेतमागतेयस्तुशैवार्चनंकरिष्यति॥तदातत्पितरोयांतिनिराशाःश्राद्धलोलुपाः॥२॥नृत्यंतिपितरःस
र्वेशांभवेगृहमागते॥तीव्रंगर्जंतिनंदंतिप्रस्तुवंतिचशांकराः॥३॥अतःशैवार्चनंकार्यंद्विजैःधर्मपरायणैः॥हृष्टोभवतिगौरीशःशैवानामे
वपूजया॥४॥शैवहृत्कमलेशुद्धेसदातिष्ठतिशंकरः॥अतःशैवार्चनंकार्यंशिवपूजापरायणैः॥५॥यस्तुभोजयतेशैवांशिवबुध्यास्वशक्ति
तः॥तस्यपुण्यफलंवक्तुंवेदैरपिनशक्यते॥६॥त्रिपुंड्रांकितफालेनभुज्यतेयद्गृहांतरे॥तत्रनृत्यंतिपितरःपीयूषाप्लुतविग्रहाः॥७॥भक्त्याशैवो
भोजनीयःश्राऽद्धेपित्रर्थमादरात्॥शैवरूपेणपितरोभुंजंतेप्रीतिपूर्वकं॥८॥श्राद्धंयःकुरुतेविप्रःशैवान्त्यक्त्वाभ्रमादपि॥तत्कृतंतद्वृथाश्राद्धं
पितृभिस्तन्नगृह्यते॥९॥ईशानःपितृरूपेणभुंक्तेविश्वभुगव्ययः॥तत्रशैवपरित्यागेकथंभुंक्तेमहेश्वरः॥१०॥शिवःशैवमुखेनैवभुंक्तेतस्मान्म
हेश्वरः॥शैवद्वाराभोजनीयःतस्मात्पूज्योहिशांकरः॥११॥शैवव्रतानिकार्याणिद्विजैःमुक्त्यर्थिभिःसदा॥शिवःशैवव्रतैरेवतुष्टोभवतिसर्वथा
॥१२॥सोमवारव्रतंशैवंतत्कर्त्तव्यंद्विजैःसदा॥त्यक्तसोमव्रताविप्राभविष्यंत्येवपापिनः॥१३॥सोमेदिवानभोक्तव्यममायामपिसर्वथा॥द्वाद
श्यामपिनाश्नीयात्संक्रातिष्वपिसर्वथा॥१४॥नभोक्तव्यंदिवाविप्रैःसर्वथासोमवासरे॥सोमवारेदिवाभुक्त्वाद्वादशाब्दव्रतंचरेत्॥१५॥सोमवा
सरपूर्वेतुभवेच्चेकादशीयदि॥तदाभुक्त्वाऽपिकर्त्तव्यंसोमवासरव्रतंद्विजैः॥१६॥उभयोर्दैवतंयस्मान्महादेवःप्रकीर्त्तितः॥शक्तैर्द्वयंकार्यमश
क्तैरन्यदेवहि॥१७॥तत्राप्येकादशीतोत्रश्रेष्ठोयंसोमवासरः॥त्यक्त्वाप्येकादशींकार्यंसोमवारव्रतंद्विजैः॥१८॥सोमवारव्रतफलंकेनवक्तुंहिश
क्यते॥सोमवारव्रतफलंजानातिभगवान्शिवः॥१९॥त्रयोदश्यांत्रयोदश्यामुपोष्यासायमास्तिकैः॥शिवपूजाप्रयत्नेनकार्याबिल्वदलादिभिः

॥२०॥ कार्यः शिवचतुर्दश्यामुपवासो द्विजैः सदा ॥ रात्रौ जागरणं कार्यं कार्यं शंकरपूजनं ॥ २१ ॥ शिवरात्रिदिने मोहाद्यदि भुंक्ते द्विजोपि सन् ॥ स याति न
रकं घोरं यावदाचंद्रतारकं ॥ २२ ॥ कर्त्तव्यः सततं विप्रैर्मणिबद्भस्मसंग्रहः कर्त्तव्यं सततं विप्रैः केवलभस्मधारणं ॥ २३ ॥ कर्त्तव्यं सततं विप्रैः श्रौतमुद्धूल
नं द्विजाः ॥ कर्त्तव्यं सततं विप्रैः श्रौतं रुद्राक्षधारणं ॥ २४ ॥ कर्त्तव्यं सततं विप्रैर्बिल्वपत्रैः शिवार्च्चनं ॥ नित्यं संपादनीयानि बिल्वपत्राणि सादरं ॥ २५ ॥ बिल्वानां
पोषणं कार्यं स्वशरीरवदादरात् ॥ कर्त्तव्यं सर्वदा विप्रैर्महादेवस्य पूजनं ॥ २६ ॥ शिवार्च्चनं विना विप्रा मुक्तिर्नास्त्येव सर्वथा ॥ अतः सर्वं परित्यज्य कर्तव्यं शिवपू
जनं ॥ २७ ॥ भवद्भिः क्रियते नित्यं बिल्वमूले शिवार्चनं ॥ अतो मुक्तिरयत्नेन प्राप्या युष्माभिरुत्तमा ॥ २८ ॥ दृश्यंते शिवलिंगानि भवद्भिः सर्वदा द्विजाः ॥ शिव
लिंगानि पूज्यंते नानादिक्षु स्थितान्यपि ॥ २९ ॥ एकं वा नार्मदं लिंगं दृश्यते येन सादरं ॥ तस्य पापानि नश्यंति शलभा इव वह्निगाः ॥ ३० ॥ नर्मदेयं लिंगरूपाना
नालिंगविराजिता ॥ लिंगार्च्चनपराक्रांता धन्यैराश्रीयते सदा ॥ ३१ ॥ अत्र बिल्वतरोर्मूले नार्मदं लिंगमुत्तमं ॥ यः पूजयति यत्नेन तस्य मोक्षः करस्थितः ॥
॥ ३२ ॥ बिल्वमूले बिल्वपत्रैर्द्विनैवाजलशोधितैः ॥ भक्त्या शिवं समभ्यर्च्यो शिवमेवाधिगच्छति ॥ ३३ ॥ ॥ द्विज उवाच ॥ ॥ इत्युक्तः शांकरैः सर्वैः
पूजितः शिवकिंकरः ॥ पुंडरीकपुरं प्राप ब्रह्मविष्ण्वादिसेवितं ॥ ३४ ॥ अतो बिल्वतरोर्मूले बिल्वपत्रैर्मनोहरैः ॥ शिवपूजाकृता रात्रौ ततो मृत्युर्गतस्तव
॥ ३५ ॥ तव पापानि नष्टानि पूर्वजन्मकृतान्यपि ॥ अग्रेपि शंकरं नित्यं पूजयस्व प्रयत्नतः ॥ विष्णुरुवाच ॥ ॥ इत्युक्तस्तद्वचः श्रुत्वा द्विजः संतुष्टमानसः ॥
तदा प्रभृति यत्नेन शिवपूजां चकार सः ॥ ३७ ॥ स कुर्वन्देवदेवस्य महादेवस्य पूजनं ॥ सर्वपापविनिर्मुक्तः संप्राप च महेश्वरं ॥ ३८ ॥ अतः पूज्यः प्रय



त्नेन शिवः पतितपावनः ॥ नित्यं निश्चलचित्तेन भुक्तिमुक्त्यर्थमास्तिकः ॥ ३९ ॥ भवानी श्रीमहादेवं स्वयमत्यंतयत्नतः ॥ पूजयत्यादराद्भक्त्या लिंगरू
पिणमव्ययं ॥ ४० ॥ अत्र व्याघ्रपुरे पूर्वं भवानी गिरिजा प्रति ॥ पूजयित्वा वरं याचे वराणामुत्तमोत्तमं ॥ ४१ ॥ ॥ श्रीपार्वती उवाच ॥ ॥ शंभो सायंस
मारभ्य कार्त्तिका सोमवासराः ॥ यावंतः संति तेष्वेका भवंतं पूजयाम्यहं ॥ श्रीमहादेव देवेश देयो मह्यमयं वरः ॥ इत्युक्तः श्रीमहादेवो गिरिजां तामुवा
च ॥ ४३ ॥ ॥ श्रीशिव उवाच ॥ ॥ चत्वारो यामिनीयामास्त्रयायामत्रयं त्वया ॥ कार्यं मदर्चनं देवि बिल्वपत्रादिभिः मुदा ॥ ४४ ॥ चतुर्थे यामिनी
यामे कुमाराद्या गणेश्वराः ॥ देवाश्च ब्रह्मविष्ण्वाद्याः पूजयिष्यंति मां प्रभुं ॥ ४५ ॥ त्वया चेत्क्रियते पूजा नक्तं यामचतुष्टये ॥ तदा कथं कुमाराद्यैः कर्त्तव्यं
मम पूजनं ॥ ४६ ॥ अयं तु कार्त्तिको मासः प्रशस्तो मम पूजने ॥ तत्रापि सोमवारेषु प्रशस्तं मम पूजनं ॥ ४७ ॥ तत्रापि रात्रौ कल्याणि सोमवारे शिवार्चनं ॥

ममप्रियकरंसत्यंसत्यमेवोच्यतेमया॥ पुण्यकालाः समायांतिगिरिजेसोमवासरे॥ तत्रापिकार्त्तिकेमासिविशेषात्सोमवासरे॥४९॥ सोमवा
रेकृतापूजाममप्रियकराशिवे॥ तत्रापिकार्त्तिकेमासिसापूजामुक्तिभुक्तिदा॥ ५०॥ बिल्वपत्रैर्द्रोणपुष्पैर्धत्तूरकुसुमैरपि॥ पूजनीयोहमीशानः
कार्त्तिकेसोमवासरे॥५१॥ द्रोणपुष्पैः प्रशस्तैर्मेकार्त्तिकीसोमवासरे॥ योर्चयेत्त्रिशियत्नेनसमांप्राप्नोतिशोभने॥ ५२॥ बिल्वपत्रैःसमभ्यर्च्य
कार्त्तिकीसोमवासरे॥ ममप्रियतमोभूयात्सत्यंसत्येनसंशयः॥५३॥ एकंवायदिधत्तूरं कार्त्तिकीसोमवासरे॥ यदिदद्यान्ममप्रीत्यामयिलीनोभ
विष्यति॥५४॥ इत्युक्तंतद्वचःश्रुत्वाभवानीशिवतत्परा॥ तथास्त्वितिशिवंप्राहतदासंतुष्टमानसा॥५५॥ ततःसाकार्त्तिकमाससंप्राप्यशिववल्ल
भा॥ कार्त्तिकप्रतिपद्येवसोमवासरमापसा॥ शिवपूजासाधनानिसंपाद्यगिरिजाततः॥ पूजांकर्त्तुंसमारेभेसायमारभ्यशंकरे॥५७॥ अवेज्ञा
यैववृत्तान्तमिदमस्माभिरैश्वरं॥ सायंशिवार्चनंकर्त्तुंमुद्युक्तंतादृशैर्द्विजाः॥५८॥ ततोब्रह्मादिभिःसाकंमयायत्नपुरःसरं॥ पूजाद्रव्यसमादायभ
स्मधृत्वागतंद्विजाः॥५९॥ ततःसमाययौभृत्योनंदिकेशस्यवीर्यवान्॥ प्रतिबध्यस्ततोमार्गस्तेनसद्वेत्रपाणिना॥६०॥ ततोस्माभिःकियत्कालं
कृतंधैर्यंततःपरं॥ शीघ्रंगंतुंसमुद्युक्तंमयाब्रह्मादिभिःसह॥६१॥ सुयशापतिदूतेनतेनसद्वेत्रपाणिना॥ क्षणार्धेनवयंसर्वेताडिताःपतिताभुवि॥
॥६२॥ ततोयाममात्रयंमात्रासम्यगभ्यर्चितःशिवः॥ ततःस्कंदादिभिःसर्वैःपूजितःपार्वतीपतिः॥६३॥ ततोस्माभिःकृतापूजाशिवस्यपरमात्मनः॥त
तःकृतंप्रयत्नेनगंधर्वाद्यैःशिवार्चनं॥६४॥ तदामयाप्रतिज्ञातमद्यचेत्पार्वतीपतिं॥ सोमेद्रक्ष्येतदानेत्रमर्पयामीतिशंकरे॥६५॥ यामिन्याःपश्चिमेयामेत
तोदृष्टोमहेश्वरः॥ ततःसंपूज्यबिल्वाद्यैर्नेत्रेणाप्यर्चनंकृतं॥६६॥ ततस्तुष्टोमहादेवोनेत्रंकमलसंन्निभं॥ ददौमह्यंकृपासिंधुरत्रश्रीमच्चिदंबरे॥६७॥
श्रीमच्चिदंबरेशस्यपूजांयस्तुकरिष्यति॥ तस्यपापानिनश्यंतिस्वेष्टसिद्धिश्चजायते॥६८॥ चिदंबरेतिमंत्रोयंजपनीयःप्रयत्नतः॥ चिदंबरेतिमंत्रेण
पूजनीयःसदाशिवः॥६९॥ अस्मिन्चिदंबरेक्षेत्रेमहादेवःकृपानिधिः॥ चकारतांडवंप्रीत्याभवानीसन्मुखंद्विजाः॥७०॥ पुरासुरद्विषःक्रूराबलवीर्यम
दोन्नताः॥ दुःखंदत्वास्थितानित्यंअस्माकंत्रिपुराह्वयाः॥७१॥ ताराक्षोमकराक्षश्चविद्युन्मालीतितेत्रयः॥ आसन्तिस्रःपुरस्तेषामसुराणांमनोज
वाः॥ पुरत्रयेपितिष्ठंतित्रयस्तेतुसुरद्विषः॥ पुरत्रयंप्रयात्येवयत्रतेषांमनोगतिः॥७३॥ ततपुरत्रयमासाद्यसुखेनैवास्थिताश्चते॥ ज्वलत्सर्वतसं

श्रीशिवर०७ काशंतपुरत्रयमद्भुतं ।।७४।। यत्रगच्छतितत्रैवज्वलंत्यन्याकुलाजनाः ।। अगतिर्नास्तिकुत्रापितस्यस्वर्गादिषुध्रुवं ।।७५।। सुरैःदुखंयथाप्राप्तंते उ-स-पू-
१५ भ्यस्तद्बहुकृतोमम ।। तद्दत्तदुःखसंतप्तादुःखिताःसर्वदाजनाः ।।७६।। कदाचिदागतोब्रह्मासेंद्रस्त्रिपुरदुःखितः ।। मत्समीपंततोमह्यं
सर्वदुःखंन्यवेदयत् ।।७७।। मह्यंदुःखंनिवेद्यापिदुःखांतंनययौविधिः ।। दुःखितायातिरिक्तायशक्तिहीनायशंकराः ।।७८।। दुःखाप
हारकेदुःखंनिवेदयतियःपुमान् ।। सदुःखांतंप्रयात्येवमादृशान्येवचान्यथा ।।७९।। ममत्रिपुरसंहारेयदिशक्तिर्भवेत्तदा ।। मत्तोदुःख
निवृत्तिस्यादन्यथास्यात्कथंद्विजाः ।।८०।। सहस्रवर्षपर्यंतमटत्येवपुरत्रयं ।। मुहूर्तमात्रंभवतिक्वचित्रिपुरसंगमः ।।८१।। तस्मि
न्मुहूर्त्तेसामर्थ्यंयदिस्त्रिपुरनाशने ।। सएवतस्यदुःखस्यवस्तुतस्तुविनाशकः ।।८२।। ममतादृशसामर्थ्यंनास्त्येवब्रह्मणोथवा ।। ना
स्मदन्यसुराणांचमहामृत्युंजयंविना ।।८३।। अतस्तेनातिदुःखेनसंतप्तास्मोवयंपुरा ।। तेनदुःखेनसततंनकृतंशिवपूजने ।।८४।।
त्यागेनशिवपूजायाःप्राप्तंदुःखंपुनःपुनः ।। दुःखमग्नाःस्थिताःसर्वेत्तदावयमहर्निशं ।।८५।। ततःकदाचिद्भगवान्श्रीरुद्रोभक्त श्रीसांब
वत्सलः ।। नेत्राग्निकणलेशेनतदाहत्त्रिपुरत्रयं ।।८६।। तदासूर्योदयःसर्वेप्रकाशंपरमंययुः ।। तदासंतुष्टुवुर्देवास्त्रिपुरांतकमीश्वरं १५
।।८७।। रुद्रफालाग्निसंदग्धंयदातास्त्रिपुरंतदा ।। सौख्यंपरंतुसंप्राप्तमस्माभिःसकलैःसुरैः ।।८८।। तदाप्रभृतियत्नेनदुःखेतस्मिन्निवारि
ते ।। शिवपूजापराजातावयंसर्वेपिशोकराः ।।८९।। अस्माभिश्चस्तुतःशंभुर्देवदेवशिखामणिः ।। त्रिपुरोपात्तदुःखौघविनिवृत्त्यैस्ततःपरं ।।
।।९०।। मयाब्रह्मादिभिःसाकंपूजाद्रव्यपुरःसरं ।। त्रिपुरांतकपूजार्थंगतंतस्मिन्दिनेद्विजाः ।।९१।। नंदिकेशप्रसादेनदृष्टोस्माभिर्महेश्वरः ।। त
दास्माभिःकृतापूजारत्नैःस्त्रिपुरघातिनः ।।९२।। ततःपरंमहादेवःसायंकालेस्वलीलया ।। उमोपकंठंसोत्कंठंनाट्यंकर्तुंसमारभे ।।९३।। त
तःपरंमहेशस्यनपुरंरत्नरंजितं ।। पपातात्रशिवस्थानेपश्यत्स्वस्मासुशंकराः ।।९४।। ततःपरंमहादेवोनाट्यमत्रचकारसः ।। श्रीनंदिकेशप्रमु
खागणाश्चात्रसमाययुः ।।९५।। तदाप्रभृतिसोत्कंठंनीलकंठोत्रसादरं ।। करोतिनाट्यंलीलार्थंलीलास्वीकृतविग्रहः ।।९६।। भवंतिप्रतिकल्पे
पितेताराक्षाद्द्वयोर्द्विजाः ।। तेहन्यंतेनमहेशेनप्रतिकल्पेपुनःपुनः ।।९७।। इच्छायदामहेशस्यदग्धमेतद्भवत्विति ।। तदादग्धंभवत्येवसर्वंमे

तच्चराचरं ॥ ९८ ॥ तथापि भगवान रुद्रः पुराकल्पांतरे द्विजाः ॥ चक्रे त्रिपुरदाहार्थमिच्छां शस्त्रादिसंयुतः ॥ ९९ ॥ रथारूढेन गंतव्यमित्यपीच्छां चकार सः ॥ रथो
भूच्छ्रीमहेशस्य तदा सर्वविलक्षणः ॥ १०० ॥ रथरूपं दधौ विप्रा नवखंडात्मिकापि भूः ॥ बभूवुश्चतुरो वेदा वाजिरूपधरास्तदा ॥ १०१ ॥ बभूवतुश्चंद्रसूर्यौ चक्र
रूपधरौ तदा ॥ ब्रह्मापि समभूद्यंता सायकोऽहं जनार्दनः ॥ २ ॥ मेरुर्धनुरभूच्छेषो गुणो भूत्धनुषस्तदा ॥ देवाः सैन्यमभूद्विप्रास्तस्यातिषण्मुखोऽभवत् ॥ ३ ॥ ततः
प्रतस्थे गौरीशो लीलास्वीकृतविग्रहः ॥ देवानामसुराणां च युद्धमासीत्ततः परं ॥ अनेकयुगपर्यंतं युत्धं कृत्वासुराः स्थिताः ॥ ततः परं सुरान् श्रांतान् संवीक्ष्य
कृपया शिवः ॥ ५ ॥ ततस्त्रिपुरनाशार्थं विससर्ज स सायकं ॥ ततस्ते राक्षसाः सर्वे सायकोपहता मृताः ॥ ६ ॥ सायकोत्थानकाले वै दग्धं तत्त्रिपुरं द्विजाः ॥ ततः प
रं महादेवो नित्यमन्नं चकार सः ॥ ७ ॥ पुराकल्पांतरे विप्रास्ते ताराक्षादयोऽसुराः ॥ स्वर्गलोकं गृहीत्वेंद्रं चक्रुः संहृतनायकं ॥ ८ ॥ ततः परं स देवेंद्रो लोकपालैश्च सं
वृतः ॥ ब्रह्मणापि युतः प्राप वैकुंठमतिदुःखितः ॥ ९ ॥ ब्रह्मा ततः परं सर्वमिंद्रादीनां पराभवं ॥ यथावन्मह्यमाचख्यावींद्रेण प्रेषितस्तदा ॥ १० ॥ ततो गरुडमारुह्य
चक्रं संगृह्य पाणिना ॥ मया गतं प्रयत्नेन मुरारिविजये प्रभुना ॥ ११ ॥ ततः परमभूद्युत्धमसुरैः सह सत्वरं ॥ न जातं तादृशं युत्धं कदाचिदपि शांकराः ॥ १२ ॥ पे
तुरस्त्राणि बहुशः प्रेषितानि सुरारिभिः ॥ तदा तानि प्रविष्टानि कष्टानीवाशिवार्चके ॥ १३ ॥ सत्वरं मुद्गराः पेतुः पर्वता इव कोटिशः ॥ भिंडिपालास्ततः पेतुः पाखंडा
इव भूतले ॥ १४ ॥ क्रकचाश्च ततः पेतुः कर्कशा इव सद्मनि ॥ भृशुंडाश्च ततः पेतुश्चांडाला इव शांकर ॥ १५ ॥ मायाशस्त्राणि संपेतुः कलत्राणीव योगिनि ॥
कूटशाल्मलयः पेतुः शाल्मला इव शोभने ॥ १६ ॥ कोटिवत्सरपर्यंतमेवं मया सह ॥ युत्धमासीत्ततो युत्धे ममैवासीत्पराजयः ॥ १७ ॥ युत्धकाले मया गर्वा
न्महेशो न स्मृतस्तदा ॥ अतः पराभवो युत्धे ममासीद्दुःखदः सदा ॥ १८ ॥ ततः परं गदादीनि शस्त्राण्यपहृतानि तैः ॥ सुदर्शनाख्यं चक्रं च हृतं तैरेव राक्षसैः
॥ १९ ॥ ततो मत्प्रमुखान् सर्वान् ब्रह्मेंद्राद्यमरान् द्विजाः ॥ बध्वा पाशैर्मुद्गराद्यैस्ताडयामासुरुत्थिताः ॥ २० ॥ तदा प्राप्तमहादुःखमशिवाराधकैरिव ॥ तदास्मदा
दीन दुःखार्त्तान्नंदिकेशो विलोकयत् ॥ २१ ॥ नंदिकेशोऽस्मदादीनां जायमानमुपद्रवं ॥ दृष्ट्वा निवेदयामास कालकालाय शूलिने ॥ २२ ॥ ततः कृपानि
धिः शूली शूलं [illegible] शूलमुत्तमं ॥ सुरारिनिधनं कर्तुं प्रेषयामास लीलया ॥ २३ ॥ ततस्तदागतं शूलं ज्वालामालासमाकुलं ॥ दृष्ट्वासुरादयः सर्वे जग्मुः पाता
लमुत्सुकाः ॥ २४ ॥ ततः प्रविश्य पातालं त्रिशूलमपि सत्वरं सुरारिनिधनं चक्रे क्षणार्धेनैव शांकराः ॥ २५ ॥ पुरत्रयं ततो दग्धं त्रिशूलोत्थितवह्निना ॥ त

तःपरंययौश्चलंकृतकार्यंहरालयं॥२६॥ततःप्राप्तानिखल्वानिमदीयानिमयाद्विज॥इंद्रःस्वर्गंततःप्रापगुरुवायुपुरोगमः॥२७॥ततोऽस्म्यहंच
वैकुंठंब्रह्मापिस्वालयंययौ॥ततःकृतामहेशस्यपूजायत्नपुरःसरं॥२८॥एवमेवमहादेवोलीलयैवामरद्विषां॥करोतिनिधनंविप्राःप्रतिकल्पेति
सादरं॥२९॥बहुकालंमयाविप्राःस्थित्वैतदनुभूयते॥नेदमन्योविजानातिसत्यमेवोच्यतेमया॥३०॥ ॥श्रीशिवउवाच॥ ॥इतिविष्णुवचः
श्रुत्वाशांकराविस्मिताश्चये॥केशवंप्रष्टुमुद्योगंचक्रुःप्रहसिताननाः॥३१॥ ॥शांकराऊचुः॥ ॥विष्णून्सृजतिगौरीशःप्रतिकल्पेनिजेच्छया॥
तथासतिकथंविष्णोबहुकल्पंकथंस्थितं॥३२॥ ॥श्रीविष्णुरुवाच॥ ॥सृजत्यन्यशरीराणिममैवश्रीमहेश्वरः॥ददातिमह्यंविष्णुत्वमुरुकल्पा
वधिद्विजाः॥३३॥मयासंपूजितःपूर्वंलिंगेसाक्षान्महेश्वरः॥शिवलिंगार्चनेनैवसंतुष्टोभूत्पुराशिवः॥३४॥ततःप्रादुरभूदीशःशिवलिंगेशिवान्वितः
॥तदासंपूजितःशंभुःस्तुतश्चबहुधामया तदामह्यंवरादत्ताःशिवेनबहवोमुदा॥पुनःकृतामयापूजाशंकराययथाविधि॥३६॥त्रिषष्टिकल्पपर्यं
तंविष्णुत्वमपराजितं॥तुभ्यंदत्तमितिप्रीत्यामामुवाचततःशिवः॥३७॥तदाप्रभृतिविष्णुत्वंसदामय्यनुवर्तते॥अतएवमयाज्ञातमिदंसर्वंशिवार्चया
॥३८॥लिंगार्चनेनभगवानतुष्टोभूत्वासदाशिवः॥ददातिपरमामृद्धिंकिंविष्णुत्वेधितिष्ठति॥३९॥शिवलिंगार्चनपरैर्विष्णुत्वंनैवगण्यते॥किंतुवांछं
तितेधीरागाणपत्यादिकंद्विजाः॥४०॥ब्रह्मत्वमपिनेच्छंतिधीराःशंकरपूजकाः॥गाणपत्याधिकंयांचैवाक्रियतेतैरनामया॥४१॥अहंब्रह्माद
यःसर्वेशंकरद्वारकिंकरैः॥ताडयंतेकल्पतोधीरोविष्णुत्वंनाभिवांछितो॥४२॥शिवलिंगंसमभ्यर्च्ययोयोयद्यदभीप्सितं॥प्राप्तुमिच्छति श्रीसांब
तत्तेनप्राप्तव्यंनात्रसंशयः॥४३॥शिवलिंगंप्रयत्नेनयेनसंपूज्यतेसदा॥नतस्यदुर्लभंकिंचित्सत्यंसत्यंनसंशयः॥४४॥शिवलिंगेसदा १६
कार्याशिवपूजामनीषिभिः॥लिंगेव्यंगापिसांगेवाशिवपूजायतोद्विजाः॥४५॥कार्यमस्माभिरनिशंशिवलिंगेशिवार्चनं॥तद्व्यंगमपि
विप्रेंद्राःसांगमेवभविष्यति॥४६॥प्रतिमायांप्रयत्नेनकृतयासांगपूजया॥यत्फलंतत्फलंप्राप्यंव्यंगयालिंगपूजया॥४७॥प्रतिमायांयथा
शास्त्रंसांगशंकरपूजनं॥कर्त्तुंनशक्यतेस्माभिर्विधिर्नज्ञायतेयथार्थतः॥४८॥प्रकाराबहवःसंतिमहादेवार्चनेद्विजाः॥तत्प्रकारपरिज्ञानमस्मा
कंनभविष्यति॥४९॥अल्पबुद्धिभिरस्माभितत्प्रकारविवेचनं॥कर्त्तुंनशक्यतेविप्रागहनत्वादनेकधा॥५०॥समंत्रमस्त्वमंत्रंवालिंगेशंकरपूजनं॥

सर्वार्थप्रदमित्याह जाबालः स्वयमात्मवित् ॥ ५१ ॥ चरमस्त्वचरं वास्तु शिवलिंगं शिवात्मकं ॥ पूजनीयं प्रयत्नेन द्विजैरव्यभिचारतः ॥ ५२ ॥ नार्म
दं स्थावरं लिंगं यदि स्थूलतरं न चेत् ॥ तत्र पूजा प्रयत्नेन कर्त्तव्या प्रतिवासरं ॥ ५३ ॥ आनर्मदं नाशीमं दं वा स्थावरं लिंगमुत्तमं ॥ पूजनीयं प्रय
त्नेन सर्वकालेषु सादरं ॥ ५४ ॥ स्थूलं यन्नार्मदं लिंगं तत्तु कालत्रये द्विजैः ॥ पूजनीयं बिल्वपत्रैः पुष्पैश्च विविधैर्नवैः ॥ ५५ ॥ सायंकाले प्रयत्नेन
स्थावरं लिंगमादरात् ॥ पूजनीयं बिल्वपत्रैरभिषेकपुरःसरं ॥ ५६ ॥ न यत्र स्थावरं लिंगं न तत्रैकं दिनं वसेत् ॥ उषित्वोपोषणं कृत्वा पंचगव्ये
न शुध्यति ॥ ५७ ॥ शिवालयविहीनस्य ग्रामस्य यदि दर्शनं ॥ तदा विलोकयेत्सूर्यमन्यथा पतितो भवेत् ॥ ५८ ॥ शिवालयविहीनस्तु ग्रामो द्विज
यद्यतोपि सः ॥ चंडालग्राम एवेति विज्ञेयो ब्रह्मवादिभिः ॥ ५३ ॥ यः शिवस्थानरहिते ग्रामे स्थायी भवेद्द्विजः ॥ दिनार्धवादिनं वासः पुनः संस्कार
मर्हति ॥ ५४ ॥ अशिवालयदेशेषु न गंतव्यं कदाचन ॥ यदि गच्छेत्प्रमादेन तत्प्रकृच्छ्रं समाचरेत् ॥ ५५ ॥ अशिवालयदेशस्थैर्नाभिभाषेत सर्वथा ॥ नै
कत्र संविशो मोहात्संविशेद्यदि सोपि सः ॥ ५६ ॥ न यत्र शांकरो विप्रः स्थावरं लिंगमप्युरु ॥ द्विजैस्तत्र न गंतव्यं स्वप्नेपि किमुतान्यदा ॥ ५७ ॥ शिवलिं
गावृते देशे स्थातव्यं द्विजपुंगवैः ॥ शिवलिंगानावृत्ते तु न स्थातव्यं मनीषिभिः ॥ ५८ ॥ शिवलिंगविहीनैस्तु न गंतव्यं तैर्बहिर्द्विजैः ॥ शिवलिंगं समादा
य गंतव्यं यत्र कुत्रचित् ॥ ५९ ॥ शिवलिंगानर्पितान्नं न भोक्तव्यं कदाचन ॥ शिवलिंगमनभ्यर्च्य न पेयमुदकं द्विजैः ॥ ६० ॥ न शेतव्यं गृहे रात्रौ शिवलिंग
विवर्जिते ॥ रात्रौ वने वा शेतव्यं शिवलिंगसमन्विते ॥ ६१ ॥ पुरा कश्चिद्द्विजवरो वेदशास्त्रविशारदः ॥ शिवतीर्थाटनपरः सर्वदा शिवचिंतकः ॥ ६२ ॥
स गच्छति यदा विप्रो बहिर्ग्रामान्तरे थवा ॥ शिवलिंगं समादाय तदा गच्छति सादरं ॥ ६३ ॥ द्विजानधीतवेदांश्च शिवाचारविवर्जितान् ॥ स न पश्यति विप्रें
द्रः शिवपूजापरायणः ॥ स शृणोति प्रयत्नेन शिवनामांकिता कथाः ॥ शिवचिन्हानंकितेन न वदत्येव ॥ ६५ ॥ यो वदत्यति यत्नेन शिवस्मरणपूर्वकं ॥
स तेन सह शैवेन वदति प्रीतिपूर्वकं ॥ ६६ ॥ शिवेत्युक्त्वा प्रतिग्रासं संभुंक्ते भगवत्प्रियः ॥ शिवेत्युक्त्वा पिबत्यंबु शंकराय समर्पितं ॥ ६७ ॥ शिवेत्युक्त्वा
फलादीनि स भक्षयति सादरं ॥ शिवेत्युक्त्वा स वस्त्राणि परिधत्तेनुवासरं ॥ एवं स्थितः स विप्रेंद्रः शिवयात्रार्थमुद्यतः ॥ शिवलिंगं समादाय प्रस्थितः
शिवचिंतकः ॥ ६९ ॥ ततः परं महादेवो विप्ररूपमुपाश्रितः ॥ ययौ तेन सहारण्ये भस्मानंकितविग्रहः ॥ ७० ॥ अरण्ये संचरन् विप्रं भस्मानंकितवि
ग्रहं ॥ विलोक्य भानुमालोक्य स त्वरं गंतुमुद्यतः ॥ ७१ ॥ तदानीमवदद्विप्रं विप्ररूपधरः शिवः ॥ मामात्यज द्विजात्यल्पं व्रजेति ग्लानिपूर्वकं ॥ ७२ ॥ तं

सक्काग्रेगतःशीघ्रंश्रुत्वापितदुदीरितं॥अशैवोयंस्थितोदूरेसम्यगासीदितिद्विजः॥७३॥भिल्लरूपंततोधृत्वारुद्राक्षानपिशंकरः॥धृत्वाभस्मच
सर्वांगेशिवेत्याहशनैःशनैः॥७४॥ततःपरंशिवेत्युक्तिंश्रुत्वोत्फुल्लमुखांबुजः॥परावृत्यददर्शैनंभिल्लरूपंधरंशिवं॥७५॥रुद्राक्षभूषणंभिल्लंभ
स्मसंवीतविग्रहं॥कृशांगंसादरंदृष्ट्वाननामभुविदंडवत्॥७६॥ततोबिल्वदलैःश्रुत्वैतस्मैपूजांचकारसः॥भिल्लरूपधरःशंभुस्ततस्तमवदद्द्वि
जं॥७७॥ ॥भिल्लउवाच॥ ॥त्वयाहंननमस्कार्योभिल्लोहंहीनजातिजः॥त्वमुत्कृष्टोद्विजवरस्तत्रापिशिवपूजकः॥७८॥इतितस्यकृशांगस्यरु
द्राक्षाभरणस्यच॥भस्मभूषितदेहस्यश्रुत्वावाचमुवाचतं॥७९॥ ॥द्विजउवाच॥ ॥भिल्लश्शूद्रोथवाक्षुद्रःपुल्कसोवास्तुकिंमम॥शि
वचिन्हधरोजंतुर्ममपूज्योनसंशयः॥८०॥शिवचिन्हंधृतंयेनसपूज्योभक्तिपूर्वकं॥शिवचिन्हविहीनांगोद्विजोप्यर्च्योनसर्वथा॥८१॥इतितद्वच
नंश्रुत्वातद्भक्तिंपुनरीश्वरः॥विज्ञातुमाहकृशवत्कृशकंठवदास्तिकाः॥८२॥ ॥भिल्लउवाच॥ ॥मयात्यक्तानिशस्त्राणिशक्तिहीनेनप
र्वते॥शक्तिर्यद्यपिवक्तुमपिब्रह्मन्ममनास्त्यधुनाध्रुवं॥८३॥क्षुधयापीडितोनित्यमरण्येनिवसाम्यहं॥देहिमह्यंजलंविप्रततोन्नमपिसादरं॥
॥८४॥ग्रामंनयातियत्नेनमामीदृशमनुत्तम॥स्थातुंनशक्यतेघोरेवनेस्मिन्मृगपीडया॥८५॥ ॥द्विजउवाच॥ ॥गमनेयद्यशक्ति
स्तेतदास्कंधेममाधुना॥आरुह्याग्याहिभस्मांगभयंमाकुरुसर्वथा॥८६॥अन्नपानादिभिर्नित्यंकरिष्येतवपोषणं॥भ्रातृवद्भृत्यवद्भिल्लचिंतांमाकु
रुमाकुरु॥८७॥विनान्नेनशरीरंतेजातंक्षीणतरःततः॥दुग्धाज्यसहितंदास्येपुष्ट्यर्थंनित्यमोदनं॥८८॥औषधान्यपियत्नेनदापयिष्याम्यसंश
यं॥मरणादपिसंरक्ष्येमृत्योरपिभयंत्यज॥८९॥अस्थिमात्रावशिष्टंतेशरीरंजातमीदृशं॥अतःपरंवस्थानमत्रकार्यंनसर्वथा॥९०॥उत्थूलना
र्थमप्यस्यनशक्तिर्दृश्यतेतव॥उत्धूल्यंतेत्वयांगानिकथंभस्माभिगृह्यते॥९१॥रुद्राक्षधारणेशक्तिस्तवनास्त्येवसर्वथा॥कथंतथापिरुद्राक्षाधृ
ताःसंतित्वयाधुना॥९२॥धन्योसिकृतकृत्योसिशिवचिन्हंयतस्त्वया॥धृतमस्त्यतियत्नेनदुर्बलेनापिसादरं॥९३॥यथास्तितवविश्वासोभस्मरु
द्राक्षधारणे॥तथाममास्तिविश्वासोभस्मरुद्राक्षधारणे॥९४॥यस्मिन्भवतिभाग्येनसततंभगवत्कृपा॥तस्यैवभवतिश्रुत्धाभस्मरुद्राक्षधारणे॥९५॥
त्वयिभाग्यप्रदानित्यमस्त्येवभगवत्कृपा॥यतस्त्वैवंविश्वासोभस्मरुद्राक्षधारणे॥९६॥ ॥विष्णुरुवाच॥ ॥इत्युक्त्वातंपुनर्भक्त्याऽप्रण
म्याभ्यर्च्यभस्मना॥समादायस्वकेस्कंधेसमारोपयदादरात्॥९७॥ततःपरंमहादेवःप्रादुरासीत्कृपानिधिः॥उमासंश्लिष्टवामांगोनानाप्रमथसे

वितः॥ ततःपरं महादेवं दृष्ट्वाप्रमथसेवितं॥ पूजया मासयत्नेन तुष्टाव चकृतांजलिः॥ ९९॥ ॥ द्विजउवाच॥ ॥ नमस्तेभक्तमंदार नमस्तेवृषभध्व
ज॥ नमस्तेपार्वतीनाथ नमस्तेभस्मभूषण॥ १००॥ नमस्तेप्रमथाधीश नमस्तेचंद्रशेखर॥ नमस्तेकरुणासिंधो नमस्तेभक्तवत्सल॥ १॥ नमस्तेव्या
घ्रचर्मांग नमस्तेशेषभूषण॥ नमस्तेमृगहस्ताय नमस्तेशूलपाणये॥ २॥ नमस्तेकालकालाय नमस्तेत्रिपुरांतक॥ नमस्तेविष्णुतातायनमस्तेकाम
नाशक॥ ३॥ नमस्ते पुण्यरूपाय नमस्ते यज्ञरूपिणे॥ नमस्तेज्ञानरूपाय नमस्तेज्ञानदायक॥ ४॥ नमस्तेज्ञानवृत्ताय नमस्तेवृत्तिरूपिणे॥ नमस्ते
वीरभद्राय भद्ररूपायतेनमः॥ ५॥ नमस्तेभद्रदाकार नमस्तेभद्रदप्रभो॥ नमस्तेपरमोत्कृष्टपरब्रह्मन्नमोस्तुते॥ ६॥ नमस्तेनिर्गुणामेय नमस्तेस
गुणप्रभो॥ नमस्तेसर्वदेवेश नमस्तेसर्वपालक॥ ७॥ नमस्तेसर्ववंद्येश नमस्तेसर्वपूजित॥ नमस्तेगिरिरूपाय नमस्तेवनरूपिणे॥ ८॥ नमस्तेस
र्वरूपाय पार्वतीनाथतेनमः॥ लिंगरूप नमस्तेस्तु नमस्तेलिंगपूजित॥ ९॥ ॥ विष्णुरुवाच॥ ॥ इतिस्तुतोमहादेवोबरं वरयसुव्रत॥ वरदो
हमितिप्रीत्यातमुवाचद्विजोत्तमः॥ १०॥ ॥ द्विजउवाच॥ ॥ ममास्त्वत्यंतविश्वासो भस्मरुद्राक्षधारणे॥ तथैवशिवपूजायांविश्वासोस्तुममप्र
भो॥ ११॥ विश्वासोस्तुममस्वामिंस्तवनायानुकीर्तने॥ विश्वासोस्तुममस्वामिन्सदाशिवकथाश्रुतौ॥ १२॥ विश्वासोस्तुममश्रीमन्शिवक्षेत्राटनेसदा॥
विश्वासोस्तुममश्रीमन्शिवतीर्थनिषेवणे॥ १३॥ विश्वासोस्तुममश्रीमन्शिवनैवेद्यभोजने॥ विश्वासोस्तुममश्रीमन्शिवभक्तजनार्चने॥ मागृह्णातुकदा
पीशाचक्षुरेतदशांकरं॥ मागृह्णातुश्रोत्रमेतन्नामाद्येतदशांकरं॥ १५॥ मास्तुवासोममस्वामिन्नशांकरजनालये॥ मास्तुप्रीतिर्ममस्वामिन्नशांकरजना
लये॥ १६॥ मास्तुप्रीतिर्ममस्वामिन्नशांकरजनैः सह॥ भस्मोद्धूलितदेहस्यरुद्राक्षाभरणस्यमे॥ १७॥ देहपातोमभूत्स्वामिन्शिवस्मरणपूर्वकं॥ सर्वे
प्येतेवरादेयामह्यमद्यमहेश्वर॥ १८॥ अनाथनाथसर्वज्ञकृपालोपार्वतीपते॥ ॥ विष्णुरुवाच॥ ॥ इतितद्वचनंश्रुत्वासंतुष्टःपरमेश्वरः॥ दत्वा
वरान्पुनस्तेन पूजितोंतर्दधेशिवः॥ १९॥ एतादृशःकृपासिंधुर्भगवान्भक्तवत्सलः॥ पूजनीयःप्रयत्नेनाशिवलिंगेशिवात्मके॥ २०॥ शिवलिं
गार्चनपरोनित्यंशिवपरायणः॥ सहस्रेषुभवत्येकोभुविपुण्यतपोबलात्॥ २१॥ श्रद्धाशंकरपूजायांसहसानभविष्यति॥ सैवलब्धायदिश्रद्धात
दामुक्तिरदुर्लभा॥ २२॥ श्रद्धाभवतिभाग्येनाशिवलिंगैकपूजने॥ सैवश्रद्धायतःसाक्षाभुक्तिदामुक्तिदापिसा॥ २३॥ शिवलिंगान्यपूजायामभा

श्रीशिवर०७ ग्यानां दुरात्मनां ॥ श्रद्धा भवति साश्रद्धा नरकस्यैव साधनं ॥२४॥ न वेदविहितं विप्राः शिवलिंगान्यपूजनं ॥ वेदानुक्तार्चनाद्याति सर्वेपि नर उ॰स॰पू॰
१८ कं प्रति ॥२५॥ निधनेत्यादिभिर्मन्त्रैर्यथालिंगार्चनं श्रुतं ॥ तथा न श्रूयते क्वापि शिवलिंगान्यपूजनं ॥२६॥ यावंतः संति पापिष्ठाः शिवलिंगान्यपू
जकाः ॥ तावंतो निरयं यांति यावदाचंद्रतारकं ॥२७॥ महापातकिनामेवा शिवलिंगान्यपूजने ॥ भक्तिर्भवति नान्येषामिति जाबालवादिनः ॥२८॥ ब्र
ह्महत्यादिपापानि यथा नरकसाधनं ॥ शिवलिंगान्यपूजापि तथा नरकसाधनं ॥२९॥ शिवान्यः कश्चिदाराध्योस्ति इतीत्यपि यो वदेत ॥ स वेदबाह्यः श्वं ज
डालो जारजश्चेति मन्यतां ॥३०॥ शिवलिंगधिया कार्यं शैवानामपि पूजनं ॥ न कार्यं बहिःशैवेषु मत्यं बुधिर्मनीषिभिः ॥३१॥ लिंगानि संति पुण्यानि स्थावराणि
चराणि च ॥ द्विविधानीति वेध्यानि चरलिंगानि तत्र तु ॥३२॥ यथा रत्नादिलिंगानि चरलिंगानि सुव्रताः ॥ तथैव चरलिंगानि शांकराः केवलं द्विजाः ॥३३॥ न
थाच शांकराणां चा शिवलिंगधिया द्विजैः ॥ पूजा कार्या प्रयत्नेन शिवतुष्ट्यर्थमन्वहं ॥३४॥ यादृशं तादृशं वस्तु शिवलिंगं शिवात्मकं ॥ पूजनीयं प्रय
त्नेन नित्यमव्यभिचारतः ॥३५॥ पुरा सुमेरुशिखराद्वाप पृथिवी महः ॥ तदैतन्महो विप्राः पुरुषो भूदनुत्तमः ॥३६॥ तमेव पुरुषं दृष्ट्वा तदा हिमवदाश्र
याः ॥ पूजयामासुरर्घ्याद्यैः शौनकाद्या मुनीश्वराः ॥३७॥ ततः प्रसन्नहृदयस्तमेव पुरुषं तदा ॥ कोसि स्वामिन्निति प्रश्नं चक्रुस्ते शौनकादयः ॥३८॥ ततः सु श्रीशिव
पुरुषो धीमन् सर्वधर्मप्रवर्तकः ॥ सत्यभूतं वचः प्राह वेदो हमिति सादरं ॥३९॥ ततस्ते ऋषयस्सर्वे शौनकाग्निपुरोगमाः ॥ प्राहुरत्यंत संतुष्टास्तं १८
वेदपुरुषं तदा ॥४०॥ ॥ ऋषय ऊचुः ॥ ॥ वेदोसि वेदतत्वज्ञ सर्ववेदार्थविद्वर ॥ त्वत्तः संशयविच्छेदो भविष्यत्यद्य तु ध्रुवं ॥४१॥ कः परः सर्वदेवे
षु ध्येयः को भगवान्स्थितः ॥ इदं सर्वमशेषेण वद वेदाद्य सादरं ॥ ॥ वेदपुरुष उवाच ॥ ॥ परो महेश्वरो ज्ञेयः सर्वदेवोत्तमस्ततः ॥ ध्येयः स एव भ न
गवान् ध्येयो न्यो न मनीषिभिः ॥४३॥ विष्णुरुवाच ॥ ॥ इतितद्वचनं श्रुत्वा मुनयः शौनकादयः ॥ पुनः संशयमापन्नाः पप्रच्छुर्विनयानताः ॥४४॥
॥ ऋषय ऊचुः ॥ ॥ को वा महेश्वरो देवः तस्य रूपं च कीदृशं ॥ वद सर्वं विशेषेण वेदवाक्यैर्यथाक्रमं ॥४५॥ ॥ वेदपुरुष उवाच ॥ ॥ यो वेदा
दौ स्वरः प्रोक्तो वेदांते च प्रतिष्ठितः ॥ तस्य प्रकृतिलीनस्य यः परः स महेश्वरः ॥४६॥ नान्यो महेश्वरो ज्ञेयो रुद्र एव स शंकरः ॥ स परः सर्वदेवेषु हि जा
ध्येयः स एव हि ॥४७॥ सर्वकर्त्ता सर्वसाक्षी शिव एव महेश्वरः ॥ सत्यमेतत्पुनः सत्यं उद्धृत्य भुजमुच्यते ॥४८॥ सर्वश्रुतिश्रुतो नित्यः सांब एव महे
श्वरः ॥ सत्यमेवं तत्पुनः० ॥४९॥ सर्वश्रुतिश्रुतो नित्यो रुद्र एव महेश्वरः ॥ सत्यमेतत्पु० ॥५०॥ सर्वश्रुतिश्रुतो नित्यो भर्ग एव महेश्वरः ॥ सत्यमे० ॥५१॥

सर्वश्रुतिश्रुतोनित्योसोमएवमहेश्वरः॥ सत्यमे०॥ ५२॥ सर्वश्रुतिश्रुतोनित्योभीमएवमहेश्वरः॥ सत्यमे०॥ ५३॥ सर्वश्रुतिश्रुतोनित्यरुद्र
क्षरएवमहेश्वरः॥ सत्यमेत०॥ ५४॥ सर्वश्रुतिश्रुतोनित्यस्थाणुरेवमहेश्वरः॥ सत्यमे०॥ ५५॥ सर्वश्रुतिश्रुतोनित्यः शंभुरेवमहेश्वरः॥
सत्यमे०॥ ५६॥ सर्वश्रुतिश्रुतोनित्यः सर्वएवमहेश्वरः॥ सत्यमेत०॥ ५७॥ सर्वश्रुतिश्रुतोनित्योभवएवमहेश्वरः॥ सत्यमेत०॥ ५८॥ सर्व
श्रुतिश्रुतोनित्यउग्रएवमहेश्वरः॥ सत्यमेतत्पुनः सत्यमुद्धृत्यभुजमुच्यते॥ ५९॥ विप्राविश्वाधिकोरुद्रोविश्वंविष्ण्वादिकंजगत्॥ नरुद्रा
दधिकः कोपितस्मात्सपरउच्यते॥ ६०॥ यः सोमोजनिताविष्णोः सविष्णोरधिकस्ततः॥ विष्ण्वादिजनितासोमः सर्वदेवाधिको ध्रुवं॥ ६१॥
योवैरुद्रः सभगवान्अन्योनभगवान्ध्रुवं॥ सत्यमेतत्पुनः सत्यमुद्धृत्यभुजमुच्यते॥ ६२॥ ध्येयोमुक्त्यर्थिभिर्नित्यंशिवएकः शिवशंकरः॥ स
त्यमेतत्पुनः सत्यमुद्धृत्यभुजमुच्यते॥ ६३॥ निधनेत्यादिभिः कार्यंशिवलिंगार्चनंद्विजैः॥ शिवलिंगस्वरूपेणयतस्तिष्ठतिशंकरः॥ ६४॥ शिवस्यैवा
र्चनंकार्यंलिंगरूपस्यवैदिकैः॥ अन्यथानरकंयांतिसत्यमेवोच्यतेमया॥ ६५॥ सदृशंप्रभुं योवैरुद्रः सभगवान्सविश्वाधिकउच्यते॥ महेश्वरः स
एवेतिज्ञात्वापूज्योमहेश्वरः॥ ६६॥ महेश्वरमुमाकांतमनन्यसदृशंप्रभुं॥ योन्यतुल्यतयावेत्तिसचंडालइतिस्मृतः॥ ६७॥ ईशानंसर्वविद्याना
मीश्वरंजगतांप्रभुं॥ योन्यतुल्यतयावेदसचंडालइतिस्मृतः॥ ६८॥ ईशानः सर्वविद्यानामित्यादैर्वचनैर्मया॥ ध्येयः शंकरएवेतिनिश्चितंबहुधा
पुरा॥ ६९॥ शिवलिंगस्वरूपस्यशिवस्यपरमात्मनः॥ कर्त्तव्यमर्चनंनित्यंसाक्षान्मुक्तिप्रदायकं॥ ७०॥ ब्राह्मण्यमपिसंप्राप्ययोनार्चयतिशंकरं॥
सदुर्भगइतिज्ञेयोब्राह्मणैर्ब्रह्मवित्तमैः॥ ७१॥ येनततंतपः पूर्वमघोरंशंकरालये॥ तस्यैवभवतिश्रद्धाशिवलिंगसमार्चने॥ ७२॥ यः करिष्यति
यत्नेनशिवलिंगेशिवार्चनं॥ ससाक्षाच्छंकरंसांबंसमर्चयतिसर्वदा॥ ७३॥ लिंगेसमर्चितः शंभुर्ददातिवरमिप्सितं॥ अतः प्रयत्नतोनित्यंकर्त्तव्यं
लिंगपूजनं॥ ७४॥ उद्धूलनंत्रिपुंड्रंचतथारुद्राक्षधारणं॥ कर्त्तव्यमतियत्नेनलिंगपूजापरैर्द्विजैः॥ ७५॥ कर्त्तव्योलिंगपूजांतेपंचाक्षरजपोद्विजैः॥
सहस्त्रमप्रसादेनरुद्राध्यायजपस्ततः॥ ७६॥ रुद्राध्यायेनकर्त्तव्यंशिवलिंगाभिषेचनं॥ बिल्वपत्रैः पूजनीयंशिवलिंगंप्रयत्नतः॥ ७७॥ अयंमे
हस्तइत्याद्यैः सव्यहस्ततलेनयः॥ उपस्पृशेल्लिंगपार्श्वेसपापेभ्योविमुच्यते॥ ७८॥ प्रदक्षिणांत्रिकंकार्यमधिकंतुशिवालये॥ कृतांजलिपुटैरेव

 शिवस्मरणपूर्वकं॥ यानिकानिचपापानिब्रह्महत्यादिकानिच॥ तानितानिविनश्यंतिप्रद क्षिणपदेपदे॥ ८०॥ उत्थायोत्थायसाष्टांगान्प्रणामान्ववि 
विंशदुत्तरान्॥ यःकरिष्यतियत्नेनसपापेभ्योविमुच्यते॥ ८१॥ प्रणम्यपरमेशाग्रेकरताडनपूर्वकं॥ योनृत्यत्यन्वहंभक्त्यासपापेभ्योविमुच्यते॥ ८२॥
वृषस्यवृषणंस्पृष्ट्वावृषशृंगांतरान्मुदा॥ यःपश्येल्लिंगमैशानंसपापेभ्योविमुच्यते॥ ८३॥ भुवनत्रयतीर्थानिसर्वाण्यपिनिशामुखे॥ वृषांडंसमुपा
श्रित्यतिष्ठंतिमुनिसत्तमाः॥ ८४॥ वृषांडं यःपश्येत्सायंसतीर्थान्यखिलान्यपि॥ स्पृष्टःस्नानश्चसततंपूतश्चात्रनसंशयः॥ द्रष्टव्यमैश्वरंलिंगंवृष
शृंगांतराद्द्विजाः॥ वृषेशवृषणंस्पृष्ट्वाशिवस्मरणपूर्वकं॥ ८६॥ प्रदक्षिणनमस्कारान्कृत्वा दृष्ट्वाचशंकरं॥ पुनःप्रदक्षिणंकृत्वाशिवलोकेमही
यते॥ ८७॥ इमानिनित्यकार्याणिभस्मधारणपूर्वकं॥ शिवलिंगार्चनादीनिब्राह्मणाद्यैःप्रयत्नतः॥ ८८॥ सततंशिवपूजायांवित्तंयस्यानुवर्त्तते॥
सधन्यइतिविज्ञेयस्तेनमुक्तिरवाप्यते॥ ८९॥ शिवपूजापिकर्त्तव्याशिवलिंगेनिरंतरं॥ शिवलिंगेकृतापूजासर्वकामप्रदायनः॥ ९०॥ येपूजयंतिस
ततंशिवलिंगंशिवात्मकं॥ नतेषांगर्भवासादिदुःखानिद्विजपुंगवाः॥ ९१॥ शिवनामामृतंपीतंमुदायेनमुहुर्मुहुः॥ नपिबत्येवसपुनःमातुस्तन्यंपु
नःपुनः॥ ९२॥ शिवनामामृतेपीतेजन्मैवनतथासति॥ स्तनपानंकथंकुर्यादतस्तन्नैवसर्वथा॥ ९३॥ ॥ विष्णुरुवाच॥ ॥ इत्युक्तंतद्वचःश्रुत्वा
प्रहृष्टाःशौनकादयः॥ तंवेदंपूजयामासुः पूजितोंतर्दधेचसः॥ ९४॥ ततःपरंशौनकाद्याःशतकोटिमुनिश्वराः॥ शिवलिंगार्चनंकर्त्तुंतदाचक्रुरु 
पक्रमं॥ ९५॥ उद्धूल्यभस्मनांगानित्रिपुंड्रांकितमस्तकाः॥ रुद्राक्षधारणंकृत्वाचक्रुःशंकरपूजनं॥ ९६॥ कृत्वामृन्मयलिंगानिबिल्वपत्रादिभि 
र्मुदा॥ चक्रुर्वत्सरपर्यंतंशिवलिंगार्चनंद्विजाः॥ ९७॥ ततःपरंमहादेवःशतकोटिस्वरूपधृक्॥ आविरासीत्कृपासिंधुःप्रतिलिंगार्चकांगणे॥
॥ ९८॥ ददृशुःशौनकाद्यास्तेमुनयोयुगपद्द्विजाः॥ नानालंकारसंपन्नान्शतकोटिमहेश्वरान्॥ ९९॥ एकोपिश्रीमहादेवोनानारूपधरःस
दा॥ प्रत्यक्षमगमत्तेषामप्रत्यक्षोपिवस्तुतः॥ १००॥ शतकोटिवृषारूढंशतकोटिशिवान्वितं॥ दृष्ट्वातेमुनयःसर्वेपूजांचक्रुर्यथाविधि॥
॥ १॥ श्रीरुद्रंविविधाकारंरुद्राध्यायेनतेद्विजाः॥ तुष्टुवुर्हृष्टमनसःकृतांजलिपुटःस्तदा॥ २॥ ततोमुनीनुवाचैवंनानारूपधरःशिवः॥ इष्टंदा
स्यामिसर्वेभ्योभवद्भ्यइतिसादरं॥ ३॥ ॥ मुनयऊचुः॥ ॥ मोक्षंदेहिमहादेवमोक्षदामरसत्तम॥ पुरुषार्थपरोमोक्षस्ततोमोक्षस्त्वपेक्षितः॥
॥ ४॥ किंचास्माकंमहादेवशिवलिंगार्चनेसदा॥ दृढोभवतुविश्वासःशिथिलोमास्तुसर्वथा॥ ५॥ किंचास्माकंमहादेवकेवलेभस्मधारणे॥

दृढोभवतु॰॥ ६॥ किंचास्माकंमहादेवसदारुद्राक्षधारणे॥ दृढोभवतु॰॥ ७॥ किंचास्माकंमहादेवरुद्राध्यायजपेसदा॥ दृढोभवतु॰॥ ८॥
किंचास्माकंमहादेवपंचाक्षरजपेसदा॥ दृढोभवतु॰॥ ९॥ किंचास्माकंमहादेवशिवतीर्थाटनेसदा॥ दृढोभवतु॰॥ १०॥ किंचास्माकंमहादेव
शिवनैवेद्यभक्षणे॥ दृढोभवतु॰॥ ११॥ किंचास्माकंमहादेवशिवभक्तजनार्चने॥ दृढोभवतुविश्वासःशिथिलोमास्तुसर्वथा॥ १२॥ ॥विष्णुरुवाच॥ ॥
तद्याचितावराः सर्वेगिरिजापतिनातदा॥ दत्ताःस्ततःपरंजातापुष्पवृष्टिर्मनोहरा॥ ततःपरंमहादेवोनानारूपधरोपिसः॥ क्षणार्धेनैवयुगपल्लिंग
रूपीतिरोदधे॥ १४॥ एतादृशंकृपासिंधुंलिंगरूपिणमीश्वरं॥ नित्यमव्यभिचारेणपूजयंतिमनीषिणः॥ १५॥ ॥शिवउवाच॥ ॥एवमुक्त्वा
स्थितोविष्णुरेतस्मिन्नंतरेरविः॥ अस्ताद्रिंसमवापाथततोमौनान्निसूचयन्॥ १६॥ विष्ण्वाद्याःदैवतगणाःऋषयश्चततःपरं॥ शिवगंगात
टंप्रापुःसंध्याकालेवरानने॥ १७॥ ततस्नात्वासमुद्धूल्यभस्मनागानिसादरं॥ त्रिपुंड्रधारणंचक्रुस्ततोरुद्राक्षधारणं॥ १८॥ ततोबिल्वद
लादीनिपूजोपकरणानिच॥ आदायपूजयामासुर्मूलस्थानेश्वरंशिवे॥ १९॥ ततोहेमसभामध्येरत्नस्तंभविराजिते॥ मयानाट्यंसमार
ब्धंसायंकालेमनोरमे॥ २०॥ नाट्यकालेनंदिकेशोगृहीत्वावेत्रमुत्तमं॥ चकारदूरतोदेवान्मुनीनपिवरानने॥ २१॥ प्रमथाःकोटिशोदे
वितदामामनघंशिवं॥ तुष्टुवुर्हृष्टमनसःकृतांजलिपुटस्तदा॥ २२॥ मूर्धस्त्वंजलिमादायविष्णुब्रह्मादयःसुराः॥ तुष्टुवुर्दूरतःस्थिता
प्रहृष्टहृदयांबुजाः॥ २३॥ तदाजयजयेत्येवंशब्दादुंदुभिनिस्वनाः॥ तूर्यःस्वनाश्चसंजाताःसर्वदिक्षुमनोरमाः॥ २४॥ पुष्पवृष्टि
रभूद्देवितदाकल्पतरुच्युता॥ सुगंधाःशीतलाःशांतावायवोपिववुस्तदा॥ २५॥ तदामृदंगवाद्यानिगृहीत्वाकेशवःशिवे॥ सेवांक
र्तुंसमारंभेदेविसर्वेश्वरस्यमे॥ २६॥ ब्रह्मातालांगृहीत्वामांशिवेवेगागपिप्रिये॥ वीणांगृहीत्वाविमलांशिवेवेगानलोलुपा॥ २७
नाट्यसंरंभसंपन्नंगंधर्वागणनायकाः॥ मुदाजयजयेशेतितुष्टुवुर्हृष्टमानसाः॥ कृतंनाट्यंततोदेविभवत्सन्मुखमादरात्॥ ना
ट्यविद्यामभिनयन्मोहयन्जगतांत्रयं॥ २९॥ पादंविन्यस्यपादाग्रेहस्तेहस्तेपिसंभ्रमात्॥ कृत्वापिकुटिलांग्रीवांकृतंनाट्यंमयाशिवे॥
॥ ३०॥ धमिंधमिरिवाभून्मेन्यासोन्यासइवाभवत्॥ चित्रंचित्रमिवाभून्मेनर्तकस्यतवाग्रतः॥ ३१॥ व्यूहंव्यूहइवाभून्मेरतिरासीद्रतिर्यथा॥

विरक्तिरासीत्सुभगेविरक्तिरिवसर्वतः॥३२॥बिकारोभूद्विकारोनिर्विकारस्यवस्तुतः।बिकारइवसंभूतोनिर्विकारस्यचेष्टितं॥३३॥अंगुल्यग्रेनिधा 
यांगमुत्तमांगेतदग्रकं।निधायनृत्यतोदेविममाभून्मंगलंस्वतः॥३४॥ नित्यमंगलसंतुष्टःतन्मंगलमनर्गलं॥युगपन्मेलितंजातंमंगलेमंगलंयथा॥३५॥
नृत्यव्यूहसमाविष्टंददृशुःकेचिदास्तिकाः॥केचिन्नददृशुर्देविभ्रमंतोदिक्षुसर्वतः॥३६॥नृत्याकुंचितसव्यचारुचरणप्रांतोल्लसन्नूपुरंलीलाचालितरत्नकं
कणमृरणत्कारोत्करश्रीविणं॥दीर्घानर्घ्यजटासटाबिघटनत्रुट्यन्महोडुच्छटं।नृत्यंतंददृशुःशिवेसुरगणाःसायंमुदामांशिवं॥३७॥ ॥इतिश्रीशि
वरहस्येउग्राख्येसप्तमांशेशिवगौरीसंवादोनामचतुर्विंशोध्यायः॥२४॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥श्रीगणेशायनमः॥ ॥श्रीशिवउवाच॥ ॥पश्यतांनृत्यमानंदंसुराणांशोभनेतथातः॥क्षणमात्रमभूद्रात्रिररुणोप्युदितस्ततः।ततःस्नात्वायथाश
स्त्रंउद्धूल्यांगानिभस्मना॥रुद्राक्षधारणंकृत्वासंध्यांचक्रुस्ततःपरं॥२॥ततोविष्णुविधींद्राद्याःमुनयश्चप्रयत्नतः॥श्रीमूलस्थाननाथंमांपूजयामा
सुरंबिके॥३॥प्रदक्षिणादिकंकृत्वापंचाक्षरजपंततः॥सर्वेहेमसभामध्येंप्रविष्टाःकमलानने॥४॥ततस्तेशांकराःसर्वेभस्मोद्धूलितविग्रहाः॥शिव
धर्मान्वदस्वेतिविष्णुमूचुर्मदर्चकं॥५॥ततःप्रणम्यविष्णुर्मांभक्त्याविनयपूर्वकं॥मदर्चनफलंवक्तुंमुदैवोपक्रमेशिवे॥६॥ ॥विष्णुरुवाच॥ ॥
भुक्तिमुक्तिप्रदंपुण्यंश्रीमहादेवपूजनं॥श्रुतंश्रुतिषुसर्वत्रतत्कार्यममरैर्द्विजैः॥७॥बिल्वपत्रेणसंपूज्यलिंगरूपिणमीश्वरं॥ब्रह्महत्यादिकोटिभ्यो
मुच्यतेनात्रसंशयः॥८॥बिल्वपत्रैर्महादेवःपूजितःश्रद्धयाद्विजाः॥अवशोपिस्वतःशुद्धोवशोभवतिवस्तुतः॥९॥पुराकश्चिद्द्विजवरःशिवलिंगा 
र्चनप्रियः॥बिल्वपत्रैर्महादेवंपूजयित्वास्थितःसदा॥१०॥बिल्वपत्राण्यलभ्यानिभविष्यंतीतिशंकया॥सशुष्कबिल्वपत्राणिगृहेसंस्थाप्यसं 
स्थितः॥११॥नवानिबिल्वपत्राणिनप्राप्नोतियदातदा॥शिवलिंगंबिल्वपत्रैःशुष्कैरभ्यर्च्यसंस्थितः॥१२॥बिल्वपत्रैरनभ्यर्च्यशिवलिंगंशिवात्म
कं॥नपिबत्येवसजलंतृषार्तोपिप्रयत्नतः॥१३॥एवंस्थितेनतेनैवसुप्रीतःशंकरःकृतः॥बिल्वरक्षकइत्येतन्नामतस्यबभूवच॥१४॥ततःक
दाचिद्गौरीचेशस्तस्मैदातुंवरंद्विजाः॥चोररूपसमाश्रित्यप्रविवेशतदालयं॥१५॥चोररूपधरैरेवप्रमथैरपिसंवृतः॥तंद्विजंगृहमध्यस्थंमुवा
चस्वार्चकंशिवः॥१६॥ ॥शिवउवाच॥ ॥रेरेकिंक्रियतेविप्रद्रव्यंदर्शयदर्शय॥अन्यथाताडयिष्यामिप्राणान्हराम्यसंशयं॥१७॥ ॥
॥विष्णुरुवाच॥ ॥इत्युक्तस्तद्वचःश्रुत्वासविप्रोदुःखितस्तदा॥बिल्वपत्रघटाःसर्वेधनंनेतीशमब्रवीत्॥इत्युक्त्वाबिल्वपत्राणिघटमध्य

इत्युक्त्वागृहमध्यस्थान्बिल्वपत्रघटान्बहून्॥ दृष्ट्वाप्रोवाचवचनंप्रथमान्प्रतिशंकरः॥१८॥श्रीशिवउवाच॥ ॥इत्युएतेधनघटाःसर्वेशतावधि
गृहस्थिताः॥एतान्घटान्गृहीत्वैवभवंतोयांत्वितिद्विजाः॥१९॥विष्णुरुवाच॥ ॥इत्युक्तंतद्वचःश्रुत्वासविप्रोदुःखितस्तदा॥बिल्वपत्रघटाःस
र्वेधनंनेतीशमब्रवीत्॥इत्युक्त्वाबिल्वपत्राणिघटमध्यस्थितानिसः॥सत्वरंदर्शयामासतमुवाचततःशिवः॥२१॥ ॥शिवउवाच॥ ॥जायतेध
नमेतेभ्यःपत्रेभ्योनात्रसंशयः॥रक्षणंनवभांडेषुपत्राणांकथमन्यथा॥२२॥एतेघटाःप्रयत्नेननैयाएवनसंशयः॥प्राप्तव्यंधनमेतेभ्यःपत्रेभ्योस्मा
भिरन्वहं॥२३॥विष्णुरुवाच॥ ॥इत्युक्तंतद्वचःश्रुत्वाद्विजोदुःखसमाकुलः॥हत्वामांतदनुप्रीत्यानयैतानीत्युवाचतं॥२४॥तथैवास्त्वितिगौ
रीशःशूलमुद्यम्यपाणिना॥ततःपरंसविप्रोपिनिश्चित्यमरणंस्वकं॥२५॥चिंताव्याकुलितोभूत्वास्वपुत्रंप्रत्यवाचसः॥ ॥द्विजउवाच॥ ॥पुत्र
बिल्वदलान्येतान्यतियत्नेनसादरं॥२६॥संपादितानिबहुधापूरितानिघटेष्वपि॥एतावंत्यपिपत्राणिसंपाद्यानिकथंमया॥२७॥अधुनाबिल्व
पत्राणिवनेष्वपिनसर्वथा॥बिल्वपत्रार्चनंत्यक्त्वानपिबानिजलान्यपि॥२८॥बिल्वपत्रार्चनाभावेमरणंमेभविष्यति॥तथाचाद्यैवसंत्यक्ष्येतनुमे
तांनसंशयः॥२९॥प्रायशोमृत्युकालोद्यममायंसमुपस्थितः॥गच्छजीवसुतारण्यंबिल्ववृक्षसमावृतं॥३०॥बिल्वपत्रैर्बिल्वमूलेशिवमर्चय
सादरं॥मात्यजार्भकभस्मांगेमोहेनापिशिवार्चनं॥३१॥बिल्वपत्रैःप्रयत्नेनपूजयस्वसदाशिवं॥वनवासरतैसार्कंप्रीतिंकुरुसदार्भक॥३२॥श्रृणु
शैवींकथामेवजपपंचाक्षरंसदा॥उद्धूलनत्रिपुंड्राभ्यामलंकुरुतनुंसदा॥३३॥रुद्राक्षधारणंप्रीत्याकुरुयत्नेनसंततं॥ ॥विष्णुरुवाच॥इतित
द्वचनंश्रुत्वापुत्रोपिपितृवत्सलः॥मयापिबिल्वपत्रार्थेतनुस्त्याज्येत्युवाचतं॥३४॥द्विजपत्न्यपितंदृष्ट्वास्वपतिंमर्त्तुमुद्यतं॥मयापिबिल्वपत्रा
र्थेतनुस्त्याज्येतुत्युवाचतं॥३५॥ततःपरंसविप्रेंद्रोभस्मधृत्वायथाविधि॥सरुद्राक्षोमहादेवंपूजयामासभक्तितः॥३६॥प्रदक्षिणानमस्कारान्च
कारतदनंतरं॥शिवतीर्थंततोविप्रःपपौपावनपावनं॥३७॥ततःशिवार्पितांश्रुत्धांबिल्वमालांदधारसः॥ततस्तुष्टावगिरिशंरुद्रसूक्तैरनेक
धा॥३८॥ततोजजापश्रुत्धात्माशिवपंचाक्षरंद्विजाः॥ततोजजापश्रीरुद्रंशिवलिंगस्यसन्निधौ॥३९॥तत्पुत्रोभस्मरुद्राक्षान्धृत्वामातृसमन्वि
तः॥चकारपूजनंशंभोःपित्रवत्पितृवत्सलः॥४०॥ततःस्वयोपिरुद्राक्षान्स्थापयित्वामुखांतरे॥ततश्चक्रुःपुनःपूजांशिवलिंगेशिवात्मके

 ।।४१।।सकुटुंबस्ततोविप्रःशिपंचाक्षरंजपन्।।सत्वरंमारयेत्युक्त्वाशिवाग्रेसंविवेशसः।।४२।। ततःकृपानिधिःशंभुस्तंविप्रंमरणोन्मुखं।।दृ 
 ष्ट्वास्वरूपममलंदर्शयामाससत्वरं।। सददर्शमहादेवंसकुटुंबोद्विजोत्तमः।।अत्युच्चवृषभारूढंप्रमथैरुपसेवितं।।४४।। संस्तूयमानममरैर्वेदैर्ना
नाविधैरपि।। उमासंश्लिष्टवामांगंव्याघ्रचर्मधरंप्रभुं।।अनेकचंद्रसूर्याग्निप्रभाविस्फुरितंप्रभं।।चंद्रावतंसमनघंभस्मभूषितविग्रहं।।अनेकरत्न
मालाभिःसमलंकृतविग्रहं।। चंद्रसूर्याग्निनयनंप्रसन्नमुखपंकजं।।एतादृशंमहादेवंदृष्ट्वासंतुष्टमानसः।।४७।।सविप्रःपूजयामासबिल्वपत्रादिसा
धनैः।।ततस्तुष्टावगिरिशंरुद्राध्यायादिभिर्द्विजः।।४८।। ततःप्रणम्यबहुधाकृतांजलिपुटस्थितः।। ततस्तुतोषमहादेवःपूजितश्चप्रयत्नतः।।४९।।
दास्यामीष्टवरान्विप्रवरयेतितमब्रवीत्।। ।।द्विजउवाच।। ।।कृतार्थोस्मिमहादेवत्वत्पादांबुजदर्शनात्।।यदिदंचिंत्यतेनित्यंयोगिभिर्योगत
त्परैः।।तदिदंपादकमलंतवदेवोत्तमप्रभो।।५१।।सर्वदेवस्तुतंनित्यंदृष्टंभाग्यवशान्मया।। यद्विष्णुनेत्रपद्मेनपूजितंतत्पदांबुजं।।५२।।सर्वामरगणा
राध्यंदृष्टंभाग्यवशान्मया।।इदमत्युत्तमंरूपंदृष्टंकेनापिनप्रभो।।५३।। दृष्टमद्यमयाशंभोत्वत्प्रसादेनमोक्षदं।।भक्तिस्त्वय्येवसततंममास्त्वव्यभि
चारिणी।।५४।। नित्यंतवैवपूजायांमतिरस्तुममप्रभो।।तवनामजपेभक्तिर्ममास्त्वन्वहमीश्वर।।५५।।भक्तिरस्त्वनिशंशंभोतवनामानुकीर्त्तने।।नि
त्यंममनोभृंगस्तवैवचरणांबुजे।।५६।। संचरत्वतिसंतुष्टोमोक्षपुष्परसान्विते।।त्वत्पादकमलद्वंद्वेद्वंद्वदुःखनिवारके।।५७।।विष्णुनेत्रार्चितेनि
भस्मरुद्राक्ष त्यंप्रीतिरस्तुममेश्वर।।ममास्तुभक्तिरनिशंशिवभक्ताभिपूजिते।।शंभोशिवशिवेत्येववदतोममशंकर।।५९।। भस्मरुद्राक्षवपुषस्तनुत्यागोस्तुमोक्षद २१
धारणे।।५८।। ।।६०।। ।।विष्णुरुवाच।। ।।इतितद्याचितान्दत्वावरान्देवोत्तमःशिवः।। पुनःसंपूजितस्तेनतत्रैवांतर्दधेद्विजाः।।६१।। एतादृशंवेदवेद्यंकृपा
ममास्तुभक्ति सागरमीश्वरं।।पूजयंत्यतियत्नेनभूरिपुण्यतपोधनाः।।६२।।भस्मनाबिल्वपत्रैश्चयेर्चयंतिसदाशिवं।।नतेषांगर्भवासादिदुःखानीतिश्रुतिर्द्विजाः।।पु
रनिशं राकश्चिद्द्विजवरोजाबालार्थविदन्वहं।।विधूलनंत्रिपुंड्रंचकुर्वन्नेवास्थितःसदा।।६४।। सनित्यंभस्मनाशंभूलिंगरूपिणमव्ययं।।संपूज्यबिल्व
पत्राद्यैस्ततोर्चयतिसादरं।।६५।।ससर्वदानवेभांउभस्मसंपूर्यसादरं।। करोतिभस्मनोनित्यंरक्षणंयत्नपूर्वकं।।६६।।स्वयमुद्धूलनंकृत्वाकृत्वा
नित्यंत्रिपुंड्रकं।।रुद्राक्षधारणंकृत्वासमर्चयतिशंकरं।।६७।।स्वार्थंभूतिंपृथक्कृत्वाशिवपूजार्थमप्ययं।।कृत्वाभस्मपृथङ्नित्यंशिवार्चनप
रोभवत्।।६८।। कदाचिदीदृशोविप्रःप्रातःकालेसमुत्थितः।। स्नात्वोद्धूल्यत्रिपुंड्रंचकृत्वासंध्यादिकंततः।।६९।।शिवलिंगार्चनंकर्त्तुं

संकल्प्यविधिपूर्वकं।। रुद्रसूक्तादिभिः सम्यक् चक्रे रुद्राभिषेचनं।। ७०।। ततो विभूतिपूजार्थं विभूतिमवलोकयत्।। भूतिं गृहीतुमुद्युक्तो भूतिपूजा
परायणः।। ७१।। तदानीं श्रीमहादेवस्तस्मै दातुं वरं परं।। समुद्युक्तो भस्म सर्वं जहाराहृश्यमूर्तिमान्।। ७२।। ततः स विप्रः पूजार्थमलब्ध्वा भस्म शां
करं।। अतिदुःखसमाक्रांतो गलद्बाष्पो बभूव सः।। ७३।। शिवार्चनार्थसंकल्पः कृतोद्य शिवसंनिधौ।। शिवपूजा कथं वास्याद्विना शांकरभस्मना।।
।। ७४।। जाबालोक्तेन विधिना भस्म कार्यं प्रयत्नतः।। ततः परं पूजनीयो भस्मना गिरिजापतिः।। ७५।। बहुभिर्दिवसैर्भस्म शांकरं जायते ततः।। ता
वत्कालं कथं त्याज्या शिवपूजा श्रुतिश्रुता।। ७६।। प्रतियामेव कर्त्तव्यं मया शंकरपूजनं।। तत्पूजनं विना भस्म कथं वाऽद्य भविष्यति।। ७७।। पानीयमपि
न ग्राह्यं शिवपूजां विना मया।। मम प्राणा विनश्यंति पानीयग्रहणं विना।। ७८।। शिवपूजांतरायेण संकल्पप्रच्युतोप्यभूत्।। शिवपूजापरित्यागेन
रकोपि भविष्यति।। ७९।। अतः परं मयाद्येहं शरीरं यत्नपूर्वकं।। त्याज्यं भस्माभिपूतेन शिवध्यानपुरःसरं।। ८०।। यत्नेन यदि देहस्य त्यागो न क्रिय
ते तदा।। तृषार्त्तस्याविलंबेन तनुरेषा गमिष्यति।। ८१।। तृषार्त्तस्य भवेन्मोहो मोहे सति ततः परं।। शिवस्मरणमेतस्य कथमेव भविष्यति।। ८२।। ये
त्यजंति तनुं मर्त्याः शिवस्य स्मरणं विना।। तेषां भवत्यघोरे षु नरके सुचसंस्थितिः।। ८३।। तथा चाद्य प्रयत्नेन चितिं कृत्वा स्वकां तनुं।। सत्वरं निक्षि
पाम्यग्नौ ज्वलत्वेषा तनुर्मम।। ८४।। शिवार्चनासाधनस्य शरीरस्यास्य रक्षणं।। वृथा भवत्यतो द्यैव ज्वालनीया तनुर्मम।। ८५।। ।। विष्णुरुवाच।।
इति निश्चित्य विप्रेंद्रः सत्वरं भस्मना विना।। पूजयामास यत्नेन बिल्वपत्रादिभिः शिवं।। ८६।। ततः प्रणम्य बहुधा स्तुत्वा च बहुधा स्तवैः।। जजा
प शतरुद्रीयं जजाप च षडक्षरं।। ८७।। ततः पुनः प्रणम्येशं कृत्वा कर्म शिवार्पणं।। ततः काष्ठैः प्रयत्नेन स चकार चितिं द्विजः।। ८८।। ततः प्र
ज्वालयामास चितिं पर्वतसन्निभां।। चितिं प्रदक्षिणं चक्रे शंकरं हृदि संस्मरन्।। ८९।। ततः शिव महेशान शंकरेति समुच्चरन्।। प्रविवेश चि
तिं विप्रः शिवं ध्यायन्नुमापतिं।। ९०।। तदानीं श्रीमाहादेवः करुणासागरः प्रभुः।। आविरासीद्वृषारूढः शिवासंश्लिष्टविग्रहः।। ९१।। श
शाम शीतलो जातः प्रज्वलन्नपि पावकः।। स ददर्श ततः शंभुं नानाप्रमथसेवितं।। ९२।। उमासंश्लिष्टवामांगं वृषभारूढमव्ययं।। सोम
सूर्याग्निनयनं सोमार्धकृतशेखरं।। ९३।। अभयप्रदमीशानं चेकितानमजं विभुं।। भस्मभूषितसर्वांगं रुद्राक्षवलयावृतं।। ९४।। अनं
तचन्द्रप्रतिममनंतरविसंनिभं।। अनंतवह्निप्रतिमं वस्तुतोप्रतिमं शिवं।। ९५।। अतिसुंदरमीशानममेयगुणसंश्रयं।। मंदारमाला सं

वीतंवृंदारकगणार्चितं।।९६।। एतादृशंशिवंदृष्ट्वाप्रहृष्टवदनोद्विजः।। पूजयामासयत्नेन प्रणम्यसपुनःपुनः।।९७।। ततःपरंमहादेवंश्रीगुरुद्रेणकृतांज
लिः।।तुष्टावपरयाभक्त्यास्तवैरन्यैश्चसादरं।।९८।। सुप्रीतोभगवाञ्छंभुर्वरंवरयसुव्रत।। प्रसन्नोस्मीतितंप्राहतदाभक्तवरप्रदः।।९९।। इत्युक्तमीशव
चनंश्रुत्वासोपिद्विजोत्तमः।। मूर्धन्यंजलिमाधायप्राहशंभुंशिवार्चकः।।१००।। ।।द्विजउवाच।। ।।कृतार्थोस्मिमहादेवतवपादाब्जवंदनात्।।धन्योस्मि
कृतकृत्योस्मिपुनीतोस्मिमहेश्वर।।१।।जन्मपावनमेतन्मेममवंशोपिपावनः।।यतस्त्वत्प्रसादपद्मस्यदर्शनंजातमद्यमे।।२।।मममाताभवद्धन्यापिताधन्यो
भवन्मम।।यतस्त्वत्पादकमलंदृष्टंमुक्तिप्रदंप्रभो।।३।।तवैतदुत्तमंरूपंनवेदैरपिदृश्यते।।मयाभाग्यवशादद्यदृष्टंरूपंतवप्रभो।।४।।महेशतवपूजार्थ
मुपविष्टस्यमेप्रभो।।प्रत्यूहामाविशंत्वीशकदाचिदपिसर्वथा।।५।।शंभोममास्तुविश्वासःशिवलिंगैकपूजने।।त्वय्येवाव्यभिचारेणभक्तिरस्तुममप्रभो।।
।।६।।शिवमंत्रजपेप्येवंश्रद्धास्तुममशंकर।।शिवतीर्थाटनेप्येवंश्रद्धास्तुममशंकर।।७।।नित्यंशिवकथास्वेवंश्रोत्रमेतत्प्रवर्त्तता।।शिवनामामृतंपातुं
जिह्वैषापिप्रवर्त्तता।।८।।शिवतीर्थान्यगमनेमोहाद्यदिमतिर्मम।।तदाभवंतुबहवःप्रत्यूहाश्रीमहेश्वर।।९।।शिवत्वदन्यपूजायांमोहाद्यदिमतिर्मम।।त
दाभवंतुबहवःप्रत्यू०।।११।।शिवत्वदन्यवीक्षायांमोहाद्यदिमतिर्मम।।तदाभवंतु०।।१२।।शिवत्वदन्यचिंतायांमोहाद्यदिमतिर्मम।।तदाभवंतु०।।१३।।
शिवत्वदन्यवार्त्तायांमोहाद्यदिमतिर्मम।।तदाभ०।।१४।।शिवत्वदन्यपूजायांमोहाद्यदिमतिर्मम।।तदाभवंतु०।।१५।।शिवान्यदेवश्रवणेमोहाद्यदिमतिर्म
म।।तदाभवंतुबहवःप्रत्यूहाश्रीमहेश्वर।।१६।।शिवान्यदेवस्तोत्रेषुयदिमोहान्मतिर्मम।।तदाभवंतु०।।१७।।शिवान्यतीर्थग्रहणेमोहाद्यदिमतिर्मम।।त
दाभ०।।१८।।शिवान्यदेवनैवेद्येयदिमोहान्मतिर्मम।।तदाभ०।।१९।।शिवान्यदेवनिर्माल्येयदिमोहान्मतिर्मम।।तदाभवंतु०।।२०।।शिवान्यदेवभक्तेषु
यदिमोहान्मतिर्मम।।तदाभ०।।२१।।शिवान्यदेवताध्यानेयदिमोहान्मतिर्मम।।तदाभवंतु०।।२२।।शिवान्यदेवतास्पर्शेयदिमोहान्मतिर्मम।।तदाभवंतुब
हवःप्रत्यूहाश्रीमहेश्वर।।२३।।शंभोत्वदन्यदेवानांकथायास्तासुसर्वथा।।अश्रद्धासर्वकालेषुनैरंतर्येणजायतां।।२४।।शंभोशिवकथास्वेवभक्तिश्रद्धाच
संततं।।भवतुत्वत्प्रसादेनममदेवशिखामणे।।मतिरस्तुममस्वामिन्केवलेभस्मधारणे।।मतिरस्तुममस्वामिन्भुत्येरुद्राक्षधारणे।।२६।।केवलाशिवपू
जैवकर्त्तव्येत्यस्तुमेमतिः।।केवलंशिवनामैवस्मर्त्तव्यमितिचास्तुधीः।।२७।।उमापतेमहादेवशिवेतिवदतोमम।।तनुत्यागोस्तुगौरीशत्वदर्चनपुरःसरं।।
।।२८।।दानपात्रमहंशंभोदानकालोयमीश्वर।।तदात्वनेतरोयाच्योयाच्याभक्तिस्त्वयिप्रभो।।२९।।नयाचेनयाचेमहादेवशंभोवरानन्यलभ्यानहंभक्तब
धो।।परंत्वेकरूपांमदन्यैरलभ्यांभवद्भक्तिमेकांपरामीशयाचे।।३०।।ययैवेशभक्त्यातृणीकृत्यसर्वानुपेंद्रादिदेवानहंसर्वथापि।।त्वदर्च्चापरोनित्यमव्य

श्रीशिवर०७ तिबहवः प्रतिजन्मनि॥५४॥शिवाराधनमात्रेण घोरसंसारसागरः॥शुष्को भवति विप्रेंद्राः सत्यं सत्यं न संशयः॥५५॥ यथा सर्पविषग्रस्ता म्रियंते उ०सं०पू०
२३ भेषजं विना॥ तथा नश्यंति बहवो महादेवार्चनं विना॥५६॥ संसारसागरो नाम दुःखसागर उच्यते॥ तद्दुःखाब्धौ पतंत्येव संत्यक्तशिवपूजनाः॥५७॥
पुरा शचीपतिः स्वर्गे सभामंडलमध्यगः॥ मन्ये कृतार्थमात्मानं सभासत्समुपासितः॥५८॥ ततः समोहसंजातो मुहूर्तं विवशो द्विजाः॥ उवास पार्वती
नाथस्मरणेन विना तदा॥५९॥ ततोतिव्याकुलो जातः स देवेंद्रः ततः परं॥ गुरुं संवीक्ष्य विकटं बभाषे वचनं द्विजाः॥६०॥ ॥इंद्र उवाच॥ ॥व्याकुलं स
मभूच्चित्तं गुरो हेतुं विना च मे॥ कंपते तनुरेषा च वायुनीत लतेव मे॥६१॥ स्वेदोपि जायते पश्य शुष्कमोष्ठमभून्मम॥ वाचो न निःसरंत्येव सरलालिलिता इव॥
॥६२॥ उष्णास्थपुष्पमालेव गात्रयष्टिरभून्मम॥ कृष्णाभ्रं तं दुरेखेव दृश्यतेयं मया तनुः॥६३॥ एतावत्कालपर्यंतं सुखेनैवास्थितं मया॥ अधुनैवेदमु
त्पन्नं दुःखमज्ञातहेतुकं॥६४॥ दुःखमेतन्मया सर्वं चतुर्वक्त्राय सत्वरं॥ निवेदनीयं यत्नेन त्वमप्यायाहि मद्वधे॥६५॥ ॥अगस्त्य उवाच॥ ॥
इत्युक्त्वा सगुरुं वज्री गुरुणापि समन्वितः॥ प्रययौ ब्रह्मलोकाय ददर्श स विधिं ततः॥६६॥ रुद्राक्षमालावीतांगं भस्मोद्धूलितविग्रहं॥ लिंगार्चनं विधिं नत्वा
प्रकृतं विनिवेदयेत्॥ ततस्तद्वचनं श्रुत्वा विधिर्विस्मितमानसः॥ उवाचेंद्रं यथायोग्यं यज्ज्ञातं तत्तथा द्विजाः॥६७॥ ॥ब्रह्मोवाच॥ ॥इंद्राद्य न त्वया
सम्यक्पूजितः पार्वतीपतिः॥ तेनैव व्याकुलं जातं तव चित्तमनाकुलं॥६८॥ येन न क्रियते नित्यं यथाविधि शिवार्चनं॥ तेन दुःखानि सर्वाणि प्राप्यंते श्रीशिव
नात्र संशयः॥६९॥ दुःखालया भवंत्येव सर्वे त्यक्तशिवार्चनाः॥ त्यक्तेशपूजनैरेव प्राप्यते दुःखमन्वहं॥७०॥ शंकरं शंकरं नित्यं यो नार्चयति सादरं॥ २३
न तस्य सुखलेशोपि सत्यं सत्यं न संशयः॥७१॥ यथा दुःखवशं यांति शंकरेतरपूजकाः॥ तथा दुःखवशं यांति त्यक्तशंकरपूजनाः॥७२॥ शंकरं सम्य
गाराध्य प्राप्नुवंति शमन्वहं॥ शंकराराधने त्यक्ते कथं शमुपलभ्यते॥७३॥ शंकरार्चनमेवैकं परमानन्दसाधनं॥ तदन्येन श्रुतं वज्रिन्परमानंदसाधनं॥
देवेष्वन्येषु वा वज्रिन् शंकरान्यो न शंकरः॥ ततः शमाप्तुं कुर्वंति शंकराराधनं द्विजाः॥७५॥ शमाप्तुं यतते यस्तु विना शंकरपूजनं॥ स मूर्ख इति विज्ञे
यो नेतरो मूर्ख उच्यते॥७६॥ कायेन मनसा वाचा यः शंकरमुपासते॥ स पंडित इति विज्ञेयः स पूज्यो धनिभिर्धनैः॥७७॥ शंकरासक्तचित्तानां न दूरे शं
मतः सदा॥ शंकराराधनं कार्यं शमार्थिभिरहर्निशं॥७८॥ स्वर्गापवर्गफलदं शंकरं लोकशंकरं॥ ये पूजयंति सततं ते धन्या नात्र संशयः॥७९॥ ॥
भगवान्पार्वतीनाथो सर्वाभीष्टफलप्रदः॥ स येन पूज्यते नित्यं तस्य दुःखं न सर्वथा॥८०॥ महादेवमनभ्यर्च्य यस्तिष्ठति च सर्वथा॥ न प्राप्नोति सुखं

नूनमीतिजाबालवादिनः॥ ८१॥ वेदाः सृष्टा महेशेन वेदोक्तविधिना सदा ॥ यत्नेनस्वार्चनं कार्यं सर्वेष्टदमिति ध्रुवं ॥ ८२॥ बहवो मुनयः पूर्वमुमाकांतस्य
पूजया॥ दुःखपाशविनिर्मुक्ताः शंकरं समुपाययुः॥ ८३॥ पुरा विष्णुः प्रमादेन विहाय शिवपूजनं॥ अकांडे व्याकुलो जातः ऽखिन्नगात्रोऽष्टतातुकः॥
॥ ८४॥ जातोतिदुःखितं दृष्ट्वा कमला कमलापतिं॥ दुःखापहारकं वाक्यमुवाच कृतनिश्चया॥ ८५॥ ॥लक्ष्मीः॥ ॥ विष्णो पूजय देवेशमुमाकां
तमनामयं॥ यत्पूजयैव दुःखेभ्यः सद्यो मुक्तो भविष्यसि॥ ८६॥ मृत्युंजयं जयाकांक्षी त्वमेवाभ्यर्च्य सादरं॥ प्राप्नोसि विजयं पूर्वमतिदुष्टान्मुरा
द्धरे॥ ८७॥ यदा दुःखं त्वया प्राप्तमसुरेभ्यस्तदा त्वया॥ पूजितः श्रीमहादेवो भक्तिश्रद्धापुरःसरं॥ ८८॥ श्रीमहादेवपूजायां त्वमस्यत्यंतमुत्सुकः
॥ अतोद्यापि प्रयत्नेन पूजयस्व महेश्वरं॥ ८९॥ महादेवं विनास्माकं नास्ति दुःखनिवारकः॥ तत्पूजां कुरु यत्नेन केशव क्लेशनाशिनीं॥ ९०॥ अस्माकम
मरादीनां शिव एवेष्टदैवतं॥ दुःखं विनश्यत्यखिलमिष्टदैवतपूजया॥ ९१॥ करिष्यसि यदि प्रीत्या सत्वरं शंकरार्चनं॥ तदा त्वया धुना प्राप्तं सौख्यम
द्य जनार्द्दन॥ ९२॥ केशवालस्यरहितः कुरु शंकरपूजनं॥ यदालस्यं तदा प्राप्तं दुःखमद्य पुनर्हरे॥ ९३॥ ॥ ब्रह्मोवाच॥ ॥ इत्युक्तं तद्वचः श्रु
त्वा केशवः सत्वरं तदा॥ शंकरं पूजयामास भस्म धृत्वा यथाविधि॥ ९४॥ ततो दुःखविनिर्मुक्तः स बभूव जनार्दनः॥ सौख्यं बहुतरं प्राप श्री
महादेवपूजया॥ ९५॥ तदा प्रभृति विश्वेशं शिवलिंगस्वरूपिणं॥ स्वहृत्पद्मे संनिवेश्य पूजयत्यनिशं हरिः॥ ९६॥ हरिहृत्पद्मसंविष्टं शिवलिंगमनु
त्तमं॥ द्रष्टव्यमिति यास्यामि त्वमप्यायाहि सत्वरं॥ ९७॥ ॥अगस्त्य उवाच॥ ॥ इत्युक्त्वा विष्णुलोकाय सदेवेंद्रो विधिर्ययौ॥ ददर्श च त
तो विष्णुं शिवपूजापरायणं॥ ९८॥ भस्मोद्धूलितसर्वांगं त्रिपुंड्रांकितमस्तकं॥ रुद्राक्षमालाभरणं शंकरस्मरणोत्सुकं॥ ९९॥ दृष्ट्वा विष्णुं
स देवेंद्रो विधिर्नत्वा कृतांजलिः॥ देवेंद्रोक्तं यथापूर्वं ज्ञापयामास विष्णवे॥ १००॥ ततस्तद्वचनं श्रुत्वा विष्णुः शंकरपूजकः॥ वेदवेदांतत
त्वज्ञः प्राह वाचं सुखावहां॥ १॥ ॥विष्णुरुवाच॥ ॥ तावद्वसंति दुःखानि यावन्नाराध्यते शिवः॥ दुःखानि विलयं यांति सम्यगाराधिते शि
वे॥ २॥ तावदेव यमाद्भीतिर्यावन्नाराध्यते शिवः॥ तावदेव महाव्याधिर्यावन्नाराध्यते शिवः॥ ३॥ तावद्वसंति पापानि यावन्नाराध्यते शिवः॥
तावद्भवति दारिद्र्यं यावन्नाराध्यते शिवः॥ ४॥ यथा सूर्योदये जाते विनश्यति तमस्तथा॥ पूजिते श्रीमहादेवे दुःखमात्रं विनश्यति॥ ५॥ नाना
दुःखमहाव्याधिभेषजं शिवपूजनं॥ सत्यं सत्यं पुनस्सत्यमुद्धृत्य भुजमुच्यते॥ ६॥ नाना संसारदुःखानि नश्यंति शिवपूजया॥ सऽत्यं स

त्यमितिप्राहजाबालोपिस्वयंविधे॥७॥संसारजंरुजंरुद्रोद्रावयत्यर्चितःसदा॥ततोर्चनीयमनिशंरुद्रलिंगंमुमुक्षुभिः॥८॥सर्वमन्यपरित्यज्य
शिवएकंशिवंकरः॥ध्येयइत्याहहिविधेसाक्षादाथर्वणश्रुतिः॥९॥पूजनीयोमहारुद्रोमनोवाक्कायकर्मभिः॥तत्पूजयैवनश्यंतिदुःखानिविवि
धान्यपि॥१०॥विनाशयतिसंसारंयःसकृत्पूजयाशिवः॥सकिमन्यानिदुःखानिननाशयतिपूजितः॥११॥भावपूतंमहादेवंयोर्चयिष्यतिसंततं॥स
संप्राप्नोतिधर्मार्थकाममोक्षान्नसंशयं॥१२॥संसारसागरंघोरंयःसमुत्तर्तुमिच्छति॥तेननित्यंमहादेवःपूजनीयःप्रयत्नतः॥१३॥धन्यःसइतिविज्ञेयोयः
शश्वाच्छिवपूजकः॥सतरत्येवसंसारंनानापातकसागरं॥१४॥शिवेतिनामदावाग्नेर्महापातकपर्वताः॥भस्मीभवंत्यनायासात्सत्यंसत्यंनसंशयः॥१५॥
पापमूलानिदुःखानिविविधान्यपितान्यतः॥शिवार्चनैकनाश्यानिनान्यनाश्यानिसर्वथा॥१६॥शिवार्चनपरैरेवघोरसंसारसागरः॥तीर्णोनान्यैःससंसा
रसागरस्तीर्यतेध्रुवं॥१७॥संसारसागरंघोरंयःशोषयितुमिच्छति॥सकरोतिप्रयत्नेनबिल्वपत्रैःशिवार्चनं॥१८॥विविधान्यपिपापानियान्यनंतानि
तानितु॥विनश्यंतिविधेनित्यंत्रिपुरांतकपूजया॥१९॥अनभ्यर्च्यमहादेवंनिष्पापोस्मीतियोवदेत्॥सपातकीतिविज्ञेयोवेदवेदांतपारगैः॥समभ्य
समभ्यर्च्यमहादेवंनिष्पापोस्मीतियोवदेत्॥सपातकीतिविज्ञेयोवेदवेदांतपारगैः॥समभ्यर्च्यमहादेवंनिष्पापोस्मीतियोवदेत्॥सपावनइति
ज्ञेयोवेदवेदांतपारगैः॥२१॥सवैदिकःसपुण्यात्मासधन्यःसबुधोविधे॥यःसदाकायवाक्चित्तैःशरणंयातिशंकरं॥२२॥भवंतिविविधाध
र्मायेषांसद्यःफलोन्मुखाः॥तेषांभवतिविश्वासस्त्रिपुरांतकपूजने॥२३॥पातकानिविनश्यंतियावंतिशिवपूजया॥भुवितावंतिपापानिनसंत्ये
वचतुर्मुख॥२४॥ब्रह्महत्यादिपापानांराशयोप्यमिताविधे॥शिवस्मृत्याविनश्यंतियावंतिशिवपूजया॥भुवितावंतिपापानिनसंत्येवचतुर्मुख॥
ब्रह्महत्यादिपापानांराशयोप्यमिताविधे॥शिवस्मृत्याविनश्यंतिनतेकिंशिवपूजया॥२५॥शिवनामतरिंप्राप्यसंसाराब्धिंतरंतिते॥संसारमूलपा
पानितेननश्यंत्यसंशयं॥संसारमूलभूतानांपातकानांचतुर्मुख॥शिवनामकुठारेणविनाशोजायतेध्रुवं॥२७॥शिवनामामृतंपेयंपापदावानलार्दि
तैः॥पापदावाग्नितप्तानांशांतिस्तेनविनानहि॥२८॥शिवेतिनामपीयूषवर्षधारापरिप्लुताः॥संसारदवमध्येपिनशोचंतिनसंशयः॥२९॥येषांधर्म
स्वभावानांमहेशःकुलदैवतं॥तेधन्यास्तेममाराध्यास्तेमहेशकृपाश्रयाः॥३०॥नभक्तिःशंकरेपुंसांरागद्वेषरतात्मनां॥तद्विधानांनसहसाभुक्तिर्भ
वतिसर्वथा॥३१॥अनंतजन्मभिर्येनतपस्तप्तंभविष्यति॥तस्यैवभक्तिर्भवतिभवानीप्राणवल्लभे॥३२॥जातापिशंकरेभक्तिरन्यसाधारणावृथा॥
परंत्वव्यभिचारेणशिवभक्तिरपेक्षिता॥३३॥यस्यास्त्यामरणंशंभौभक्तिरव्यभिचारिणी॥तस्यैवमोक्षःसुलभोनान्यस्येऽतिमतिर्मम॥३४॥विधे

भवंतिप्रत्यूहाः शिवभक्तिविघातकाः ॥ प्रत्यूहास्तेशमंयांतिमहेशानुग्रहात्परात् ॥ ३५ ॥ यस्यभक्तिरनुस्यूतादेहपातांतमीश्वरं ॥ सशिवानुगृहीतोन्यो
नभवत्येवतादृशः ॥ ३६ ॥ यस्यभक्तिर्महादेवधारारूपानुवर्तते ॥ नस्तस्मैसवंशायसमित्रायचतुर्मुख ॥ ३७ ॥ शिवोपूज्योयथानित्यंतथापूज्यः शिवा
र्चकः ॥ शिवार्चकः शिवावेति त्रयः पूज्याममान्वहं ॥ ३८ ॥ अनेकजन्मतपसापूतः पुण्यौघसंश्रयः ॥ महादेवपरोभूत्वायजतिश्रीमहेश्वरं ॥ ३९ ॥
यस्यश्रीमन्महादेवभक्तिरव्यभिचारिणी ॥ तस्यहृत्कमलेसांबः सर्वदाप्याधितिष्ठति ॥ ४० ॥ सांबस्यश्रीमहेशस्यसन्निधिर्यत्रसर्वदा ॥ नतस्यपापले
शोस्तिसत्यंसत्यंनसंशयः ॥ ४१ ॥ सर्वत्रविद्यमानोपिशिवोभक्तहृदंबुजे ॥ लिंगरूपंसमाश्रित्यक्रीडालोलोधितिष्ठति ॥ ४२ ॥ ऊधस्येवयथाक्षीरंगोस
र्वांगगतंतथा ॥ शिवः सर्वव्यापकोपि शिवलिंगेधितिष्ठति ॥ ४३ ॥ अतः सर्वंपरित्यज्यशिवलिंगंप्रयत्नतः ॥ पूजनीयंविधेनित्यंविधिवद्भक्तिपूर्वकं
॥ ४४ ॥ शिवलिंगेशिवः पूज्योनान्यत्रतुकदाचन ॥ यतः शिवोलिंगरूपीलिंगरूपेभिपूज्यते ॥ ४५ ॥ क्षीरोपलब्धिर्नयथाविषाणादोस्तनंविना ॥ शि
वलिंगंविनातद्वच्छिवोनान्यत्रपूज्यते ॥ ४६ ॥ लिंगरूपंमहादेवंयोर्चयिष्यतिसादरं ॥ ससर्वपापनिर्मुक्तोभवत्येवनसंशयः ॥ ४७ ॥ कृत्वाप्यनंत
पापानियदिशंकरमर्चयेत् ॥ ससर्वपापनिर्मुक्तोभवत्येवनसंशयः ॥ ४८ ॥ शिवपूजाकृतायेनतस्यपापानिबहून्यपि ॥ क्षणेनैवविनश्यंति वन्हिगाः
शलभाइव ॥ ४९ ॥ भवंतिभस्मसाद्वृक्षादवदग्धायथावने ॥ तथाभवंति दग्धानिशांकराणामघान्यपि ॥ ५० ॥ निष्पापाः शांकराः सर्वेशंकरध्या
नतत्पराः ॥ शंकराराधनासक्तामनोवाक्कायकर्मभिः ॥ ५१ ॥ यथाशंकरपूजायामुत्सुकंजायतेमनः ॥ तथाशंकरपूजायामप्युद्युक्तंमनोमम ॥
॥ ५२ ॥ सितेनभस्मनानित्यमुद्धूल्यापादमस्तकं ॥ यः पूजयतिगौरीशंसमोक्षमधिगच्छति ॥ ५३ ॥ भस्मोद्धूलितसर्वांगोयोजपेच्छांभवंमनुं ॥
समहापापनिर्मुक्तः सद्यएवभविष्यति ॥ ५४ ॥ येकेनापिजलार्द्रेणबिल्वपत्रेणशंकरं ॥ यः पूजयतियत्नेनसपापेभ्योविमुच्यते ॥ ५५ ॥ भक्त्याबि
ल्वदलैरीशंयः पूजयतिसर्वदा ॥ सवंशकोटिसंयुक्तः शिवलोकंप्रयास्यति ॥ ५६ ॥ यः सकृत्पूजयित्वापिशंकरंलोकशंकरं ॥ प्रयातिशिवसायुज्यं
किंपुनर्नित्यपूजया ॥ ५७ ॥ नित्यंबिल्वदलैरीशः पूजनीयः प्रयत्नतः ॥ वेदोक्तशिवमंत्रेणचतुर्वर्गफलार्थिभिः ॥ ५८ ॥ शिवलिंगार्चनेनैवमुक्तिर्भ
वतिनान्यथा ॥ तस्मात्प्रयत्नतः कार्यंनित्यंशंकरपूजनं ॥ ५९ ॥ शिवार्चनपराधीराभवंतिभुविधार्मिकाः ॥ तेभवंतिशिवाकारायतस्तेशिवपूजकाः ॥
॥ ६० ॥ पापाद्रिपक्षविच्छेददक्षवज्रंशिवार्चनं ॥ सत्यमेतत्पुनः सत्यमुद्धृत्यभुजमुच्यते ॥ ६१ ॥ बिल्वैः शिवार्चनंकर्त्तुंयततेयोयदातदा ॥ रुदंतिपा
पगिरयः क्वगंतव्यमितिध्रुवं ॥ प्रयच्छतियदाभक्त्यायोबिल्वंलिंगमस्तके तदातदघसंघातो दग्धोभवतिसर्वथा ॥ ६३ ॥ योनित्यंभस्मपूतांगः शि

 वपूजोन्मुखोभवेत्॥सतरत्येवसंसारमघोरमतिदारुणं॥६४॥भक्तिश्रद्धाकृतंब्रह्मन्श्रीमहादेवपूजनं॥घोरसंसारकालाहिविषभेषजमु 
 च्यते॥६५॥संसारसर्पदष्टानांशिवपूजैवभेषजं॥शिवपूजातिरिक्तंतुनैवतद्विषभेषजं॥६६॥संसारनाशनोपायःशिवस्यैवार्चनेविधे॥
संसारनाशनोपायस्तदन्योनैवदृश्यते॥६७॥ब्रह्मस्वहरणंकृत्वा हत्वापिब्राह्मणान्बहून्॥लिप्यतेनरैःपापैःविरूपाक्षसमर्चकः॥६८॥वि
लोक्यवेदानखिलान्शिवस्यैवार्चनंपरं॥संसारनाशनोपायइतिपूर्वंविनिश्चितं॥६९॥अनंतैर्विविधैर्वेदैर्वेदांतैरागमैरपि॥शिवएवसदा
पूज्योनान्यइत्युच्यतेध्रुवं॥७०॥शिवपूजाबहुविधाकथ्यतेनिगमैर्विधे॥आगमैरपिसापूजाविविधैवेतिकथ्यते॥७१॥षोडशैरुपचारैश्चपू
जनीयोन्वहंशिवः॥तेषुमंत्राश्चविविधानिगमागमचोदिताः॥७२॥मंत्राःशिवपराःसर्वेनिगमागमचोदिताः॥सम्यग्ज्ञातुंनशक्यंतेवि
विधाबहवोयतः॥७३॥तथापितेषुमंत्रेषुशिवपंचाक्षरःपरः॥तेनमंत्रेणविश्वेशःपूजनीयःप्रयत्नतः॥७४॥शिवपंचाक्षरोमंत्रःस
र्वमंत्रोत्तमोत्तमः॥नतस्मादधिकोमंत्रोवेदमंत्रेषुदृश्यते॥७५॥शिवपंचाक्षरोमंत्रोवैदिकोवेदसंमतः॥वेदेषुपठ्यतेतद्वद्वेदांतेष्वपि
पठ्यते॥७६॥ऋषिभिःसंस्तुतोमंत्रःशिवमंत्रोमुमुक्षुभिः॥शिवेनापिस्तुतोमंत्रःशिवमंत्रःशिवप्रदः॥७७॥मंत्रमालामध्यवर्तीशिवमंत्रःशि
रोमणिः॥ईदृशोमंत्रमालास्थोमणिरत्यंतदुर्लभः॥७८॥वेदावतंसोमंत्रोयंशिवपंचाक्षरस्ततः॥तेनमंत्रेणकर्त्तव्यंशिवलिंगार्चनंबुधैः॥७९॥ 
अनेनशिवमंत्रेणवेदाःसर्वेप्यलंकृताः॥अतोनेनैवकर्त्तव्यंश्रीमहादेवपूजनं॥अनेनैवहिमंत्रेणमंत्राःसर्वेप्यलंकृताः॥अतोनेनैवमंत्रेणकर्त्तव्यं 
शंकरार्चनं॥८१॥श्रीमत्पंचाक्षरेमंत्रेसर्वाघौघविनाशके॥स्मृतेपिपापगिरयोभवंत्येवहिभस्मसात्॥८२॥पुराद्विजाधमःकश्चिदाजन्मामरणंत
दा॥चकाराशेषपापानिदुर्वृत्तविवृतोविधे॥८३॥तेनयावंतिपापानिकृतानिप्रतिवासरं॥तानितावंतिपापानिसंख्येयानिनसर्वथा॥८४॥
एतादृशःसपापिष्ठःकदाचिद्विपिनंययौ॥तत्रापश्यत्सरोरम्यंपद्मवृंदनिषेवितं॥८५॥राजहंससमाकीर्णंचंडकारंडमंडितं॥डिंडीरग
णसंकीर्णकुंदमंडलमंडितं॥८६॥ददर्शतत्रचंडालीमुद्दंडकुचमंडितां॥दोर्दंडेधृतडिंडीरामुद्दंडमुखमंडलां॥८७॥जलावगाहनपरां
विवस्त्रांमदनातुरः॥बभाषेवचनंविप्रोमंदहासपुरःसरं॥८८॥ ॥द्विजाऽधमउवाच॥अयिबालेकुतेभर्त्तानगरेपिक्वतेगृहे॥इदं
सर्वमशेषेणयथार्थंवदसत्वरं॥८९॥ ॥विष्णुरुवाच॥ ॥इतितद्वचनंश्रुत्वाचंडालीसारजस्वला॥विज्ञायसामसंभाष्यांतथाप्याहाति

विस्मिता॥९०॥ ॥चंडालीउवाच॥ ॥मद्धस्तेोपयोगः कोमद्भर्त्तुरापितेद्विज॥ गछगछत्वमार्गेणयत्रगछसिसत्वरं॥९१॥विवस्त्रां
जलतीरस्थांमाविलोकयमांद्विज॥ विवस्त्रांयुवतींदृष्ट्वादूरेगछंतिसाधवः॥९२॥जनसंमर्द्दभीत्यात्रमयाप्यद्यसमागतं॥गतेमयित्वया
प्यत्रस्थातव्यंस्वेछयाद्विज॥९३॥ ॥द्विजः धमउवाच॥ ॥त्वयासहात्रस्थातव्यंमयाकमललोचने॥युवतीयुवयोरत्रसंगमः सुखदा
यकः॥९४॥परस्त्रीगमनेपापंबहुधाश्रूयतेनकिं॥साभिलाषंपरस्त्रीषुभाषणंचातिनिंदितं॥९६॥पतिव्रतासुनारीषुयोन्यथाकुरुतेमतिं॥नत
स्यनरकात्घोरात्सहसानिर्गमोद्विज॥९७॥चंडाल्यासहसहसंबंधः कथंवातवरोचते॥जुगुप्सापिकथंविप्रमयिनैवाभिजायते॥९८॥ब्राह्मणाःप
थिचंडालछायायाअपिसंगमे॥स्नानंकुर्वंतियत्नेनसचैलंमंत्रपूर्वकं॥९९॥चंडालीगमनंसाक्षात्कथंकर्त्तुसमुद्यतः नस्मर्यतेत्वयाप्रायः परलोकभयं
द्विज॥१००॥भीतिर्भवतुवामावाविप्रतेपारलौकिकी॥भवंतंब्राह्मणाः सर्वेबहिष्कुर्वंतिनेहः किं॥१॥किंचात्रयदिभर्त्तामेदैवादायातिकानने॥स
भवंतंमदासक्तंशस्त्रेणैवहविष्यति॥२॥मयापिदेयः शापोद्ययदिमांस्प्रष्टुमुद्यतः॥ दत्तःपतिव्रताशापोनान्यथासभविष्यति॥३॥नाहंविलोकयि
ष्यामिभर्तृभिन्नंनरंनवं॥व्रजविप्रततः शीघ्रंयत्रकुत्रापिदुर्मते॥४॥ ॥विष्णुरुवाच॥ ॥इतितद्वचनंश्रुत्वासविप्रोमदनातुरः॥चंडालीगमनं
कर्त्तुंबलात्समुपचक्रमे॥५॥मायाहिविप्रमायाहिमायाहीत्याहसातदा॥तदेवबाक्यंशुश्रावतद्भर्त्तावनमध्यगः॥६॥ततः सत्वरमागत्यतद्भर्त्ता
शस्त्रसंयुतः॥तंद्विजंहंतुमुद्युक्तोधृत्वाकेशान्द्रढासिना॥७॥तदातद्धननोद्युक्तंस्वपतिंसाब्रवीत्तदा॥धर्मशास्त्रविचारज्ञास्वभर्त्तृहितकांक्षि
णी॥८॥ ॥चंडालीउवाच॥ ॥विप्रः कृतापराधोपिनहंतव्योमनीषिभिः॥ परंतुदूरतस्त्याज्यः सत्यमेवमयोच्यते॥९॥ततस्तमाहविप्रोपिप्रा
णान्माहरमाहर॥तवदास्यंकरिष्यामीत्यतिभीतस्तदाविधे॥१०॥इतितद्वचनंश्रुत्वाचंडालीशिवतत्परा॥शस्त्रपाणिंक्रूरचित्तंचंडालंतमुवाचसा॥११॥
॥चंडालीउवाच॥ ॥अनेनमाहरेत्युक्तंद्विवारंदैवयोगतः॥अतोहरहरेत्युक्तंनामानेनहरात्मकं॥१२॥हरस्मरणशीलस्यहननंपापसाधनं॥त
स्मादेतस्यहननंनकर्त्तव्यंत्वयाध्रुवं॥१३॥कृतानंतमहापापोप्यपराधयुतोपिवा॥ नरः स्मृतहरः सद्यः सर्वपापैः प्रमुच्यते॥१४॥द्विजस्यपापहीनस्य
हननंनोचितंततः॥अयंकृतापराधोपित्याज्यएवनसंशयः॥१५॥अमुंस्मृतहरंविप्रंबलाद्यदिहनिष्यति॥ तदाभविष्यतिक्रूरनरकेक्षेनतोस्थितिः॥
॥१६॥उपकारोप्यनेनाद्यकृतएवाधुनावयोः॥आवाभ्यांसंस्मृतोयस्मादेतद्वाराहरः परः॥१७॥इदंहरहरेत्येतन्नामसाक्षाद्धरात्मकं॥श्रुतिश्रुतंश्रो

ऽपेयंश्रुतमघाघवारकं ॥१८॥ हरस्मरणमेतास्मिन्नरण्येत्यंतदुर्लभं ॥ स्मरणंहरशब्दस्यततोप्यत्यंतदुर्लभं॥१९॥ उपकारः कृतोनेनयादृशस्तादृ
शोधुना॥ कार्यःप्रत्युपकारोद्यतादृशकोपिनध्रुवं॥२०॥ शक्तिःप्रत्युपकारस्यनावयोर्हतभाग्ययोः॥ शक्तिःप्रत्युपकारस्यमहद्भाग्यवतोभवेत्॥२१॥
हरनामामृतंदैवादधुनानेनपायितं॥ एतत्प्रत्युपकारस्तुनप्राणैरपिसर्वदा॥२२॥ यद्यदागणितंद्रव्यंदीयतेस्मैतदाप्ययं॥ नास्यप्रत्युपकारोतःकिंकर्त्तव्य
मतःपरं॥२३॥ ॥विष्णुरुवाच॥ ॥इतितद्वचनंश्रुत्वाचंडालोविस्मितस्तदा॥ तंप्रणम्यययौगेहंसपत्न्यासंयुतोविधे॥२४॥ सविप्रःसर्पसंदष्टः
शिवेत्युक्त्वातनुंजहौ॥ ततस्तत्रसमुक्तोभूद्विश्वेशकृपयाविधे॥२५॥ ॥ब्रह्मोवाच॥ ॥चंडाल्यास्तादृशंज्ञानंकथमासीज्जनार्दन॥ यज्ज्ञानंमोक्षदं
साक्षाद्योगिनामपिदुर्लभं॥२६॥ ॥विष्णुरुवाच॥ ॥साभूद्ब्रह्मन्पुरानारीब्राह्मणीपतिदेवता॥ पतिशुश्रूषणरतासर्वदापतिमाश्रिता॥२७॥ तयानपू
जितंब्रह्मन्शिवलिंगंशिवात्मकं॥ तयाशिवमनभ्यर्च्यभुक्तमेवान्वहंमुदा॥२८॥ तयाकदाचिद्यत्नेनजाबालोपनिषच्छ्रुता॥ ततःपरंद्विजानाहसैवजा
बालपारगान्॥२९॥ ॥ब्राह्मणीउवाच॥ ॥द्विजाजाबालतत्त्वज्ञाःशृण्वंतुवचनंमम॥ अनादरोनकर्त्तव्यःप्रणताहंकृतांजलिः॥३०॥ अनार्चितशिवा
यांतिनरकेष्वितिपद्यते॥ श्रुतिरेषामयाद्यैवश्रुतात्वन्मुखपंकजात्॥३१॥ ब्राह्मण्यापिमयाविप्रानकृतंशंकरार्चनं॥ भुक्तमीशार्चनंत्यक्त्वाबहुकालंमयाध्रुवं
॥३२॥ रुद्रार्चनविहीनानांविप्रस्त्रीणांश्रुतिश्रुतं॥ प्रायश्चित्तंकिमस्त्यद्यवदंतुश्रुतिपारगाः॥३३॥ प्रायश्चित्तविहीनानांद्विजस्त्रीणांतनुव्यये॥ कथंवानर
कावासोकियत्कालंभविष्यति॥३४॥ नरकांतेपुनर्जन्मभविष्यतिकथंद्विजाः॥ एतत्सर्वंविशेषेणवदंतुप्रणयान्मयि॥ ॥द्विजाऊचुः॥ ॥द्विजन्मनांतु
सर्वेषांनित्यंशंकरपूजनं॥ कर्त्तव्यमतियत्नेनत्याज्यंसर्वथाशुभे॥३६॥ द्विजानांद्विजनारीणांमयंधर्मःसनातनः॥ द्विजैरिवसदाकार्यंद्विजस्त्रीभिःशिवा
र्चनं॥३७॥ परंत्वत्रविशेषोस्तिपुंसांशंकरपूजने॥ नविशेषाधिकारोस्तिद्विजस्त्रीणांतुसर्वथा॥३८॥ रुद्राध्यायेनसूक्तैश्चनित्यंश्रीरुद्रलिंगकैः॥ अभिषे
कोन्वहंकार्यःशिवलिंगेद्विजैःशुभे॥ रौद्रैर्नानाविधैर्मंत्रैःकर्त्तव्यंशिवपूजनं॥ द्विजानांब्राह्मणादीनामयंधर्मःसनातनः॥४०॥ स्त्रीभिःपंचाक्षरेणै
वकर्त्तव्यंशिवपूजनं॥ द्विजस्त्रीणामयंधर्मःसर्वासांचसनातनः॥४१॥ द्विजैर्द्विजांगनाभिर्वात्यक्त्वाशंकरपूजनं॥ नपेयंजलमप्यल्पंप्रमादेनापिस
र्वथाद्विजोवाद्विजनारीवात्यक्त्वाशंकरपूजनं॥ यदिभुंक्तेतदायोनिश्वंडालीप्राप्यतेध्रुवं॥४३॥ शावाशौचेपिकर्त्तव्यंविनास्पर्शंशिवार्चनं॥ जन्माशौ
चेप्येवमेवकर्त्तव्यंशंकरार्चनं॥४४॥ शिवलिंगस्पर्शमात्रंनकार्यंसूतकेद्वये॥ दूरेस्थित्वायथायोगंपूजाकार्यैवशंकरे॥४५॥ शंकरार्चनकालेषुद्विजोना
शौचदोषभाक्॥ एवंश्रौताग्निहोमेपिद्विजोनाशौचदोषभाक्॥४६॥ तथा ऽ तथाप्यत्रविशेषोस्तिशिवलिंगार्चनेशुभे॥ अग्नौस्पर्शस्तदाकार्यःशिवलिं

गेतुनध्रुवं॥ ४७॥ अस्पर्शदोषनाशार्थंसूतकांतेप्रयत्नतः॥ रौद्रेणचरुणाकार्योहोमोरौद्रैः सहस्रकं॥ ४८॥ प्रसवोजायतेयस्यास्तयातुशिवपूजनं॥
कर्त्तव्यंमानसेनित्यंदशाहांतंयथाक्रमं॥ ४९॥ दशाहासमतीतेतुकृत्वास्नानंयथाविधि॥ शिवलिंगार्चनंकार्यंद्विजस्त्रीभिर्द्विजैरिव॥ ५०॥ दशाहेसमती
तेतुद्विजैः स्नेयंबकश्चरुः॥ कर्त्तव्योतिप्रयत्नेनसतिलोगोघृतान्वितः॥ होमः कार्यः प्रयत्नेनसहस्रंहविषाद्विजैः॥ स्वस्वशास्त्रमार्गेणप्रतिष्ठाप्यहुता
शने॥ ५२॥ सूतकेशिवलिंगस्यजातमस्पर्शनंयतः॥ ततस्तद्दोषशांतिस्तुतेनहोमेनजायते॥ ५३॥ होमोयंपुरुषाणांतुस्त्रीणांतुकदाचन॥ होमेनतुयतस्ता
सामाधिकारः श्रुतिश्रुतः॥ ५४॥ सूतकांतेतुकर्त्तव्यंस्त्रीभिर्ईशादिनार्चनं॥ यावद्यस्मिन्दिनेतावत्तदासर्वंचवस्तुतः॥ ५५॥ कार्यंरजस्वलास्त्रीभिः मा
नसंशिवपूजनं॥ स्नात्वाकार्यंचतुर्थेन्हियथापूर्वंशिवार्चनं॥ ५६॥ यद्येकस्मिन्दिनेत्यक्तंशिवलिंगार्चनंतदा॥ पंचवत्सरपर्यंतंतमशैलेस्थितिर्भवेत्॥ ५७॥
दिनद्वयेचेद्द्विगुणंत्रिगुणंतद्दिनत्रये॥ एवमेवयथाकालंगुणवृद्धिः प्रजायते॥ ५८॥ संत्यक्तेशार्चनानांतुभवेत्यन्याश्चयातनाः॥ यातनांतेततः प्राप्यंदुःखचं
डालजन्मच॥ ५९॥ ततश्चंडालजन्मानिप्राप्यान्येवपुनः पुनः॥ चंडालजन्मविछित्तिस्तादृशानांनसर्वथा॥ ६०॥ द्विजजन्मापिसंप्राप्ययेननाभ्यर्च्यतेशिवः॥
तेनसंप्राप्यनरकंचंडालजन्मलभ्यते॥ ६१॥ यावंतः संतिचंडालास्तावंतः पूर्वजन्मनि॥ मोहसंत्यक्तविध्युक्तःशिवलिंगार्चनाध्रुवं॥ ६२॥ शिवलिंगानर्चकानां
प्रायश्चित्तशतैरपि॥ चंडालजन्मविछित्तिर्नभविष्यतिसर्वथा॥ ६३॥ कृत्वाव्रतान्यनेकानिदानान्यपिसहस्रशः॥ शिवलिंगार्चनत्यागाच्चंडालंजन्म
लभ्यते॥ ६४॥ पातिव्रत्यंत्वयासम्यक्रक्षितंनात्रसंशयः॥ तथापियोनिंचंडालींयासित्यक्तशिवार्चना॥ ६५॥ ॥ विष्णुरुवाच॥ ॥ इतितद्वचनंश्रु
त्वासंतप्ताब्राह्मणीतदा॥ हाहाहतास्मिदुःखार्त्तापपातपृथिवीतले॥ ६६॥ तदासर्पतनुंधृत्वाकालमृत्युस्समागतः॥ तद्दृष्टासामृतानारीनीताचयमकिंक
रैः॥ ६७॥ ततः परमघोरेषुनरकेषुस्थितातततः॥ चंडालजन्मसंप्रापशंकरानर्चनाद्विधे॥ ६८॥ द्विजवाक्यैर्यदाजातासंतप्तहृदयापुरा॥ ततोजातिस्म
रासाभूच्छेवसंभाषणादपि॥ ६९॥ प्राप्यचंडालजन्मापिसानित्यंमोहवर्जिता॥ शंकरस्मरणंकृत्वासर्वदेवाधिसंस्थिता॥ ७०॥ कृत्वामृन्मयलिंगा
शिव निप्रत्यहंप्रीतिपूर्वकं॥ पूजयामाससापुष्पैः करवीरादिभिः शिवं॥ शिवेत्युक्त्वामहादेवंलिंगस्वरूपिणं॥ पूजयित्वास्थितानित्यंततः साविजहौत
नुं॥ ७२॥ ततः संप्रापसास्वर्गंस्वर्गेशच्यासहस्थिता॥ ततोविदर्भराजस्यतनयासाबभूवच॥ ७३॥ सैवबाल्यंसमारभ्यनित्यंजातिस्मरामुदा॥
चकारविधिवद्धृत्वलनशिवलिंगस्यपूजनं॥ ७४॥ उद्धूल्यभस्मनांगानिकृत्वारुद्राक्षधारणं॥ चकारबालिकाप्यार्यसानंदंशिवपूजनं॥ ७५॥ रुद्राक्ष

 लंकृतानित्यंभस्मसंवीतविग्रहा॥सारत्नाभरणादीनिजहौशिवपरायणा॥७६॥सुरत्नपट्टयोग्येपिफालपट्टेमनोहरे॥फालपट्टंविहा 
 येवसाचकारत्रिपुंड्रकं॥७७॥कंठाभरणयोग्यापिकंबुकंठीमनोरमा॥रेजेरुद्राक्षकंठासाहेमाभरणवर्जनात्॥७८॥चंदनागरुकस्तूरीवि
लेपनरतापिसा॥जहौसाचंदनादीनिभस्मोद्धूलनतत्परा॥७९॥शिवेतिशब्दमनिशमुच्चार्यजननींप्रति॥७९॥किंचिद्वदतिसानंदंस्वेप्सि
तंमुदितानना॥८०॥हरशंकरगौरीशपार्वतीरमणेतिच॥नित्यमुक्त्वास्थिताब्रह्मन्नत्युत्साहपुरःसरं॥८१॥ईदृशीबालिकापृष्टाकदाचिज्ज
नकेनसा॥कथमेतादृशीबुधिस्तवजातेतिसादरं॥८२॥पित्रापृष्टायथापूर्ववृत्तांतमखिलंतदा॥जगादादिप्रयत्नेनजनकानंदवर्धिनी॥८३॥त
दुत्क्रमखिलंश्रुत्वाविदर्भाधिपतिस्तदा॥पुलकांकितसर्वांगःसानंदाश्रूण्यमुंचत॥८४॥तदाप्रभृतियत्नेनसविदर्भमहीपतिः॥सादरंपूजया
मासशंकरंलोकशंकरं॥८५॥सर्वेतांबालिकांदृष्ट्वाविदर्भाधिपतेःसुतां॥सुभगेतिचतांप्राहुर्नित्यंजयपुरःसरं॥८६॥सर्वेशिवार्चकाजाता
दृष्ट्वातांशिवपूजकां॥उद्धूलनत्रिपुंड्रांकारुद्राक्षांकाश्चसर्वदा॥८७॥शिवस्थानानिजातानिविदर्भाधिपपट्टणे॥शिवस्थानेषुसर्वेषुशैवा
एवस्थिताःसदा॥८८॥श्रुताःशिवकथाएवविदर्भाधिपपट्टणे॥शिवनामांकिताएवसर्वेप्यासन्सजाविधे॥८९॥यत्रगच्छंतितत्रैवशिवस्था
नंमनोहरं॥तत्रस्थैर्दृश्यतेलोकैःशिवालापसमन्वितं॥९०॥दिनेदिनेविदर्भेशोमहदैश्वर्यसंयुतः॥ववृधेश्रीमहादेवपूजयाचतुरानन॥
॥९१॥एवंस्थितःसभूपालतत्सुतापिप्रयत्नतः॥पूजयंतीमहादेवंववृधेनवयौवना॥सादत्ताकुलनाथायविदर्भेणमहीभुजा॥सोपितांसुंद
रींप्राप्यबभूवानंदसंयुतः॥कुलनाथोमहादेवंलिंगरूपिणमव्ययंपूजयामासयत्नेनरत्नाद्यैरन्वहंमुदा॥९४॥सावैदर्भ्यर्पितंदृष्ट्वाकुल 
नाथंशिवार्चकं॥अत्यंतमुदितानित्यंचकारशिवपूजनं॥९५॥साचकारान्वहंभक्त्याश्रीबिल्वैरमितैर्नवैः॥शिवलिंगार्चनंहैमैस्तावद्भिःक 
मलैरपि॥९६॥साचकारान्वहंभुत्थैःकरवीरैःसितासितैः॥शिवलिंगस्वरूपस्यमहादेवस्यपूजनं॥९७॥वैदर्भीकारयामासनवबिल्ववना
निसा॥सरांसिकारयामासकमलानांचसामुदा॥९८॥कारयामासयत्नेनकरवीरवनान्यपि॥वनानितानिजातानिशतलक्षंचतुर्मुख॥९९॥वना
नितानिजातानिसर्वाण्यप्येकदाविधे॥पुष्पितान्यतिरम्याणिदृष्टिभव्यानिसर्वदा॥१००॥एकैकस्मिन्वनेजाताशतलक्षवनोकहाः॥प्रतिस्कंधंप्रसूना
नितेषुजातानिकोटिशः॥१॥यत्नेनानाय्यासानित्यंहेमपद्मानिसंततं॥पूजयामासयत्नेनबिल्वानिचसदाशिवं॥२॥करवीरवनेभ्यःसासर्वेभ्योप्य

तियत्नतः॥ पुष्पाण्यानाय्यसर्वाणिपूजयामासशंकरं॥३॥ एवंप्रतिदिनंपुष्पैःकरवीरैसितासितैः॥ हेमपत्रैर्बिल्वपत्रैःशिवमभ्यर्च्यसं
स्थिता॥४॥ पुराकश्चिद्विजोदृष्टःकरवीरवनेतया॥ करवीरैःपूजयंतमहादेवंसितासितैः॥५॥ सानत्वाद्विजवर्यंतंशिवपूजापरायणं॥
बभाषेभक्तिभावेनकृतांजलिपुटाविधे॥६॥ ॥वैदर्भीउवाच॥ ॥पूज्यतेगिरिजानाथःकरवीरैःसितासितैः॥ जलाप्लुतैर्नवैः
शुद्धैःत्वयामंत्रपुरस्सरं॥७॥ बिल्वपत्रैश्चविमलैस्त्वयासंपूज्यतेशिवः॥ पूज्यतेशंकरोनित्यंसुवर्णकमलैरपि॥८॥ करवीरैर्बिल्व
पत्रैःसुवर्णकमलैरपि॥ पूजितेशंकरेनित्यंपुण्यंस्यात्कीदृशंवद॥९॥ इतितद्वचनंश्रुत्वापुजांतेब्राह्मणोविधे॥ विनयावनतोभूत्वाबभावे
वचनंमुदा॥१०॥ ॥द्विजउवाच॥ ॥बिल्वपत्रांतरालेस्तुसंछाद्याशिवमस्तकं॥ शिवलोकमवाप्नोतिशिवेनसहमोदते॥११॥
भस्मोद्धूलितसर्वांगःशुद्धरुद्राक्षभूषणः॥ बिल्वपत्रैःसमभ्यर्च्यशंकरंयातिशंकरं॥१२॥ बिल्वपत्रैर्महादेवंयोर्चयिष्यतिभक्तितः॥
सभहापापकोटिभ्योमुक्तोमुक्तिंप्रयास्यति॥१३॥ त्रिदलंत्रिगुणाकारंत्रिनेत्रंचत्रियायुधं॥ त्रिजन्मपापसंहारमेकंबिल्वंशिवार्पितं॥
॥१४॥ त्रिशूलसंनिभैरीशेबिल्वपत्रैःसमर्चिते॥ सद्यएवबिनश्यंतिमहापातककोटयः॥१५॥ बिल्वपत्रेणशुष्केणाप्यर्चितःपार्वतीपतिः॥
ददातिपरमामृद्धिंसायुज्यंचतनुव्यये॥१६॥ सच्छिद्रमस्तुशुष्कंवाशाठितंवाजलाप्लुतं॥ बिल्वपत्रंस्वतःशुद्धंशिवप्रियकरंध्रुवं॥१७॥ शुभे
पर्युषितत्वंचबिल्वपत्रेषुनध्रुवं॥ बिल्वपत्रस्यचूर्णेनाप्यर्चनीयःसदाशिवः॥१८॥ रत्नवद्रक्षणीयानिबिल्वपत्राणिसंततं॥ बिल्वपात्रार्च
नेनैवतुष्टोभवतिशंकरः॥१९॥ महादेवस्यसांबस्यबिल्वपत्रमतिप्रियं॥ यथाप्रियाहैमवतीबिल्वपत्रंतथाप्रियं॥२०॥ अखंडैर्नूतनैःशुद्धैः
बिल्वपत्रैःप्रयत्नतः॥ यःपूजयंतिगौरीशंसगौरीशंप्रयास्यति॥ श्रीबिल्वपत्रमहिमाशिवेनज्ञायतेशुभे॥ श्रीबिल्वपत्रमहिमावेदैरपिन
बुध्यते॥२२॥ करवीरस्यपुष्पेणरक्तेनधवलेनवा॥ यःपूजयंतिगौरीशंसपापेभ्योविमुच्यते॥२३॥ यत्पुण्यंलभतेमर्त्योमहेशेमणिपूजया॥
तत्पुण्यंलभतेमर्त्यःकरवीरस्यपूजया॥२४॥ सुवर्णकमलानांचपूजयागिरिजापतिः॥ हृष्टोददातिसायुज्यमर्चकायनसंशयः॥२५॥ ॥वि
ष्णुरुवाच॥ ॥इत्युक्तंतद्वचःश्रुत्वाप्रणिपत्यचतंद्विजं॥ ततोबिल्ववनादीनिकारयामाससापुनः॥२६॥ सारत्नैःकारयामासशिवालयमनु
त्तमं॥ तत्रसाकारयामासमुक्तंप्राकारमुत्तमं॥२७॥ तस्मिन्छिवालयेसैवरत्नलिंगमनुत्तमं॥ स्थापयामासयत्नेनकुलनाथानुमोदिता॥२८॥

तस्मिन्शिवालयेभक्त्या घृतदीपामनोहराः॥ तया दत्ताः प्रयत्नेन हेमपात्रेषुकोटिशः॥२९॥ धूपयामाससाशंभुनित्यंगुग्गुलुपर्वतैः॥ नैवेद्यंकार
यामासदिव्यान्नैराज्यसंयुतैः॥३०॥ शिवस्थानमभून्नित्यंसर्वतःपुष्पसंकुलं॥ पुष्पमालापरिवृतं पुष्पगंधसमन्वितं॥३१॥ नृत्यंचकारसानित्यं
तस्मिन्नेवशिवालये॥ गानंचकारसानित्यंतत्रैवशिवमंदिरे॥३२॥ आर्द्रादिपुण्यऋक्षेषु बेदोत्थानसाशिवोत्सुवान्॥ कारयामासयत्नेनतत्तत्का
लेषुसादरं॥३३॥ तयैवकारिताःशैवाःसुवर्णोत्सवविग्रहाः॥ अलंकृताविग्रहास्तेरत्नमालादिभिःसदा॥३४॥ साहेमंकारयामासलक्षचक्रा
न्वितरथं॥ हेमध्वजपताकाढ्यंमुक्तामालोपशोभितं॥३५॥ तद्धेमरथश्रृंगाणिसत्यलोकमिमंस्फुटं॥ तान्यतीवसुरम्याणिसरत्नानिचतुर्मु
खा॥३६॥ तस्मिन्रथेमहादेवमुमादेहार्धविग्रहं॥ संस्थाप्यपूजयामाससाविदर्भेशपुत्रिका॥३७॥ रथारूढंशिवंदृष्ट्वासंतुष्टहृदयासती॥ नृ
त्यंचकारबहुधाकुलनाथेचपश्यती॥३८॥ शांकरेभ्योददौसैवरत्नानिविविधानिच॥ शांकरेभ्योददौसैवपृथ्वींरत्नसमन्वितां॥३९॥ ब्राह्मणान्शांकरा
न्दृष्ट्वादंडवत्प्राणिपत्यसा॥ रत्नैःसंपूजयामाससाशैवाननियत्नतः॥४०॥ रत्नासनेषूपवेश्यसाशंकरपरायणान्॥ पादप्रक्षालनंकृत्वापपौतचर
णोदकं॥४१॥ धूपदीपादिदानेश्चतोषयामासशांकरान्॥ शांकरान्रत्नमालाभिस्तोषयामाससासदा॥४२॥ यस्ययावदभिप्रेतंशांकरस्यधनंतदा॥
ददौदानोत्सुकातस्मैसाततोप्यधिकंधनं॥४३॥ एवमेवान्वहंप्रीत्यातोषिताःशांकरास्तया॥ शंकरश्चापियत्नेनपूजितोभूत्तयासदा॥४४॥ कार्त्ति
केमासिसानित्यंरथोत्सवमनिंदिता॥ कारयामासयत्नेनसांबस्यपरमात्मनः॥४५॥ सकोटिघटसंपूर्णैर्गोक्षीराज्यादिभिर्मुदा॥ सेवयामास 
गौरीशंकार्त्तिकीसोमवासरे॥४६॥ चंदनादीनिदत्वेशेसाबिल्ववनपल्लवैः॥ धत्तूरैःकरवीरैश्चपूजयामासशंकरं॥४७॥ द्रोणपुष्पैरतिश्वेतैः 
कार्त्तिकीसोमवासरे॥ शिवंसापूजयामासरात्रौयामचतुष्टये॥४८॥ परमान्नेननैवेद्यंकारयामाससाबहु॥ करपूरराशयोप्युच्चाःदीपार्थंज्वा
ज्वालितास्तया॥४९॥ धूपार्थंज्वालितात्युच्चास्तथैवागरुराशयः॥ प्रतियामेप्येवमेवचकाराभ्यर्च्यनंविधे॥५०॥ एवंसंतोषसंयुक्ताकार्त्तिकी
सोमवासरे॥ पूजयंतीमहादेवंसाक्षात्सोमंददर्शसा॥५१॥ अनंतसोमसूर्याग्निप्रतिमंवृषभध्वजं॥ कर्पूरगौरंसानंदमुमासंश्लिष्टविग्रहं॥५२॥
चंद्रार्कवन्हिनयनंचंद्रशेखरमीश्वरं॥ मुक्तादामपरीतांगं दुकूलवसनान्वितं॥५३॥ भ्राजद्भालत्कुसद्भाग भ्राजिभूतिविभूषणं॥ रुद्राक्षमाला
संवीतंमुक्तामालासमावृतं॥५४॥ रत्नकेयूरकटकरत्नपट्टविराजितं॥ नानारत्नपरिभ्राजन्मुकुटोत्तममंडितं॥५५॥ वीज्यमानमनंतैश्चसचा

मीकरचामरैः॥ अनंतरत्नछत्रौघच्छायासंवेष्टितंप्रभुं॥ ५६॥ मंदहाससमाक्रांतपूर्णेंदुवदनंशिवं॥ अनंतप्रमथैः सेव्यंब्रह्मविष्ण्वादिपूजितं॥ ५७॥
दृष्ट्वाप्रसन्नवदनानत्वासंपूज्यसादरं॥ अंजलिंमूर्ध्निविन्यस्यतुष्टावपरयामुदा॥ ५८॥ ॥ वैदर्भ्युवाच॥ ॥ नमोनमःकारणकारणायनारायणा
राधितपादुकाय॥ नमोनमोभूतिविभूषणायविश्वेशशंभोभगवन्नमस्ते॥ ५९॥ नमोनमोमंगलविग्रहाय॥ नमोनमोनंतगुणार्णवायविश्वेशशंभो
भगवन्नमस्ते॥ ६१॥ नमोनमोभक्तवरप्रदायनमोनमःकेशवपूजिताय॥ नमोनमःसर्वसुरार्चितायविश्वेशशंभोभगवन्नमस्ते॥ ६२॥ नमोनमःसर्व
सुराधिपायनमोनमःसर्वगणाधिपाय॥ नमोनमःसर्वजनाधिपायविश्वेशशंभोभगवन्नमस्ते॥ ६३॥ नमोनमोनंतविलोचनायनमोनमोनंतलस
त्कराय॥ नमोनमोनंतशिरोधरायविश्वेशशंभोभगवन्नमस्ते॥ नमोनमोहेमविभूषणायनमोनमःशैलसुतान्विताय॥ नमोनमोबिल्वदलप्रि
प्रियायविश्वेशशंभोभगवन्नमस्ते॥ ६५॥ नमोनमोनिर्मितपारदायनमोनमोनिर्मितभूधराय॥ नमोनमोनिर्मितकेशवायविश्वेशशंभोभगवन्नमस्ते॥
॥ ६६॥ नमोनमोभानुगणप्रभायनमोनमोश्चंद्रगणप्रभाय॥ नमोनमोवन्हिगणप्रभायविश्वेशशंभोभगवन्नमस्ते॥ ६७॥ नमोनमोमन्मथसूद
नायनमोनमःपद्मजसूदनाय॥ नमोनमोमाधवसूदनायविश्वेशशंभोभगवन्नमस्ते॥ ६८॥ नमोनमःसर्वविधायकायनमोनमःसर्जितरक्षका
य॥ नमोनमःसर्जितनाशकायविश्वेशशंभोभगवन्नमस्ते॥ ६९॥ ॥ विष्णुरुवाच॥ ॥ इतिस्तुत्वामहादेवंवैदर्भीविनयान्विता॥ पूजयामास
रत्नाद्यैःसोमंसगणमादरात्॥ ७०॥ ततः प्रसन्नोभगवांस्तुष्टस्तत्कृतपूजया॥ वरंवृणुवरंमत्तःसुव्रतेत्याहतांशिवः॥ ७१॥ ॥ वैदर्भ्युवाच॥
कृतार्थास्मिमहादेवदर्शनादधुनातव॥ दर्शनात्तवगौरीशजन्मधन्यमभून्मम॥ ७२॥ यदिदंपादकमलंतवश्रुतिशिरःश्रुतं॥ दृष्टंभाग्य
वशाच्छंभोविष्णुनेत्रार्चितंमया॥ ७३॥ हिरण्यबाहूदृष्टोतेरूपंदृष्टंहिरण्मयं॥ हिरण्यवर्णोदृष्टोद्यतवमंगलविग्रहः॥ ७४॥ त्वं
हिरण्यपतिर्दृष्टस्त्वंदृष्टोस्यंबिकापतिः॥ दृष्टोस्युमापतिःसाक्षाद्दृष्टःपशुपतिर्मया॥ ७५॥ ऋतंसत्यंपरंब्रह्मपुरुषंकृष्णपिंग
लं॥ ऊर्ध्वरेतंविरूपाक्षंदृष्ट्वात्वांमुदितास्म्यहं॥ ७६॥ प्रत्यक्षोसियतस्त्वंयक्षततोहंमुदिताप्रभो॥ भोग्यस्त्वंममनान्योस्तिसत्यं
सत्यंनसंशयः॥ ७७॥ वेदैरपिनविज्ञातंतवेदंरूपमुत्तमं॥ तदेवेदंमयादृष्टंत्वत्प्रसादान्महेश्वर॥ ७८॥ महेशत्वत्प्रसादेनभुक्तमै
श्वर्यमुत्कटं॥ यावद्भुक्तंनकेनचित्॥ ७९॥ मयानज्ञातमाजन्मशारीरंदुःखमण्वपि॥ सुखेनैवस्थितंशंभोसर्वदात्वत्प्रसादतः॥ ८० ॥

 कोटिशोरत्नदानानिस्वर्णदानान्यपिप्रभो॥ कृतानित्वत्प्रसादेनपार्वतीवल्लभान्वहं॥ उमेशभुक्तभोगायनभोगेच्छाममप्रभो॥ सत्यं 
सत्यंपुनःसत्यंदेहिमुक्तिमतःपरं॥८२॥ ॥विष्णुरुवाच॥ ॥इतितद्वचनंश्रुत्वाशिवःसंतुष्टमानसः॥ तामुवाचकरंधृत्वासुप्री
तःपरयामुदा॥८३॥ ॥सदाशिवउवाच॥ ॥इतोनवतमेमासितवपुत्रोभविष्यतिसर्वज्ञोमयिभक्तिंकरिष्यति॥८४॥ ससंचरिष्यति
स्वच्छंस्वर्गलोकेपिसादरं॥ सर्वभूमंडलस्यापिरक्षकःसभविष्यति॥८५॥ नित्यंमृन्मयलिंगानांसहस्रंपूजयिष्यति॥ सकारयिष्यतिप्री
त्यामह्यंमणिशिवालयं॥८६॥ कारयिष्यतिमाणेयंलक्षचक्रायुतंरथं॥ सजीविष्यतिनीरोगःपूर्णकल्पशतत्रयं॥८७॥ तस्यपत्न्योभवि
ष्यंतिपुत्रास्तत्तुल्यविक्रमाः॥ एवमग्रेपिसुभगेवंशवृद्धिर्भविष्यति॥८८॥ ततःसर्वेपिमुक्ताश्चभविष्यंतिनसंशयः॥ मदर्चनंकृतंयस्मात्त्व
यासंततमादरात्॥८९॥ तेनैतादृशसौभाग्यंतवबालेभविष्यति॥ जीवकल्पशतंबालेत्वंचसौभाग्यपूर्वकं॥९०॥ निरोगंनित्यसंतुष्टापुष्टांगी
नित्ययौवना॥ मयिभक्तिंकुरुप्रीत्यामामभ्यर्च्चयसंततं॥९१॥ कुरुदानानियत्नेनप्रत्यहंप्रीतिपूर्वकं॥ ततःकल्पशतांतेत्वंमुदाराधनपूर्व
कं॥९२॥ त्यक्त्वास्वच्छांतनुंशुद्धांमामुपेष्यसिबालिके॥ मदाराधनजाद्धर्माद्भाग्यमेतादृशंतया॥९३॥ प्राप्तव्येनात्रसंदेहःसत्यंसत्यंवरा
नने॥ यस्तुविश्वस्यमांभक्त्यापूजयिष्यतिसंततं॥९४॥ ससमाप्नोतिदेवेशान्मत्तःसौभाग्यमीदृशं॥ वेदेषुयस्यविश्वासोभविष्यतिदृढःस
दा॥९५॥ तस्यैवमयिविश्वासोमत्पूजायांचशोभने॥ ॥विष्णुरुवाच॥ ॥इत्युक्त्वापूजितःसम्यक्तयारत्नादिभिःशिवः॥ शिवाल
केरत्नलिंगेसगणोंतर्दधेविधे॥९६॥ ततःसंतुष्टहृदयासादधौरोहदंविधे॥ चंद्ररेखेववववृधेसुभगासादिनेदिने॥९७॥ ततःसाजनया 
मासपुत्रंशांकरपूजकं॥ शुभलक्षणसंपन्नंसर्वावयवशोभितं॥९८॥ सतुजातिस्मरोजातोजातमात्रश्चतुर्मुख॥ उत्पत्तिदिनमारभ्य 
कृतंतेनशिवार्चनं॥९९॥ ॥ब्रह्मोवाच॥ ॥कथंजातिस्मरोजातोजातमात्रःसबालकः॥ किंवापुण्यंकृतंतेनपूर्वजन्मनिमाधव॥
॥१००॥ ॥विष्णुरुवाच॥ ॥सबालकःपुराविप्रोदरिद्रोव्याधिपीडितः॥ व्रणसंकीर्णसर्वांगःपुंडरीकपुरेस्थितः॥१॥ श्रीमच्चिदंबरेश
स्यद्वारिभस्मावगुंठितः॥ सर्वदैवास्थितःपूर्वंबलिभक्षणतत्परः॥२॥ तत्रैवशिवगंगायांस्नात्वाभस्मविभूषणः॥ रुद्राक्षभूषणोनि
त्यंस्थितःपंचाक्षरंजपन्॥३॥ एवमेवऽस्थितोनित्यंबहुकालंततःपरं॥ नित्यंपार्थिवलिंगानिपूजयामाससादरं॥४॥ ततश्चिदंबरं

त्यक्त्वा वृषाचलं दिदृक्षया॥ चलितोध्वनिमध्यान्हे जहौ प्राणान्तृषार्द्दितः॥५॥ ततः स पुष्पकारूढः स्वर्गलोकं ययौ विधे॥ स्वर्गलोके
स्थितः प्रीत्या बहुकालं द्विजोत्तमः॥६॥ वैदर्भीगर्भमापन्नस्ततो भाग्यवशाद्विधे॥ स्थितो गर्भेपि दुःखानि नावाप शिवपूजकः॥७॥
बलिभोजनपुण्येन सोभूज्जातिस्मरो द्विजः॥ लिंगपूजनपुण्येन भूपतिः समजायत॥८॥ एवं जातिस्मरो बालः पितृसंतोषवर्द्धकः॥
पूजयामास गौरीशं मुलत्यवधिसादरं॥९॥ यथाशक्तिकृता तेन देवदेवे महेश्वरे॥ तथा भक्तिर्न केनापि शक्यते कर्त्तुमन्वहं॥१०॥ यथो
क्तं श्रीमहेशेन वैदर्भी प्रतिसादरं॥ तथैव जातस्तत्पुत्रः शिवपूजापरायणः॥११॥ वैदर्भीतनयं दृष्ट्वा श्रीमहादेवपूजकं॥ संतुष्टहृदया जाता
सौभाग्यानिलया सदा॥१२॥ वैदर्भीतनयो ब्रह्मन्नुपयेमे ततः परं॥ तस्य लक्षणभूत्सौम्यं नारीणामतिसुंदरं॥१३॥ नवलक्षं सुता जातास्त
स्य तासु शिवार्चकाः॥ पौत्रान्शिवार्चकान्दृष्ट्वा वैदर्भी मुदिता स्थिता॥१४॥ लक्षचक्ररथस्तेन कारितो मणिरंजितः॥ शिवालयः कृतस्तेन
नानारत्नमयः शुभः॥१५॥ वैदर्भ्यप्यनिशं शंभुं पूजयामास सादरं॥ हेमपद्मैर्बिल्वपत्रैः प्रसूनैर्विविधैरपि॥१६॥ सा सर्वदा महादेवं
स्मरंती शिवतत्परा॥ नित्यं शिवकथामेव शुश्राव श्रुतिसंमता॥१७॥ शिवालये सन्निविश्य शिवलिंगस्य सन्निधौ॥ प्रतिक्षणं शिवं बिल्वैः पू
जयित्वैव सा स्थिता॥१८॥ तत्पुत्रो मातरं दृष्ट्वा शिवपूजापरां सदा॥ शिवपूजासाधनानि तस्यै दत्वा स्थितो विधे॥१९॥ एवं स्थित्वा कदाचित्सा
पूजयंती महेश्वरं॥ शिवे शशंकरेत्युक्त्वा विजहौ मुदिता तनुं॥२०॥ ततः प्रेषितमीशेन पुष्पकं पुष्पसंकुलं॥ पुष्पकं सा समारुह्य ययौ शंकरसं
निधिं॥२१॥ तदा दुंदुभयो नेदुः पुष्पवृष्टिरभूत्तदा॥ गंधर्वाश्च जगुः सर्वे ननृतुश्चाप्सरोगणाः॥२२॥ शिवस्तामागतां दृष्ट्वा दृष्ट्वा च जगदंबि
कां॥ बभाषे वचनं प्रीत्या वैदर्भीमपि तोषयन्॥२३॥ ॥श्रीमहादेव उवाच॥ ॥इयं मदेकनिरता मदाराधनतत्परा॥ मामेव सर्वदा
ध्यात्वासौ स्थिता भुवि संस्थिता॥२४॥ कियत्कालं त्वया सार्कं अत्र क्रीडां करोत्वियं॥ ततः परमियं देवि मयि लीना भविष्यति॥२५॥ मन्ना
मोच्चारणं कृत्वा तनुः स्यक्त्वानया प्रिये॥ ततो मय्यधुनैवेयं लीना भवतुमर्हति॥२६॥ तथाप्येषा सखी भूत्वा तव कल्पशतत्रयं॥ तिष्ठत्वत्यंत
संतुष्टा ततो लीना भविष्यति॥२७॥ ॥पार्वत्युवाच॥ ॥शिवे देया मुक्तिरस्यै संदेहो नात्र सर्वथा॥ कियत्कालविलंबेन मुक्तिरस्या
भविष्यति॥२९॥ ॥विष्णुरुवाच॥ ॥इतीशवचनं श्रुत्वा पुनः संशयसंयुता॥ तदा संशयनाशार्थं उवाच प्रीतिपूर्वकं॥३०॥ ॥
२४ आलस्यं कथमेतस्यास्त्वयीशं भो प्रसीदति॥ त्वत्प्रसादे विलंबो पि कथं वा जायते वद॥२८॥
श्रीशिव उवाच॥

 पार्वत्युवाच॥ शिवमुक्तैवजातेयंदेयान्यामुक्तिरस्तिका॥ कौतुकंक्रियतेशंभोकिमेतद्वदसादरं॥ ३१॥ ॥श्रीसदाशिवउवाच॥ ॥ 
 सामीप्यरूपायामुक्तिस्तामापेयंवरानने॥ इयंनपरमांमुक्तिंप्रापाग्रेसाभविष्यति॥ ३२॥ शिवेतिशिवमन्त्रामसम्यगुच्चार्ययस्तनुंत्यजेत्स
मन्मयोभूत्वामयिसंविशतिध्रुवं॥ ३३॥ शिवेत्तिसर्ववेदांतैःसंस्तुतंनामयन्मम॥ तद्ददातिपरांमुक्तिमंतकालेस्मृतंशिव॥ ३४॥ विष्णुरुवाच॥
॥ इतितद्वचनंश्रुत्वाभवानीशिववल्लभा॥ संतुष्टाप्रीतिमापन्नाजाताविच्छिन्नसंशया॥ ३५॥ वैदर्भ्यपिसुखंप्रापसंस्थिताशिवयासह॥ शि
वपूजाप्रभावेनक्रीडामपिचकारसा॥ ततःसापरमांमुक्तिंसंप्रापचशिवाज्ञया॥ शिवरूपैवसाजाताशिवपूजाप्रभावतः॥ ३७॥ इदंवृत्तांत
मखिलंनंदिकेशेनसादरं॥ मह्यमुक्तंपुराब्रह्मन्तत्तुभ्यंचनिवेदितं॥ ३८॥ अतःशिवेतिमंत्रोयंसर्वमंत्रोत्तमोत्तमः॥ तेनमंत्रेणसततंपूजनी
यःसदाशिवः॥ ३९॥ मयानेनैवमंत्रेणपूज्यतेगिरिजापतिः॥ एतन्मंत्रसमोमंत्रोनवेदेष्वखिलेष्वपि॥ ४०॥ सदाशिवोवेदवेद्यःसर्वदेवोत्तमो
यथा॥ तथैवसर्वमंत्रेभ्यःशिवेतिमनुरुत्तमः॥ ४१॥ विधेशिवेतिमंत्रेणशिवलिंगेसमर्चिते॥ दुःखानिविलयंयांतिसद्यएवनसंशयः॥ ४२॥
हेमाद्रिशिखरेसंतिशिवलिंगानिभूरिशः॥ गत्वातत्रेंद्रसंयुक्तःपूजयस्वविधेशिवं॥ ४३॥ ॥अगस्त्यउवाच॥ ॥इत्युक्तोविष्णुनाब्रह्मा
सदेवेंद्रःप्रणम्यतं॥ जगाममेरुशृंगाग्रेशिवलिंगार्चनेच्छया॥ ४४॥ हेमाद्रिशृंगेसर्वत्रसचचारविधिस्ततः॥ अदृष्ट्वाशिवलिंगानिपुनः
संप्रापकेशवं॥ ४५॥ तमागतंविधिंप्राहकिमासीदितिकेशवः॥ शिवलिंगान्यदृष्टानिमयेत्याहततोविधिः॥ ४६॥ इतितद्वचनंश्रुत्वा 
विष्णुर्विस्मितमानसः॥ उवाचवचनंविप्राविधिंविस्मापयन्तदा॥ ४७॥ ॥विष्णुरुवाच॥ ॥ हेमाद्रिशिवलिंगानिदृश्यंतेखलुशां 
भवैः॥ तल्लिंगदर्शनंयेषांशांभवास्तेनसंशयः॥ ४८॥ कथंमलिनचित्तानांशिवलिंगस्यदर्शनं॥ यतोविशुद्धचित्तानांजायतेलिंग
दर्शनं॥ सर्वदाशिवभक्तानांशिवसंसक्तचेतसां॥ जायतेमोक्षदंश्रौतंशिवलिंगस्यदर्शनं॥ ५०॥ प्रायशोनास्तिविश्वासस्तववेदेष्वत
स्त्वया॥ हेमाद्रौशिवलिंगानिनदृष्टानिस्थितान्यपि॥ ५१॥ अतोधुनासहेंद्रेणकृत्वोद्धूलनमादरात्॥ रुद्राक्षधारणंकृत्वाजपशैवं
षडक्षरं॥ ५२॥ चतुर्विंशत्तिलक्षंचेज्जप्यतेशांभवोमनुः॥ तदावेदेषुविश्वासस्तवब्रह्मन्भविष्यति॥ ५३॥ जपोप्ययंचविधिवत्क
र्तव्योभक्तिपूर्वकं॥ अन्यथातवविश्वासोवेदेषुनभविष्यति॥ ५४॥ जातेवेदेषुविश्वासेविश्वासस्तेशिवेभवेत्॥ शिवेजातेचविश्वा

सेदुःखनाशोभविष्यति॥ ५५॥ शिवेयेषांनविश्वासस्तेसर्वेदुःखितास्सदा॥ शिवविश्वासहीनानांतद्दुःखंनविनश्यति॥ ५६॥ नभविष्यतिविश्वा
सः सहसाशंकरेविधे॥ विश्वासः शंकरेयस्यसधन्यइतिगीयते॥ ५७॥ संतन्यमानोविश्वासःशंकरेयदिजायते॥ तदादुःखानिनश्यंतिसर्वाण्यपि
नसंशयः॥ ५८॥ तावद्दुःखानियावन्नविश्वासः पार्वतीश्वरे॥ अतोजपमनुंशैवंशिवविश्वासकारणं॥ ५९॥ कुरुशैवस्यमंत्रस्यविधिवज्जपमादरा
त्॥ जपेपिकुरुविश्वासंशुचिःशैवमनोर्विधे॥ ६०॥ विश्वासेनविनाक्कापिनकार्यंसिद्धिमेष्यति॥ अतोजपमनुंशैवंसेंद्रोविश्वासपूर्वकं॥ ६१॥ ॥
अगस्त्यउवाच॥ ॥ इतितद्वचनंश्रुत्वाविश्वस्यवचनंद्विजाः॥ जजापविधिद्धृत्वासेंद्रःशैवंषडक्षरं॥ ६२॥ चतुर्विंशतिलक्षाणांजातेशैवमनोर्जपे॥ सर्वेष्व
पिचवेदेषुविश्वासोभूत्तयोर्दृढः॥ ६३॥ ततः परंमहेशेपिविश्वासोभूत्तयोर्दृढः॥ प्रायश्चित्तविमुक्त्यर्थंतंप्राहविष्णुर्विधिंततः॥ ६४॥ ॥विष्णुरुवाच॥ ॥
अतः परंविधेगच्छहेमाद्रिशिखरंप्रति॥ तत्रशंकरलिंगानिपूजयस्वयथाविधि॥ ॥अगस्त्यउवाच॥ ॥ इतितद्वचनंश्रुत्वाविष्णुंनत्वाकृतांज
नभाषेविनयाद्ब्रह्माकृतांजलिपुटोद्विजाः॥ ६६॥ ॥ ब्रह्मोवाच॥ ॥शिवलिंगंत्वयाविष्णोकथंसंपूज्यतेन्वहं॥ संस्थाप्यतेत्वयाकुत्रशिव
लिंगंसमर्चितं॥ ६७॥ ॥विष्णुरुवाच॥ ॥ विधेममैवहृत्पद्मेशिवलिंगंशिवात्मकं॥ तिष्ठत्येकंमयातस्यक्रियतेपूजनंसदा॥ ६८॥ मया
नस्थाप्यतेन्यत्रशिवलिंगंसमर्चितं॥ प्रतिक्षणंमयातस्यपूजनंक्रियतेविधे॥ ६९॥ ॥अगस्त्यउवाच॥ ॥ इतितद्वचनंश्रुत्वाविधिर्विस्मित
मानसः॥ विष्णोदर्शयतल्लिंगमितिप्राहद्विजोत्तमाः॥ ७०॥ ॥विष्णुरुवाच॥ ॥ दिव्यंचक्षुर्ददाम्यद्यतुभ्यमिद्रायचाधुना॥ मद्धृत्कमल
मध्यस्थंशिवलिंगविलोकय॥ ७१॥ हृत्पद्मसंनिविष्टंयच्छिवलिंगंशिवात्मकं॥ द्रष्टुंनशक्यतेतत्तुसर्वथाचर्मचक्षुषा॥ ७२॥ ॥अगस्त्यउवाच॥ ॥इत्यु
स्या त्क्वासदद्दौविष्णुर्दिव्यंचक्षुप्रदात्त्वंतस्यासीच्छिवपूजया॥ ७३॥ विष्णुहृत्पद्मसंविष्टंशिवलिंगंशिवात्मकं॥ ताभ्यांदृष्टंयदाविष्णोशिवलिंगंशि
वात्मकं॥ तदैवसर्वदुःखानिनिवृत्तानितयोर्द्वयोः॥ ७५॥ सेंद्रश्चतुर्मुखस्तत्रचकारशिवपूजनं॥ पंचामृतैर्बिल्वपत्रैर्हैमपद्मैस्तदाद्विजाः॥ ७६॥ इंद्रः
प्रापसुखंसद्यस्तत्रशंकरपूजया॥ ततोविधिर्ययौसेंद्रोहेमाद्रिशिखरंप्रति॥ ७७॥ शिवलिंगानिदृष्टानितत्रतेनततःपरं॥ सेंद्रःसंपूजयामास
शिवलिंगानिसादरं॥ ७८॥ शिवलिंगानिसंपूज्यसपुनःप्रापकेशवं॥ लिंगानिपूजितानीतिहरिंप्राहविधिर्मुदा॥ ७९॥ हरिः पूजितलिंगस्यसंतु
ष्टस्यविधेर्वचः॥ श्रुत्वास्वयंचसंतुष्टःप्राहवाक्यंचतुर्मुखं॥ ८०॥ ॥विष्णुरुवाच॥ ॥ विश्वस्यदेवदेवेशंमहेशमनिशंविधे॥ अद्यप्रभृतियत्ने

नपूजयस्वयथाविधि॥८१॥आपादमस्तकंसम्यग्भस्मनोद्धूल्यसादरं॥सर्वश्रुतिश्रुतंशैवंजपमंत्रंषडक्षरं॥८२॥शृणुशैवींकथांनित्यंवद 
शैवींकथांसदा॥पूजयस्वातियत्नेनशिवभक्तान्पुनःपुनः॥८३॥अप्रमादेनसततंशिवैकशरणोभव॥शिवार्चनेनसततमानंदंप्राप्यतेयतः
॥८४॥इंद्रत्वमपियत्नेनपूजयस्वमहेश्वरं॥महेशपूजयासद्यःसुरत्वंप्राप्तंयतस्त्वया॥८५॥गुरोत्वमपियत्नेनपूजयस्वसदाशिवं॥यत्पूजयामुक्तिकां
ताकरस्थैवभविष्यति॥८६॥शिवार्चनंपरोधर्मःसर्वेषांश्रुतिचोदितः॥यत्धर्माचरणेभक्तिश्चाविघ्नताभवेत्॥८७॥ ॥अगस्त्यउवाच॥ ॥इतिवि
ष्णुवचःश्रुत्वानत्वाविष्णुंततोविधिः॥स्वेंद्रोययौस्वलोकायप्रहृष्टवदनोद्विजाः॥८८॥इंद्रोपिगुरुणासाकंब्रह्मणाप्रेषितस्ततः॥हृष्टोययौस्वलोकायग
तदुःखोद्विजोत्तमाः॥८९॥अतःशिवार्चनेनैवदुःखनाशोभिजायते॥शिवार्चनंविनाविप्रादुःखनाशोनजायते॥९०॥संसारबंधविच्छेदोजाय
तेशिवपूजया॥संसारबंधविच्छेदोनशिवाराधनंविना॥९१॥यस्यलीलाविहारोयंप्रपंचविविधोद्विजाः॥तस्यश्रीविश्वनाथस्यपूजादुःखापहारिणी
॥९२॥विश्वस्यपार्वतीनाथोयष्टव्यश्चमुमुक्षुभिः॥स्मर्तव्यश्चप्रयत्नेनध्यातव्यश्चमहेश्वरः॥९३॥ध्यानेनतपसायज्ञैःपूजयाचमुहुर्मुहुः॥प्रीणनी
योमहादेवःसर्वदामुक्तिकांक्षिभिः॥९४॥उद्धूलयध्वमंगानिभस्मनाप्रतिवासरं॥भूषयध्वंशरीराणिरुद्राक्षैःश्रुतिचोदितैः॥९५॥शिरो
ललाटस्थानानिसितभस्मत्रिपुंड्रकैः॥पावयित्वाप्रयत्नेनपूजयध्वंमहेश्वरं॥९६॥जपध्वमतियत्नेनरुद्राध्यायंमुहुर्मुहुः॥श्रीरुद्रा- 
ध्यायमध्यस्थंध्यातंवेदैःस्तुतंसदा॥९७॥मंत्रंनमःशिवायेतिजपध्वंविधिपूर्वकं॥समंत्रराजःसर्वेषांमंत्राणामधिपोद्विजाः॥९८॥नास्तित
त्सदृशोमंत्रोमंत्रेषुविविधेष्वपि॥वेदवेदांतसंवेद्यःसर्वमंत्रोत्तमोत्तमः॥९९॥पंचाक्षरःसवेदेड्यःसतुमंत्रशिरोमणिः॥मोक्षोभवतिवि
प्रेंद्रास्तज्जपेनैननान्यथा॥१००॥पंचाक्षरंमंत्रराजंमहादेवात्मकंद्विजाः॥योजपेदतियत्नेनमुक्तिस्तस्यैवजायते॥१०१॥पंचाक्षरजपास
क्तःपंचास्यध्यानतत्परः॥सर्वप्रपंचनिर्मुक्तःप्रपंचंचनैवपश्यति॥२॥पंचाक्षरविहीनानांमुक्तिनास्त्येवसर्वथा॥अतःपंचाक्षरंश्रौतंज
पध्वंसततंद्विजाः॥३॥पंचाक्षरस्यमाहात्म्यंवेदैरपिनबुध्यते॥४॥पंचाक्षरस्यमहिमाब्रह्माद्यैर्नैवबुध्यते॥अस्मदाद्यैस्तुतन्मंत्र
महिमाज्ञायतेकथं॥५॥महेशःसर्वदेवेशःसर्वज्ञःपरमेश्वर॥जानातिशिवमंत्रस्यमाहात्म्यंनेतरोध्रुवं॥६॥वेदास्तुवेत्तियं
मंत्रंवेदांताश्चप्रयत्नतः॥तस्यमंत्रस्यमाहात्म्यंकोवावेदाप्रिवंविना॥७॥ ॥विष्णुरुवाच॥ ॥इत्यगस्त्यवचःश्रुत्वा

वशिष्ठाद्यामुनीश्वराः॥शिवार्चनपराजाताभस्मोद्धूलितविग्रहाः॥८॥अतःशिवार्चनंकार्यंसर्वदाशैवपुंगवैः॥ मुक्ताशिवार्चनेनैव
वबहवःपूर्वमास्तिकाः॥९॥शिवार्चनोत्सरोधर्मोनास्तिनाऽस्तीतिमेमतिः॥ सत्यमेतत्पुनःसत्यमुद्धृत्यभुजमुच्यते॥१०॥शिवार्चनंपरो
धर्मस्तपश्चशिवपूजनं॥यज्ञाःशिवार्चनंविप्राःसत्यंसत्यंनसंशयः॥११॥शिवार्चनंकृतंयेनभक्तिपूर्वकमादरात्॥तेनयागाःकृताःस
र्वेऽसांगाःसर्वस्वदक्षिणाः॥१२॥शिवार्चनंकृतंयेनभक्तिपूर्वकमादरात्॥कृतानितेनसर्वाणिमहादानानिसंततं॥१३॥शिवार्चनंकृ
तंयेनभक्तिपूर्वकमादरात्॥ तेनाधीतोऽनंतशाखोवेदःसांगोद्विजोत्तमाः॥१४॥शिवार्चनंकृतंयेनभक्तिपूर्वकमादरात्॥तेनतीर्था
निसर्वाणिसेवितानिनसंशयः॥१५॥शिवार्चनंकृतंयेनभक्तिपूर्वकमादरात्॥तेनधर्मास्समस्ताश्चकृताएवद्विजोत्तमाः॥१६॥सर्वेषामपिध
र्माणांविश्वासःफलमीश्वरे॥तस्यापिफलमुत्कृष्टंश्रीमहादेवपूजनं॥१७॥सर्वेप्सितार्थफलदंश्रीमहादेवपूजनं॥सर्वेप्सितार्थाःसिध्यंति
श्रीमहादेवपूजया॥१८॥तिरस्कृताःकल्पवृक्षाःश्रीमहादेवपूजकैः॥ तृणीकृताकामधेनुःशिवपूजापरायणैः॥१९॥कल्पवृक्षास्तुविप्रेंद्रा
विनश्वरफलप्रदाः॥फलंशिवार्चनाद्विप्राःप्राप्तव्यमविनश्वरं॥२०॥प्राप्यतेकल्पवृक्षेभ्यःफलमल्पंविनश्वरं॥ फलंशिवार्चनात्प्राप्यमनल्प
मविनश्वरं॥२१॥शिवार्चनपरोमर्त्योभक्तिपूर्वकमन्वहं॥यंयंकामयतेकामंतंतमाप्नोतिसर्वदा॥२२॥शिवार्चकस्यकुत्रापिनकिंचिदस्तिदु
र्लभं॥इच्छामात्रेणसिध्यंतितस्यार्थाःसकलाअपि॥२३॥गाणपत्यंपुराप्राप्तंबहुभिःशिवपूजया॥मुक्ताश्चबहवःपूर्वंमहेशस्यैवपूजया॥२४॥
अत्रैवनाद्यसदनेपुंडरीकपुरेपुरा॥त्रिपुरारिंसमभ्यर्च्यमुक्ताजाताश्चकोटिशः॥२५॥श्रीमच्चिदंबराधीशोयेनदृष्टःकदाचन॥सोपिमुक्तो
भवत्येवमहेशकृपयाद्विजाः॥२६॥धन्यायूयंशिवासक्ताश्रीचिदंबरवासिनः॥भस्मरुद्राक्षवीतांगानिःसंगाःपरमार्थिनः॥२७॥ ॥श्रीमहा
देवउवाच॥ ॥इतिविष्णुवचःश्रुत्वाशैवाविष्णुमदर्चकं॥धन्योसीत्यभिनंद्याथजग्मुःस्वस्वाश्रमंप्रति॥२८॥विष्णुरप्यसभानाथंततःसंपूज्य
मांशिवे॥परमानंददांधन्यांप्रापमेकाशिकांपुरीं॥२९॥ततःस्नात्वाज्ञानवाप्यांकृत्वाज्ञानेनादर्शनं॥ दंडपाणिंततोनत्वाढुंढिशमभिपूज्यच
॥३०॥मोक्षलक्ष्मीविलासाख्यमंडपंप्रापसत्वरं॥ततोददर्शमांशंभुंसर्वदेवशिखामणिं॥३१॥ततःप्राहमहालक्ष्मींमत्पूजनपरांशिवे॥वि
लोकयप्रयत्नेनमामानंदपरिप्लुतः॥३२॥ ॥विष्णुरुवाच॥ ॥विश्वेश्वरोयंमदनांतकोयंमृत्युंजयोयंत्रिपुरांतकोयं॥सर्वेश्वरो

यंसुरवंदितोयंगौरीश्वरोयंचयमांतकोयं।।३३।।विज्ञानमानंदमनंतमीड्यंविश्वेश्वरंलिंगमिदंमनोज्ञं।।पश्यैतदाद्यंतविहीनमार्येसमर्चया
त्र्येश्वरमादिदेवं।।३४।।इत्युक्त्वामामुमाकांतलक्ष्मीकान्तोजनार्दनः।।पूजयित्वाप्रयत्नेनकाश्यामस्यांस्थितःशिवे।।३५।।विष्णुर्दभ्रसभा
नाथंनृत्यंतंमांविलोकयन।।तेनपुण्यप्रभावेनकाशींप्रापमदात्मिकां।।३६।।यत्पुंडरीकपुरमध्यसंस्थंतत्रापिदह्रंगगनंविशोकं।।तस्मिन्य
दंतस्तदुपासितव्यंमुक्त्यैकाशीप्राप्तुकामैरनन्यैः।।३७।। ।।इतिश्रीशिवरहस्येउग्राख्येसप्तमांशेशिवगौरीसंवादेचिदंबरमाहात्म्येपंचविं
शोध्यायः।।२५।। ।।श्रीसदाशिवउवाच।। ।।कुंभघोणाभिधंक्षेत्रमेकमस्तिवरानने।।तत्क्षेत्रेजन्ममात्रेणमुक्तिर्भवतिसर्वथा।।१।।तत्रसं
तिमहाशैवाःकोटिशःकमलानने।।तेसर्वेसर्वभावेनसर्वदामदुपासकाः।।२।।उद्धूल्यभस्मनातेतुसर्वेप्यापादमस्तकं।।रुद्राक्षधारणंकृत्वा
पूजयंत्यनिशंचमां।।३।।सदाशिवेशशर्वेतिशंकरेतिवदंतिते।।मन्नाम्नाचिन्हिताःसर्वेसर्वेमद्रूपचिंतकाः।।४।।अनन्यशरणास्तेतुमदेक
शरणाःशिवे।।मन्नामजपसंसक्तामच्चित्तामद्गतासवः।।५।।कुंभघोणाभिधेलिंगंतत्रतिष्टतिशोभने।।तत्पूजामतियत्नेनतेकुर्वंतिमद
र्चकाः।।६।।सार्द्रपातान्विताभूतायदाभवतिशोभने।।तदातल्लिंगपूजायासामुक्तिंसंप्रयच्छति।।७।।तदासंपूजितेलिंगेकुंभघोणेश्वराभिधे।।
सर्वेकामानेकदेवप्राप्नुवंतिशुभानने।।८।।तत्रपूर्वंतपस्तप्तंविष्णुनापापजिष्णुना।।मल्लिंगपूजकेनार्येज्वलत्पावकतेजसा।।९।।तपस्यं
तंमहाविष्णुंकुंभघोणनिवासिनं।।प्रणिपत्यविधिःप्राहमुक्त्युपायंवदेतितं।।१०।। ।।विष्णुरुवाच।। ।।सर्ववेदश्रुतंपुण्यंवेदांतेष्वपिसं
श्रुतं।।शिवलिंगार्चनंकार्यंमुक्त्यर्थंभस्मभूषणैः।।११।।महादेवार्चनंब्रह्मन्चतुर्वर्गफलप्रदं।।तत्फलंप्राप्यतेसर्वैःशंकरस्यैवपूजया।।१२।।
शंकराराधनंयेननकृतंसावधानतः।।सदुर्भगोदुराचारोदुर्बुद्धिश्चनसंशयः।।१३।।यावंतोदुर्भगाःसंतितावंतोवस्तुतोविधे।।संत्यक्तशंक
राचाराःसंत्यक्तशिवपूजनाः।।१४।।नयेनशंकरःसम्यक्पूज्यतेप्रत्यहंमुदा।।तेनसंप्राप्यतेदुःखंयातनापितनुव्यये।।१५।।सर्वश्रुतिश्रुतं
नित्यंश्रीमहादेवपूजनं।।त्यक्त्वामोहाद्भ्रमेणापिदुःखंप्राप्नोतिदुःसहं।।महादेवार्चनंत्यक्त्वायोमोहाद्भोक्तुमिच्छतिसविष्टामेवदुर्बुद्धिःसततं
भोक्तुमिच्छति।।१७।।महादेवार्चनंत्यक्त्वाजलंयःपातुमिच्छति।।समूत्रमेवसततंदुर्बुद्धिःपातुमिच्छति।।१८।।यःशंकरंप्रयत्नेनपूजयि
ष्यतिसर्वदा।।सतपस्वीसधर्मिष्ठःससर्वगुणसंश्रयः।।१९।।भूतंभव्यंभविष्यच्चभाग्यंयस्यभविष्यति।।तस्यैवभक्तिर्भवतिभवानीप्राणव

ल्लभे ॥ २० ॥ भगवान्भगविध्वंसीभवानीवल्लभः प्रभुः ॥ भूरिभाग्यप्रभावेनभाव्यतेभुविभावुकैः ॥ २१ ॥ भक्तिमव्यभिचारेणनकरिष्यंतियेशिवे ॥
सनित्यसूतकीज्ञेयोजारजश्चचतुर्मुख ॥ अशैवकृतकर्माणिवेदोक्तान्यपिपद्मज ॥ वृथाभवंतिसर्वाणिपातकंप्रत्युताधिकं ॥ २३ ॥ अशैवेवैदिकंकर्म
नकर्त्तव्यंकदाचन ॥ अशैवानांवैदिकेपुनकर्मस्वधिकारिता ॥ २४ ॥ अशैवोयत्कुलेजातस्तत्पुल्कसकुलंविधे ॥ सत्यमेतत्सत्यमेतदुत्क्षिप्यभुजमुच्य
ते ॥ २५ ॥ अशैवाद्ब्राह्मणाछ्रेष्ठः स्वतः पुल्कसवंशजः ॥ सत्यमेत० ॥ २६ ॥ अशैवजननंव्यर्थंजीवनंचयथावृथाविधे ॥ सत्यमेत० ॥ २७ ॥ अशैवभावा
द्विष्टायांक्रिमिभावोवरंविधे ॥ सत्यमेत० ॥ २८ ॥ प्राप्तव्यंयातनादुखमशैवेनतनुव्यये ॥ क्रिमिभिर्यातनादुःखंतथानप्राप्यतेविधे ॥ २९ ॥ अशैवेर्यात
नाप्राप्ताबहुभिर्यममंदिरे ॥ नतेषांगणनाकर्तुंशक्यतेनात्रसंशयः ॥ ३० ॥ ब्राह्मणः क्षत्रियोवैश्यःशूद्रश्चांत्यजएववा ॥ शैवोयदिभवेद्भाग्यात्सपूज्यः स
र्वदाविधे ॥ ३१ ॥ संपादनीयायत्नेनशिवभक्तिस्तपोबलात ॥ सैवभक्तिर्मुक्तिदात्रीयाभक्तिस्यादनन्यगा ॥ ३२ ॥ किमश्वमेधयागांतेर्यागैः सर्वस्वदक्षि
णैः ॥ यदिनस्यान्महादेवेभक्तिरव्यभिचारिणी ॥ ३३ ॥ किमत्युत्तमगोदानैर्बहुभिः सांगदक्षिणैः ॥ यदिनस्या० ॥ ३४ ॥ किमश्वदानैरमितैर्विधेसर्वस्व
रमितै देक्षिणैः ॥ यदिनस्या० ॥ ३५ ॥ किंहेमदानैश्चैर्विधेसर्वस्वदक्षिणैः ॥ यदिन० ॥ ३६ ॥ किंकन्यारत्नदानैश्चविधेसर्वस्वदक्षिणैः ॥ यदिन० ॥ ३७ ॥ किंदंतिर
त्नदानैश्चविधेसर्वस्वदक्षिणैः ॥ यदिन० ॥ ३८ ॥ किंभूमिरत्नदानैश्चविधेसर्वस्वदक्षिणैः ॥ यदिनस्या० ॥ ३९ ॥ किमन्नदानैः किंतीर्थैः किंतपोभिरनु
त्तमैः ॥ यदिन० ॥ ४० ॥ किंधर्मैरमितैरन्यैर्बहुभिः किंमहादिभिः ॥ यदिनस्यान्महादेवेभक्तिरव्यभिचारिणी ॥ ४१ ॥ येनदत्तंबिल्वपत्रंभक्त्यानन्यगयाशि
वे ॥ कृतानितेनविधिवन्महादानानिकोटिशः ॥ ४२ ॥ येनजप्तःप्रयत्नेनशिवपंचाक्षरः परः ॥ तेनयागाः कृताः सांगाः सर्वेसर्वस्वदक्षिणाः ॥ ४३ ॥ ये
नध्यातोमहादेवः क्षणंवासावधानतः ॥ तेनतप्तानिसर्वाणितपांसिविविधान्यपि ॥ ४४ ॥ येनामस्तकमापादंकृतमुत्धूलनंमुदा ॥ तेनधर्माः कृताः स
र्वेसर्वदासावधानतः ॥ ४५ ॥ सभाग्यवान्सपुण्यात्मासतपोनिधिरुत्तमः ॥ योनन्यशरणोनित्यमर्चयेत्पार्वतीपतिं ॥ ४६ ॥ सकुलीनः सविद्यावा
न्ससर्वगुणसंश्रयः ॥ योनन्य० ॥ ससर्वयोगनिरतः ससमाधियुतस्तदा ॥ योनन्य० ॥ ४८ ॥ ससर्वज्ञः सपूतात्मासतत्वज्ञः सधर्मवित् ॥ योनन्य० ॥
॥ ४९ ॥ सबुध्धिमानसनीतिज्ञः सविद्वान्पंडितोत्तमः ॥ योनन्य० ॥ ५० ॥ कृतानियेनदानानिग्रहणेचंद्रसूर्ययोः ॥ तस्यैवानन्यगाभक्तिर्भवतिश्रीमहे
श्वरे ॥ ५१ ॥ कृतायेतानियत्नेनयागाः सर्वस्वदक्षिणाः ॥ तस्यैवानन्यगाभक्तिर्भवतिश्रीमहेश्वरे ॥ ५२ ॥ येसततंभविष्यंतिदग्धसंसारवासनाः ॥ ते

 यामनन्यगाश्चत्याशिवेभक्तिः प्रजायते॥५३॥ पुरागोकर्णमाश्रित्यकुंभयोनिस्तपोनिधिः॥शिवध्यानरतोभूत्वातपस्तेपेतिदुष्करं॥ 
॥५४॥भस्मोद्धूलितसर्वांगस्त्रिपुंड्रांकितमस्तकः॥रुद्राक्षमालाभरणोजटामंडलमंडितः॥५५॥सददर्शद्विजंतत्रभस्मोद्धूलितविग्र
हं॥रुद्राक्षमालाभरणंशिवपूजापरायणं॥५६॥तंदृष्ट्वातीवसंतुष्टःसविनिर्दिष्टविष्टरः॥कुशविष्टरसंविष्टंविशिष्टंप्रणनामच॥५७॥
अगस्त्यंप्रणतंदृष्ट्वासविप्रःसत्वरंविधे॥सम्यक्प्रदक्षिणीकृत्यप्रणनामपुनःपुनः॥५८॥ततःसमुपविष्टंतंकुंभयोनिंमहामुनिं॥संपूज्या
र्घ्यादिभिःसम्यकुउवाचसकृतांजलिः॥५९॥ ॥द्विजउवाच॥ ॥कुंभयोनेकृतार्थोस्मितवपादाब्जदर्शनात्॥भवतःशिवभक्तस्य
संगमोभून्मदाश्रये॥६१॥ ॥विष्णुरुवाच॥ ॥इत्युक्तापितृतृप्त्यर्थंचकारश्राधमादरात्॥ततःपरमुवाचायंवदधर्मानितिद्विजः॥
॥६२॥ ॥अगस्त्यउवाच॥ ॥शिवभक्तोसिधर्मज्ञःकृतार्थोसिशिवव्रत॥धर्मःसर्वोपिविज्ञातस्त्वयानात्रतुसंशयः॥६३॥त्वद्दा
त्तयाशास्त्रदृष्टानत्यापिमुनिसत्तम॥द्विजधर्मानहंवक्ष्येश्रुणुयत्नेनसादरं॥६४॥उत्थायपश्चिमेयामेकृत्वाशौचादिकंततः॥
स्नानंकार्यंप्रयत्नेनशिवलिंगस्यसंनिधौ॥६५॥परिधायततोवस्त्रमुद्धूल्यांगानिभस्मना॥त्रिपुंड्रधारणंकार्यंततोरुद्राक्षधा
रणं॥६६॥संध्याकार्याततोयत्नाद्देवीजप्याततःपरं॥शिवलिंगार्चनंकार्यंततोबिल्वादिसाधनैः॥६७॥जपनीयस्ततःस 
म्यक्श्रौतःशिवषडक्षरः॥ततोरुद्रजपःकार्यःशिवध्यानपुरःसरं॥६८॥प्रदक्षिणनमस्कारास्ततःकार्याप्रयत्नतः॥पूजानिवे 
दनंकार्यंशंकरायततःपरं॥६९॥ ॥विष्णुरुवाच॥ ॥इत्यगस्त्यवचःश्रुत्वाप्रणिपत्यमुनिंद्विज॥प्रदक्षिणनमस्कारविधिं
ब्रूहीतिचाब्रवीत्॥७०॥ ॥अगस्त्यउवाच॥ ॥प्रदक्षिणविधिंवक्ष्येश्रुणुसम्यक्द्विजोत्तम॥नमस्कारविधिंचात्रवक्ष्येवैदिकमार्ग
तः॥७१॥प्रदक्षिणप्रकारस्तुद्विविधोवेदसंमतः॥सव्यापसव्यःसव्यश्चतत्राद्यविधिरुच्यते॥७२॥वृषंचंडंकृषंचैवसोमसूत्रं
पुनर्वृषं॥चंडंचसोमसूत्रंचपुनःचंडंपुनर्वृषं॥७३॥एतत्प्रदक्षिणोक्तानिस्थानानिनवसत्तम॥नतान्युल्लंघनीयानिवेदमार्गर
तैर्द्विजैः॥७४॥प्राग्द्वारंदेवदेवस्यवृषस्थानंप्रकीर्तितं॥पश्चिमाभिमुखंलिंगेस्थानमेतद्दीरितं॥वृषस्यतुमुखंज्ञेयंशिवाभिमुख

मुत्तमं॥७५॥ देवस्यनैर्ऋतंस्थानंचंडस्थानंप्रकीर्तितं॥ पश्चिमाभिमुखेलिंगेस्थानमेतदुदीरितं॥ प्राङ्मुखेशिवलिंगेतुचंडस्थानंद्विजोत्तमं॥ ईशान
भागेविज्ञेयमन्यत्रतुनसर्वथा॥७७॥ महेशस्योत्तरंस्थानंसोमसूत्रस्थलंस्मृतं॥ पूर्वाभिमुखलिंगेतुनियमोयंप्रकीर्तितः॥७८॥ पश्चिमाभिमुखेलिं
गेसोमसूत्रंशिवस्यतु॥ पूर्वस्थानंतुविज्ञेयमन्यत्रतुनसर्वथा॥७९॥ त्रीण्येतानिस्थलान्येवनस्थानानिसत्तम॥ एतेष्वेवत्रिरावृत्यानवस्थानप्रकल्प
नं॥८०॥ तेष्वेवैकैकमावृत्यातान्येवात्रपुनःपुनः॥ यत्नेनावर्त्तनीयानिनवतायांतिनान्यतः॥८१॥ उपविश्यवृषस्थानेसंकल्प्यविधिपूर्वकं॥ कृतां
जलिपुटोमौनीचंडस्थानंव्रजेत्ततः॥८२॥ पुनर्वृषेशमागत्यसोमसूत्रंव्रजेत्ततः॥ पुनर्वृषेशमागत्यचंडस्थानंव्रजेत्ततः॥८३॥ ततोवृषेशम
प्राप्यसोमसूत्रंव्रजेद्द्विजः॥ सोमसूत्रमनुल्लंघ्यचंडस्थानाद्वृषंव्रजेत्॥८४॥ स्थानान्येवंसमावृत्यवृषभेशंपुनर्यदा॥ प्राप्नुयान्नियतोभूत्वा
तदेकस्यात्प्रदक्षिणं॥८५॥ सव्यापसव्यरूपेस्मिंवैदिकेतुप्रदक्षिणे॥ प्रदक्षिणविधिःप्रोक्तोजाबालैरयमेवहि॥८६॥ एवंप्रदक्षिणंकार्यंप्रत्य
हंशंकरालये॥ यद्यत्रमोहाद्व्यत्यासस्तदास्यादन्यथाध्रुवं॥८७॥ दिवासंध्यासुकर्त्तव्यमेवमेवप्रदक्षिणं॥ इदंप्रदक्षिणंनित्यंद्विजमात्रस्यस
त्तम॥८८॥ प्रदक्षिणत्रयंकार्यमेवपंचदशाथवा॥ अष्टौद्वादशवाकार्याण्यधिकान्यपिशक्तितः॥८९॥ सव्यंसव्येनकर्त्तव्यंतदपिचश्रु
तिचोदितं॥ तदपिद्विजमात्रस्यनित्यमेवनसंशयः॥९०॥ शक्तैस्तुसर्वदाकार्यंसव्यासव्यप्रदक्षिणं॥ इदंकार्यंप्रदोषेषुशक्तिहीनैरपिद्वि
ज॥९१॥ सव्यासव्यविधानेनप्रदोषेशंकरालये॥ प्रदक्षिणत्रयंवापिकर्त्तव्यंनियमाद्द्विजैः॥९२॥ शिवालयेषुयःकुर्यात्सव्यासव्यप्रदक्षिणं॥ स
फलंवाजपेयस्यसंप्राप्नोतिपदेपदे॥९३॥ कृतांजलिपुटैरेवशिवध्यानपुरःसरं॥ प्रदक्षिणंसदाकार्यंमहादेवालयेद्विज॥९४॥ अष्टांगसहितःका
र्यःप्रणामःपार्वतीपतेः॥ सर्वकालेषुयत्नेनशिवध्यानपुरःसरं॥९५॥ जानुबाहुशिरोवक्षगंडानांगाष्टकंयदा॥ दंडवत्प्रणतासक्तंतदष्टांगन
तिर्भवेत्॥९६॥ एतदष्टांगसंयुक्ताःप्रणामाःपार्वतीपतेः॥ प्रयत्नेनान्वहंकार्याःसावधानंद्विजातिभिः॥९७॥ एकविंशतिकर्त्तव्याःप्रणामाःपा
र्वतीपतेः॥ एकादशाथवाष्टौवानातोन्यूनाःकदाचन॥९८॥ यःसाष्टांगंमहादेवंननमेत्सावधानतः॥ सदग्धांगइतिज्ञेयःसत्यंसत्यंनसंशयः॥
॥९९॥ प्रातःशिवार्चनंकृत्वादशकार्याःप्रदक्षिणाः॥ मध्यान्हेतुद्वादशैकादशसायान्हिसादरं॥१००॥ अनुद्धूलितदेहेनमहादेवप्रदक्षिणं॥ नकर्त्त
व्यंनकर्त्तव्यंकदाचन॥१॥ सोमसूत्रमनुल्लंघ्यगर्भेकार्याःप्रदक्षिणाः॥ वृषोयदिभवेद्गर्भेनोचेत्तत्रनसर्वथा॥२॥ सोमसूत्रमनुल्लंघ्यगर्भेसवृष

श्रीशिवर०७ भेपिच॥ विहितंवास्त्ववहितसोमसूत्रंनलंघयेत्॥३॥ वहिश्वापिहितंसूत्रंमुल्लंघ्यंमैवसर्वथा॥ मोहादपिहितंसूत्रंउल्लंघ्याप्नोति उ-ग्रा-पू-
३४ यातनाः॥४॥ उत्तराभिमुखैःकार्यंश्रीमहादेवपूजनं॥ प्राङ्मुखेनाथवाकार्यंश्रीमहादेवपूजनं॥ दक्षिणाभिमुखैर्मर्त्यैर्नकर्त्तव्यंशिवार्च
नं॥६॥ ॥ विष्णुरुवाच॥ ॥ इत्युक्तंतद्वचःश्रुत्वाप्रणम्यमुनिपुंगवं॥ शिवपूजासाधनानिवदेत्याहद्विजोऽत्तम॥७॥ ॥अगस्त्यउ
वाच॥ ॥ शिवपूजासाधनानिसमासेनवदाम्यहं॥ शृणुष्वैतानिविप्रेंद्रजाबालोक्तानियत्नतः॥८॥ वक्ष्येऽधिकारिणंचात्रश्रीम
हादेवपूजने॥ यत्पूजयामहादेवः तुष्टोमुक्तिंप्रयच्छति॥९॥ अनुद्धूलितदेहेननकर्त्तव्यंशिवार्चनं॥ अनुद्धूलितदेहस्यनोधिकारुस्य
शिवार्चने॥१०॥ रुद्राक्षरहितांगेननकर्त्तव्यंशिवार्चनं॥ रुद्राक्षरहितानांहिनाधिकारःशिवार्चने॥११॥ भस्मोद्धूलितसर्वांगो
स्त्रिपुंड्रांकितमस्तकैः॥ रुद्राक्षमालाभरणैःकर्त्तव्यंशंकरार्चनं॥१२॥ अभिषेकोरुद्रमंत्रैःकर्त्तव्यःशोधितोदकैः॥ ततोदेयं
वस्त्रयुग्ममुपवीतद्वयंतथा॥ वस्त्रोपवीताभावेतुबिल्वपत्रद्वयंद्वयं॥ ततःपरंपूजनीयोविभूत्यापरमेश्वरः॥१४॥ ततोबि
ल्वदलैःशुद्धैरच्छिद्रैःकोमलैर्नवैः॥ पूजनीयःप्रयत्नेनलिंगरूपीसदाशिवः॥१५॥ शुष्कैःपर्युषितैश्छिद्रैःयादृशैस्तादृशैरपि॥
बिल्वपत्रैर्महादेवःपूजनीयःप्रयत्नतः॥१६॥ रत्नवद्बिल्वपत्राणिसंगृह्यद्विजपुंगवाः॥ पूजयंतिमहादेवंवेदमार्गप्रवर्त्तकाः॥१७॥ चूर्णी
कृतान्यपिप्राज्ञाःबिल्वपत्राणिवैदिकाः॥ संपाद्यपूजयंतीशंनबालाभैर्विचक्षणाः॥१८॥ बिल्वपत्रार्चनेनैवसांगंशंकरपूजनं॥ बि
ल्वपत्रंविनापूजानसांगापार्वतीपतेः॥१९॥ धूपदीपोपहारादेरभावेपिद्विजोत्तम॥ सांगंबिल्वदलैरेवभविष्यतिशिवार्चनं॥२०॥ व
स्त्राद्यर्थेबिल्वपत्रंप्रदेयंश्रीमहेशितुः॥ वस्त्रादिदानतोप्यद्भुतत्वेवहिपुण्यदं॥२१॥ सर्वार्थेबिल्वपत्राणिभविष्यंतिनसंशयः॥ बिल्व श्रीशिव
पत्रार्थमन्यत्तुनभवत्येवसर्वथा॥२२॥ रत्नंचबिल्वपत्रार्थंवयतस्तत्रतोधमं॥ बिल्वपत्रसमंवस्तुनभूतंनभविष्यति॥२३॥ नके ३४
नाप्यतिशुष्केणबिल्वपत्रेणयःशिवं॥ समर्चयतियत्नेनसशिवंप्रतिपद्यते॥२४॥ पातार्द्रसोमसंयुक्तभूतायांशिशंकरं॥ बिल्वप नि
त्रैःसमभ्यर्च्यब्रह्महापिविमुच्यते॥२५॥ बिल्वपत्रैर्महादेवंपूजयित्वापुराद्विजा॥ बहवोमोक्षमापन्नाःसंख्यातेषांनविद्यते॥
॥२६॥ सहस्रार्बुदपुष्पाणांपूजयामत्फलंभवेत्॥ ततोपिकोटिगुणितंबिल्वपत्रार्चनात्फलं॥२७॥ सहस्रार्बुदरत्नानांपूजया

यत्फलंभवेत्॥ ततोपिकोटिगुणितंबिल्वपत्रार्चनात्फलं॥ २८॥ यत्पुण्यंलभतेमर्त्यास्तिलराशिभिरर्चने॥ ततोपिकोटिगुणितंबिल्वपत्रा
र्चनात्फलं॥ २९॥ यत्पुण्यंलभतेमर्त्योमापराशिभिरर्चने॥ ततोपिकोटिगुणितंबिल्वपत्रार्चनात्फलं॥ ३०॥ यत्पुण्यंलभतेमर्त्योयवरा
शिभिरर्चने॥ ततोपिको०॥ ३१॥ कृत्वायत्नेनसततंब्रह्महत्यार्बुदान्यपि॥ बिल्वैःशिवंसमभ्यर्च्यतत्पापेभ्योविमुच्यते॥ ३२॥ अनंतब्रह्महत्या
दिपापानिविविधान्यपि॥ सद्योनश्यंतिबिल्वेनपूजितेनमहेश्वरे॥ ३३॥ भूतिपूजोत्तरंबिल्वैःपूजनीयोमहेश्वरः॥ प्रत्यहंनियमेनेतिप्राहुर्जा
बालवादिनाः॥ ३४॥ बिल्वपत्रैःप्रसूनैश्चकरवीरादिभिर्द्विज॥ पूजनीयःप्रयत्नेनदेवदेवमहेश्वरः॥ ३५॥ धूपदीपादिकंसर्वकल्पनीयंततःप
रं॥ सोपदंशंकल्पनीयंनैवेद्यंप्रत्यहंशिवे॥ ३६॥ प्रत्यहंशिवनैवेद्यंकर्तव्यमितिवाञ्छया॥ पाकःकार्यःप्रयत्नेनब्राह्मणैस्त्रिर्यादिभिः॥ ३७॥ या
वदन्नंकृतंतावन्निवेद्यैवमहेश्वरे॥ भोक्तव्यमतियत्नेनानित्यंशिवानिवेदितं॥ शिवानिवेदितान्नानिनभोक्तव्यानिसर्वथा॥ जलादिकंचनग्रा
ह्यंशंकरायानिवेदितं॥ ३९॥ सर्वंशिवार्चनंकृत्वाविधिवद्भक्तिपूर्वकं॥ कृत्वापूजामहेशायततःसर्वंनिवेदयेत्॥ ४०॥ जलंहस्तेसमादायसादरं
भक्तिपूर्वकं॥ जानुभ्यामवनिंगत्वामंत्रमेनंपठेत्ततः॥ ४१॥ आवाहनंनजानामिपूजांचोमापतेप्रभो॥ क्षमस्वदेवदेवेशममांगीकुरुशंकर॥ ४२॥
इतिमंत्रंसमुच्चार्यत्यक्त्वापात्रेजलंततः॥ स्पर्शकार्योमहेशस्यधृत्वाबिल्वदलेकरे॥ ४३॥ स्पृष्ट्वाहस्ततलेनेशमयंमेतित्रिधाजपेत्॥ सद्योजा
तादिमंत्राश्चजपनीयाःप्रयत्नतः॥ ४४॥ ततःपरंपुनर्नत्वाजप्यपंचाक्षरःपरः॥ सहस्रंवातदर्द्धंवातदर्द्धंवायथाविधि॥ ४५॥ त्रिःपरीत्यमहा
देवंशिवनिर्णेजनोदकं॥ पिबेत्सर्वार्थसिध्यर्थंत्रिस्त्रिश्चुलुकसंमितं॥ ४६॥ हस्तेगृहीत्वायत्नेनशिवनिर्णेजनोदकं॥ अमुंमंत्रंपठित्वाद्रोत
ग्राह्यंतदनंतरं॥ ४७॥ कालमृत्युहरंपुण्यंब्रह्महत्यादिनाशकं॥ व्याधिघ्नंपुण्यदंपास्येशिवनिर्णेजनोदकं॥ ४८॥ इतिमंत्रंसमुच्चार्यशिवती
र्थंप्रयत्नतः॥ पातव्यंप्रत्यहंविप्रत्रिकालमपिसादरं॥ ४९॥ ततःपरंपुनर्नत्वादेवदेवमुमापतिं॥ भोजनीयःप्रयत्नेनशैवोभक्तिःपुरःसरं॥
॥ ५०॥ शैवंयोभोजयेन्नित्यंप्रीत्यायत्नपुरःसरं॥ सभोजयतिगौरीशंसाक्षाद्देवद्विजोत्तम॥ ५१॥ भोजयित्वास्वयंशैवंशैवनसहवाद्विज
॥ भोक्तव्यमतियत्नेनशिवध्यानपुरःसरं॥ ५२॥ प्राणानांकिरिकेत्यादिपठित्वैवमनुत्ततः॥ भोक्तव्यमयथाविप्रैर्नभोक्तव्यःद्विजोत्त
म॥ ५३॥ भुक्त्वापुनःप्रयत्नेनजपनीयःषडक्षरः॥ ततःशिवकथाविप्रश्रोतव्यायत्नपूर्वकं॥ ततःसायंमहादेवःपूजनीयःप्रयत्नतः
॥ रात्रावपियथाशक्तिपूजाकार्यामहेश्वरे॥ ५५॥ यामिन्याःपश्चिमेयामेकृत्वाशौचादिकंततः॥ उद्धृत्यभस्मनागानिकर्तव्यंशिवचिंतनं

 ॥५६॥ स्मर्त्तव्योपार्वतीनाथोरत्नसिंहासनास्थितः॥ उमालिंगितवामांगोदिव्यमंगलविग्रहः॥५७॥ स्मेराननःस्मरहरः सर्वदेवशिखामणिः॥ विष्णुब्रह्मादि 
वंद्यांघ्रिः कल्याणगुणसंश्रयः॥५८॥ विष्ण्वादिमौलिरत्नौघसमालिंगितपादुकः॥ अनंतैश्वर्यसंपन्नोनानागणनिषेवितः॥५९॥ एवंस्मृत्वामहादेवं
नत्वास्नात्वाततःपरं॥ उद्धूलनादिकंकृत्वाकर्त्तव्यंशिवपूजनं॥६०॥ स्नानंकार्यंसदाविप्रशिवतीर्थेद्विजादिभिः॥ शिवतीर्थान्यतीर्थेषुनस्नानव्यंकदाच
न॥६१॥ शिवलिंगसमीपस्थंयद्यत्तीर्थंभविष्यति॥ तत्तत्सर्वंद्विजश्रेष्ठशिवतीर्थंविदुर्बुधाः॥६२॥ येनतन्नतपस्तप्तंशिवमुद्दिश्यसादरं॥ तच्चतीर्थंमहापु
ण्यंशिवतीर्थंनसंशयः॥६३॥ विष्ण्वाद्यैःशिवमुद्दिश्ययत्रतप्तंतपःपुरा॥ तच्चतीर्थंम०॥६४॥ कश्यपाग्निवशिष्ठाद्यैर्यत्रतप्तंतपःपुरा॥ तच्चतीर्थंम०॥६५॥ गं
धर्वकिन्नराद्यैश्चयत्रतप्तंतपःपुरा॥ तच्चतीर्थंमहापुण्यंशिवतीर्थंनसंशयः॥ यत्रैवशिवमुद्दिश्यसर्वैस्तप्तंतपःपुरा॥ स्थास्यत्येवहितत्रैकंशिवलिंगंशिवा-
त्मकं॥६७॥ शिवलिंगंप्रतिष्ठाप्यशिवमुद्दिश्यशांभवाः॥ तपःकुर्वंतियत्नेननान्यथाद्विजपुंगव॥६८॥ विष्णुप्रभृतयःसर्वेशांभवाएवतेस्ततः॥ शिवलिंगं
प्रतिष्ठाप्यतपस्तप्तंयथाविधि॥६९॥ शिवशंभोमहेशेतितिस्त्रःपीत्वैवजलंततः॥ स्नात्वापुनःपिबेदापोमंत्रैस्तैरेवपूर्ववत्॥७०॥ ततःकालाग्निरुद्रैवप्राणा
यामपुरःसरं॥ देयमर्घ्यंभैरवायजप्त्वामुंमंत्रमादरात्॥७१॥ अतितीक्ष्णमहाकायकल्पांतदहनोपम॥ भैरवायनमस्तुभ्यमनुज्ञांदातुमर्हसि॥७२॥ अर्घ्यं
दत्वाभैरवायमंत्रेणानेनसादरं॥ स्नातव्यमतियत्नेनभस्मधारणपूर्वकं॥७३॥ जलेनिमज्जस्मर्त्तव्यःपार्वतीरमणःप्रभुः॥ शिवनामानुसंधानंकर्त्तव्यंच
स्वशक्तितः॥७४॥ जलेनिमज्जाष्टवारंमहादेवमनुंजपेत्॥ सजपःसर्वधर्माणांहेतुरित्युच्यतेबुधैः॥७५॥ मार्जनादिततःकृत्वाधृत्वावस्त्रंचपावनं॥ पुन
राचमनंकार्यंमंत्रैस्तैरेवसादरं॥७६॥ उद्धूल्यभस्मनागात्राणिधृत्वातिर्यक्त्रिपुंड्रकं॥ रुद्राक्षधारणंकृत्वासंध्याकार्याततःपरं॥७७॥ ततःशिवार्चनंकार्यंबि
ल्वपत्रादिसाधनैः॥ ततोहोमादिकंकार्यंपुनश्चाशिवपूजनं॥७८॥ स्नानंचैत्रादिमासेषुसर्वेष्वप्यतियत्नतः॥ शिवप्रीत्यर्थमेवेतिकर्त्तव्यंब्राह्मणादिभिः॥७९॥
सत्कर्मयद्यत्तत्सर्वंशिवप्रीत्यर्थमेवहि॥ क्रियतेवैदिकैःसर्वैर्वेदमार्गप्रवर्त्तकैः॥८०॥ स्नानदानादिकंसर्वंशिवप्रीत्यर्थमित्यतः॥ कर्त्तव्यमतियत्नेन 
वेदमार्गरतैर्द्विजैः॥८१॥ फलंभवतितद्विप्रस्नानदानादिकर्मणां॥ तत्फलस्यशिवोदाताशिवान्यस्तुनसर्वथा॥८२॥ सर्वंशिवार्पणंकृत्वास्वकृतंकर्मवै
दिकं॥ तिष्ठंतिवेदमार्गस्थाऋषयोब्रह्मवादिनः॥८३॥ नकरिष्यतिसत्कर्मवैदिकंयःशिवार्पणं॥ सनतत्कर्मफलंपूर्णंप्राप्नोत्येवनसंशयः॥८५॥
एकएवमहारुद्रोविश्वात्माविश्वसंश्रयः॥ विश्वंव्याप्याखिलंभुंक्तेविश्वभूर्भूतभावनः॥८६॥ ईशःसर्वस्यजगतप्रभुरन्योनतादृशः॥ ईशत्वादिवे
दोपिशिवएवप्रवर्त्तते॥८७॥ ईशास्तुशिवनामान्योनेशःसर्वात्मनाद्विज॥ एवमीशानइत्याद्यैर्निर्णीतोर्थोनसंशयः॥८८॥ जपहोमतपोदानयाग

र्मादिभिः शिवः ॥ तुष्टस्तत्कर्मफलदो भवत्येव न संशयः ॥ ८९ ॥ दत्तं जप्तं हुतं तप्तं विनिवेद्य सदाशिवे ॥ तिष्ठंत्यनाकुलाः प्राज्ञा वेदांतार्थविचारकाः ॥
॥ ९० ॥ क्रियंते श्रौतकर्माणि शंकरार्थं ततस्ततः ॥ शिवे निवेदनीयानि स्नानादीन्यपि सादरं ॥ ९१ ॥ कृत्वा चैत्रादिमासेषु स्नानं नित्यं द्विजादिभिः ॥
मंत्रैरेतैः स्नानकर्म निवेद्यं गिरिजापतौ ॥ ९२ ॥ चैत्रस्नानेन भगवान् महारुद्रो विराट्पतिः ॥ प्रीणातु श्री महादेवो विष्णुब्रह्मादिवंदितः ॥ ९४ ॥ ज्ये
ष्ठस्नानेन भगवान्देवश्रेष्ठो महेश्वरः ॥ प्रीणातु शांकरीयुक्तो नानागणनिषेवितः ॥ ९५ ॥ अषाढमासस्नानेन भगवान्भक्तवत्सलः ॥ प्रीणातु सर्वभू
तात्मा सत्यो दाक्षायणीयुतः ॥ ९६ ॥ नभः स्नानेन भगवान् भगनेत्रभिदीश्वरः ॥ प्रीणात्वार्यायुतो देववर्यः सनातनः ॥ ९७ ॥ नमस्यस्नानस्नाने
न भगवान् विश्वलोचनः ॥ प्रीणातु सोमः सोमात्मा विभुर्हैमवतीयुतः ॥ ९८ ॥ आश्विनमासस्नानेन भगवान्विश्वहृद्गतः ॥ प्रीणाति त्रिपुरारातिरीशानी
प्राणनायकः ॥ ९९ ॥ भगवान्कार्त्तिकस्नानात्सोमसूर्याग्निलोचनः ॥ प्रीणातु दुर्गासंसक्तो दुर्गपातकनाशकः ॥ १०० ॥ मार्गशीर्षस्य मासीयस्नाने
न भगवान्भवः ॥ प्रीणातु सच्चिदानंदो भवानीप्राणनायकः ॥ १ ॥ पुष्यस्नानेन भगवान्पुष्टिनायकः ॥ प्रीणातु मन्मथारातिरंबिकाप्राणवल्लभः ॥ २ ॥
माघस्नानेन भगवानुमाकांतो जगत्सिता ॥ प्रीणातु शिवयायुक्तः सर्वमंगलसंश्रयः ॥ ३ ॥ भगवान् फाल्गुनस्नानान्नीलकंठो जगत्पतिः ॥ प्रीणातु मंग
लायुक्तः सर्वमंगलदायकः ॥ ४ ॥ मंत्रानेवं समुच्चार्य प्रतिमासं प्रयत्नतः ॥ स्नानं यः कुरुते नित्यं स स्नानफलभाग्भवेत् ॥ ५ ॥ पलाशपुष्पैर्यः कुर्याद्व
संते शंकरार्चनं ॥ देवेंद्रत्वमवाप्नोति स्वर्गे शत्वाभिलाषुकः ॥ ६ ॥ ग्रीष्मे तु मल्लिकापुष्पैर्यः कुर्याच्छंकरार्चनं ॥ ब्रह्मत्वं समवाप्नोति यदि विष्णुत्वमिच्छति ॥
ब्रह्मत्वं यदि वांछति ॥ ७ ॥ वर्षतौ कुशपुष्पैर्यः पूजयिष्यति शंकरं ॥ स विष्णुत्वमवाप्नोति यदि विष्णुत्वमिच्छति ॥ ८ ॥ शरत्काले महादेवं यः पद्मैः पूज
यिष्यति ॥ स सूर्यत्वमवाप्नोति यदि सूर्यत्वमिच्छति ॥ अर्कपुष्पैर्महादेवं हेमंते योर्चयिष्यति ॥ स चंद्रत्वमवाप्नोति यदि चंद्रत्वमिच्छति ॥ १० ॥ शैशिरे क
रवीरैर्यः पूजयिष्यति शंकरं ॥ गाणपत्यमवाप्नोति गाणपत्याभिलाषुकः ॥ ११ ॥ उक्तर्तु पुष्पकुसुमैः शंकरं योर्चयिष्यति ॥ त्रिकालमेककालं
वा सततदुक्तं फलं लभेत् ॥ १२ ॥ प्रतिकालेपि पुष्पाणामयुतेन सदाशिव ॥ पूजनीयः प्रयत्नेन पूर्वोक्तफलकांक्षिभिः ॥ १३ ॥ बिल्वपत्रैः समभ्यर्च्यः सर्वत्तु
ष्वपि सर्वदा ॥ स्वाभीष्टं फलमाप्नोति महादेवप्रसादतः ॥ १४ ॥ द्रोणपुष्पैः पूजनीयो मार्गशीर्षे प्रयत्नतः ॥ १५ ॥ पुष्ये पुनर्वसूपुष्पैः पूजनीयः सदा
शिवः ॥ माघे धत्तूरकुसुमैः पूजनीयो महेश्वरः ॥ १६ ॥ शमीपुष्पैः पूजनीयः फाल्गुने मासि शंकरः ॥ चैत्रे पलाशकुसुमैः पूजनीयो मृडः प्र
२ पूजनीयः कार्त्तिके मासि शंकरः ॥ अर्कपुष्पैः

 भुः॥१८॥ आषाढेविरजापुष्पैः पूजनीयःपिनाकभृत्॥ श्रावणेकुटजैःशंभुः पूजनीयः प्रयत्नतः॥१९॥ पूज्योभाद्रपदेमासिकुशपुष्पैस्त्रि 
 लोचनः॥ आश्विनेमासिसंपूज्यः पारिजातैरुमापतिः॥२०॥ चैत्रेदमनकैःपुष्पैः पूजनीयोयमांतकः॥ तत्तत्समयजैःपूज्यो वैशाखादिषु
पल्लवैः॥२१॥ भूतायांमृगराजेनयः पूजयतिशंकरं॥ सर्वपापविनिर्मुक्तः शिवलोकंगमिष्यति॥ २२॥ भूतायांसोमयुक्तायांकरवीरैर्महेश्वरं॥
यः पूजयतियत्नेनसमोक्षमधिगच्छति॥२३॥ सोमार्द्रपातयुक्तायांभूतायांकमलैःशिवं॥ यः पूजयतियत्नेनसमोक्षमधिगच्छति॥ २४॥
सोमार्द्रपातयुक्तायांअष्टम्यांकनकाव्हयैः॥ यः पूजयतिगौरीशंसमोक्षमधिगच्छति॥ २५॥ सार्द्रायांपातयुक्तायामष्टम्यामर्जुनैःशिवं॥ यः
पूजयतियत्नेनसमोक्षमधिगच्छति॥२६॥ सोमार्द्रपातयुक्तायांपौर्णमास्यांसदाशिवं॥ यः पूजयतिधत्तूरैः समोक्षमधिगच्छति॥ २७॥ सोमार्द्र
पातयुक्तायाममायांगिरिजापतिं॥ करवीरैः समभ्यर्च्य प्राप्नुवंतिशिवंजनाः॥२८॥ दुकूलतंतुतिर्यस्तुश्रावण्यांपूजयेच्छिवं॥ सर्वपापविनि
र्मुक्तः शिवलोकंप्रयास्यति॥२९॥ दुकूलतंतवः शुभ्राः स्वमानेनशतत्रयं॥ सार्धंशिवलिंगरूपेदेयामुक्त्यर्थिभिर्द्विज॥३०॥ श्रावण्यांपौर्णमास्यां
तुपूजेयंश्रुतिषुश्रुता॥ इयंनैमित्तिकीपूजाकर्त्तव्यातिप्रयत्नतः॥३१॥ तंडुलैःप्रतिभूतायांशतांजलिमितैःशिवं॥ यः पूजयतियत्नेनसमोक्षमधिग
च्छति॥३२॥ चणकैःप्रतिभूतायांशतांजलिमितैःशिवं॥ यः पूजयतियत्नेनसमोक्षमधिगच्छति॥३३॥ चणकैःप्रतिभूतायांशतांजलिमितैःशिवं॥
यः पूजयति०॥३४॥ तिलैश्चप्रतिभूतायांशतांजलिमितैश्शिवं॥ यः पूज०॥३५॥ यवैश्चप्रतिभूतायांशतांजलिमितैःशिवं॥ य०॥३६॥ माषैश्चप्रतिभू 
तायांशतांजलिमितैःशिवं॥ यः पूज०॥ ३७॥ सर्षपैःप्रतिभूतायांशतांजलिमितैःशिवं॥ य०॥ ३८॥ मुद्गैश्चप्रतिभूतायांशतांजलिमितैःशिवं॥ यः
पूज०॥३९॥ सुगंधाम्ररसेनेशंसार्द्राष्टम्यांप्रयत्नतः॥ योभिषिंचतिरुद्रेणसमोक्षमधिगच्छति॥ ४०॥ क्षीरेणप्रतिभूतायांप्रस्थेनेशंप्रयत्न 
तः॥ योभिषिं०॥४१॥ आज्येनप्रतिभूतायांप्रस्थेनेशंप्रयत्नतः॥ योभिषिंचति०॥ ४२॥ सितयाप्रतिभूतायांप्रस्थमानेनशंकरं॥ योभिषिं०॥४३॥
नारिकेलजलेनेशंप्रत्यष्टम्यांप्रयत्नतः॥ योभिषिं०॥ ४४॥ यः पूजयतियत्नेनसुरसाम्रफलैःशिवं॥ ससर्वपापनिर्मुक्तः शि०॥४६॥ यः पूजयति
ति गौरीशंसुगंधकदलीफलैः॥ ससर्वपापविमुक्तः शिवलोकंप्रयास्यति॥४७॥ शिवंसुगंधजंबीरैर्यः पूजयतिसादरं॥ ससर्व०॥ ४८॥ शिवंजंबूफ
लैः पक्वैः यः पूजयतिसादरं॥ ससर्व०॥ ४९॥ यः पूजयतिगौरीशंसुगंधबदरीफलैः॥ ससर्व०॥ दध्यन्नेनाज्ययुक्तेनयः पूजयतिशंकरं॥

ससर्वं०॥५१॥क्षीरान्नेनाज्ययुक्तेनयःपूजयतिशंकरं॥ससर्वं०॥५२॥साज्येनशर्करान्नेनयःपूजयतिशंकरं॥ससर्वं०॥५३॥साज्ये
नाम्ररसान्नेनयःपूजयतिशंकरं॥ससर्वं०॥५४॥शतग्रासमितैरन्नैरुक्तैः पूज्योमहेश्वरः॥ फलैरुक्तैःशतमितैःपूजनीयोमहेश्वरः॥दीप
मालांगोघृतेनयःकरोतिशिवालये॥ससर्वपापविनिर्मुक्तःशिवलोकंप्रयास्यति॥५६॥ धूपयिष्यतियोधूपैरुत्तमैःशंकरालयं॥ससर्वपाप०
॥५७॥यःशिवप्रतिमाकुड्यचित्राःशिवमंदिरे॥ससर्वं०॥५८॥स्वस्तिकाद्यैरलंकुर्याद्योनित्यंशंकरालयं॥ससर्वं०॥५९॥पुष्पमालादिभिर्नि
त्यंयोलंकुर्याच्छिवालयं॥ससर्वं०॥६०॥ सुधागैरिकदानाद्यैर्यालंकुर्याच्छिवालयं॥ससर्वं०॥६१॥भेरीमर्दलवाद्याद्यैर्घोषयेद्यःशिवालये॥
ससर्वं०॥६२॥वीणादिध्वनिभिर्यस्तुध्वनयेच्छिवमंदिरे॥ससर्वं०॥६३॥शिवालयेतोरणानियःकुर्यान्मोक्तिकादिभिः॥ससर्वं०॥६४॥नित्यंकरो
त्यं तियोनृत्यंमुदाशंकरमंदिरे॥ससर्वं०॥६५॥जलादिसाधनैर्नित्यंशोधयेद्यःशिवालयं॥ससर्वं०॥६६॥माघेमासिमहेशाययःकुर्याद्घृतकंब
लं॥ससर्वपापविनिर्मुक्तःशिवलोकंप्रयास्यति॥६७॥ ॥विष्णुरुवाच॥ ॥इत्यगस्त्यवचःश्रुत्वासविप्रोहृष्टमानसः॥अगस्त्यंप्राह
विनयात्कृतांजलिपुटोविधे॥६८॥ ॥विप्रउवाच॥ ॥कथंकुंभजकर्तव्यंशिवायघृतकंबलं॥तत्सर्वंवदसर्वज्ञवेदशास्त्रविशारद॥६९॥
॥अगस्त्यउवाच॥ ॥सितानामसितानांवागवामेवघृतंनवं॥वस्त्रसंशोधितंग्राह्यंप्रस्थसार्धशतत्रयं॥७०॥शोधितेष्वेवपात्रेषुतत्र
क्षिप्यघृतंनवं॥रक्षणीयंप्रयत्नेनघनीभावावधिद्विज॥माघेमासिततःसायंपोर्णमास्यांप्रयत्नतः॥अभिषिच्यततोदेयंघनीभूतंघृतंशिवे॥
॥७२॥ततोधूपादिकंदत्वानैवेद्यंचप्रयत्नतः॥पुनर्धूपादिकंदेयंपुनःपूजांप्रकल्पयेत्॥७३॥पुराणवचनैःकार्यंततोजागरणंनिशि॥भोज
नीयास्ततःप्रातःशैवास्स्वादुरसायनैः॥७४॥महाकंबलमेतत्तुघृतस्यपरिकीर्तितं॥एतत्पूजापरापूजानास्तिगोरीपतेर्द्विज॥७५॥कृतकंबलपू
जातुस्वस्वशक्त्यापिशक्तितः॥माघेमासिप्रयत्नेनकर्तव्यंमुक्तिकांक्षिभिः॥कंबलार्धंतदर्धंवाप्रयत्नतः॥कर्तव्यंश्रीमहेशायतनुंप्राप्यद्विजैर्द्विज
॥७७॥एवंयःकुरुतेमर्त्योमहेशघृतकंबलं॥ससर्वपापनिर्मुक्तःशिवलोकंगमिष्यति॥७८॥यंयंकामयतेकामंयःकृत्वाघृतकंबलं॥तंतंकाम
मवाप्नोतिसमोक्षमधिगच्छति॥७९॥पुरोरेवानदीतीरेगौतमंमुनिपुंगवं॥दृष्ट्वासुमेधाःपप्रच्छप्रणम्यविनयान्वितः॥८०॥ ॥सुमेधाउवाच॥॥
गौतमश्रुतितत्वज्ञवेदशास्त्रविशारद॥ऐश्वर्यमोक्षदंचैवमहेशस्यैवपूजनं॥वदधर्मंविशेषतः॥८१॥ ॥सूतगौतमउवाच॥ ॥शिवार्च

नास्तरोधर्मोनास्तिवेदेषुसर्वथा॥ ऐश्वर्यमोक्षदंचैवमहेशस्यैवपूजनं॥८२॥ महेशपूजनादन्यन्नास्त्यैवैश्वर्यमुक्तिदं॥ सत्यमेतत्पुनःसत्य 
मितिवेदावदंतिहि॥८३॥ यमर्थहृदिसंकल्प्ययःपूजयतिशंकरं॥ स्ततमर्थमवाप्नोतिसत्यंसत्यमितिश्रुतिः॥८४॥ शिवलिंगार्चनेनैवभुक्ता
भोगाननेकधा॥ मुक्तिंचप्राप्नुवंत्येवशिवार्चनपरायणः॥८५॥ अखंडमतुलैश्वर्यंयस्ययावदपेक्षितं॥ ततोप्यधिकमैश्वर्यंप्राप्तव्यंशिवपूजया॥८६॥
शिवचिंतनशीलंचेदुत्तमंचित्तमन्वहं॥ वित्तेशोयातिपत्तित्वंपतिपत्तेरपिस्वयं॥८७॥ माघेमासिमहादेवेयःकुर्यात्घृतकंबलं॥ सभुक्त्वासकलांभोगा
न्नैतेमोक्षंचविंदति॥८८॥ नराभूपतयोजाघृतकंबलदानतः॥ जातिस्मराश्चतेजातामुक्ताश्चांतेशिवार्चनात्॥८९॥ पुरासुनागसंविप्रंजाबालश्रु
तिपारगं॥ प्रेपंच्छगूढकर्णोगोधर्मदारिद्र्यनाशकं॥९०॥ ॥सुनागसउवाच॥ माघेमकरगेभानौकर्त्तव्यंघृतकंबलं॥ असितायाःसितायश्चधेनो
र्घृतमनुत्तमं॥ संपादनीयंयत्नेनघनीभूतंचशोधितं॥९१॥ तद्घृतंतुलयोत्तीर्णप्रस्थसार्धशतत्रयं॥ तदर्धंवातदर्धंवासायंनेयंशिवालये॥ घृतेनान्ये
नदेवेशमभिषिच्यमहेश्वरं॥ घनीभूतंघृतंदेयंततःशंकरमस्तके॥९३॥ ततास्तिलैःसर्षपैश्चबिल्वपत्रैश्चकोमलैः॥ हेमपद्मैश्चदेवेशःपूजनीयोमहेश्व
रः॥९४॥ धूपदीपादिकंदेयंततोनैवेद्यमादरात्॥ ततोनीराजनंदत्वादेयापुष्पांजलिस्ततः॥९५॥ प्रदक्षिणनमस्कारान्कृत्वाचतदनंतरं॥ शैवंपंचा
क्षरंजप्त्वाशिवायैतन्निवेदयेत्॥९६॥ ततोजागरणंकार्यंशिवस्मरणपूर्वकं॥ रात्रिर्नेयाप्रयत्नेनमहादेवकथादिभिः॥९७॥ ततःप्रातःसमुत्थायकृत्वा
स्नानादिकंपुनः॥ पूजनीयोमहादेवोघृतसेचनपूर्वकं॥९८॥ भोजनीयास्ततःशैवाभक्ष्यैर्भोज्यैश्चयत्नतः॥ ततःस्वयंचभोक्तव्यंबंधुभिःसहसादरं॥ 
॥९९॥ अनेकतवदारिद्र्यंनाशमेष्यतिसर्वथा॥ भोगांश्चविपुलान्भुक्त्वाशिवलोकंगमिष्यसि॥१००॥ ॥गौतमउवाच॥ ॥इत्युक्तस्तेनसशिवे 
चकारघृतकंबलं॥ ततःप्रापसवैश्वर्यमक्षीणंवृद्धिसंयुतं॥१॥ रत्नप्रासादसंयुक्तागृहास्तेनविनिर्मिताः॥ वेदिकाकारितास्तेननवरत्नसमन्वि
ताः॥२॥ निक्षेपाबहवोलब्धास्तेनसंख्याविवर्जिताः॥ तस्यसार्धशतंपुत्राबभूवुःशिवतत्पराः॥३॥ इदंसर्वंसमालोक्यमहदैश्वर्यमुत्कटं॥ स
मस्तभोगसंपन्नोहृष्टचित्तोबभूवसः॥४॥ समाघमासियत्नेनसकुटुंबोमहेश्वरं॥ नित्यंसमर्चयामासरत्नाद्यैरतिभक्तितः॥५॥ सदैवपूज
यामाससबिल्वदलकोटिभिः॥ करवीरादिभिःपुष्पैरमितैरपिसादरं॥६॥ तेनैश्वर्येणधनदमधःकृत्वाससंस्थितः॥ तेनैश्वर्येणसंतुष्टोब
भूवशिवतत्परः॥७॥ सुमाघमासियत्नेनततःपुत्रादिसंयुतः॥ चकारोक्तप्रकारेणमहेशेघृतकंबलं॥८॥ ततःप्रनृत्यमभवत्ततोप्यैश्वर्यवान्मु

त्कटं॥ तेनैश्वर्येणसंतुष्टः पूजयामासशंकरं॥ ९॥ कारितंचततस्तेनरम्यंरत्नशिवालयं॥ प्रसादःकारितस्तेननानारत्नविराजितः॥ १०॥ तस्मिञ्छिवाल
येतेनालिंगरत्नमयंशुभं॥ स्थापितंविधिवत्तेनतोषिताशांभवास्तदा॥ ११॥ कृतानिरत्नदानानितेनतत्रशिवालये॥ तदासुवर्णदानानिकृतानिबहु
धामुदा॥ १२॥ लक्षंगावोबहुक्षीराःशिवार्थंतेनरक्षिताः॥ नित्यंसलक्षगोक्षीरैरभिषिच्यास्थितःस्वयं॥ १३॥ घृतप्रस्थसहस्रेणाप्यभिषिच्यस्थि
तःशिवं॥ मधुप्रस्थसहस्रेणाप्यभिषिच्यास्थितःस्वयं॥ १४॥ घृताक्तपरमान्नेनससंपूज्यमहेश्वरं॥ शर्करामधुदुग्धान्नैःपूजयामासशंकरं॥ १५॥
तेनायुतत्रयंशैवाःभोजितःप्रत्यहंमुदा॥ तेनदत्तानिरत्नानिभोजितेभ्योयदृच्छया॥ १६॥ कदाचित्तद्गृहंप्राप्ताःसार्धलक्षत्रयंद्विजाः॥ दृष्ट्वातान्भस्म
दिग्धांगानहृष्टचित्तोबभूवसः॥ १७॥ ततस्तान्पूजयामासभोजयामासचादरात्॥ तेभ्योददौसरत्नानांप्रत्येकंलक्षपंचकं॥ १८॥ एवंभुक्त्वाखिलान्
भोगान्कृत्वाचशिवपूजनं॥ सशिवंप्रापदेहांतेघृतकंबलपूजया॥ १९॥ ॥ अगस्त्यउवाच॥ ॥ इत्युक्तःससुमेधोपिगौतमेनमहात्मना॥ चकारमा
घेसंप्राप्तेशिवायघृतकंबलं॥ २०॥ ततःप्रापसचैश्वर्यममितंशिवपूजया॥ भुक्त्वाचसकलान्भोगान्सशिवंप्रापसत्तम॥ २१॥ अतोयत्नेनकर्त्तव्यंम
हेशघृतकंबलं॥ भोगमोक्षेछयाविप्रसत्यंसत्यंनसंशयः॥ मीनकर्कटयोर्मध्येजलधारांमहेश्वरे॥ यःकल्पयेदविछिन्नांसमोक्षमधिगछति॥ २३॥
शिवंमकरसंक्रांतौदुग्धाद्यैःप्रस्थसंमितैः॥ अभिषिच्यप्रयत्नेनशुद्धैरपिजलैर्नवैः॥ २४॥ भस्मबिल्वादिभिःसम्यक्पूजयित्वामहेश्वरं॥ संकल्प
पूर्वंयत्नेननैवेद्यंतुप्रकल्पयेत्॥ २५॥ शतप्रस्थमितैःकृष्णैःश्वेतैर्वाक्षालितैस्तिलैः॥ पूजनीयस्ततोभक्त्यालिंगरूपीसदाशिवः॥ २६॥ सिंहादिष्वपि
संक्रांतिष्वेवमेवसदाशिवः॥ पूजनीयःप्रयत्नेनविषुवेष्वयनेष्वपि॥ २७॥ युगादिष्वपिसंपूज्योमन्वादिष्वपिशंकरः॥ एवमेवशिवःपूज्यो
ग्रहणेचंद्रसूर्ययोः॥ २८॥ एवंयःकुरुतेभक्त्यालिंगपूजांमहेश्वरे॥ समहापातकेभ्योपिमुच्यतेनात्रसंशयः॥ २९॥ तिलैःपूजांप्रयत्नेन
स्वस्वंजलिमितैःसदा॥ यःकरोतिसपापेभ्यःसर्वेभ्योपिविमुच्यते॥ ३०॥ एवमेवमहादेवंयोनित्यंश्वेतसर्षपैः॥ भक्त्यासंपूजयेद्विप्रसपा
पेभ्योविमुच्यते॥ ३१॥ यस्तुबिल्ववनादीनिशिवपूजार्थमादरात्॥ करोतिश्रद्धयायुक्तःसमोक्षमधिगछति॥ ३२॥ यःशिवालयनिर्माणं
कारयिष्यतिभक्तितः॥ समहापापनिचयात्सद्यएवविमुच्यते॥ ३३॥ पुरानिषधदेशेषुकश्चिदासीद्द्विजाधमः॥ तेनपापान्यनंतानिकृतानिद्वि
जसत्तम॥ ३४॥ तत्कृतानांमहाघानांप्रायश्चित्तंनसर्वथा॥ ब्रह्महत्यादिपापानिकोटिशःसचकारहि॥ ३५॥ एतादृशःसपापिष्ठःकदाचि

 द्राजमंदिरं ।।सराजपत्न्युपभोगार्थंप्रविवेशधनुर्धरः।। ३६।। ततोराजसतींदृष्ट्वानवयौवनदर्पितां।। बलाद्गृहीतुमुद्युक्तोराज्ञादृष्टस्ततःपरं।।३७।। 
ततःसभीतोवेगेनप्रपलाय्यगतोबहिः।।सराजाप्यतितीव्रेणशल्यपाणिरुपागतः।।३८।। ततःपरंधृतोविप्रोराजभृत्यैःप्रयत्नतः।। ततोहंतुंसमुद्यु
क्तःसराजातंद्विजाधमं।।३९।।ततस्तमब्रवीद्विप्रोराजानंशल्यपाणिनं।। एकेनैवप्रहारेणहरमामितिसत्वरं।।४०।। हरमामितियःशब्दस्तदुक्तःस्तंनृपस्त
दा।।श्रुत्वाबभूवतत्कालेरोमांचांचितविग्रहः।।४१।। ततःशल्यंनृपस्त्यक्त्वास्वहृद्येवमचिंतयेत्।।अयंधन्योनहंतव्यःसर्वथापुण्यसंश्रयः।।४२।।हर
मामितिशब्दोयंनिःसृतोस्तिमुखाद्धुतः।।सर्वपापहरःपुण्योभुक्तिमुक्तिफलप्रदः।। रात्रौतामसकालेस्मिन् हरशब्दोहरात्मकः।।श्रावितोहमनेनाघ
बलाद्घविनाशकः।। ४४।।अयंहरपरोनूनंजन्मजन्मांतरेनरः।।अन्यथाहरइत्येवंकथमुक्तमिहाधुना।। ४५।। हरोहरतिपापानिसंसारात्ता
रयेत्परं।।करोतिनिर्मलाकारंहरनामपरंनरं।।४६।। नूनंहरहरेत्येतन्नामसारतरंवरं।।नैतदन्यतरंनामसंसारतरुदारकं।।४७।। अनेनास्यो
महारात्र्यावुपकारःकृतोमहान्।। एतत्तुल्योपकारोस्मैकःकर्त्तव्योमयाधुना।।धर्मार्थकाममोक्षाणांदानेशक्तिर्भवेद्यदि।। तदाप्रत्युपकारोस्यभ
विष्यत्यन्यथातुन।।४९।। ।।अगस्त्यउवाच।। इतिसंचित्यनृपतिस्तस्मैनत्वाततःपरं।।माभैषीरितितंप्राहगृहीत्वाहस्तमादरात्।।५०।।त
तस्तमब्रवीद्राजातुभ्यमिष्टंस्वशक्तितः।।दास्येममैवनिकटेसंवसस्वेतिसादरं।। ५१।।राजाशिवकथालापैर्नीत्वारात्रिंततःपरं।।धनंधान्यंचरत्ना
निददौतस्मैयथेच्छया।। ५२।। ततःसविप्रोलब्धश्रीःसदाराज्ञासहस्थितः।।शुश्रावधर्मान्खिलान्सराज्ञासहसंततं।। ५३।।श्रुत्वाधर्मानशेषेणस
विप्रोधर्मतत्परः।।ततःसर्वंपरित्यज्यशिवपूजापरोभवत्।।५४।।भूपालस्तंद्विजंदृष्ट्वाशिवपूजापरायणं।।संतोषंपरमंप्रापविस्मितश्चद्विजोत्तमः।।
।।५५।।कारयामासनृपतिस्सशिवालयमुत्तमं।।कारयामासनृपतिःमुक्ताप्रासादमुत्तमं।।५६।। ततःसस्थापयामासतत्रलिंगंशिवात्मकं।। कोटिशो 
दीपदानानिसचकारशिवालये।।५७।। रत्ननिर्मितपात्रेषुगोघृतेनैवसादरं।। दीपस्तंभान्सुवर्णेनकारयामासकोटिशः।। ५८।।तेषुसंस्थाप
यामासदीपपात्राणिकोटिशः।।कारयामासनृपतिर्नानापुष्पवनंमुदा।। ५९।।कारयामासयत्नेननृपोबिल्ववनान्यपि।। एतादृशंनृपंदृष्ट्वा
सविप्रोविप्रयत्नतः।।६०।। शिवालयंसुवर्णेनकारयामाससादरं।।तत्रलिंगंप्रतिष्ठांचचकारविधिपूर्वकं।।६१।। ततःपरंमृतोविप्रःशिवरूपमवा
पसः।।सराजादेवदेवेशंपूर्वजन्मनिशंकरं।।६२।।पूजयामासयत्नेनतेनैश्वर्यमवापसः।।भक्तिंचपरमांप्रापतयैवशिवपूजया।।६३।। तयैवभक्त्या

सततंशिवपूजापरायणः॥ चकारपरयाभक्त्यासर्वान्छिवरतान्द्विजान्॥ ६४॥ शिवलिंगैकनिरताननन्यशरणानपि॥ तद्राजवशगोदेशो
यावानासीद्द्विजोत्तम॥ ६५॥ सतत्रकारयामासप्रतिग्रामेशिवालयं॥ शिवस्थानविहीनेभ्योदेशेभ्यःकरमागतं॥ ६६॥ सनजग्राहभूपालः
शत्रुवृंदनिबर्हणः॥ गृहीत्वापरराष्ट्रंचहत्वाशत्रून्नृपोबली॥ ६७॥ तद्राष्ट्रेकारयामासशिवस्थानानिकोटिशः॥ एवंधर्मरतोराजाशिवपूज
नपूर्वकं॥ ६८॥ करोतिसततंविप्रराष्ट्रस्यपरिपालनं॥ तस्यभूपस्यपुत्रास्तुजाताःपंचशतंद्विज॥ ६९॥ तेपिशूराःसुविद्याश्चशिवपूजापरा
यणाः॥ तेषुपुत्रेषुभूपालोराष्ट्रंविन्यस्यसादरं॥ ७०॥ स्वयंशिवमवापांतेशिवपूजापुरःसरं॥ अतःशिवपराधन्याःपुण्याःपूजाश्चसादरं॥
अतःशिवपराधन्याः॥ ७१॥ निर्जिताघानिरातंकानिःशंकाःशमनादपि॥ कश्चिद्द्विजाधमःपूर्वमरण्येसंस्थितःसदा॥ ७२॥ तेनारण्येस्व
वासार्थएकापर्णकुटीकृता॥ तत्पर्णशालानिकटेनार्मदंलिंगमुत्तमं॥ ७३॥ स्थितमुष्णेनसतप्तंपक्वजंबूफलप्रदं॥ कदाचित्तेनतद्दृष्टंशिव
लिंगंशिवात्मकं॥ ७४॥ दृष्ट्वापर्णकुटीमध्येस्थापितंतेनतत्ततः॥ संस्थाप्यतन्महालिंगंहन्म्यनेननरानिति॥ ७५॥ संतोषपरमंप्रापभिल्लः
पथिकघातुकः॥ सपातयित्वापथिकान्स्वपर्णग्रहसंन्निधौ॥ ७६॥ तेषांशिरांसिलिंगेनचूर्णयामासतेनवै॥ तेनलिंगेनचूर्णयामास+
निहितायावंतोनिर्गतासवः॥ ७७॥ तावंतोपिशिवंप्रापुर्लिंगस्पर्शगतोनसः॥ ततःसनार्मदंलिंगंनररक्तसमावृतं॥ ७८॥ प्रक्षाल्यपर्ण
सदनेस्थापयित्वास्थितःसदा॥ तेनैकवारंनिहतोनजीवतिपुनर्नरः॥ ७९॥ तादृशंतन्महालिंगंतेनसंरक्षितंसदा॥ तल्लिंगंकश्चिदागत्यने
ष्यतीतिभियासदा॥ सपत्रबिल्वशाखाभिःससमाछाद्यसंस्थितः॥ तेनकृत्वास्थितंतत्रानित्यमेवंद्विजोत्तम॥ ८१॥ तेनलिंगेनबहवोविप्रा
स्तेनहतापुरा॥ कदाचिदागतोविप्रोमहापातकसंश्रयः॥ ८२॥ सोपितेनैवलिंगेननिहतःस्वतनुंजहौ॥ ततोनीतःसपापिष्टोयमदूतैर्भया
नकैः॥ ८३॥ तमानीतंद्विजंदृष्ट्वाचित्रगुप्तंयमोब्रवीत्॥ ॥यमउवाच॥ ॥किमनेनकृतंपापंपुण्यंवाकोयमीदृशः॥ पुण्यवान्यातकी
वेत्तिवदसत्वरमादरात्॥ ८४॥ ॥चित्रगुप्तउवाच॥ ॥एतत्कृतानिपापानिसंख्येयानिनसर्वथा॥ पापैरेवदिनान्यस्यगतानिबहुधा
यम॥ ८५॥ ब्रह्महत्यादिकंकृत्वाप्रत्यहंप्रीतिपूर्वकं॥ ततोयमन्नमश्नातिपापिष्ठाग्रसरावृतः॥ ८६॥ यमास्यैतादृशस्यापिनर्मदालिंगसं
स्पर्श निधौ॥ वनेबभूवमरणंतल्लिंगस्पर्शपूर्वकं॥ तल्लिंगमात्रेस्पर्शणदग्धपापाभवंतश्च त्यतः॥ अयंनिःष्पापएवासीन्नास्ययामीययातना॥ येत्यजंतित

नुधीरानर्मदालिंगसंनिधौ॥ तेसर्वेपिभवत्येवमुक्तानास्त्यत्रसंशयः॥८७॥ यस्यकस्यापिवाकालशिवलिंगस्यसंनिधौ॥ त्यक्तदेहःशिवंयातिसत्यं 
सत्यंनसंशयः॥८८॥ लिंगस्यसंनिधौयेनलिंगस्पर्शपुरःसरं॥ त्यक्तंशरीरंतेनाशुशिवसंप्राप्यतेध्रुवं॥८९॥ नर्मदालिंगनिकटेहतायेतरवो
पिते॥ प्रयांतिशिवसायुज्यंकिमन्येमनुजादय॥९०॥ कीटादयस्तनुंत्यक्तानर्मदालिंगसंनिधौ॥ बहवोमोक्षमापन्नास्तेषांसंख्यानविद्यते॥
॥९१॥ येनार्चितंबिल्वपत्रैर्नर्मदालिंगमुत्तमं॥ तेनार्चितानिलिंगानिसार्धकोटिशतत्रयं॥९२॥ येनसंपूज्यतेनित्यंनर्मदालिंगमुत्तमं॥ नतत्कु
लप्रसूतानांवसतिर्नरकालये॥९३॥ सद्योनश्यंतिपापानिनर्मदालिंगदर्शनात्॥ स्पर्शनादर्चनाद्यैस्तुमोक्षएवहिलभ्यते॥९४॥ हत्वापिकोटि
शोविप्रान्वेदवेदांगपारगान्॥ यःपश्येन्नर्मदालिंगंसपापेभ्योविमुच्यते॥९५॥ यःपूजयेद्बिल्वपत्रैर्नर्मदालिंगमुत्तमं॥ ससद्योमुच्यतेपापैःको
टिजन्मकृतैरपि॥९६॥ अमितानिविचित्राणिपातकानिनवान्यपि॥ सद्यएवविनश्यंतिनर्मदालिंगपूजया॥९७॥ ॥अगस्त्यउवाच॥ ॥इतितद्वचनं
श्रुत्वायमःसंतुष्टमानसः॥ पूजयामासतंविप्रमुपवेश्यनिजासने॥९८॥ तदानीमेवसहसासोत्साहंशिवकिंकराः॥ समागताःसाट्टहासंददर्शचसतान्य
मः॥९९॥ दृष्ट्वातान्सत्वरःकालोरत्नसिंहासनेधुतान्॥ उपवेश्ययथाशक्तिपूजयामाससादरं॥१००॥ ततस्तेयममालोक्यविनयानतकंधरं॥ प्रोचुर्यम
हितंवाक्यमुत्फुल्लवदनास्तदा॥१॥ ॥शिवकिंकराऊचुः॥ ॥अनभ्यर्चितगौरीशान्पातयस्वमलह्रदे॥ असंस्पृष्टमहादेवान्पातयस्वमल
ह्रदे॥२॥ असंकीर्त्तितगौरीशान्पातयस्वमलह्रदे॥ अजप्तशिवमंत्रांश्चपातयस्वमलह्रदे॥३॥ अधृतश्वेतभस्मांगान्पातयस्वमलह्रदे॥ अधृतो 
त्तमरुद्राक्षान्पा०॥४॥ अजप्तश्रीमहारुद्रान्पा०॥ अनमस्कृतभालाक्षान्पा०॥५॥ असंस्तुतमहादेवान्पा०॥ अभावितमहादेवान्पा०॥६॥ ॥ 
गौतमउवाच॥ ॥इत्याज्ञाप्ययमंनम्रंतेसर्वेशिवकिंकराः॥ ययुःकैलासनिलयंतंगृहीत्वैवसत्वरं॥७॥ गाणपत्यंददौतस्मैमहेशःकरुणा
निधिः॥ सतिष्ठतिगणेष्वेवशिवसेवापरःसदा॥८॥ अतस्त्वनुक्षयेस्पृष्टंशिवलिंगंद्विजेंद्रियैः॥ तैरीशकृपयालभ्यंगाणापत्यंनसंशयः॥९॥
कर्त्तव्यंशिवलिंगस्यस्पर्शःप्राणात्ययक्षणे॥ तेननश्यंतिपापानिगाणपत्यंचलभ्यते॥१०॥ शिवलिंगंशिवाकारंयःस्पृशेदन्वहंमुदा॥ तस्य
सद्यःप्रणश्यंतिमहापातककोटयः॥११॥ दुर्लभःशिवलिंगस्यस्पर्शोमुक्तिप्रदायकः॥ शिवलिंगस्यसंस्पर्शोभूरिपुण्यतपःफलं॥ यस्यैवशिवलिं
गस्यस्पर्शनंवेदसंमतं॥ तस्यैवस्पर्शनंकार्यमर्यमेत्यादिभिर्द्विजैः॥१३॥ शिवलिंगस्यमाहात्म्यंतत्स्पर्शस्यापिवस्तुतः॥ शंकरोवेदसर्वज्ञस्तद

न्यस्तुनसर्वथा ।। १४ ।। शिवलिंगंशिवाकारंसर्ववेदांतसंस्तुतं ।। तदेवपरमं पूज्यंब्राह्मणाद्यैर्मुमुक्षुभिः ।। १५ ।। शिवलिंगंवेदवेद्यंई दृशंशंकरात्मकं
।। तेनभिल्लेनसततंस्पृष्ट्वास्पृष्ट्वास्थितंद्विज ।। कदाचित्धनिकाविप्रावेदवेदांगपारगाः ।। दृष्टास्तेतेनभिल्लेनतरुगुल्मावृतेवने ।। १७ ।। ततस्तान
खिलान्विप्रान्पातयित्वाऽवनीतले ।। तेनैवशिवलिंगेनचूर्णयामाससत्वरं ।। १८ ।। ततःसबिल्वशाखाग्रैर्नवपल्लवसंयुतैः ।। लिंगमाछादयामासप्रक्षा
ल्यविमलैर्जलैः ।। १९ ।। तदानीमागताःकेचित्प्रबलाःशस्त्रपाणयः ।। तेतत्रस्तान्द्विजान्सर्वान्ददृशुर्भुविपातितान् ।। २० ।। ततस्तेभिल्लमालोक्यभ
टास्तेरोषसंयुताः ।। धनूंष्यारोप्यतंहंतुमुद्युक्ताबाणपाणयः ।। २१ ।। सन्नद्धाःप्रबलाःक्रूराःधनुर्विद्याविशारदाः ।। धनूंष्यारोप्यतदनुस्थिता-
श्चित्रार्पिताइव ।। २२ ।। ततःसमागतावीराःसहस्रंशस्त्रपाणयः ।। तंहंतुमुद्युक्ताःस्थिताश्चित्रार्पिताइव ।। २३ ।। दृष्ट्वातांनगतभीर्भिल्लःपरमा
श्चर्यसंयुतः ।। स्वांतर्विचारयामासकिमेतेषामभूदिति ।। २४ ।। ततोविचार्यतानाहसदृढोच्चधनुर्धरान् ।। किमर्थंस्थीयतेवीराःकिमासीत्तद्वदंत्वि
ति ।। ।।भटाऊचुः ।। ।। भवंतंहंतुमुद्युक्ताःसर्वेवयमुदायुधाः ।। कुंठिताद्यभवच्छक्तिस्त्वय्यस्माकमिहाधुना ।। त्वयैतेनिहताविप्राब्रह्माहा
सितथापिते ।। कुतःसमागताभिल्लशक्तिरस्मन्निरोधने ।। २६ ।। मनुष्यस्येदृशीशक्तिर्नभविष्यतिसर्वथा ।। भवानतोनभिल्लोसिभगवानसिके
वलं ।। २७ ।। धनुर्धराणामस्माकंशक्तिरद्यैवकुंठिता ।। हेलयाजितवैकुंठावयंनात्रास्तिसंशयः ।। २८ ।। इंद्रःपराजितोस्माभिर्गंधर्वाश्चपराजि
ताः ।। वयमेवधनुःशास्त्रेप्रवीणानात्रसंशयः ।। २९ ।। वयंरुद्रार्चकानित्यंरुद्रदत्तपराक्रमाः ।। सत्यलोकादिलोकेषुसंचारोप्यास्तिनोध्रुवं
।। ३० ।। भवान्भाग्यवशादद्यदृष्टोस्माभिर्भवापहः ।। भगनेत्रभिदीशानोभवानेवनसंशयः ।। ३१ ।। नानारूपाणिधृत्वैवविहारःक्रियतेत्व
या ।। वेदैरपिनविज्ञातंतवरूपंमहेश्वर ।। ३२ ।। यथैतेनिहताविप्रास्तथैवास्मानपिप्रभो ।। हनत्वत्करसंस्पर्शान्मुक्तिरद्यभविष्यति ।। ३३ ।।
यद्यप्यद्यकृतार्थास्मोतवदर्शनमात्रतः ।। तथापीशत्वयासर्वेहंतव्यावयमीदृशाः ।। ३४ ।। ।।अगस्त्यः।। इत्युक्त्वातेभटाःसर्वेत्यक्त्वाश-
स्त्राणिसत्वरं ।। भस्मनोद्धूलनंचक्रुस्तद्देवापादमस्तकं ।। ३५ ।। ततोनवैर्बिल्वपत्रैर्धृतरुद्राक्षभूषणाः ।। भिल्लमभ्यर्चयामासुःशिवबुध्यात
मेवते ।। ३६ ।। ततःप्रणम्यतेसर्वेपतित्वापृथिवीतले ।। शंभोशिवशिवेत्युक्त्वाहनस्वेतितमब्रुवन् ।। ३७ ।। तदानींश्रीमहादेवःसंतुष्टो
गणसेवितः ।। प्रादुरासीद्वृषारूढोभगवान्भक्तवत्सलः ।। ३८ ।। ततस्तंदेवदेवेशमुमालिंगितविग्रहं ।। दृष्ट्वाप्रहृष्टास्तेसर्वेतुष्टु

२सोम

 दुर्विनयानताः॥३९॥ ॥भगऊचुः॥ ॥नमस्तेपार्वतीनाथकरुणाकरशंकर॥नमस्तेदेवदेवेशभगवन्भक्तवत्सल॥४०॥नमस्तेवि 
 श्ववंद्येशमधुसूदनसूदन॥नमस्तेसूर्यसूर्याग्निनयनामितविक्रम॥४१॥नमस्तेविमलाकारनिराकारमहेश्वर॥नमस्तेनिर्गुणानंदभक्तानंदप्र
वर्धक॥४२॥नमस्तेजगदाधारनिराधारमहेश्वर॥नमस्तेब्रह्मविष्ण्वादिदेवाराध्याध्वरप्रिय॥४३॥नमस्तेचंद्रचूडेशचंद्रवर्णामितप्रभ॥न
मस्तेमन्मथारातिन्दक्षाध्वरविनाशक॥४४॥नमस्तेवेदवेदांतवेदशास्त्रादिसर्जक॥नमस्तेसर्ववेदांतप्रतिपादितविग्रह॥४५॥नमस्ते
गिरिजाबंधोदयासिंधोबुधोत्तम॥नमस्तेभूतिभृद्बंधोभूतिभूषणभूतिद॥४६॥नमस्तेसर्वदेवेशसर्वदेवनमस्कृत॥नमस्तेसर्वभूतेशसर्वभू
तनमस्कृत॥४७॥ ॥अगस्त्यउवाच॥ ॥इतिस्तुत्वातदासर्वेबिल्वपत्रैर्महेश्वर॥संपूज्यभक्तिभावेनप्रणेमुस्ते पुनःपुनः॥४८॥तत
स्तानाहभगवान्भक्तिभावनतान्भटान्॥आनंदामृतवर्षिण्यामधुरश्लक्ष्णयागिरा॥४९॥ ॥महादेवउवाच॥ ॥भुविभुक्त्वेप्सितान्भोगा
न्मोंप्रयांतुततःपरे॥तावद्यत्नेनमांनित्यमर्चयस्त्वध्वमतंद्रिताः॥५०॥भिक्षोयमपिनिष्पापोमामेष्यत्येवसर्वथा॥एतेप्येतत्धताविप्रा मामेष्यं
तिनसंशयः॥५१॥अनेननार्मदंलिंगंबिल्वशाखावृतंकृतं॥प्रक्षाल्यतैर्जलैःशुद्धैःस्थापितंचनिजालये॥५२॥अनेनघर्मसंतप्तंनार्मदंलिं
गमुत्तमं॥निजपर्णकुटीमध्येस्थापितंयत्नपूर्वकं॥५३॥अयंतुनार्मदंलिंगंस्पृशत्यन्वहमादरात्॥पश्यत्यपिप्रयत्नेनसर्वदासावधानतः
॥५४॥शिवलिंगार्चनफलंप्रदर्शयितुमादरात्॥कृतंमयाद्य ऽवीराणांभवतांशक्तिकुंठनं॥५५॥मत्तःसंप्राप्तवीर्याणांभवतामपिदुःसह॥श 
क्तिरास्मिन्कुंठितैवमलिंगर्चनतत्परे॥५६॥मदर्चनपरेमर्त्येयादृशेतादृशेपिवा॥पराक्रमोनाक्रमतेध्रुवमेतध्रुवंध्रुवं॥५७॥छायायांस्थापये
द्यस्तुशिवलिंगंमदात्मकं॥समामेष्यत्यसंदिग्धंसंदग्धाखिलपातकः॥५८॥तृणपर्णमयेगेहेदारुग्रावमयेथवा॥शिवलिंगंप्रतिष्ठाप्यमुच्यं
तेसर्वकिल्बिषैः॥५९॥शिवलिंगंप्रतिष्ठाप्यब्रह्मत्वंयोभिवांछति॥दास्यामितस्मैब्रह्मत्वंतथामोक्षंचसर्वथा॥शिवलिंगंप्रतिष्ठाप्यविष्णुत्वं 
योभिवांछति॥तस्मैदास्यामिविष्णुत्वंअंतेमोक्षंचसर्वथा॥६१॥शिवलिंगंप्रतिष्ठाप्यकष्ठग्रावादिमंदिरे॥सर्वान्कामानवाप्यंतेमयिसंप्रवि
शंतिच॥६२॥ ॥अगस्त्यउवाच॥ ॥इत्युक्त्वापार्वतीनाथःसर्वदेवशिखामणिः॥सगणःसत्वरंसांबस्तत्रैवांतरधीयत॥६३॥एतादृशो
मुक्तिदाताशंकरःकरुणाकरः॥पूजनीयःप्रयत्नेनध्यातव्यश्चमुमुक्षुभिः॥६४॥संसारसर्पदृष्टानांशिपिविष्टार्चनंपरं॥संजीवनीतदन्य
त्तुनैवसंजीवनीध्रुवं॥यःकुर्यात्कृतपापोपिमहादेवार्चनंमुदा॥ससर्वेभ्योपिपापेभ्योभुक्तिमुक्तिंचविंदति॥६६॥तेषांननरकाद्भीतिःसं

रादपिसर्वथा।। येषामस्तिमहादेवेभक्तिरव्यभिचारिणी।। ६७।। शिवभक्तिस्स्वयंसाक्षाद्भुक्तिदापरमुक्तिदा।। साभक्तिर्भूरितपसाधन्यानांभवतिद्विज।। ६८।। शिवा
र्चनात्परोधर्मोनास्तिनश्रूयतेपिवा।। सत्यमेतत्पुनःसत्यंसत्यमेतन्नसंशयः।। ६९।। भजनीयोमहादेवोजपनीयःषडक्षरः।। स्मरणीयःशिवानाथःपूजनीय
श्चशंकरः।। ७०।। पुराब्रह्मादयोदेवाहिमवत्पर्वताश्रयाः।। संपूज्यदेवदेवेशंकेदारेशमुपाश्रिताः।। ७१।। तदानीमागतोविष्णुःशिवयात्रापरायणः।। आगत्यपू
जयामासकेदारेशमुमापतिं।। ७२।। ततस्तुष्टावगिरिशंरुद्रमंत्रैरनेकधा।। ततःप्रदक्षिणीकृत्यप्रणामांश्चचकारसः।। ७३।। ततोजजापहृष्टात्माशैवंपं
चाक्षरंमुदा।। ततःपरंमहारुद्रंजजापसहरिर्द्विज।। ७४।। ब्रह्माद्यास्तंहरिंदृष्ट्वाशिवपूजापरायणं।। प्रणम्यदंडवद्भूमौपप्रच्छुर्धर्मसंहितं।। ७५।। ।। देवाऊचुः।।
विष्णोवेदार्थतत्त्वज्ञशिवपूजापरायण।। किंध्येयंकिंपरंब्रह्मवदनिश्चित्यसादरं।। ७६।। ।। अगस्त्यउवाच।। ।। इतितद्वचनंश्रुत्वाविष्णुर्हृष्टःकृतांजलिः।। प्रण
म्यशिरसाशंभुमुवाचद्विजसत्तम।। ७७।। ।। विष्णुरुवाच।। ।। ऋतंसत्यंपरंब्रह्मपुरुषंकृष्णपिंगलं।। ऊर्ध्वरेतंविरूपाक्षंविश्वरूपंभजाम्यहं।। ७८।। शि
वपरंब्रह्मसच्चिदानंदलक्षणं।। तदन्यंनपरंब्रह्मतदतोध्येयमास्तिकैः।। ७९।। निर्लिप्तोनिर्गुणोनित्यस्तुरीयःशिवउच्यते।। सच्चिद्घनोनिराकारोनिर्द्वंद्वःस
निरामयः।। सृजत्यवतिहंत्यस्मान्सभवत्वाद्युपाधिभिः।। अदृष्टेनास्मदादीनांतस्यैच्छैवंप्रजायते।। ८१।। भवत्वोपाधिमाश्रित्यसृजत्यस्मानुमापतिः।।
लीलयैवसृजत्यस्मांस्तस्यासोनकश्चन।। ८२।। मृडत्वोपाधिमाश्रित्यसपात्यस्मानुमापतिः।। सलीलयास्मानवतिस्तस्यायासोनकश्चन।। ८३।। हरत्वोपा
धिमाश्रित्यसहंत्यस्मान्पिनाकधृक्।। सहंत्यस्मान्लीलयैवतस्यायासोनकश्चन।। ८४।। शिवस्यवस्तुतःकृत्यंतस्यनास्त्येवसर्वथा।। तथापिलील
यैवास्मान्सृजत्यवतिहंतिच।। ८५।। स्वतंत्रस्यमहेशस्यसर्वज्ञस्यामितात्मनः।। सृष्ट्यादावितरापेक्षानास्तिसर्वात्मनासुराः।। ८६।। सतुरीयोस्मदादी
नांनप्रत्यक्षःकदाचन।। परंतुवेदवेदांतैःतद्रूपमवगम्यते।। ८७।। श्रुतिस्मृतिपुराणाद्यैःशिवोस्तीत्युच्यतेततः।। श्रुत्याद्युक्तप्रकारेणससेव्यःसर्वसाधनैः
।। ८८।। संततंयैस्तपस्तप्तंबहुधाबहुसाधनैः।। तेषामेवशिवोस्तीतिश्रुतिभिर्जायतेमतिः।। ८९।। अनंतमव्ययंशांतंशिवमक्षरमद्वयं।। अविज्ञाया
न्यथाज्ञात्वाभवंत्यत्यंतदुःखिताः।। ९०।। शिवोस्तिनिर्गुणोनंतस्तुरीयइतिधीरपि।। सहसानभवत्येवसंसाराविष्टचेतसां।। ९१।। नयेषांविष
यासक्तिर्येचनिर्दग्धकल्मषाः।। तेषामेवशिवोस्तीतिर्बुद्धिर्भवतिशाश्वती।। ९२।। धर्मास्तपांसिदानानियागाश्चविविधाःसुराः।। शिवोस्तीत्य
स्तियाबुद्धिस्तदर्थमितिमन्यतां।। ९३।। शिवोस्तीतिविदित्वादौश्रुत्युक्ताःशिवविग्रहाः।। ध्यातव्याःपूजनीयाश्चमुमुक्षुभिरहर्निशं।। ९४।। विश्वंभूतंभु

वनंचित्रमेतज्जातंभूयोजायमानंचभूयः॥एतत्सर्वंरुद्रएवेतिमत्वाभूयोभूयःपूजनीयोमहेशः॥९५॥नेहेशान्यत्सर्वथाविश्वरूपोविश्वव्यापीसर्वमेत
न्महेशः॥तस्माद्ध्यात्वासर्वभावेनसर्वैर्भूयोभूयःपूजनीयोमहेशः॥९६॥रुद्रंमत्वासर्वभावेनसर्वेसर्वोशास्यंनिर्गुणंनिष्कलंच॥संसेवंतेसाधवःस
र्वथातोभूयोभूयःपूजनीयोमहेशः॥९७॥रुद्रःसर्वंरुद्रएकत्वमाहुरेकोरुद्रोनद्वितीयायतस्थे॥नेशादन्यत्किंचिदस्तीतिनित्यंभूयोभूयःपू॰॥९८॥
यंवेदांतानैवजानंतिसित्थायंयोगींद्रानैवजानंतिविप्राः॥तंचिद्रूपंज्ञातुमिच्छंत्यतोयंभूयो॰॥९९॥योयंज्ञात्वैवामृतत्वंप्रयातिध्वस्तानंताघोरपापः
क्षणेन॥सोयंसोमःसोमरूपोखिलात्माभूयोभूयः॰॥१००॥योनिर्लिप्तोनिर्गुणोपिस्त्रिनेत्रोयोनिर्बाहुःस्वर्णबाहुःस्वतंत्रः॥योनिरूपोपिस्वर्णरूपो
यएैषोभूयो॰॥१०१॥निर्वर्णोपिस्वर्णवर्णोयआसीद्योंबारूपोप्यंबिकानाथआसीत॥देवाधीशःसोयमज्ञेयतत्वोभूयो॰॥२॥यस्येच्छातोस्मा
कमुत्पत्तिरासीद्यस्येच्छातोजायतेरक्षणंच॥यस्येच्छातोभाविनाशःसनित्योभूयोभूयो॰॥३॥यस्माद्भीतोवातिवायुस्सदायंयस्माद्भीतोदेति
सूर्योपिनित्यं॥यस्माद्भीतावन्हिमुख्याःसमुत्थोभूयोभूयो॰॥४॥यस्यार्चातोलभ्यतेसर्वपृथ्वीयस्यार्चातोलभ्यतेमोक्षलक्ष्मीःयस्यार्चातो
नेकधर्मौघसिद्धिःसोयंशंभुःपूजनीयोनिशंच॥५॥पुरारेवातटेकश्चिद्ब्राह्मणोब्रह्मवित्तमः॥बहुकालंस्थितःशंभुलिंगरूपिणमर्चयन्
॥६॥तत्रकश्चिन्महापापीतंदृष्ट्वाद्विजसत्तमं॥प्रणम्यदंडवद्भूमौकृतांजलिरभाषत॥७॥शिवार्चनपरश्रीमन्किंमहापापनाशकं॥
मयाकृतानिपापानिज्ञात्वाविप्रतिवासरं॥८॥ ॥द्विजउवाच॥ ॥त्वयाघनर्मदादृष्टाशिवलिंगसमाश्रिता॥तवपापानिनष्टानिरेवा
दर्शनमात्रतः॥९॥येनैकमपिदृष्टंस्याच्छिवलिंगंशिवात्मकं॥तस्याप्येनांसिनश्यंतिविविधान्यपितत्क्षणे॥१०॥शिवलिंगान्यमेयानिरे
वायांसंतिसर्वतः॥एतेषांदर्शनेजातेविनश्यंत्यघकोटयः॥११॥वस्तुतःशिवलिंगस्यस्मरणेनापिसत्वरं॥पातकानिविनश्यंतिविचित्रा
ण्यमितानिच॥१२॥शिवलिंगप्रदेशोत्थवायुस्पर्शोपितत्क्षणे॥विनाशयतिपापानिघोराणिविविधान्यपि॥१३॥शिवलिंगाश्रितंदेशं
यःप्राप्नुयततेयदा॥तदेवाखिलपापानिप्रनश्यंत्यास्तिहिश्रुतिः॥१४॥अस्माकंशिवभक्तानांश्रुतिप्रामाण्यवादिनां॥धर्माधर्मविचा
रार्थेश्रुतिरेवावलंबनं॥१५॥शिवोक्ताःश्रुतयोस्माभिःशिवभक्तैःसमादृताः॥शिवोक्तत्वेनवेदेषुप्रमाण्यंज्ञातमास्तिकैः॥१६॥शिव
लिंगानिदृष्टानिसायमद्यत्वयाधुना॥अतःपरंपातकानिनस्क्षास्यंतित्वयिध्रुवं॥१७॥यानिपापान्यनंतानिप्रतिजन्मार्जितान्यपि॥ता

निसद्योविनश्यंतिसायंशंकरदर्शनात्॥ सायंकालेमनुष्याणांदुर्लभंशिवदर्शनं॥ महेशदर्शनंसायंदेवानामपिदुर्लभं॥१९॥ यस्मिन्कृपामहेशस्यपूर्णातिष्ठति
सर्वदा॥ तस्यसायंमहेशस्यदर्शनंभवतिध्रुवं॥२०॥ सर्वथाहतभाग्यानांमहापापरतात्मनां॥ तेषांसायंमहेशस्यदर्शनंनभविष्यति॥ सायंदृष्ट्वामहादेवं
यःपूजयतिसादरं॥२१॥ ससर्वपापनिर्मुक्तःशिवसायुज्यमेष्यति॥ प्रातःकालादिकालेषुसर्वेष्वपिमहेश्वरः॥ पूजनीयोविशेषेणपूज्यःसायंमहेश्व
रः॥ निशियःपूजयेल्लिंगंबिल्वपत्रैःप्रयत्नतः॥२३॥ सजन्मकोटिपापेभ्योमुच्यतेनात्रसंशयः॥ शिवलिंगार्चनेनैवमहापातकनाशनं॥२४॥ शिव
लिंगार्चनानान्यत्महापातकनाशकं॥ तावत्पापानितिष्ठंतिनयावच्छिवपूजनं॥२५॥ अमितान्यपिपापानिनश्यंतिशिवपूजया॥ पापक्षयोभाग्यवृ
द्धिरायुर्वृद्धिःक्षणेक्षणे॥२६॥ भवत्यवश्यंमर्त्यानांश्रीमहादेवपूजया॥ आयुरारोग्यमैश्वर्यंतत्वज्ञानमनामयं॥२७॥ भवतिश्रीमहादेवपूज
दुःखनाशो येत्याहहिश्रुतिः॥ शत्रुनाशोमोहनाशश्चसर्वथा॥२८॥ भवतिश्रीमहादेवपूजयेत्याहहिश्रुतिः॥ विद्यावृद्धिःपुत्रवृद्धिर्वंशवृद्धिश्चसर्वदा॥२९॥
भवतिश्री०॥ शिवलिंगार्चकासाध्यंनकिंचिदपिसर्वथा॥ सत्यमेतत्पुनःसत्यमुद्धृत्यभुजमुच्यते॥ यत्प्रसादांशलेशांशलेशेनापिजनार्दनः॥३१॥
वैकुंठंप्रापशत्रुश्चजघानार्च्यसशंकरं॥ यतंतेयत्प्रसादार्थंविष्णुब्रह्मादयःसुराः॥३२॥ ससर्वदापूजनीयोदेवदेवोत्तमःशिवः॥ यःकालकालः
सर्वज्ञःसर्ववंद्योमहेश्वरः॥३४॥ ससर्वदापू०॥ यस्यांतंनविदुर्देवाब्रह्मविष्णुपुरोगमाः॥३५॥ ससर्व०॥ यस्यप्रसादलेशेनविष्णुत्वंप्राप्यतेज
नैः॥३६॥ ससर्वदा०॥ येनेदंसृष्टमखिलंजगत्स्थावरजंगमं॥३७॥ ससर्वदा०॥ येनसंपाल्यतेनित्यंसर्वमेतच्चराचरं॥३८॥ ससर्वदा०॥ ये
नेदंविश्वमखिलंभस्मसात्क्रियतेक्षणात्॥३९॥ ससर्वदा०॥ योनित्यंवेदवेदांतैरनिशंप्रतिपाद्यते॥४०॥ ससर्वदा०॥ यःपूर्णःसच्चिदानंदः
सर्वव्यापीविभुःप्रभुः॥४१॥ ससर्वदा०॥ योनिर्गुणोपिसगुणःपरमानंदविग्रहः॥४२॥ ससर्वदा०॥ यन्नाममात्रस्मरणाद्भुक्तिंमुक्तिंचविंदति॥
॥४३॥ ससर्वदा०॥ यत्कथाश्रवणात्सद्योदग्धाःसंसारवासनाः॥४४॥ ससर्वदा०॥ यत्पूजनंश्रुतंवेदेघोरसंसारभेषजं॥४५॥ ससर्व०॥ यत्पूजानि
रताधन्याःपूज्याविष्ण्वादिभिःसुरैः॥४६॥ ससर्वदा०॥ येनत्वासकृदप्याशुमुच्यंतेसर्वकिल्बिषैः॥४७॥ ससर्व०॥ यमर्चयंतिमुनयोहृत्पंकज
निवासिनं॥४८॥ ससर्वदा०॥ यन्नामामृतपामर्त्यास्तिरस्कुर्वंतिमाधवं॥४९॥ ससर्व०॥ यदर्चनेनसंप्राप्यंगाणपत्यमनामयं॥५०॥ सस
र्वदा०॥ यद्भृत्यभावमिच्छंतिविष्णुब्रह्मादयःसुराः॥५१॥ ससर्व०॥ यमाहुर्निष्कलंशांतंनिरवद्यंनिरंजनं॥५२॥ ससर्वदा०॥ यमा

हुर्बलहंतारं विष्णुहंतारमीश्वरं ।। ५४ ।। ससर्वदापूजनीयोदेवदेवोत्तमः शिवः ।। यमाहुतिरितिहासाद्याभगवंतमनेकधा ।। ५५ ।। ससर्व० ।। यमाहुः श्रीविरूपा
क्षमुमादेहार्धधारिणं ।। ५६ ।। ससर्वदा० ।। यमाहुः करुणासिंधुं भक्तबंधुमुमापतिं ।। ५७ ।। सस० ।। योवैरुद्रः सभगवानित्याहाथर्वणोपियं ।। ५८ ।। सस
र्व० ।। योवैरुद्रः सभगवानित्याहाथर्वणोपियं ।। ५८ ।। ससर्व० ।। यस्यतत्वमविज्ञाय देवाः सर्वेपिमोहिताः ।। ५९ ।। ससर्व० ।। यंविदित्वामृतीभूयनपुनर्गर्भभा
ग्नरः ।। ६० ।। ससर्वदापूजनीयोदेवदेवोत्तमः शिवः ।। ६१ ।। ।। विष्णुरुवाच ।। ।। इतितद्वचनंश्रुत्वासतदामुक्तपातकः ।। तत्रैवनर्मदातीरेशिवार्चनपरो
भवत् ।। ६१ ।। ततः परंसमुक्तोभूच्छिवलिंगसमर्चनात् ।। तस्मान्मुमुक्षुभिर्नित्यं पूजनीयः सदाशिवः ।। ६२ ।। अन्यकश्चित्पुराविप्रः शिवपूजापरः स्थितः ।।
ससर्वदाभस्मनिष्ठः सदारुद्राक्षभूषणः ।। ६३ ।। पंचाक्षरपरोनित्यंरुद्राध्यायपरायणः ।। शिवयोगमिहप्राप्यहृष्टचित्तोबभूवसः ।। तस्मिन्योगेस
विप्रेंद्रश्चकारोपोषणंनिशि ।। चकारपरयाभक्त्यात्तदाजागरणंद्विजः ।। ६५ ।। ।। देवाऊचुः ।। ।। शिवयोगस्यकिंविष्णोलक्षणंतद्वदस्वनः ।। यंप्रा
प्योपोषणंचक्रेतथाजागरणंद्विजः ।। ६६ ।। जागरेणोपवासेनतस्मिन्योगेचकिंफलं ।। इदंसर्वंविशेषेणवदकारुणिकोत्तम ।। ६७ ।। ।। विष्णुरुवाच ।।
सपातार्द्रसोमयुक्ताभूतायास्यान्महानिशि ।। शिवयोगः सविख्यातः सर्वकर्मफलप्रदः ।। ६८ ।। तस्मिन्योगेनरः स्नात्वापूजयित्वा
महेश्वरं ।। सर्वपापविनिर्मुक्तः सद्योजातिस्मरोभवेत् ।। ६९ ।। तस्मिन्योगेमहादेवः सर्षपैः सतिलैर्यवैः ।। अखंडबिल्वपत्रैश्च पू
जनीयः सदाशिवः ।। ७० ।। अयंयोगोमहापुण्यः कोटिचंद्रग्रहैः समः ।। कोटिसूर्यग्रहैस्तुल्यः समोयंकोटिपर्वभिः ।। ७१ ।। तस्मिंदिने
प्रयत्नेनशैवेयः पूजयेत्धनैः ।। समहापातकेभ्योपिमुच्यतेनात्रसंशयः ।। ७२ ।। जागरश्चोपवासश्चतस्मिन्योगेशिवार्चनं ।। कृत्वा
कार्यः प्रयत्नेनमध्येपिशिवपूजनं ।। ७३ ।। आस्मिन्योगेसविप्रोपियोगमाहात्म्यविन्मुदा ।। निशिजागरणंचक्रेकेदारेशंस
मर्चयन् ।। ७४ ।। सपूजयोपवासेननिशिजॉरणेनच ।। प्रातर्जातिस्मरोजातस्तत्वज्ञानमवापच ।। ७५ ।। सभूतभाविजन्मानि
ज्ञात्वासर्वाणितत्क्षणे ।। परंनिर्वेदमापन्नोनिर्घृणोभूत्तदासुराः ।। ७६ ।। सततोष्टाशीतिलक्षदुष्टकुत्सितयोनिषु ।। सहस्रवारंजन्मा
निभविष्यंतीत्यबुध्यत ।। ७७ ।। तानिजन्मान्यसंप्राप्यदुःखमप्राप्यचस्वयं ।। मुक्तस्तुनभविष्यामिसर्वथेत्यप्यबुध्यत ।। ७८ ।। यतः प्रा
प्यानिजन्मानिमयैतावंत्यतोमम ।। नभविष्यंतिदेहांतः शिवस्मरणपूर्वकम् ।। ७९ ।। यस्यदेहक्षयोभाविशिवस्मरणपूर्वकं ।। नतस्य

जन्मसंबंधप्रापकाद्दृष्टसंगमः॥ ८०॥ मरणंयस्यवाजंतोःशिवस्मरणपूर्वकं॥ ससभाग्यसानिर्दग्धदुष्टादृष्टौघसंततिः॥ ८१॥ अनेकधाकृ
तंयेनश्रीमाहादेवपूजनंतस्यस्यान्मरणंजंतोश्शिवस्मरणपूर्वकं॥ ८२॥ ॥ विष्णुरुवाच॥ ॥ इतिसंचिंत्यशिवपूजाप्रभावतः॥ कायव्यूहे
नजन्मानिसंप्राप्तुंयत्नवानभूत्॥ ८३॥ देहसृष्टानिजन्मानिसंप्राप्यपुनःपुनः॥ चंडालनारीसमभूत्सतत्वज्ञोविचक्षणः॥ ८४॥ चंडालजन्मसं
प्राप्यश्वमांसंसुरयासह॥ मोक्तुंसमारभेदेवाःकपालेनचिदग्निना॥ ८५॥ श्वमांसंसुरयासिक्तंपच्यमानंविलोक्यसः॥ चर्मणापिहितंचक्रेत
त्कपालमुखंतदा॥ ८६॥ तदानीमागतस्तत्रदधीचिर्मुनिसत्तमः॥ तामद्राक्षीत्ततोनारींश्वमांसपचनोन्मुखीं॥ ८७॥ तामुवाचततोनारींमुनि
र्विस्मितमानसः॥ चर्मणापिहितंदृष्ट्वाकपालंमांससंयुतं॥ ८८॥ ॥ दधीचिरुवाच॥ ॥ अमेध्यतरमेतद्धिश्वमांसंपच्यतेत्वया॥ किमर्थ
च मेतदधुनाचर्मणापिहितंमुखं॥ ८९॥ अमेध्यतरवस्तूनिनसंत्येतदपेक्षया॥ चर्मणैतत्पिधानेनवदकारणमस्तिकिं॥ ९०॥ ॥ विष्णुरुवाच॥
इतितद्वचनंश्रुत्वासत्यमुक्तंत्वयेतितं॥ प्रणम्यविनयादाहसचंडालीस्वरूपभाक्॥ प्राप्तचंडालीजन्माद्विजउवाच॥ ॥ देवोत्तमंम
हादेवंयेवदंत्यन्यथाजनाः॥ तद्दृष्टिपातभीत्यैतच्चर्मणापिहितंमया॥ देवोत्तमेशिवेसांबेयोविष्णुसमतांवदेत्॥ तद्दृष्टिपातभीत्यै
तच्चर्मणापिहितंमया॥ देवोत्तमेशिवेसांबेयोविष्णुसमतांवदेत्॥ तद्दृष्टिपातभीत्यैतच्चर्मणापिहितंमया॥ ९३॥ नयैरव्यभिचारे
णक्रियतेशिवपूजनं॥ तद्दृष्टिपातभीत्यैतच्चर्मणापिहितंमया॥ ९४॥ भस्मनामंत्रपूतेननयैरुद्धूलनंकृतं॥ तद्दृष्टि०॥ ९५॥ नयैःकृ
तंत्रिपुंड्रस्यकेवलस्यैवधारणं॥ तद्दृष्टि०॥ ९६॥ रुद्राक्षधारणेभक्तिर्नयेषांश्रुतिसंमते॥ तद्दृष्टि०॥ ९७॥ मृदोर्ध्वपुंड्रफालादौ
येकुर्वंतिभ्रमान्विताः॥ तद्दृष्टि०॥ ९८॥ मृदोर्ध्वपुंड्रंकर्तव्यमितिमोहाद्वदंतिये॥ तद्दृष्टि०॥ ९९॥ येलीलयाप्यूर्ध्वपुंड्रंधृत्वातिष्ठ
तिमोहिताः॥ तद्दृष्टि०॥ १००॥ येभोजयंतिमोहेनाप्यूर्ध्वपुंड्रधरंद्विजं॥ तद्दृष्टि०॥ १०१॥ येभोजयंतिमोहेनशिवभक्तिविवर्जि
तान्॥ तद्दृष्टि०॥ २॥ येपूजयंतिमोहेनशिवभक्तिविवर्जितान्॥ तद्दृष्टि०॥ ३॥ नमस्कुर्वंतियेमोहाच्छिवभक्तिविवर्जितान्॥
तद्दृष्टि०॥ ४॥ भगवंतमुमाकांतंसंततंनार्चयेतिये॥ तद्दृष्टि०॥ ५॥ नचित्तवृत्तिःसततंयेषांशिवकथाश्रुतौ॥ तद्दृष्टि

श्रीशिवर०७ पातभीत्यैतच्चर्मणापिहितंमुखं॥६॥नयेषांसततंचित्तंमहेशस्मरणेरतं॥तद्दृष्टि०॥७॥नयेषांपार्वतीनाथेभक्तिरव्यभिचारिणी उ॰स॰पू॰
४३ ॥तद्दृष्टि०॥८॥येविष्ण्वाद्यमराराध्यंमहेशंप्राहुरन्यथा॥तद्दृष्टि०॥९॥सर्वभावेनयेनित्यंनययुःशरणंशिवं॥तद्दृष्टि०॥१०॥स
र्वोत्तमोमहादेवोनयेषांकुलदेवतं॥तद्दृष्टि०॥शिवरात्रिव्रतेभक्तिर्नयेषांश्रुतिसंमते॥तद्दृष्टि०॥१२॥सोमवारव्रतेभक्तिर्नयेषांश्रु
तिसंमते॥तद्दृष्टि०॥१३॥कालाष्टमीव्रतेभक्तिर्नयेषांश्रुतिसंमते॥तद्दृष्टि०॥१४॥भक्तिर्नयेषांवेदोक्तशिवतीर्थनिषेवणे॥तद्दृ
ष्टि०॥१५॥भक्तिर्नयेषांवेदोक्तेशिवनैवेद्यभक्षणे॥तद्दृष्टि०॥१६॥श्रीमहादेवभक्तेषुभक्तिर्येषांनसर्वदा॥तद्दृष्टिपातभीत्यैतच्चर्म
णापिहितंमुखं॥१७॥यथाचंडालसंस्पृष्टमन्नंसंत्यज्यतेबुधैः॥अशैवदृष्टमप्यन्नंतथात्याज्यंप्रयत्नतः॥१८॥ज्ञेयाश्चंडालचंडा
लाःशैवधर्मविवर्जिताः॥अतएवहितदृष्टंभोक्तव्यंनकदाचन॥१९॥अमेध्यतरमप्येतदशैवैऽर्यदिदृश्यते॥भवत्यमेध्यमत्यंतं
श्वमलाक्तमिवोज्झितं॥२०॥ ॥विष्णुरुवाच॥ ॥इतितद्वचनंश्रुत्वादधीचिरतिविस्मितः॥तत्वमेतत्कथंज्ञानमितिचिंतापरोभव
त्॥२१॥जाबालश्रुतिज्येष्ठोयमर्थोघसमुदीरितः॥अयमर्थःकथंज्ञातश्चंडाल्यादुष्टचित्तया॥२२॥इतिसंचिंत्यसमुनिर्दध्यौस्तिमित
लोचनः॥चांडाल्याःकथमेतस्यास्तत्वज्ञानमभूदिति॥२३॥प्रणिधानेनविज्ञायतत्स्वरूपंततोमुनिः॥जातिस्मरायविप्रायप्रणम्या
हतमादरात्॥२४॥ ॥दधिचिरुवाच॥ ॥धन्योसिकृतकृत्योसितत्वज्ञोसिद्विजोत्तम॥त्वत्स्वरूपंनविज्ञातंमयातत्क्षम्यतांपुरा॥ श्रीसांब
॥२५॥ ॥विष्णुरुवाच॥ ॥इत्युक्त्वाविनयात्तत्वादधीचिस्तंद्विजोत्तमं॥अस्यकेदारनाथस्यपूजार्थसमुपागतः॥२६॥अस्यकेदार ४३
नाथस्यपूजयाबहवःपुरा॥जाताजातिस्मरायोगेतत्वज्ञाश्चामितौजसः॥२७॥शिवार्चकानांधन्यानांशैवधर्मरतात्मनां॥तत्वज्ञा
नंभवत्येवप्रयासेनविनाध्रुवं॥२८॥धन्यामहेशसंसक्तपूतचित्तानिरंतरं॥सत्यमेतत्सत्यमेतदुद्धृत्यभुजमुच्यते॥२९॥अनेकजन्म
भिस्तप्तंयेनघोरतरंतपः॥तस्यैवसततंभक्तिर्भवतिश्रीमहेश्वरे॥३०॥मुक्ताबभूवुर्यावंतस्तावंतःशिवपूजकाः॥मुक्तिर्नास्त्यन्य
थायस्माद्विनोमाकांतपूजया॥३१॥यएकांतमुमाकांतंस्मरंतस्संततिंसंततं॥तेधन्यास्तत्कुलंधन्यंधन्यास्तत्पितरोध्रुवं॥३२॥

विनाभाग्येनमहताशंकराराधनेमतिः॥ नभविष्यतितत्सत्यमुध्धृत्यभुजमुच्यते॥३३॥शंकराराधकाएवभूरिभाग्यसमाश्रयाः॥
सत्यमेतत्पुनःसत्यमुधृत्यभुजमुच्यते॥३४॥भूरिभाग्यप्रभावेनशंभोभक्तिःप्रजायते॥सत्यमे०॥३५॥शिवंकरःशंकरान्योस्ती
तिशंकापिनैवमे॥शिवएवइतिश्रुत्यानिर्णीतोर्थोयतोमम॥३६॥शंकरंशंकरंमत्वायेर्चयंतितमन्वहं॥तेममान्वहमभ्यर्च्याभ
क्तिश्रत्धापुरस्सरं॥३७॥भगवंतंमुमाकांतंयोनार्चयतिसंततं॥सनित्यसूतकीतस्यपृथिव्यांमास्तुसंतति॥३८॥यःसर्वदामहादेवं
भक्तिपूतोनसंश्रयेत्॥सदुष्टःसतुपापिष्टःसपातकगणाश्रयः॥३९॥धृत्वोष्णीषादिकंमूर्ध्नियःकुर्याच्छिवपूजनं॥सशिरोव्याधि
संक्रांतोनरकंचाधिगछत्ति॥४०॥शरीरेकंचुकंधृत्वायोगछेच्छिवमंदिरं॥सकुष्ठाक्रांतसर्वांगोनरकंचाधिगछति॥४१॥विभू
तिधारणंत्यक्त्वायोगछेच्छिवमंदिरं॥संपुल्कसोदरेस्थित्वाननरकंचाधिगछति॥४२॥शिवालयांगणेंचार्मेयःपादत्राणमुत्सृजेत
॥सकल्पकोटिपर्यंतंचांडालोभवतिध्रुवं॥४३॥यःपादत्राणपादःसन्प्रविशेछंकरांगणं॥सकल्पकोटिपर्यंतमंत्यजःसान्व
योभवेत्॥४४॥पादत्राणंशिवद्वारिचार्मेयःस्थापयिष्यति॥सकोटिकल्पपर्यंतंयातिचंडालदासतां॥४५॥धृत्वोर्ध्वपुंड्रंयःकु
र्यान्मोहेनापिशिवार्चनं॥सयातिनरकंघोरंयावदाचंद्रतारकं॥४६॥अविनीतोमहादेवंयःपूजयितुमिछति॥सयातिनर०॥
॥४७॥पूजाद्रव्यमनादाययोगछेच्छिवमंदिरं॥सयाति०॥४८॥हृदिदेवोत्तमत्वेनयोनध्यातिमहेश्वरं॥सयाति०॥४९॥हृदिस
र्वात्मकत्वेनयोनध्यायत्तिमहेश्वरं॥सयाति०॥५०॥हृदिविश्वाधिकत्वेनयोनध्यात्तिमहेश्वरं॥सया०॥५१॥हृदिमोक्षप्रदत्वेन
योनध्यातिमहेश्वरं॥सयाति०॥५२॥यःसंततमुमाकांतंनाराधयतिसादरं॥सकंटकतरुर्भूत्वाश्मशानेष्वधितिष्ठति॥
५३॥शिवानिवेदितान्नानियोभुंक्तेसोतिदुःखितः॥आब्रह्मकल्पपर्यंतंविष्ठायांजायतेक्रिमिः॥५४॥शिवलिंगमनभ्यर्च्यस
कृद्वायःपिबेदपः॥सकोटिजन्मपर्यंतंचंडालोभवतिध्रुवं॥५५॥शिवलिंगमनभ्यर्च्ययोन्यकर्मरतोभवेत्॥सकोटिजन्म
पर्यंतंविड्वराहोभविष्यति॥५६॥शिवलिंगमनभ्यर्च्यभोक्तुंयोयततेनरः॥सकोटिकल्पपर्यंतंश्वुनकोभवतिध्रुवं॥५७॥शि

श्रीशिवर॰७ वलिंगमनभ्यर्च्चयोभोजयितुमिछति॥ सकोटियुगपर्यंतंमार्जालोभवतिध्रुवं॥ ५८॥ विभूतिधारणंत्यक्त्वायोभुंक्तेमोहसंगतः उ॰स॰पू॰
४४ ॥ सकाकजन्मसंप्राप्यनरकंचाधिगछति॥ ५९॥ विभूतिधारणंत्यक्त्वायोभोजयितुमिछति॥ सगृध्रजन्मसंप्राप्यनरकंचाधिगछ
ति॥ ६०॥ त्रिपुंड्रांनंकितंविप्रंयोभोजयितुमिछति॥ ससर्पजन्मसंप्राप्यनरकंचाधिगछति॥ ६१॥ ननमेदंउवद्भक्त्यायोन्वहंपार्व
तीपतिं॥ सवनेजगरोभूत्वानरकंचाधिगछति॥ ६२॥ प्रदक्षिणंमहेशस्ययोन्वहंनकरिष्यति॥ सतैलघर्षकागारेबलिवर्दोभवि
ष्यति॥ ६३॥ योनस्तौतिमहादेवंशिवस्तोत्रैरनेकधा॥ सपुनःपुनराजन्ममूकएवाभिजायते॥ ६४॥ यःपूजितंमहादेवनपश्यत्यन्व
हंमुदा॥ सकोटिजन्मपर्यंतमंधएवाभिजायते॥ ६५॥ योन्वहंशिवलिंगाग्रेनर्त्तनंनकरिष्यति॥ सकोटियुगपर्यंतंमूत्रकूपे
धितिष्ठति॥ ६६॥ कुर्याच्छिवालयप्रांतेयोमलंमोहतोपिवा॥ ६७॥ सकोटिकल्पपर्यंतंमलकुंडेधितिष्ठति॥ कुर्याच्छिवालये
यस्तुश्लेष्मोद्गारादिकानिच॥ ६८॥ सकोटिकल्पपर्यंतंश्लेष्मकुंडेधितिष्ठति॥ शिवाभिमर्शनंश्रौतंनकरिष्यतियोन्वहं॥ सकोटि
कल्पपर्यंतंतप्तशैलेधितिष्ठति॥ अतोतिसावधानेनस्छातव्यंमुक्तिकांक्षिभिः॥ ७०॥ विरूपाक्षःपूजनीयोनित्यमव्यभिचारतः
॥ महेशाराधनंत्यक्त्वामुक्त्यर्थीयोन्यमर्चयेत्॥ ७१॥ ससंत्यक्त्वामृतंमोहाद्रेतःपिबतिसंततं॥ ॥ अगस्त्यउवाच॥ ॥ इत्यु
क्त्वातद्वचःश्रुत्वाब्रह्माद्याहृष्टमानसाः॥ चंडालीरूपमासाद्यकिंचकारेतिचाब्रुवन्॥ ७२॥ ॥ विष्णुरुवाच॥ ॥ कायव्यू श्रीसांब
हेनसर्वाणिशरीराणियथाक्रमं॥ संप्राप्यसर्वदुःखानिसंप्रापततःपर॥ ततःपुनःसमागत्यकेदारेशममुंप्रभुं॥ संपूज्यसर्वबं ४४
धेभ्योमुक्तोमुक्तोबभूवसः॥ ७४॥ मोक्षंप्रतिसुराःश्रौतंश्रीविरूपाक्षपूजनं॥ अन्यानपेक्षमनघमसाधारणकारणं॥ ७५॥ म
हादेवार्चनेप्रीतिर्महद्भाग्यफलंसुराः॥ ततोविधेयंयत्नेनश्रीमहादेवपूजनं॥ ७६॥ महादेवार्चनपरैःशिवपूजाफलेप्सुभिः॥
यत्कर्तव्यंप्रयत्नेनतत्समासेनवक्ष्यते॥ कृत्वाशौचादिकंकर्मस्नात्वातुविमलेजले॥ भस्मनोद्धूलनंकार्यंसम्यगापादमस्तकं॥
॥ ७७॥ केवलंवारुणंस्नानंदेहबाह्यमलापहं॥ विभूतिस्नानमनघंबाह्यांतरमलापहं॥ ७८॥ त्यक्त्वापिवारुणंस्नानंविभूति

स्नानतत्परः॥ अंतर्बहिश्च संशुधः शिवपूजाफलं भवेत्॥ ७९॥ यद्बाह्यमलमात्रस्य नाशकं स्नानमस्तितत्॥ कृतमप्यकृतं सत्यं भस्मस्नानं विना सुराः॥ ८०॥
भस्मस्नानं श्रुतिप्रोक्तमाग्नेयं स्नानमुच्यते॥ तन्नाशयति तीव्रेण प्राणिबाह्योतरं मलं॥ ८१॥ या भस्मना समाक्रांता तनुः सैवातिनिर्मला॥ भस्म
संबंधमात्रेण नश्यत्यघकुलं यतः॥ ८२॥ कृत्वापि कोटिशो नित्यं वारुणं स्नानमादरात्॥ न भवत्येव पूतात्मा भस्मस्नानं विना द्विजाः॥ ८३॥ यद्भस्म
स्नानमाहात्म्यं तद्वेदो वेद तत्वतः॥ यद्वा वेद महादेवः सर्वदेवशिखामणिः॥ ८४॥ भस्मस्नानमकृत्वैव यः कुर्यात्कर्म वैदिकं॥ स तत्कर्मफलार्धर्द्धि
मपि नाप्नोति वस्तुतः॥ यः करिष्यति यत्नेन भस्मस्नानं यथाविधि॥ स एव वैदिके कर्मण्यधिकारी श्रुतिश्रुतः॥ ८६॥ अकृत्वा भस्मना स्नानं पूतो
हमिति यो वदेत्॥ स एवानृतवादीति विज्ञेयः सततं बुधैः॥ ८७॥ पावनं पावनानां च भस्मस्नानं श्रुतिश्रुतं॥ न करिष्यति यो मोहात्स महापातकी
भवेत्॥ ८८॥ अनंतैर्वारुणस्नानैर्यत्पुण्यं प्राप्यते द्विजैः॥ ततोनंतगुणं पुण्यं भस्मस्नानादवाप्यते॥ ८९॥ कालत्रयेपि कर्तव्यं भस्मस्नानं प्र
यत्नतः॥ भस्मस्नानं यतः श्रौतं तत्त्यागी पतितो भवेत्॥ ९०॥ मूत्राद्युत्सर्जनांतेपि भस्मस्नानं प्रयत्नतः॥ कर्त्तव्यमन्यथा पूता न भविष्यंति
मानवाः॥ ९१॥ विधिवत्कृतशौचोपि भस्मस्नानं विना द्विजः॥ न भविष्यति पूतात्मा नाधिकार्यपि कर्मणि॥ ९२॥ अपानवायुनिर्याणे जंभणे स्तुं
भने क्षुते॥ श्लेष्मोद्गारेपि कर्त्तव्यं भस्मस्नानं प्रयत्नतः॥ ९३॥ भस्मस्नायी त्रिपुंड्रांकः कृतरुद्राक्षभूषणः॥ कृत्वा शिवार्चनं नित्यं शिवपूजाफ
लं लभेत्॥ ९४॥ कृतभस्मस्नान पूतो यत्र कुत्रापि वा मृतः॥ स सर्वपापनिर्मुक्तः शिवलोकं गमिष्यति॥ ९५॥ पुरा कश्चिद्द्विजवरः काशीं गं
तुं समुद्यतः शनैः शनैर्दक्षिणतः चचालात्यंतमास्तिकः॥ ९६॥ गछन्मार्गे क्वचित्स्थित्वा रात्रीं नीत्वारुणोदये॥ कृत्वा शौचादिकं सर्वं भस्मस्ना
नं चकार सः॥ ९७॥ ततस्तं भस्मनास्नातं शुचिर्भूतं द्विजोत्तमं॥ ददर्श पथिकः कश्चित्तदा सर्पविषावृतः॥ ९८॥ ततः प्रणम्य तं विप्रं स्ववृत्तांतमशेषतः
॥ तस्मै निवेदयामास सर्पदंशं च सत्वरं॥ ९९॥ ततस्तमर्धनिष्क्रांतप्राणवायुं विलोकयन्॥ तदंगं भस्मसंवीतं चकार दययाद्विजः॥ १००॥
ततस्तं नेतुमचिरादागता यमकिंकराः॥ ततस्ते भस्मसंवीतं दृष्ट्वा प्राहुः परस्परं॥ १॥ ॥ यमदूता ऊचुः॥ ॥ अयं कृताघसंघोपि भस्मसंवीतवि
ग्रहः॥ पूतात्मा जात एवाद्य नास्य पापकृतं भयं॥ २॥ विलयं यांति पापानि भस्मसंबंधमात्रतः॥ अत एवास्य पापेभ्यो न भयं विद्यते ध्रुवं॥ ३॥
भस्मप्राप्तमनेनाद्य भूरिभाग्यवशादिह॥ प्रायः पूर्वभवे नैव बहु पुण्यं कृतं भवेत्॥ ४॥ देहावसानसमये भस्मप्राप्तिरयत्नतः॥ न भवत्येव स

हसाबहुपुण्यतपोविना॥५॥द्वित्राअपिकणाः पुण्या भस्मनोत्यंतदुर्लभा॥अनेनाद्यकथंप्राप्तंबहुभस्माप्रयत्नतः॥६॥लब्धभस्मकणार्थेना
प्यर्थेदुर्ललितालकाः॥बभूवुर्बहवोभूरिभस्मनापिकिमद्भुतं॥७॥अपादमस्तकंसम्यक्भस्मनालंकृतोस्त्ययं॥कृतकृत्योतएवाद्यमुक्तिर
स्यभविष्यति॥८॥ ज्ञातुंनशक्यतेभाग्यंपुरुषाणामयंयतः॥ कृताऽघोपिप्राप्तभस्मोमुक्तः संसारबंधनात्॥९॥एतादृशंवस्तुतस्तुमहद्भा
ग्यमपेक्षितं॥ किमतोस्त्यधिकंभाग्यमयत्नेनापवर्गदं॥१०॥ तनुर्विभूतिसंवीतादृष्टादृष्टवशादिह॥तनुः क्व दृश्यतेस्माभिर्विभूतिकृतभूषण
॥११॥दिनमद्याभवद्धन्यंयतोभस्मविभूषणः॥ दृष्टोस्माभिरदृष्टेन किमस्तीष्टमतो धिकं॥१२॥ अयंद्विजवरोदृष्टोयोयमस्यविमोचकः॥विभू
तिदानचतुरःसदयोधिगतोदयः॥१३॥भव्योभस्मांगरागोयंब्राह्मणोभगवत्प्रियः॥भस्मांगरागभक्तस्तुभगवद्भक्तउच्यते॥१४॥ एतस्यसंन्निधा
नेनप्राप्तभस्मोयमीदृशः॥ अधुनाभगवद्रूपोभविष्यतिनसंशयः॥१५॥ अयंचेन्नीयतेस्माभिः प्रमादोन्मोहतोपिवा॥ तदास्मासुयमः क्रूरः कृ
पांनैवकरिष्यति॥१६॥ किंचाधुनैनंनेष्यंतिवीराः शंकरकिंकराः॥तेषांभस्मांगरागाणामुत्कंठानयनेयतः॥१७॥भस्मांगरागपूतांगंदृष्ट्वाशंकर
किंकराः॥मन्यंतेनयिष्यंतिभस्मभासितविग्रहाः॥१९॥ एतदानयनंकर्तुंभगवान्भस्मभूषणः॥भस्मांगरागान्कालाक्षः प्रेषयिष्यतिशंकरा
न्॥२०॥ यतोभस्मांगरागेषुभगवान्प्रीतिमानसः॥ अधुनैवातियत्नेनप्रेषयिष्यतिशांकरान्॥भस्मांगरागपूतांगंसंवीक्ष्यभगवानपि 
॥समायात्येवसहसासयतोभक्तवत्सलः॥२२॥भगवत्प्रेषयामासभस्मांगाभगवानतः॥भस्मांगस्यास्यसहसानोपेक्षांसकरिष्यति॥ 
॥२३॥त्रिनेत्रप्रेमपात्रेस्मिन्भस्मगात्रेत्रिलोचनः॥स्वप्रेममात्रपात्रत्वंसद्यः प्रकटयिष्यति॥२४॥ ॥विष्णुरुवाच॥ ॥इत्युक्त्वासंस्थि
तास्तत्रतेकृतांतस्यकिंकराः॥शंकरप्रेषितास्तीव्रंशांकराश्चसमागताः॥ २५॥भस्मांगरागपूतांगंतेतंदृष्ट्वाततः परं॥संतुष्टाः पूजयामा
सुर्भूयस्तंभस्मनाभुवि॥२६॥ ततोविमानरत्नेतेतंविभूतिकणावृतं॥उपवेश्यपुनः पुष्पैः पूजयामासुरादरात्॥२७॥कल्पवृक्षसमुद्भू
तापुष्पवृष्टिरभूत्ततः॥देवदुंदुभयोनेदुर्ननृतुश्चाप्सरोगणाः॥२८॥ ततोययुःशिवगणास्तंगृहीत्वाशिवांतिकं॥देवदुंदुभिनिर्ह्रादशंख
नादपुरःसरं॥२९॥ददौतस्मैकृपासिंधुर्गाणापत्यंमहेश्वरः॥भस्मांगरागमात्रेणत्रिनेत्रंचचकारतं॥३०॥निर्धूतपापः संप्रापदुष्प्रापं
तपसामपि॥गाणापत्यंधर्मकोटिप्राप्यमप्राप्यमन्यतः॥ ३१॥ तस्मात्सर्वप्रयत्नेनभस्मस्नानंद्विजादिभिः॥ कर्तव्यंमंत्रपूतेनभस्मनावि

धिपूर्वकं॥३२॥ न यस्योद्धूलनेश्रद्धासर्ववेदांतसंस्तुते॥ तस्यजन्मवृथादेवाःसत्यंसत्यंनसंशयः॥३३॥ शैवधर्मरताधन्याभस्मविभूषणाः॥
धन्याःशिवार्चनरताधन्याःपंचाक्षरप्रिया॥३४॥ कलौद्विजाभविष्यंतिभस्मस्नानविवर्जिताः॥ तेपतिष्यंतिनरकेयावदाचंद्रतारकंकलौद्विजा
भविष्यंतिशिवधर्मविवर्जिताः॥ तेप०॥३७॥ कलौद्विजाभविष्यंतित्रिपुंड्रानंकिताःसदा॥४०॥ कलौद्विजाभविष्यंतिरुद्राक्षानंकितःसदा॥ तेप०॥
॥४१॥ ऊर्ध्वपुंड्ररताविप्राभविष्यंतिकलौयुगे॥ तेप०॥४२॥ कलौद्विजाभविष्यंतित्यक्तलिंगार्चनाःसदा॥ तेप०॥ ४३॥ कलौद्विजाभविष्यंतित्यक्त
रुद्रजपाःसदा॥ तेप०॥ ४४॥ कलौद्विजाभविष्यंतित्यक्तपंचाक्षराःसदा॥ तेपति०॥४५॥ कलौद्विजाभविष्यंतित्यक्तरुद्राक्षवासनाः॥ तेप०॥४६॥
कलौद्विजाभविष्यंतित्यक्तशंकरवीक्षणाः॥ तेप०॥४७॥ कलौद्विजाभविष्यंतिशिवानुत्कर्षवादिनः॥ तेप०॥४८॥ कलौद्विजाभविष्यंतिशिवस्तु
तिपराङ्मुखाः॥ तेप०॥४९॥ कलौद्विजाभविष्यंतिशंकरस्तुतिनिंदकाः॥ तेप०॥५०॥ कलौद्विजाभविष्यंतिशैवपूजापराङ्मुखाः॥ तेप०॥५१॥
कलौद्विजाभविष्यंतित्यक्तशैवाभिवादनाः॥ तेपतिष्यंतिनरकेयावदाचंद्रतारकं॥५२॥ क्वचित्क्वचितिविभूषणाः॥कलिस्छा०॥ द्भविष्यंति
कलौशंकरपूजकाः॥ कलिस्छदूषयिष्यंतिदृष्ट्वातानपिमोहतः॥५३॥ क्वचित्क्वचिद्भविष्यंतिकलौभूतिविभूषणाः॥ कलिस्छा०॥५४॥
क्वचित्क्वचिद्भविष्यंतिकलौरुद्राक्षभूषणाः॥ कलिस्छा०॥५५॥ क्वचित्क्वचिद्भविष्यंतिकलौरुद्रजपोत्सुकाः॥ कलि०॥५६॥ क्वचित्क्वचिद्भवि
ष्यंतिकलौपंचाक्षरप्रियाः॥ कलि०॥५७॥ क्वचित्क्वचिद्भविष्यंतिकलौशिवकथोत्सुकाः॥ कलिस्छा०॥५८॥ क्वचित्क्वचिद्भविष्यंतिकलौशै
वजनप्रियाः॥ कलि०॥५९॥ प्रायः कलियुगेशैवाभविष्यंत्येवदुर्लभाः॥ यतःकलिसमाक्रांताभविष्यंतिकलौनराः॥६०॥ कलिरूपमहापा
पसंक्रांतायेदुराशयाः॥ तेकथंवाभविष्यंतिशैवाःशिष्टजनप्रियाः॥६१॥ यदिशैवाभविष्यंतिकलावपितपोबलात्॥ तेतरिष्यंतिसंसार
घोरसागरमुत्तमाः॥६२॥ शैवोधन्यःकलौनित्यंशंकरंपूजयिष्यति॥ सधन्यःसतपोमूर्त्तिःसपुण्यःसोतिपावनः॥६३॥ कलिपातकनिर्मु
क्तःकलौशैवोभविष्यति॥ शैवोयस्मात्कलियुगेभवत्यत्यंतदुर्लभः॥६४॥ अशैवोयःकलियुगेकलिपापकुलाश्रयः॥ ससंप्राप्यकलौदुः
खंनरकंचगमिष्यति॥६५॥ अशैवोयःकलियुगेसएवकलिसंश्रयः॥ सएवपातकीज्ञेयःसएवनरकालयः॥६६॥ अशैवसदृशःपा
पीनभूतोनभविष्यति॥ महापातककोटीनांअशैवःसंश्रयोयतः॥६७॥ पुरासर्वाणिपापानिसमूहीभूयकोटिशः॥ स्थितानिघोररू

श्रीशिवर० ७ पाणिदुःखितानियमांगणे ॥ ६८ ॥ तानिपापानिसर्वाणिदृष्ट्वाकालःकदाचन ॥ बभाषेधर्मतत्वज्ञोधर्मशास्त्रविचक्षणः ॥ उ-स-पू-
४६ ॥ ६९ ॥ ॥ यमउवाच ॥ ॥ अशैवेष्ववतिष्ठंतुपापान्येतानिसर्वदा ॥ अशैवाएवसर्वेषांपापानामाश्रयायतः ॥ ७० ॥
अशैवादपरोलोकेनास्तिपापाश्रयोयतः ॥ अतोमून्यपिपापानितेषुतिष्ठंतुसर्वदा ॥ ७१ ॥ नभस्मोद्धूलनेश्रद्धायेषां
कल्मषचेतसां ॥ तेष्वेवाऽमूनिपापानिसदातिष्ठंतुभागशः ॥ ७२ ॥ त्रिपुंड्र धारणेश्रद्धानयेषांकलुषात्मनां ॥ तेष्वे
वाऽमू० ॥ ७३ ॥ रुद्राक्षधारणेश्रद्धानएषांकलुषात्मना ॥ तेष्वेवा० ॥ ७४ ॥ शिवलिंगार्चनश्रद्धांनएषांकलुषात्मनां ॥
तेष्वेवाऽमू० ॥ ७५ ॥ शिवाभिवादनेश्रद्धानयेषांकलुषात्मनां ॥ तेष्वेवा० ॥ ७६ ॥ शिवानुचिंतनेश्रद्धानयेषांकलुषात्म
नां ॥ तेष्वेवा ॥ ७७ ॥ महादेवस्तुतौश्रद्धानयेषांकलुषात्मनां ॥ तेष्वेवा० ॥ ७८ ॥ महेशप्रेक्षणेश्रद्धानयेषांकलुषात्म
नां ॥ तेष्वेवा० ॥ ७९ ॥ शुचिशैवकथाश्रद्धानयेषांकलुषात्मनां ॥ तेष्वेवा० ॥ ८० ॥ शिवाग्रेनर्त्तनेश्रद्धानयेषांकलु
षात्मनां ॥ तेष्वेवा० ॥ ८१ ॥ पंचाक्षरजपेश्रद्धानयेषांकलुषात्मनां ॥ तेष्वेवा० ॥ ८२ ॥ श्रीमद्रुद्रजपेश्रद्धानयेषांकलुषा
त्मनां ॥ तेष्वेवा० ॥ ८३ ॥ शिवोत्कर्षपराश्रद्धानियेषांकलुषात्मनां ॥ तेष्वेवा० ॥ ८४ ॥ शिवस्थानेपराश्रद्धानयेषांकलुषात्मनां ॥
तेष्वेवामूनिपापानिसदातिष्ठंतुभागशः ॥ ८५ ॥ अविमुक्तेपराश्रद्धानयेषांकलुषात्मनां ॥ तेष्वेवामूनिपापानिसदातिष्ठंतुभागशः ॥ श्रीशिव
॥ ८६ ॥ श्रीमद्विश्वेश्वरेश्रद्धानयेषांकलुषात्मनां ॥ तेष्वेवा० ॥ ८७ ॥ श्रीमुक्तिमंडपेश्रद्धानये० ॥ तेष्वेवा० ॥ ८८ ॥ श्रीमद्विश्वेश्वरोश्र ४६
द्धान० ॥ तेष्वेवा० ॥ ८९ ॥ श्रीमदंतर्गृहेश्रद्धान० ॥ तेष्वेवा० ॥ ९० ॥ श्रीकालभैरवेश्रद्धानयेषां० ॥ तेष्वेवा० ॥ ९१ ॥ ज्ञानवाप्यांपरा
श्रद्धान० ॥ तेष्वेवा० ॥ ९२ ॥ मणकर्ण्यांपराश्रद्धान० ॥ तेष्वेवा० ॥ ९३ ॥ शिवभक्तजनेश्रद्धान० ॥ तेष्वेवा० ॥ ९४ ॥ शिवरात्रि
व्रतेश्रद्धानयेषांकलुषात्मनां ॥ तेष्वेवा० ॥ ९५ ॥ सोमवारव्रतेश्रद्धानयेषांकलुषात्मनां ॥ तेष्वेवामूनिपापानिसदातिष्ठंतु
भागशः ॥ ९६ ॥ अशैवास्त्वेतएवातस्तेमहापातकाश्रयाः ॥ एतेषामपिपापानांभविष्यंत्याश्रयाध्रुवं ॥ ९७ ॥ स्वकीयमा-

अयंत्यक्त्वानकोप्यन्यवतिष्ठतिअशैवेषुस्वाश्रयेषुपातकान्याश्रयंततः॥९८॥लोकेनसहतेकोपिप्रायःस्वस्थानरिक्ततां॥अशैवे
ष्वघगेहेषुतिष्ठंत्वेतान्यतोध्रुवं॥९९॥अद्यैवसत्वरंयांतुरेरेपापाधिदेवताः॥अशैवंस्वाश्रयंत्यक्त्वामायोत्वन्यत्रसर्वथा॥१००॥
॥विष्णुरुवाच॥ ॥इत्युक्त्वाप्रेषयामासयमःपापानिसत्वरं॥अशैवेषुततस्तानिस्थितान्येतानिसंततं॥१॥अशैवाःपापनिलयास्ततस्तेषांश्रुति
श्रुते॥भस्मस्नानादिकेश्रद्धानभविष्यतिसर्वथा॥२॥जन्मजन्मांतरकृतंपापंयस्यफलोन्मुखं॥नतस्यजायतेश्रद्धाविभूत्युद्धूलनादिषु
॥३॥जन्मजन्मांतरकृतंतपोयस्यफलोन्मुखं॥तस्यैवजायतेश्रद्धाभस्मस्नानादिकर्मसु॥४॥फलोन्मुखतपोयोगाद्भस्मस्नानरताद्वि
जाः॥कुर्वंतिभस्मनास्नानंमंत्रपूतेनभस्मना॥भालाद्यंगेषुकर्त्तव्यंत्रिपुंड्रंकेवलंततः॥रुद्राक्षधारणंकार्यंजाबालश्रुतिचोदितं॥६॥ततः
संध्यादिकंकृत्वाकर्त्तव्यंशिवपूजनं॥शिवार्चनेननश्यंतिपापानिविविधान्यपि॥७॥शिवार्चनेनप्राप्यंतेधर्मादीनिफलान्यपि॥धर्मा
दिफलहेतुत्वंयतःश्रौतंशिवार्चनं॥८॥सर्वकामप्रदंपुण्यंशिवलिंगस्यपूजनं॥सर्ववेदश्रुतंपुण्यंमहापातकनाशकं॥९॥शिवार्चनं
प्रयत्नेनयेकुर्वंतिविधानतः॥तेधन्याःपावनाःपुण्यास्तेतपोमूर्त्तयोध्रुवं॥१०॥कृतैरपिमहादानैःकोटिशोविधिपूर्वकं॥शिवार्चनफलंयाव
त्तावन्नावाप्यतेध्रुवं॥११॥कृतैरपिमहायागैःकोटिशोविधिपूर्वकं॥शिवार्चनफलंयावत्ताव०॥१२॥कृतैरपिमहाधर्मैःकोटिशोविधिपूर्व
कं॥शिवार्चन०॥१३॥कृतैरपिमहातीर्थैःकोटि०॥शिवार्चनफ०॥१४॥पूजितःशंकरोभक्त्याद्विजैर्बिल्वदलैरपि॥ददात्येवहिसंतुष्टः
सायुज्यमापलीलया॥महादेवार्चनस्यैवमुक्तिसाधनतातत॥मुक्त्यर्थिभिःप्रयत्नेनकर्त्तव्यंशिवपूजनं॥१६॥शिवैकनिरतोभूत्वायःशि
वंपूजयिष्यति॥समहापापनिर्मुक्तःशिवलोकंप्रयास्यति॥१७॥पापकाननदावाग्निःश्रीमहादेवपूजनं॥धर्मार्थकाममोक्षाणामसाधा
रणकारणं॥१८॥शिवार्चनात्परोधर्मोनास्तिनास्तिसुराध्रुवं॥सत्यमेतत्पुनःसत्यमुद्धृत्यभुजमुच्यते॥१९॥सततंश्रीमहेशस्यसर्वदेव-
शिखामणेः॥पूजांकरोतियःप्रीत्यासवंद्योममसर्वदा॥२०॥सहसानभवत्येवप्रीतिस्त्र्यंबकपूजने॥तत्रचेत्प्रीतिरनिशंजितंतर्हिज
गत्त्रये॥२१॥ ॥अगस्त्यउवाच॥ ॥इत्युक्तेतद्वचःश्रुत्वातमूचुःकेशवंसुराः॥काशींगंतुंसमुद्युक्ताःसर्वेकिमासीद्द्विजाः॥२२॥ ॥

 ।।विष्णुरुवाच।। ।। सगत्तोनर्मदांरम्यांशिव ऽलिंगसमाश्रयो।। गत्वाददर्शतत्रस्थानमुनीन्शिवपरायणान्।।२३।।पंचाशत्कोटिमुनयः 
 प्रसन्नीकृतशंकरः।।तदैवप्रस्थिताःकाशींमहोत्साहसमन्विताः।।२४।।सतैर्मुनिवरैःसाकंअत्यंतंभक्तिपूर्वकं।।विवेशमुक्तिदांकाशीं
श्रीमहेशकृताश्रयां।।२५।। दृष्ट्वातेमुनयःकाशींसत्तोसद्भुक्तिमुक्तिदां।।संतोषंपरमंप्रापुर्धनंप्राप्येवनिर्धनाः।।२६।। ज्ञानवाप्योततस्नात्वास
र्वेतेमुनिपुंगवाः।।ज्ञानेशंपूजयामासुर्दंडपाणिंततः परं।।२७।।मोदादीनदुंढिराजंचपूजयित्वाततःपरं।।बिल्वपत्रांजलिपुटाःप्रापुर्निर्वाणमं
डपं।।२८।। निर्वाणमंडपेस्थित्वाविश्वेश्वरमुमापतिं।। दृष्ट्वाप्रणम्यसंतुष्टास्तुष्टुवुर्विविधैस्तवैः।।२९।।ततःपरमतिस्वच्छैर्ज्ञानवापीजलैःसुराः।।
अभिषिच्यप्रयत्नेनविश्वेश्वरमनामयं।।३०।।भस्मनाबिल्वपत्रैश्चपूजयित्वाप्रयत्नतः।। प्रदक्षिणनमस्कारान्कृत्वाननृतुरास्तिकाः।।३१।।नि
र्वाणमंडपेसर्वेततः परमघापहे।।उपविश्यययमासक्ताःप्रापुरानंदमक्षयं।।३२।। ततःपंचाक्षरंशैवंसतारंमुक्तिदायकं।।जप्त्वारुद्रजपंकृत्वा
तुष्टुवुर्विश्वनायकं।।३३।।ततोंतर्गृहयात्रादिसर्वंकृत्वापुनःशिवं।।संपूज्यप्रययुःसर्वेकालनाथदिदृक्षया।।३४।।कालकुंडेततःस्नात्वादृष्ट्वा
श्रीकालभैरवं।।पूजयामासुरर्घ्याद्यैर्भक्तिपूर्वकमादरात्।।३५।। ततस्तेसंस्थिताःकाश्यांमुक्त्यर्थंमुनिपुंगवाः मुक्तिदांकाशिकांप्राप्यकेतुमुं
चंतिपावनाः।।३६।।श्रीमहेशस्यप्रसादेनकाशींप्राप्यमुनीश्वराः।।मुक्ताबभूवुःसर्वेपिसोपिमुक्तोद्विजोत्तमाः।।३७।।शिवार्चनेनसंप्राप्या
काशीमुक्तिप्रदायिनी।।ततोमुक्तिश्चसंप्राप्यामहेशानुग्रहात्सुराः।।३८।।शिवपूजाकामधेनुःकिंवानैवप्रयच्छति।। ततःसर्वार्थदापुण्याशिवपू
जेतिगीयते।।३९।। ।।अगस्त्यउवाच।। ।।इत्युक्त्वाविष्णुनादेवाब्रह्माद्याविष्णुमादरात्।।प्रणम्यपूजयामासुःशैवधर्मपरायणं।।४०।। 
ततोब्रह्मादयोदेवाःकेदारेशंप्रयत्नतः।। संपूज्यतुष्टुवुःस्तोत्रैर्देवदेवोत्तमंशिवं।।४१।। ।। विष्णुरुवाच।। ।।इत्यगस्त्यवचःश्रुत्वास 
र्वपापविनाशकं।।अगस्त्यंपूजयामाससशैवःशिवपूजकं।।४२।।अतोन्वहंपूजनीयःप्रयत्नेनमहेश्वरः।।यतोवेदोदितंनित्यंश्रीमहादेव
पूजनं।।४३।।अत्रश्रीकुंभघोणेशंपूजयित्वावसाम्यहं।।ममत्र्यंबकादन्यःपूज्योनास्त्येवसर्वथा।।४४।।श्रूयतेमुक्तिदानित्यंमहादेवक
थामया।।महाशैवैःसहप्रीतिःक्रियतेसर्वदामया।।४५।।दिनानिक्षणवद्यांतिशिवपूजापरस्यमे।।दुःखमात्रंविहायात्रशिवक्षेत्रेवसा
म्यहं।।४६।।शिवक्षेत्रनिवासेनसुखंयावदवाप्यते।।तावत्सुखंवस्तुतस्तुवैकुंठेपिनमेध्रुवं।।४७।।पूजयस्वात्रगौरीशंकुंभघोणाभिधंवि

धे।। सर्वकामप्रदंलिंगंकुंभघोणाभिधंयतः।। ४८।। सर्वार्थदायकंयस्माच्छ्रीमहादेवपूजनं।। अतःकुरुप्रयत्नेनशिवलिंगस्यपूजनं।। ४९।। शिवलिंगार्च
नेनैवमुक्तिस्तवभविष्यति।। शिवलिंगार्चनादन्यन्नास्तिमुक्तिप्रदंविधे।। ५०।। उद्धूल्यभस्मनांगानिधृत्वाचैवत्रिपुंड्रकं।। रुद्राक्षधारणंकृत्वापूजय
स्वसदाशिवं।। ५१।। अभिषिच्यमहादेवंरुद्राध्यायेनसादरं।। भस्मनाबिल्वपत्रैश्चपूजयस्वमहेश्वरं।। ५२।। पूजांतेजपयत्नेनशैवंपंचाक्षरंविधे।।
श्रीरुद्रजपयत्नेनततःसर्वाघनाशकं।। ५३।। पंचाक्षरेणरुद्रेण प्रीणयस्वसदाशिवं।। रुद्रपंचाक्षराभ्यांतु प्रीतोभवतिशंकरः।। षडक्षरेणरुद्रे
णयःप्रीणयतिशंकरं।। सघोरतपसारुद्रंप्रीणयत्येवनान्यथा।। ५५।। रुद्रपंचाक्षरजपस्तपएवनसंशयः।। नततोग्र्यंतपःकिंचित्सत्यमेवोच्यतेम
या।। ५६।। ।। सदाशिवउवाच।। ।। इत्युक्तोविष्णुनाब्रह्मामामनाद्यंतमव्ययं।। पूजयित्वास्थितोभक्त्याकुंभघोणेमनोरमे।। ५७।। येमामनन्य
शरणाः सततंवरेण्यंसंपूजयंतिनवकोमलबिल्वपत्रैः।। तेनिर्गुणाअपिगुणांबुधयोभवंतिविंदंतिमुक्तिमुपभुक्तसमस्तभोगाः।। ५८।। ।। इति
श्रीशिवरहस्येउग्राख्येसप्तमांशेपूर्वार्धेकुंभणमहिमानुवर्णनंनामषड्विंशोध्यायः।।२६।। ।। श्रीउग्रायनमः।। ।। श्रीशिवउवाच।। ।।मध्या
र्जुनाभिधंक्षेत्रमेकमस्तिवरानने।। तत्रसंपूज्यमांदेवमुनयश्चवसंतिहि।।१।। मध्यार्जुनेशंयःपश्येन्निशिभस्माविभूषणः।। समर्चयेच्च
भक्त्यायःसमुक्तोभवतिध्रुवं।। २।। अत्रयःकृत्तिकायोगेकार्त्तिक्यांयत्नपूर्वकं।। यः पूजयतिमांभक्त्यासमुक्तोभवतिध्रुवं।।३।। तत्रयत्नेनम
द्भक्तंसुवर्णाभरणादिभिः।। यःपूजयेत्ससंसारान्मुक्तोभवतिसर्वथा।। अत्रपातार्द्रसंयुक्तसप्तमीभानुवासरे।। योमांसमर्चयेद्भक्त्यासमुक्तो
भवतिध्रुवं।। ५।। यस्तुकृष्णालमात्रंवासुवर्णंभस्मधारणे।। ददातिपरयाभक्त्यासमुक्तोभवतिध्रुवं।। ६।। मध्यार्जुनेतपस्तप्तंबहुभिर्मुनिभिः
पुरा।। अविमुक्तमिदंप्राप्तंमुक्त्यर्थंकमलानने।।७।। सार्धलक्षसहस्राणांमुनीनामूर्ध्वरेतसां।। वासस्थलमभूत्पूर्वंश्रीमन्मध्यार्जुनेशि
वे।।८।। पुरादधीचिनातत्रतपस्तप्तमनेकधा।। वशिष्ठाद्यैश्चमुनिभिस्तत्रतप्तंतपःशिवे।।९।। तस्मिन्कालेभवद्राजाधर्ममूर्त्तिरितिश्रु
तः।। तेनधर्मेणसततंकृतंराष्ट्रस्यपालनं।।१०।। चतुष्पादभवद्धर्मस्तस्मिन्छास्यतिभूतले।। अधर्मसंक्षयोजातःसर्वस्मिन्पृथिवीतले।।
पुरामध्यार्जुनक्षेत्रेकश्चिदासीच्छिवार्चकः।। तमाहब्राह्मणःकश्चिदूर्ध्वपुंड्रधरोभ्रमात्।। १२।। ।। द्विजउवाच।। ।। ऊर्ध्वपुंड्रधरंपश्यमा
मनाकुलचेतसंसुसंतोषंयथाकालंवार्त्तांकुरुमयासह।।१३।। इतितद्वचनंश्रुत्वाभ्रमाद्दृष्ट्वाचतंद्विजं।। ततोजजापश्रीरुद्रंभानुप

श्यन्जलेस्थितः॥१४॥ ततोददर्शधर्मिष्ठंधर्ममूर्त्तिसशोकरः॥ दृष्ट्वातस्मैसमाचख्यौवृत्तांतमतिदुःखितः॥१५॥ ॥त्वयिशासतिभूलोकेधर्ममा 
र्गप्रवर्त्तके॥ अद्यैवाभून्नृपश्रेष्ठक्षेत्रेस्मिन्धर्मविप्लवः॥१६॥ ऊर्ध्वपुंड्रधरोविप्रःकश्चिद्दृष्टोधुनामया॥ तंदुष्टमतिवेगेनछिंधिछिंधिशिरोत्करैः
॥१७॥ तस्यदर्शनमात्रेणद्रष्टव्योभानुरादरात्॥ ततोरुद्रजपकार्येजलेस्थित्वाप्रयत्नतः॥१८॥ ऊर्ध्वपुंड्रंकरिष्यंतितंदृष्ट्वान्येपिमोहतः॥ तद्वत्
त्वोर्ध्वपुंड्राणियास्यंतिनरकंद्विजाः॥१९॥ त्रिपुंड्रकारणाभावेपातकंप्राहुरास्तिकाः॥ ऊर्ध्वपुंड्रस्यकरणंपापमाहुर्मनीषिणः॥२०॥ गोमांसभक्षणं
प्राहुःपातकंमुनिपुंगवाः॥ ऊर्ध्वपुंड्रस्यकरणंतथापापंनृपोत्तम॥२१॥ वरंगुरुसतीयोगोजननीयोगएवच॥ ऊर्ध्वपुंड्रस्यकरणंनवरंसत्यमुच्य
ते॥२२॥ ॥शिवउवाच॥ ॥इतितद्वचनंश्रुत्वाधर्ममूर्तिविचक्षणः॥ ऊर्ध्वपुंड्रधरंविप्रंतदाहंतुमुपक्रमे॥२३॥ ऊर्ध्वपुंड्रधरंविप्रंतंबध्वाश
कटेततः॥ राजाविहारयामासक्रकचैरतिदारुणैः॥२४॥ तच्छिन्नंतन्मुखेक्षिप्त्वासिक्त्वाचसुरयामुखं॥ चंडालामेध्यकूपेतंपातयामाससत्
त्वरं॥२५॥ ततःसकारयामासडिंडीरवमिलापतिः॥ ऊर्ध्वपुंड्रंभ्रमेणापिमाकुर्वंत्विति सत्वरं॥२६॥ मार्चयंतुमहेशान्यंभ्रमेणापीतिस
त्वरं॥२७॥ पुनःसकारयामासडिंडीरवमिलापतिः॥ उद्धूलनंविनाविप्रामातिष्ठंत्विति सत्वरं॥२८॥ पुनःसकारयामासडिंडीरवमिलापतिः॥
त्रिपुंड्रधारणंत्यक्त्वामातिष्ठंत्विति सत्वरं॥३०॥ पुनःसकारयामासडिंडीरवमिलापतिः॥ रुद्राक्षधारणंत्यक्त्वामातिष्ठंत्विति सत्वरं॥३१॥
पुनःसकारया०॥ रुद्राध्यायजपंत्यक्त्वामाष्ठं०॥ पुनःस०॥३२॥ पंचाक्षरजपंत्यक्त्वामा०॥ पुनःस०॥३३॥ महादेवकथांत्यक्त्वा०॥ पुनःसकारया०॥
महादेवार्चनंत्यक्त्वामातिष्ठंत्वितिसादरं॥ पुनःस०॥३४॥ शिवस्यैवार्चनंनित्यंकुर्वंत्वितिविशेषतः॥ पुनःसकारया०॥३५॥ शिवरात्रिव्रतं 
नित्यंकुर्वंत्वितिविशेषतः॥ पुनःस०॥३६॥ सोमवारव्रतंनित्यंकुर्वंत्वितिविशेषतः॥ पुनःस०॥३७॥ कालाष्टमीव्रतंनित्यंकु०॥ पुनःसका० 
॥३७॥ ॥सदाशिवउवाच॥ ॥इतिडिंडीरवंश्रुत्वादधीच्याद्यामुनीश्वराः॥ संतुष्टचित्ताःसंप्रापुःधर्ममूर्त्तिंविचक्षणं॥३७॥ ददृशुर्धर्ममूर्त्तिं
तेभस्मोद्धूलितविग्रहं॥ रुद्राक्षमालाभरणंत्रिपुंड्रांकितमस्तकं॥३८॥ सधर्ममूर्त्तिर्धर्मात्मा दृष्ट्वातान्मुनिपुंगवान्॥ अभ्युत्थायातियत्नेन
भूयोभूयोनमामतान्॥३९॥ प्रणम्यप्रीतहृदयोरत्नसिंहासनेषुतान्॥ उपविश्ययथाशास्त्रंपूजयामाससादरं॥४०॥ ययासूपूजिता
स्तेनमुनयोब्रह्मवादिनः॥ चिरंजीवेतितंप्राहुर्धर्ममूर्त्तिंकृतार्चनं॥४१॥ ततःकृतांजलिपुटंविनयानतकंधरं॥ धर्ममूर्त्तिंधर्मनिष्ठंदधीचिः

प्राहसादरं॥४२॥ ॥ दधिचिरुवाच॥ ॥ धर्ममूर्त्ते धर्मनिष्ठ धर्ममूर्तिस्त्वमेवहि॥ यतोभूच्छैवधर्मेषुविश्वासोवैदिकेषुते॥४३॥ कृतकृ
त्योसिधन्योसिमान्योस्यस्माकमन्वहं॥ यतोभूद्भवतोद्भवतोभक्तिः शैवधर्मेषुसंततं॥ भक्तिः शांभवधर्मेषुभूरिभाग्यफलंयतः॥ ततएवा
तिधन्योसितेषुभक्तिर्यतोस्तिते॥४५॥ शैवधर्मपरिभ्रष्टान्शिक्षयैवंनृपोत्तम॥ ॥ तवायंपरमोधर्मः सर्वसंपत्करोध्रुवं॥४६॥ दुष्टानां
शिक्षणंधर्मः शिष्टानांरक्षणंतथा॥ तवानेनैवधर्मेणपुण्यवृद्धिर्भविष्यति॥ शैवधर्मपरिभ्रष्टायेतेदुष्टाः तथाचते॥ हंतव्याएवयत्नेन
शितशस्त्रैर्नसंशयः॥४८॥ तएवशिष्टायेनित्यंशैवधर्मपरायणाः॥ तेरक्षणीयायत्नेनस्वशक्त्यासततंनृपैः॥४९॥ ॥शिवउवाच॥ ॥
इतितद्वचनेश्रुत्वाधर्ममूर्त्तिकृतांजलिः॥ पप्रच्छधर्मान्धर्मज्ञंदधीचींमुनिसत्तमं॥५०॥ ॥धर्ममूर्त्तिरुवाच॥ ॥धर्मः कोवाश्रुतिप्रोक्तो
यद्धर्माचरणान्मुने॥ प्रसीदतिमहादेवो देवदेवशिखामणिः॥५१॥ ॥शिवउवाच॥ ॥ इतितद्वचनंश्रुत्वादधीचिर्हृष्टमानसः॥ धर्मा
न्वक्तुंसमारेभेभुक्तिमुक्तिप्रदान्शिवे॥५२॥ ॥दधीचिरुवाच॥ ॥भुक्तिमुक्तिप्रदाधर्माः शैवधर्माः श्रुतिश्रुताः॥ तद्धर्माचारनिरताः
पूजनीयामनीषिभिः॥५३॥ भस्मस्नानादयोधर्माः मोक्षधर्माः श्रुतिश्रुताः॥ मद्धर्माचरणंकार्यंद्विजैस्सर्वैश्चयत्नतः॥५४॥ भस्मस्नानादि
कंत्यक्त्वायेतिष्ठंतिद्विजातयः॥ तेयांतिनरकंघोरंसमित्राः पितृभिः सह॥५५॥ त्रिपुंड्रधारणंश्रौतंत्यक्त्वायेभुंजतेद्विजाः॥ ते
यांतिनरकंघोरंसमित्राःपि०॥५६॥ विभूत्युद्धूलनंश्रौतंत्यक्त्वायेभुंजतेद्विजाः॥ तेयांति०॥५७॥ रुद्राक्षधारणंश्रौतंत्यक्त्वायेभुंजते
द्विजाः॥ तेयांति०॥५८॥ शिवलिंगार्चनंश्रौतंत्यक्त्वाये०॥ तेयांति०॥५९॥ रुद्राध्यायजपंश्रौतंत्यक्त्वा०॥ तेयांति०॥६०॥ पंचाक्षरजपं
श्रौतंत्य०॥ तेयांति०॥६१॥ महेशभजनंश्रौतंत्यक्त्वा०॥ तेयांति०॥६२॥ महेशचिंतनंश्रौतंत्यक्त्वा०॥ तेयांति०॥६३॥ महेशस्मरणं
श्रौतंत्यक्त्वा०॥ तेया० महेशकीर्त्तनंश्रौतंत्यक्त्वा०॥ तेयांति०॥६५॥ शिवाग्रेनर्त्तनंश्रौतंत्यक्त्वा०॥ तेयांति॥६६॥ शिवाभिनंदनंश्रौ
तंत्य०॥ तेयांति०॥६७॥ महेशवीक्षणंश्रौतंत्यक्त्वा०॥ तेयांति०॥६७॥ शिवाभिमर्शनंश्रौतंत्यक्त्वा०॥ तेयांतिनरकंघोरंसमित्राः पि
तृभिः सह॥६८॥ इत्यादयः शैवधर्माबहवः संतिभूपते॥ नाल्लंघनीयास्तेधर्माब्राह्मणाद्यैः कदाचन॥६९॥ शैवधर्मपरित्या
गंयः कर्त्तुंयततेद्विजः॥ सहंतव्यः प्रयत्नेनसत्वरंधर्मविन्नृपैः॥७०॥ शैवधर्माः श्रुतिप्रोक्ताः श्रुतयश्चशिवोदिताः॥ शिवो

क्तः धर्मत्यागेन यातना भवति ध्रुवं ॥ ७१ ॥ वेदाः शिवाज्ञावाक्यानि तानि वाक्यानि साधुभिः ॥ माननीयानि यत्नेन यावज्जीव
मतंद्रितैः ॥ ७२ ॥ शिवाज्ञावाक्यमुल्लंघ्य यः प्रवर्तितुमिच्छति ॥ स याति नरकं घोरं सवंशो नात्र संशयः ॥ ७३ ॥ शिवाज्ञा
वाक्यमुल्लंघ्य० ॥ तस्मिन्दयां विधायांते यात्येव नरकं ध्रुवं ॥ ७५ ॥ शिवाज्ञा० ॥ तस्य दृष्ट्वा मुखं सद्यः कर्तव्यं रविवीक्षणं ॥ ७६ ॥ शिवाज्ञावा०
॥ तस्य कृत्वा शिरश्छेदमश्वमेधफलं लभेत् ॥ ७७ ॥ शिवाज्ञावाक्यमनिशं यः पालयति सादरं ॥ स पूजनीयो यत्नेन सादरं भक्तिपूर्वकं ॥
७८ ॥ भस्मोद्धूलनपूतांगो योन्वहं शिवपूजकः ॥ स पूजनी० ॥ ७९ ॥ यः केवलत्रिपुंड्रांकः सततं शिवपूजकः ॥ स पूजनीयो० ॥ ८० ॥ स
रुद्राक्षधारणरतो योन्वहं शिवपूजकः ॥ ८१ ॥ शिवलिंगार्चनपरो यो० ॥ स पूजनीय० ॥ ८२ ॥ पंचाक्षरजपासक्तो यो० ॥ स पूजनी० ॥ ८३ ॥
रुद्राध्यायजपासक्तो यो० ॥ स पूजनी० ॥ ८४ ॥ शिवप्रदक्षिणासक्तो यो० ॥ स पूजनी० ॥ ८५ ॥ शिवप्रणामसंसक्तो यो० ॥ स पूजनीय० ॥ ८६ ॥
शिवाग्रेनर्तनासक्तो यो० ॥ स पूजनी० ॥ ८७ ॥ शिवस्तुतिश्रुतिपरो यो० ॥ स पूज० ॥ ८८ ॥ श्रीमहेशकथासक्तो यो० ॥ स पूजनी० ॥ ८९ ॥ शि
वकीर्तनसंसक्तो यो० ॥ स पूज० ॥ ९० ॥ प्रदोषपूजासंसक्तो यो० ॥ स पूज० ॥ ९१ ॥ शिवप्रेक्षणसंसक्तो यो० ॥ स पूज० ॥ ९२ ॥ शिवस्प
र्शनसंसक्तो यो० ॥ स पूज० ॥ ९३ ॥ बिल्वपत्रार्जनपरो यो० ॥ स पूज० ॥ ९४ ॥ बिल्वपोषणसंसक्तो यो० ॥ स पूज० ॥ ९५ ॥ विभूतिसं
ग्रहासक्तो यो० ॥ स पूजनीयो यत्नेन सादरं भक्तिपूर्वकं ॥ ९६ ॥ पुरा कश्चिदभूद्राजा शैवधर्मरतः सदा ॥ स भूपः पूजयामास शै
वधर्मरतान्द्विजान् ॥ ९७ ॥ भस्मोद्धूलनसंसक्ताः पूजितास्तेन कोटिशः ॥ शुद्धत्रिपुंड्रनिटिलाः पूजितास्तेन कोटिशः ॥ ९८ ॥ रु
द्राक्षधारणासक्ताः पूजितास्तेन कोटिशः ॥ शिवलिंगार्चनासक्ताः पू० ॥ ९९ ॥ पंचाक्षरजपासक्ताः पू० ॥ रुद्राध्यायजपासक्ताः
पू० ॥ १०० ॥ शिवप्रणामसंसक्ताः पू० ॥ शिवसंस्मरणासक्ताः पू० ॥ १ ॥ श्रीमहेशकथासक्ताः पू० ॥ शिवाग्रेनर्तनासक्ताः पू० ॥ २ ॥
बिल्वपत्रार्जनासक्ताः पू० ॥ विभूतिसंग्रहासक्ताः पू० ॥ ३ ॥ स भूपः कारयामास शिवस्थानानि कोटिशः ॥ स भूपः स्थापयामास शिव
लिं० ॥ ४ ॥ स भूपः पूजयामास शि० ॥ स धूपैर्धूपयामास शि० ॥ ५ ॥ स दीपैर्दीपयामास शिवलिंगानि कोटिशः ॥ अन्नं निवेदयामास शि
वलिंगेषु कोटिशः ॥ ६ ॥ एकैकस्मिन् शिवस्थाने दीपपात्रकुलालयाः ॥ दीपस्तंभाः सुवर्णस्य स्थापितास्तेन कोटिशः ॥ ७ ॥ शिव

स्थानान्यनंतानिसौवर्णानिसभूपतिः॥भूषयामासयत्नेनरत्नप्रासादकोटिभिः॥ ८॥कोटिशःकारयामासबिल्ववृक्षवनानिसः॥
बिल्वपत्रैःसलिंगानिपूजयामासकोटिशः॥९॥तेनरत्नानिदत्तानिशैवेभ्यःकोटिशोमुदा॥तेनसंतोषिताःशैवाःकोटिशःकांचना
दिभिः॥१०॥अशैवानिहतास्तेनकोटिशःशस्त्रपाणिना॥अशैवाःपातितास्तेनकोटिशोयममंदिरे॥प्रत्यहंलिंगदानानिसचकार
सहस्रशः॥११॥प्रतियामेप्रयत्नेनसचकारशिवार्चनं॥चकारयाममध्येपिसभूपःशिवपूजनं॥१२॥ससर्वदाशिवकथांशृश्रावशि
वचिंतकः॥सर्वप्रदोषकालेषुसचकारशिवार्चनं॥१३॥नित्यंनक्तव्रतंतेनकृतंविधिपुरःसरं॥सशंकरंसमभ्यर्च्यप्रदोषेसर्वसा
धनैः॥१४॥ततोभुंक्तेन्वहंभक्त्यास्मरन्नेवमहेश्वरं॥वृथाननीतंभूपेनक्षणार्धमपिभूपते॥१५॥सर्वदासंस्मरन्नेवसंस्थितास्त्रिपु
रांतकं॥सशंकरप्रसादेनकामगंयानमापच॥१६॥तेनयानेनसनृपोनित्यंकाशींप्रयातिच॥तत्रविश्वेश्वरंसम्यक्पूजयित्वा
विधानतः॥१७॥कृत्वांतर्गृहयात्रादिपुनरायातिभूपते॥सकदाचिद्रत्नभारैःस्वर्णभारैश्चभूपतिः॥१८॥श्रीमद्विश्वेश्वरंलिं
गंपूजयामाससादरं॥श्रीमद्विश्वेश्वरंलिंगंक्षीराद्यैरमितैर्नृप॥१९॥अभिषिच्यनवैर्बिल्वैःपूजयामासकोटिशः॥सोपाना
निसरत्नाद्यैर्ज्ञानवाप्याःप्रयत्नतः॥२०॥कारयामाससभूपालोरत्नकोशेश्वराह्वयः॥मोक्षलक्ष्मीविलासाख्येमंडपेरत्नरा
जितः॥२१॥प्रासादःकारितस्तेनसत्यलोकादिलोकगः॥निर्वाणमंडपस्तेनरत्नैरेवप्रयत्नतः॥कारितोमणिसंरुद्धस्तंभेश्वा
त्युन्नतैर्नृप॥सकदाचिन्नयोदश्यांप्रदोषेपार्वतीपतिं॥२३॥बिल्वाद्यैःपूजयन्भक्त्यासंस्थितःशिवचिंतकः॥तदानींतस्यरि
पवोरंध्रान्वेषणतत्पराः॥२४॥नगरंतस्यभीमाख्यंवेष्टयामासुरुद्धताः॥रुरुधुर्नपरद्वारंमत्तमातंगकोटयः॥२५॥नाना
शस्त्रसमाक्रांतभटकोटिसमन्विताः॥तैस्त्यक्तान्यग्निशस्त्राणिकोटिशोनगरांतरे॥२६॥तैरन्यान्यपिशस्त्राणित्यक्तानिन
गरांतरे॥तदधिकारिपुरुषायुद्धशास्त्रविशारदाः॥२६॥राज्ञेनिवेशयामासुमहद्वैरिकृतंभयं॥श्रुत्वापितद्वचोराजाकुर्वन्शं
करपूजनं॥२७॥उत्तरंनरदौतेभ्योमौनमाश्रित्यसंस्थितः॥विधायपूजांविधिवद्यथापूर्वंसभूपतिः॥२८॥निवेद्यपूजामीशा
यनिर्ययौशिवमंदिरात्॥ससंस्थितानिशस्त्राणिनगरोपरिजालवत्॥२९॥ज्वलज्ज्वालासमाकीर्णान्यालोक्याभूच्चवि

स्थिताः॥ तदानृपंसमालोक्यभूरानगरपालकाः॥ ३०॥ प्रणम्यवक्तुमुद्युक्ताः क्रूरवैरिकृतोद्यमं॥ ॥ नगरपालकाऊचुः॥ मदधारासमाक्रांतमत्त उ॰ स॰ पू
मात्तंगकोटियः॥ प्रतिद्वारंसमाश्रित्यतिष्ठंत्यगणितानृप॥ ३१॥ सारंगाइवतिष्ठंतितुरंगाश्चपुरांगणे॥ द्रष्टुंनशक्यतेराजन्तत्तुरंगांगसंगमः॥
॥ ३२॥ व्यूथयंतितुरंगास्तेशचीपतितुरंगमं॥ तद्यूथितोगतःप्रायःस्वर्गमिंद्रतुरंगमः॥ ३३॥ सेनात्रिपुरसेनेवपुरमावृत्यतिष्ठति॥ ससेनेवहिसासे
नासेनांनपरिविंदति॥ ३४॥ नगरद्वारमारभ्यसासेनाशतयोजनं॥ तिष्ठत्यत्यंतसंमर्दरथवाजिसमाकुला॥ ३५॥ चित्ररूपधरासेनाचित्रयुद्धवि
शारदा॥ तिरस्करोतिसासेनाराजन्चित्ररथानपि॥ ३६॥ ॥ दधीचिरुवाच॥ ॥ इतितद्वचनंश्रुत्वाधीरोदांतःसभूपतिः॥ चारलक्षणसंपन्नान्दूता
नाहविचक्षणः॥ ३७॥ ॥ रत्नकोशेश्वरउवाच॥ ॥ चरंतुचतुराश्चारावैरिसेनांतरेद्रुतं॥ विचार्यवैरिचिन्हानिसमायांतुसहस्रशः॥ ३८॥ किंतेविभू
तिभूषांगाःकिंतेशंकरपूजकाः॥ किंतेशैवरुद्राक्षवलयाःकिंतेशिवपरायणाः॥ ३९॥ इदंविचार्यसकलंसमायात्वद्यसत्वरं॥ सावधानेनचिन्हानिते
षांपश्यंतुसादरं॥ ४०॥ शैवधर्मरतास्तेचेद्वैरिणोप्यतियत्नतः॥ पूजाएवममांत्यंतंनान्यथाममभाषणं॥ ४१॥ अशैवास्तेयदितदातानशैवान्ब
हूनपि॥ हनिष्याम्येकएवाहमेकेनैवासिनाधुना॥ ४२॥ अशैवाःसंतियावंतस्तेमेसहजशत्रवः॥ शैवावसंतियावंतस्तेमेसहजबांधवाः॥ शैवा बांधवाः
॥ ४३॥ ॥ दधीचिरुवाच॥ ॥ इतितद्वचनंश्रुत्वाययुश्चाराःसहस्रशः॥ नृपोन्यान्प्रेषयामासपुरस्थार्थमादरात्॥ ४४॥ ततःपुनःसभूपालप्र पालप्र
विश्यशिवमंदिरं॥ पूष्पाद्यैःपूजयामासत्रिपुरारिमुदारधीः॥ ४५॥ कर्पूरराशीदीपाद्यैःसराजाशिवमंदिरं॥ दीपयामासधूपैश्चधूप
यामासगुग्गुलैः॥ ४६॥ ततःसशिवनैवेद्यंभुक्त्वाभूयोमहेश्वरं॥ संपूज्यशंकरद्वारिसंविष्टःशंकरंस्मरन्॥ ततःसमागताश्चारास्त
दानीमेवसत्वरं॥ विचार्यवैरिचिन्हानिसर्वाण्यपियथायथं॥ ४८॥ ततस्तंरत्नकोशेशंशिवसंविष्टचेतसं॥ प्रणम्योचुःप्रयत्नेनकृ श्रीशिव
तांजलिपुटाभटाः॥ ४९॥ ॥ चाराऊचुः॥ ॥ अशैवाएवतेराजन्शैवचिन्हाविवर्जिताः॥ एकोपिनास्तितत्सैन्येशैवचिन्हांकितःशुचिः ५०
॥ ५०॥ ॥ दधीचिरुवाच॥ ॥ इतितद्वचनंश्रुत्वासभीमनगराधिपः॥ ददौवस्त्राणिचारेभ्योविचित्राण्यतिहृष्टधीः॥ ५१॥ तदागरुड
शस्त्राणिसंख्याहीनानिभूपतिः॥ ददर्शवन्हिकल्पानिवैरिसंप्रेषितानिसः॥ ५२॥ ततोनारायणास्त्राणिब्रह्मास्त्राणिचकोटिशः॥ तदा
न्यान्यपिशस्त्राणिशास्त्रपाणिददर्शसः॥ ५३॥ शस्त्राणितानिदृष्ट्वैवसर्वेनगरवासिनः॥ अबालवृद्धंसंक्षुब्धाक्षणमात्रेभयाकुलाः॥

।।५४।। कल्पावसानःकिमयंयद्वासर्वक्षयोधुना।। किमेतन्नैवजानीमइतितेचुक्रुशुर्जनाः।।५५।। ततः परंसभूपालोमंदहासपुरःसरं।। रौद्र
त मस्त्रंलीलयैवप्रेषयामासभूपतिः।।५६।। दस्त्रमरिशस्त्राणिभस्मीकृत्यारिमंडलं।। भस्मीकृत्यक्षणार्द्धेनपुनः संप्रापभूपतिः।। ५७।। तत
स्तदस्त्रंसंहृत्यसभूपालःपुनःशिवं।। संपूज्यविविधैःपुष्पैश्चकारशयनंमुदा।। ५८।। ततःप्रातस्समुत्थायसभूपालःशिवार्चकः।। शि
वंसपूज्यविधिवन्नगरान्निर्ययौबहिः।।५९।। सदृदर्शचतुर्द्दिक्षुपरितःशतयोजनं।। सास्थिसंदिग्धसर्वांगवैरिभस्मचयान्नृपः।।६०।।
ततःसवारुणास्त्रोत्थजलेनाप्लाव्यभूतलं।। दूरीचकारतद्भस्मवैरिदाहसमुद्भवं।। ६१।। पुष्पवृष्टिरभूद्दिव्यातदासुरविनिर्मिता।। देवदुंदु
भयोनेदुर्ननृतुश्चाप्सरोगणाः।। ६२।। ततः संतुष्टहृदयः सभूपः पुष्पसंकुलं।। विवेशभीमनगरंपुष्पमिंदुरिवद्भुतं।। ६३।। सामर्थ्य
मीदृशंप्राप्तंतेनशंकरपूजया।।शिवाराधनसक्तानामशक्यंनास्त्यतोनृप।। स्वर्गापवर्गदातारंहरमेवहिसादरं।। स्वर्गापवर्गाविच्छे
तःपूजयंतिस्तुवंतिच।।६५।। यस्याजन्ममहद्भाग्यबलंचातुलमीप्सितं।। मोक्षश्चापेक्षितस्यांतेतेनकार्यंशिवार्चनं।। ६६।।
य सदुर्भगइतिज्ञेयोयोनार्चयतिशंकरं।। सपातकीतिविज्ञेयोनारकीत्यपिभूपते।। ६७।। महेशाराधनप्रीतिर्धन्यानामेवजायते।। ना
न्येषामन्यचित्तानामधन्यानांदुरात्मनां।भस्मभूषितसर्वांगानिःसंगाएवकेवलं।। भजंतिगिरिजार्धांगंदग्धानंगमसंगमं।।
।।६९।। ।।सदाशिवउवाच।। ।।इतितद्वचनंश्रुत्वासभूपालोमुनीश्वरं।। तद्दग्धसेनासंख्यामेवदज्ञातत्वाविशेषतः।।७०।।
रौद्रमस्त्रंकुतःप्रापसभूपालामुनीश्वरः।। इदंसर्वमशेषेणवदेत्याहसशोभने।।७१।। ।।दधीचिरुवाच।। ।।अक्षौहिणीना
मभवच्छतलक्षभटानृप।।मजस्तावंतएवासन् तुरंगाश्वबलोन्नताः।।७२।। ।।उष्ट्रास्तद्द्विगुणंराजन् बलिवर्दाश्चतुर्दिशः।।त
तोदशगुणराजनवामीनांचाभवध्रुवं।।७३।। एतावत्सैन्यमेतेनभूपेनैकाकिनानृप।। दग्धमेकेनशस्त्रेणरौद्रेणामिततेजसा।।
।।७४।। पुरासभूपतिःस्वच्छंरत्नमंडपमुत्तमं।। कारयामासभूपालोदेवदेवायशंभवे।। ७५।। तत्रसंस्थापयामासशिवलिंगमनुत्त
मं।।ततःप्रादुरभूच्छंभुःपूजितस्तेनभूपते।।७६।। ततस्तुष्टावभूपालोमहादेवंसुरोत्तमं।।स्तुतःप्रसन्नोगौरीशःतस्मैशस्त्रंददौ
परं।।७७।। तदैवशंकरःप्राहकवचंचनृपोत्तम।। सतेनकवचेनापीसवृतोभून्नराधिपः।।७८।। ।।सदाशिवउवाच।। ।।

श्रीशिवर०७ इतितद्वचनंश्रुत्वासभूपालोपिविस्मितः॥ कवचंदेवदेवस्यवदेत्याहमुनिंशिवे॥७९॥ दधीचिस्तद्वचःश्रुत्वातदासंतुष्टमानसः॥ मदीयं उ-स-भू:
५१ कवचंवक्तुंसद्यस्त्वसमारभे॥८०॥ ॥दधीचिरुवाच॥ ॥ कवचंदेवदेवस्यवक्ष्येश्रृणुनराधिप॥ येनावृतोमहादुःखैर्मुक्तोमुक्तिंच
विंदति॥८१॥ ध्येयःश्रीमहान्महादेवःसांबःसंसारमोचकः॥ पवित्रहृदयैःशुद्धैःभस्मरुद्राक्षभूषणैः॥८२॥ श्रीविश्वेश्वरमुमासहा
यमनघंविश्वात्मकंचित्घनं॥ सत्यंज्ञानमनंतमक्षरमजंनिर्लिप्तमेकंप्रभुं॥ ओंकारात्मकमक्षरंपरतरंब्रह्मादिभिर्भावितं॥८३॥ सा
नंदंहृदिभावयेद्भवभयध्वांतेदुमानंददं॥१॥ एवंध्यात्वामहादेवंसच्चिदानंदलक्षणं॥ कवचेनावृतोभूत्वामृत्युपाशंविमुच्यते॥२॥ यद्ब्रह्म
रंध्रंममसंविदाभंतद्ब्रह्मरंध्रेभगवानुमेशः॥ पायात्ससंस्छनमनंतलक्षणंनिवार्यसर्वाघकुलंनिरंतरं॥३॥ तत्सार्धमव्यान्निरामांत
चारीरुद्रःशिखांपातुशिखावतंसः॥ शिरोखिलंपातुममेंदुचूडोभालंममाव्याज्ज्वलनोरुभालः॥४॥ वामंकपोलंममपातुशंभुःकपा
लमीशोवतुदक्षिणंमे॥ पायाद्गिरीशोममवामनेत्रंत्रिलोचनोदक्षिणमक्षिपायात्॥५॥ भ्रूयुग्ममव्याद्वृषभध्वजोमेभ्रूमध्यमव्यान्म
खनाशदक्षः॥ नासापुटंपातुममांतकांतकोनासांतरंपातुपिनाकपाणिः॥६॥ मुखंममाव्याद्भुविपंचवक्त्रःपायान्ममौष्ठौशुचकृत्तिवा
साः॥ दंतान्ममाव्यात्त्रिपुरिंदुदंतोजिव्हांममाव्यान्निगमांतजिव्हः॥७॥ श्रीनीलकंठोवतुकंठदेशंपायान्महेशोममकंठपार्श्वे॥ स्कं श्रीसांब
धौममाव्यान्मदनांतकारीवक्षस्स्थलंपातुममांबिकेशः॥८॥ विश्वंभरोव्यादुदरंममेदंसर्वेश्वरोरक्षतुरोमकूपान्॥ आत्माणिपाया
दुरुशक्तिरव्यादस्थीनिविश्वास्थितिनाशहेतुः॥९॥ त्रियंबकोदक्षिणबाहुमव्याद्वामंममाव्याद्भुजगावनद्धः॥ प्रकोष्ठमव्याद्गिरीराज ५१
चापोहस्तौममाव्याद्धरशूलहस्तः॥१०॥ विशाखनाथोवतुहस्तशाखान्नखान्ममाव्यान्नरसिंहहारी॥ पृष्ठंममाव्यात्त्रिपुरारिर
व्यात्कटिद्वयंमेगिरिजासहायः॥११॥ कऽटयंतरालंममपातुशंभुरूरुद्वयंमेमृगशावपाणिः॥ जानुद्वयंपातुजनार्दनेशोगुल्फ
द्वयंपातुविराट्स्वरूपः॥१२॥ पादौममाव्यादमरैकवेद्यःपायाद्धरःपादतलद्वयंमे॥ पादांगुलीन्पातुसमस्तरूपोसर्वांतनुंपातु
महेश्वरोमे॥१३॥ प्राच्यांसदारक्षतुनीलरुद्रःकर्पूरगौरोवतुदक्षिणायां॥ पातुप्रतीच्यांभगनेत्रहारीपायादुदीच्यांजगदेकना
थः॥१४॥ ममोर्ध्वमव्यादुडुराजकांतिरधोममाव्यादुरगेंद्रभूषः॥ दिगंतरालेषुसमस्तनाथोपायाद्भवाधीश्वरकेतुलक्ष्यः॥१५॥

नदीषु मां रक्षतु विश्वमूर्त्तिः ॥ पायात्समुद्रेषु जलाधिराजः सरित्समुद्रादि विधानदक्षः ॥ १६ ॥ वाड्वासु पायादिति वाह्यवती दवान
लात्पातु दवानलाभः ॥ सिंहारिभीतेरवतु प्रभेशः पायाद ठव्यां परशत्रुहारी ॥ १७ ॥ शैलेषु मां रक्षतु शैलवासी पायाद्विलासी गिरि
गह्वरेषु ॥ गर्त्तेषु पायात्सुरवर्गहारी पायात्त्रिमूर्त्तिर्विषवृश्चिकेषु ॥ वृक्षेषु पायाद्विषवृक्षहारी ॥ १८ ॥ गजेषु पायाद्गजदर्पहारी पाया
द्विषादिष्वपि वीरभद्रः ॥ सर्वेषु पायाद्विषसर्पहारी पायात्त्रिमूर्त्तिर्विषवृश्चिकेषु ॥ १९ ॥ भूताधिपः पातु विरोधिभीतेः पायात्सिराचा
दिषु भूतनाथः ॥ मृत्युंजयो रक्षतु मृत्युभीतेः कालाग्निरुद्रोवतु कालभीते ॥ २० ॥ पापारिरव्याद्दुहृत्पातकेभ्यः पायाद्द्रुहेभ्यः कमलासनार्चेः
॥ श्रीविष्णुनेत्रार्चितपादपद्मः पातु प्रभाते ष्वखिलेषु शंभुः ॥ २१ ॥ मध्यंदिने पातु मृडो निशं मां सायान्हि पाया दमराधिनाथः ॥ महेश्वरो र
क्षतु मध्यरात्रे पायादुषस्यंधकनाशहेतुः ॥ २२ ॥ सर्वेषु कालेष्वपि पातु शंभुरुमांगसंश्लिष्टमनोज्ञदेहः ॥ मार्गे मृगव्याधवपुर्धरोव्यादद्रे
षु पायादसुरौघदारी ॥ २३ ॥ सर्वत्र सर्वार्त्तिहरो हरोव्यात्सर्वेप्सितार्थप्रदरूपधारी ॥ रक्षाविहीनस्थलमस्ति यन्मे तत्रावतु ब्रह्मजनार्दनेशः
॥ २४ ॥ कृत्वैवं कवचं पूर्वं स्तोत्रमेतत्पठेन्नरः ॥ स्तोत्रं चैतन्महेशेन तस्मै प्रख्यातमादरात् ॥ २५ ॥ हरहरामरवरपुरारे सृष्टसुरासुर पापा
रे ॥ यमारे भूतभयंकर भवभयहर शंकर संसारे ॥ २६ ॥ सर्गस्थितिकारण पुराण विषमेक्षण पिनाकपाणे त्रिशूलपाणे ॥ चंद्ररेखाभ
रणकारण कारणविगतकारण मृगपाणे ॥ २७ ॥ मणिगणमंडितफणागणभणत्फणिपत्तिभूषण ॥ निर्जितकाम संपूर्णकाम विविधानंत
कल्याणगुण ॥ २८ ॥ गौरीमनोभिराम योगिमनोभिराम विविधनिर्मितसाम ॥ विविधश्रुत्यभिहित परमाद्भुतधाम ॥ २९ ॥ स्मरशासन सु
मेरुरुचिशिखरशिखरिवरकृतसमलंकृतशरासन ॥ संहृतकमलासन संदग्धासुरवरत्रिपुरासुरकानन ॥ ३० ॥ हिमगिरिनिभवृषभा
धिपकेतन गुरुतरकरुणानिधान ॥ धिक्कृतवामन निर्मितपवनन वकृत्तिवसन ॥ ३१ ॥ पंचविध पंचानन निजभक्तहृदयायन ॥ महार
जतविराजितविविधरत्नवरसिंहासन ॥ ३२ ॥ शार्दूलचर्मवसन समधिष्ठितमहाश्मशान ॥ भक्तभयभवभंजन सोमसूर्याग्निनयन का
लकूटविषादन ॥ ३३ ॥ जयजय महेशाकेशवेश जयजय त्र्यंबिकेश ॥ जयजय विश्वेश जयजय गौरीश जयजय प्रहृतगजाधीश ॥ ३४ ॥ ज्वलज्ज्वा
लितमहाज्वलनसंहर संहर संसारममरवर ॥ नाशय नाशय पातकमुन्मूलयोन्मुलय दुष्टवासनां ॥ विपोथय विपोथय भूतभयमाल्हादय ॥ देहि

श्रीशिव र०७ ५२ देहिमुक्तिमुमावदनारविंदचंद्रचूड।। इंद्रचंद्रोपेंद्रादिसकलसुररत्नकिरीटप्रभारूषितदिव्यरत्नखचितविविधमणिपादुक।।लक्ष्मीपतिन उ-स-पू-
यनारविंदपूजितपादपद्ममुनिवरहृत्पद्मसद्म।। भुक्तिमुक्तिफलप्रदलितामरवैरिनिकरकरराजितमृगशाव।।शावचंद्रावतंससमधिष्ठि
तकाशीनगरवरप्रद।।वरयोगिचित्तचिंतितचिंतितजनमंदार।। मंदारकुसुमकरवेदारुवृंदारकबरपूजितजितमन्मथ।।नदनदीकुलाचलर
सातलतलातलसुतलवितलादिनानाभुवननायक।।नानानायकरत्ननूपुरविलसत्पादपंकज।।जगदेकनायकजयजयमहादेवदेवतासार्वभौ
मभक्तार्तिभंजन।। करुणाकरशंकरामरेशमहेशशंभोपरेशभवभर्गपिनाकपाणे।।संसारसागरमसारमघोरमासंमामुध्दरत्रिपुरसूदनमन्म
थारे।।गौरीपतेपुरहरामितपुण्यमूर्तेमुक्तिप्रदायकयमांतकविश्वमूर्ते।। संसारसागरमसारमघोरमासंमामुध्दरत्रिपुरसूदनमन्मथारे।।वि
श्वाधिकाव्ययविशुध्दगुणस्वभावनिर्द्वंद्वनित्यनिरुपाधिकनिर्विकार।। संसारसागरम०।। सोमाग्निनेत्रहरिनेत्रसमर्चितोब्जसेंद्रमुख्य
सुरवंदितपादपद्म।। संसारसागरम०।।निर्लिप्तपालितसुरासुरवर्गसर्गसृष्टिस्थितिप्रलयकारणसर्वरूप।। संसारसागरम०।।शा
र्दूलचर्मपरिवीतसुरासुरेशकर्पूरगौरकरुणाकरचंद्रमौले।।संसारसागरम०।। बिल्वार्चनप्रियविभूतिविभूषितांगनिःसंगनिर्गुणनि
रंजननिर्विकार।।संसारसागरम०।।योगींद्रमानससरोरुहसंनिविष्टश्रेष्ठेष्टदायकविशिष्टजनेष्टभूलिन्।। संसारसागरम०।।शांतांतकांत
कमुमुक्षुजनाभिसेव्यशैलाधिराजतनयायुतवामभाग।।संसारसागरम०।। कल्याणरूपकनकाचलचारुचापविज्ञानरूपदुरवापविह श्रीसांब
स्तपाप।।संसारसागर०।। वेदांतवेद्यविभवाव्ययभुत्थवृत्तेवृत्तिप्रदाभयदरक्षकृपासमुद्र।।संसारसागरमसारमघोरमासंमामुध्दरत्रि ५२
पुरसुदनमन्मथारे।। ।। महादेवउवाच।। ।।एवंस्तुत्वाममादौचकृत्वातुकवचंनृप।।सर्वपापविनिर्मुक्तोमामुपैष्यस्यसंशयं।।८४।।अनेनक
वचेनैवसंवृत्तोयत्रयोवसेत।।सर्वपापविनिर्मुक्तस्तत्रसौख्यंलभेन्नरः।।८५।।दधीचिरुवाच।। ।।एवमुक्त्वामहादेवारत्नकोशंप्रतिप्रभुः।।
तत्रैवलिंगेकाश्मीरेक्षणादंतर्दधेनृप।।८६।।श्रीरुद्रकवचाक्रांतश्रीमहारुद्रपूजकः।। सर्वपापविनिर्मुक्तः शिवलोकंगमिष्यति।।८७।।श्री
रुद्रकवचंजप्त्वाकृत्वाश्रीरुद्रपूजनं।।जप्त्वापंचाक्षरंशैवंनिष्पापोजायतेनरः।।८८।। इदंतुकवचंपूर्वमंबायैशंकरोदितं।।षण्मुखायातिभ
क्तायदेव्यापिसमुदीरितं।।८९।।ततःपरंषण्मुखेनमह्यमुक्तंनराधिप।।इदंतुपरमप्रेम्णामयातुभ्यमुदीरितं।।९०।। यदाप्रभृत्यनेनाहेकवचे
नावृतोनृप।।तदाप्रभृतिदुःखानिनदृश्यंतेमयाध्रुवं।।९१।। ।।मुरस्यनिधनंकर्तुंपुराविष्णुःसमुद्यतः।।जयप्रदंकिमस्तीतिमामुवाच

कृतांजलिः॥९२॥ ततस्तस्मैमयैवोक्तमिदंकवचमुत्तमं॥अनेनकवचेनैवसंवृतःसययौहरिः॥९३॥ ततस्तेनजयःप्राप्तःकवचस्यप्रभाव
तः॥अघोरवज्रकवचमिदंशैवमनुत्तमं॥९४॥अनेनकवचेनैवकवचीसमभूद्धरिः॥एतत्कवचसंबंधाद्धरिर्नावापवेदनां॥९५॥त
तःपरंमुरंहत्वाहरिःप्रापहिमालयं॥तदाकण्वःसमागत्यहरिंप्राहकृतांजलिः॥९६॥ ॥कण्वउवाच॥ ॥संसारतापसंतप्तंममचित्तमभू
द्धरे॥कथंसंसारसंतापविच्छित्तिःस्याद्वदस्वमे॥९७॥ ॥विष्णुरुवाच॥ ॥संसारसागरेघोरेनिमग्नानासुवर्त्मिनां॥अपारकरुणासिंधुःसां
बएवावलंबनं॥९८॥ शिवमेवभजस्वसावधानेसंतुसंसारहरःपुरापुरारिं॥ बहवःसमुपास्यमुक्तिमापुस्त्रिपुरारिर्निजभक्तमुक्ति
हेतुः॥९९॥नवबिल्वदलैरघांतकंजयकामांतकमत्तकांतकं॥विपदंतकमेधकांतकंशिवलिंगात्मकमाशुसंततं॥१००॥ बहुपापवि
मोचकंप्रभुंयदिकालांतकमर्चयिष्यति॥सततंनित्यंततदाभवान् विषयंसारवशंनयास्यसि॥१०१॥भजभर्गमनर्गलंप्रभुंभ
गवंतंभगनेत्रहारिणं॥भवभीममयंतदामुनेनभवंतंप्रतिभावयिष्यति॥ २॥भसिताभरणंभजप्रभुंभवभीतिनभविष्यतिलयि
॥शुभदस्त्वयिशंभुरव्ययोनियतंतिष्ठतितंसमर्चय॥३॥नवबिल्वपलाशकाशपुष्पैःकरवीरैःकनकायप्रसूनैः॥भसितेनच
भालल्लोचनंशिवलिंगेसततंसमर्चय॥४॥सकृदप्यमलैःसबिल्वपल्लवैःकुशधत्तूरपलाशकाशपुष्पैः॥सजलैरभिपूज्य
पार्वतीशंसकलापज्जलधिंतरंतिधीराः॥५॥हृदितिष्ठतिशैलजापतौशिवलिंगेचनिरंतरंशिवे॥नयजंतिशिवंनराधमान
रकावासरसानिरंतरं॥६॥विदधातिपरंपदंशिवःकुशपत्रैरपिसाधुपूजितः॥तमपास्यमहेश्वरंभ्रमात्सुरमन्यंसमुपा
सतेजनाः॥७॥भगवंतमुमापतिंभवंभजनीयंनभजंतियेजनाः॥नरकेषुपतंतितेजनाःसततंसत्यमुदीर्यतेमया॥८॥
दिवियेनिवसंतिभूतलेपिग्रसिताःसंसृतिघोरदंदशूकैः॥द्विजतेशिवपूजनौषधंसमवाप्यामृततिंप्रयांतिसत्यं॥९॥सकृ
दप्यतिभक्तिपूर्वकंशिवमेकंप्रणमंतियेजनाः॥अमरैरखिलैश्चतेनताःसततंसत्यमिदंध्रुवंध्रुवं॥१०॥कृतसर्वमखोपि
जन्मधत्तेकृतविश्वेशपदांबुजप्रणामः॥नपुनर्जननीभगंददामिसत्यंभुजमुद्धृत्यनसंशयंकुरुष्व॥११॥अकृतेशपदांबुजप्रण
मानरकावासमवाप्यदुःखभोगं॥समवाप्यमुहुर्मुहुर्निवृत्तानभवंतिप्रलयेपिसत्यमेव॥१२॥विविधामितपातकाश्रयानन
मंतित्रिपुरारिमादरेण॥अतएवयमालयांतरेनिबसंत्यन्वहमाप्तदुःखभोगाः॥१३॥प्रणमंत्यमरास्त्रिलोचनंमुनयःसिद्ध

४५ श्रुतिबोधितभस्मधारणंविहितंयच्छिवलिंगपूजनं॥ तदिदंद्वयमास्तिकैर्द्विजैर्नपरित्याज्यमितिश्रुतिःस्वयं॥२०॥

श्रीशिवर०७ गणाश्चसंततं॥ निगमाश्चनमंतितंततःप्रणमस्वप्रणमाम्यहंतमीशं॥१४॥ सकलामरवंद्यपादपद्मंवृतपद्मंत्रिदशैकभागधेयं॥ उ-स-पू
५३ भजसंततमद्रिजासहायंनिरपायंनिरवद्यमुक्त्युपायं॥१५॥ यजकोमलबिल्वपल्लवैरनुवारंभुजगाधिपैकहारं॥ सकलाघहरं
निरस्तवीरंहरमाराध्यतरंपरंसदारं॥१६॥ भजतामभयप्रदंमहेशंभजमृत्युंजयमादरेणनित्यं॥ तमपास्यनसंवसद्विजत्वंहि
तमेतत्सत्यमुदीरितंमयाते॥१७॥ द्विजतेशिवएवदैवतंनशिवान्यस्तवदैवतंसुरेषु॥ अतएवनिरंतरंमहेशंभजफालस्फुर
दुज्वलत्रिपुंड्रः॥१८॥ द्विजदैवतदैवतंमहेशंयदिनाराधयसिप्रकाममीड्यं॥ द्विजतैवतदानसंगतातवसत्यंप्रवदामिनान्यथा॥१९॥४
द्विजकेवलभस्मधारणंसततंकेवललिंगपूजनं॥ श्रुतिबोधितमित्यवैहितस्मात्तदुपास्यंद्वयमप्यनन्यभाजा॥२१॥ शिवमेवयजस्व
सार्वकालंशिवभिन्नंनयजस्वमोहतोपि॥ शिवभिन्नसमर्चनंवृथैवेत्यनुवारंकुरुनिश्चयंद्विजत्वं॥२२॥ शिवशंकरचंद्रशेखरेत्यतिभ
क्त्यावदसंततंमुदाच॥ शिवनामजपंविहायनान्यज्जपमोहादपिनामसर्वथैव॥२३॥ शिवनामसुधैवविप्रपेयासततंमुक्तिमभी
प्सताद्विजेन॥ शिवनामसुधापरातुजिह्वाद्विजनानाविधभूरिपुण्यलभ्या॥२४॥ शिवनामसुधारतैवजिह्वामहतामेवभवस्यतो
नुवारं॥ शिवशंकरचंद्रशेखरत्रिपुरारेतिजपस्वसावधानं॥२५॥ शिवनामसुधामुहुर्मुहुःपिबसानंदमनंतरायमाशु॥ शिवनाम
सुधैवमुक्तिहेतुर्मुनिवृंदैरखिलैश्चसेव्यमाना॥२६॥ अमृतामृतमार्यमुक्तिबीजंशिवनामामृतमेवमीयवैमिनूनं॥ अतएवमुहु
र्मुहुर्मयाशिवनामामृतमेवपीयते॥२७॥ शिवनामसुधांनिपीयभक्त्यासुधियःसाधुसुधांचनाद्रियंते॥ दिविपीतसुधाःप्रयां
तिगर्भेशिवनामामृतपाःप्रयांतिमुक्तिं॥२८॥ शिवनामसुधाविनिर्मिताागिरिजेशेनपुराकृपालुना॥ द्विजसाकृतपुण्यसंचयैर्मुहु श्रीसांब
रत्यंतमुदानिपीयते॥२९॥ रसभाजनभोजनेनिदानंरसनासैवययामुहुःप्रकामं॥ शिवनामसुधानिपीयतेनियमेनान्यवि ५३
लापनविहाय॥३०॥ शिवमर्चितमन्वहंप्रसूनैर्नवबिल्वैरपिपश्यसावधानं॥ इदमेवफलंमतंयतोक्ष्णोर्विलसत्पद्मपलाशतु
ल्यकांत्योः॥३१॥ नवबिल्वदलैःसमर्चितंशिवलिंगंद्विजसाधुपश्यतां॥ विविधामितघोरपापसंघःप्रलयंयातिनसंशयस्त
दैव॥३२॥ शृणुशार्वकथामघौघहंत्रीमनुवारंनियमेनसावधानं॥ इदमेवफलंविनिश्चितंश्रुतिभिःश्रोत्रयुगस्यवस्तुतस्तु॥३३॥
नवकोमलबिल्वपल्लवैःशिवलिंगंसविधानमर्चयिता॥ शिवसात्कृतबिल्वपल्लवान्समुपाघ्रायविनोदयस्वचित्तं॥३४॥

स्पृशशंकरमर्चितंत्रिकालेसकलाघौघविनाशनायनित्यं ।। भजचेतसिभालचंद्रमौलिंमुहुरानंददमद्वितीयमेकं ।। ३५ ।। मनसावचसाचकर्मणाशि
वएकःशिवयासमन्वितः ।। भजतीयइतिश्रुतिःस्वयंप्रतिवारंवदतिप्रबोधकृत् ।। ३६ ।। त्रिपुरारिकथासुपूजनेपित्रिपुरारेरभिवीक्षणेपिचित्ते ।।
महतांभवतिह्यनन्यभाजांनभवत्येवदुरात्मनांकदापि ।। ३७ ।। ।। दधीचिरुवाच ।। ।। इतिविष्णुवचःश्रुत्वाकंण्वःसंतुष्टमानसः ।। शिवार्च
नपरोजातःसर्वभावेनसर्वदा ।। ३८ ।। अतोयत्नेनसततंकर्तव्यंशिवपूजनं ।। शिवार्चनंयतोनित्यंभुक्तिमुक्तिफलप्रदं ।। ३९ ।। पुराकश्चिदभूद्राजन्
दरिद्रोद्विजबालकः ।। सययाचेनिशिक्षीरं अन्नंभुंजन्स्वमातरं ।। ४० ।। मातातद्वचनंश्रुत्वाबाष्पसंकुलितेक्षणा ।। बाष्पाणिदूरीकुर्वंतीसुदतीप्राहतंसु
तं ।। सुदतीउवाच ।। ।। कुतःक्षीरंमयादेयंअभाग्याहंयतःशिशो ।। अनर्चितहरायस्मादभाग्यमतएवमे ।। ४२ ।। शिवार्चनपरानित्यंमनोवाक्काय
कर्मभिः ।। संप्राप्यमहदैश्वर्यंततोमुक्ताभवंतिच ।। ४३ ।। इतितद्वचनंश्रुत्वातदोत्थायद्विजार्भकः ।। मध्यार्जुनमिदंक्षेत्रमवापजननीयुतः ।। ४४ ।। त
तःसमुनिशार्दूलमगस्त्यंभस्मभूषितं ।। प्रणम्यबिल्वपत्राद्यैःसंपूज्योवाचबालकः ।। ४५ ।। ।। द्विजबालकउवाच ।। ।। स्वामिन्नहंदरि
द्रोस्मिदरिद्रान्मरणंवरं ।। प्राप्यतेहिमहद्दुःखंदारिद्र्येणमुनीश्वर ।। ४६ ।। किंमदद्भाग्यदंपुण्यंकिंदारिद्र्यविनाशकं ।। तद्वदस्वमुनिश्रेष्ठतत्क
रिष्याम्यहंध्रुवं ।। ४७ ।। ।। अगस्तिरुवाच ।। ।। बालशीलयनिर्लीलंबालेंदुललिताकृतं ।। सलीलयातेसकलंमंगलंकलयिष्यति ।। ४८ ।।
अमंगलहरोयस्मान्मंगलोमंगलापतिः ।। तमेवार्चययत्नेनसर्वदारिद्र्यनाशकं ।। ४९ ।। पुण्यपुण्यंधर्मधर्मंमंगलानांचमंगलं ।। पावनंपावना
नांचजपशैवंषडक्षरं ।। ५० ।। शिवलिंगंबिल्वपत्रैःपूजयस्वान्वहंमुदा ।। तत्पूजयामहद्भाग्यंप्राप्तव्यंनात्रसंशयः ।। ५१ ।। नप्राप्यतेमहद्भा
ग्यंशिवलिंगार्चनंविना ।। अतोन्वहंप्रयत्नेनलिंगेपूजयशंकरं ।। ५२ ।। जगत्यांसंतियावंतोभाग्यवंतोत्रसंततं ।। तावंतोगिरिजाकांतंपू
जयंतिहि ।। ५३ ।। विनायत्नमनायासमुपेंद्रेंद्रादयःशिवे ।। समभ्यर्च्यमहद्भाग्यंलब्धातिष्ठंतिसंततं ।। ५४ ।। शिवलिंगार्चनेनैवविष्णुत्वंप्रा
पकेशवः ।। ब्रह्मत्वमपिसंप्रापब्रह्माशंकरपूजया ।। इंद्रत्वमिंद्रःसंप्रापश्रीमहादेवपूजया ।। वायुःसंप्रापवायुत्वंश्रीमहादेवपूजया ।।
नविष्णुत्वादिदातान्योविनादेवोत्तमंशिवं ।। सत्यमेतत्पुनःसत्यमुद्धृत्यभुजमुच्यते ।। विष्णुर्यदर्चनादर्च्यस्तमेवगिरिजापतिं ।। ५७ ।। पूज
यस्वातियत्नेनसर्वसंपत्प्रदंप्रभुं ।। शिवलिंगेशिवंनित्यंपूजयस्वातियत्नतः ।। ५८ ।। शिवलिंगार्चनेनैवतुष्टोभवतिशंकरः ।। प्रतिमापूज

 नाद्धेष्टंशिवलिंगस्यपूजनं॥५९॥शिवलिंगार्चनाद्धेष्टमन्यंनैवहिदृश्यते॥ ॥दधीचिरुवाच॥ ॥एवमुक्तास्थितोगस्त्यःसनातनऋषिस्त 
दा॥६०॥तदुक्तंकवचंश्रुत्वातंप्रणम्याहसादरं॥॥ सनातनउवाच॥ ॥शिवलिंगानिपूज्यानिकानिकानिमुनीश्वर॥एतत्सर्वंविशेषेणव
दमह्यंकृपानिधे॥६१॥ ॥दधीचिरुवाच॥ ॥इतितद्वचनंश्रुत्वाप्रहृष्टवदनोमुनिः॥शिवलिंगस्वरूपाणिवक्तुंसमुपचक्रमे॥६२॥ ॥
॥अगस्त्यउवाच॥ ॥शिवलिंगानितिष्ठंतिविविधान्युत्तमानिच॥तत्वरूपाणिसर्वाणिश्रुणुवक्ष्येसनातन॥६३॥शिवलिंगस्वरूपंतुवक्तुं
यद्यपिनोचितं॥तथापिशिवभक्तायतुभ्यंतत्प्रवदाम्यहं॥६४॥शिवलिंगस्यमाहात्म्यंयस्यकस्यापिसत्वरं॥नवक्तव्यंयतस्तत्तुगोपनी
यंप्रयत्नतः॥६५॥यस्यास्तिश्रुतिषुश्रद्धातस्यश्रद्धामहेश्वरे॥तस्यैवशिवमाहात्म्येश्रद्धानान्यस्यसर्वथा॥यस्यास्तिशिवमाहात्म्येश्रद्धा
मुक्तिप्रदायिनी॥तस्मैवक्तव्यमुत्कृष्टंशिवमाहात्म्यमादरात्॥६७॥तवास्तिशंकरेश्रद्धाततःप्रायःपुराभवान्॥ब्राह्मणःकेवलाभूतिर्धृता
चविधिवत्वया॥६८॥ ॥सनातनउवाच॥ ॥नकदापिपुराकृतंमयाविधिवत्केवलभस्मधारणं॥यदितत्कृतमादरात्तदाममजन्मेदम
भूत्कथंमुने॥६९॥अहमीदृशजन्मभाजनंनपुराब्राह्मणजन्मभाजनं॥यदितन्ममह्येवतदानशिवःसाधुसमर्चितःकथं॥७०॥नक
दापिपुराकृतंमयाविधिवत्केवलशंकरार्चनं॥यदितत्कृतमादरात्तदाममजन्मेदमभूत्कथंमुने॥७१॥नकदापिपुराकृतंमयाविधिवत्के
वलमीशवंदनं॥यदितत्कृ०॥७२॥नकदापिपुराकृतंमयाविधिवत्केवलमीशसेवनं॥यदि०॥७३॥नकदापिपुराकृतंमयाविधिवत्केवल
मीशमीक्षणं॥यदि०॥७४॥नकदापिपुराकृतंमयाविधिवत्केवलमीशचिंतनं॥यदि०॥७५॥नकदापिपुराकृतंमयाविधिवत्केवलशै
वसेवनं॥यदितत्कृतमादरात्तदाममजन्मेदमभूत्कथंमुने॥७६॥विहितंविधिवद्विभूतिधारणंकृतमित्युक्तमिदंत्वयाधुना॥विधिवन्न 
विभूतिधारणंकृतमेवेत्यनुमीयतेमया॥॥अधुनापिविभूतिधारणेविधिवन्नक्रियतेहिवस्तुतः॥विधिवन्नविभूतिधारणंविहितंकर्त्तुमपी 
हशक्यते॥विबुधैरपिभस्मधारणंविधिवत्कर्त्तुमशक्यमेवहि॥नयतोधिगतोविभूतिधारणेविबुधैरप्यतिविस्तृतोविधिः॥७९॥क्रिय
तेहिकथंचिदेवतद्विहितंकेवलभस्मधारणं॥भवदादिभिरप्यनुक्षणंविधिसंरक्षणदक्षमानसैः॥८०॥विधिनापिकृतंनवस्तुतोविधिव
त्केवलभस्मधारणं॥यदितेनकृतंतथातदानकथंमुक्तिमवापतत्क्षणे॥८१॥यदिकेवलभस्मधारणंकृतमादेहविसर्जनंतदा॥कज

निर्धूतशुभ्रभस्मनांजनिशंकापिनजायतेयतः ।।८२।। भवबंधविमोचकंयतोविहितंकेवलभस्मधारणं ।। ततएवभवाभिभावकाः सततंकेवल
भस्मधारिणः ।।८३।। यदिकेवलभस्मधारणेविमलाभक्तिरुदेतिभाग्यतः ।। नतदामरणादिकंभयंक्वभयंकेवलभस्मधारणे ।।८४।। विविधामितपु
ण्यपूरणेदृढभक्तिर्भवनाशकारणे ।। भवतित्रिपुरारिभूषणेसततंकेवलभस्मधारणे ।। ८५।। धृतकेवलभस्मभूषणोयदिशंभुंधृतभस्मभूषणं ।।
विषयानपहायचिंतयेत्क्षणमात्रंक्वतदाभयंयमात् ।। ८६।। बहुजन्मकृतैरनावृतैः सुकृतैः केवलभस्मधारणे ।। समुदेतिमतिः श्रुतिश्रुतेसततंशैव
मतान्वर्त्तिनां ।। ८७।। सितकेवलभस्मधारिणामधिकारः शिवलिंगपूजनं ।। अतएवतदर्चितः शिवोवितरत्येवतदीप्सितंफलं ।। ८८।। सितकेवल
भस्मधारणंविधिवद्भूरिविधायसादरं ।। सततंशिवनिष्ठचेतसांतनुबंधः क्वतदातिदुःखदः ।।८९।। ।। दधीचिरुवाच ।। ।। इतितद्वचनंश्रुत्वाभूरिभ
क्तिप्रवर्धकं ।। अगस्त्यस्तंप्रणम्याहसनातनमुनिंतदा ।। ९०।। ।। अगस्त्यउवाच ।। ।। धन्योसिभस्मनिष्ठोसिततएवभवान्मुने ।। शंकरानुगृही न
तोसिसर्वथानात्रसंशयः ।।९१।। शंकरानुगृहीतानांभक्तिर्भस्मनिजायते ।। नान्येषामितिवेदोपिस्वयंवदतिसादरं ।।९२।। श्रुतोश्रद्धातवैवास्ति
यतस्तेभस्मधारणे ।। भक्तिरेतादृशीयस्मात्पावनोसिसनातन ।।९३।। श्रद्धातववेदोत्तमेशिवे ।। ततस्तेशिवलिंगानांमाहात्म्यंतद्वदाम्यहं ।। ९४।। शि
वलिंगेषुसर्वेषुरसलिंगमनुत्तमं ।। तत्रसंपूजितः शंभुप्रसीदतिनसंशयः ।। ९५।। रसलिंगेमहादेवंसंपूज्यान्वहमादरात् ।। भुक्त्वाभोगान्महादेवंप्रा
प्नोत्येवनसंशयः ।।९६।। हेमरौप्यादिलिंगेषुसंपूज्यपरमेश्वरं ।। सर्वपापविनिर्मुक्ताः प्रयांतिशिवमंदिरं ।।९७।। काश्मीरलिंगममलंपुराविष्णुर्यथा
विधि ।। पूजयित्वापरामृद्धिंलक्ष्मींचावापशोभनां ।। विधिर्मरकतेलिंगेसमभ्यर्च्यमहेश्वरं ।। सर्जकोभूदयत्नेनमहादेवप्रसादतः ।।९९।। हेमलिं
गेसमभ्यर्च्यमहादेवंशचीपतिः ।। वृत्रंहत्वाविनायत्नंस्वर्गंप्रापपुनर्मुदा ।।१००।। वैद्रुमंलिंगमभ्यर्च्ययोगसिध्यर्थमादरात् ।। योगिनोयोगसंप
न्नाजाताभस्मविभूषणाः ।।१।। कपिलाद्यामहासिद्धानार्मदंलिंगमुत्तमं ।। संपूज्यसिद्धिमापन्नाःसितभस्मविभूषणाः ।।२।। देवैर्दैवर्षिभि
स्सिद्धैरन्यैश्चमुनिपुंगवैः ।। नार्मदादीनिलिंगानिपूजितानिमुमुक्षुभिः ।।३।। मृन्मयंलिंगमभ्यर्च्यपुरालक्ष्मीःप्रयत्नतः ।। जातासौभाग्यसंपन्नाम
हादेवप्रसादतः ।।४।। शीघ्रमिष्टार्थदंश्रौतंमृत्तिकालिंगपूजनं ।। तदायुवृद्धिदंनित्यंभुक्तिमुक्तिप्रदंचतत् ।।५।। यावन्मृद्रेणुरचितंपार्थिवंलिंग
मुत्तमं ।। तावंत्यघानिनश्यंतितन्मृल्लिंगार्चनान्मुने ।।६।। मृन्मयंलिंगमभ्यर्च्यसर्वदाकामदंशुभं ।। सर्वदुःखहरंपुण्यंश्रौतंस्वर्गापवर्गदं ।।७।।

 

मृन्मयेलिंगमभ्यर्च्य पुराब्रह्मादयःसुराः॥ स्वस्वेप्सितंसमासाद्यबभूवुःसुखिनोमुने॥ ८॥ येनमृन्मयलिंगस्यक्रियतेसांगमर्चनं॥ तेनसद्यःप्राप्यते
वसौभाग्यमतुलंध्रुवं॥ ९॥ पुरावज्रंसमादायवज्री पर्वतशासनः॥ गिरिपक्षच्छेदनार्थमुद्युक्तः प्रययौगिरीन्॥ १०॥ तमायांतंसमालोक्यमैनाकोगृहे
मवल्लियः॥ हिमवंतंप्रणम्याहविनयानतकंधरः॥ मैनाकउवाच॥ ॥ शैलपक्षच्छेदनार्थंवज्रपाणिःसमुद्यतः॥ किंकर्त्तव्यंमयास्वामिन्भवत्ताचवदस्वमे
॥ १२॥ कमद्यशरणंयामःकःशरण्यःसुखप्रदः॥ कःपूजितोवज्रघातादस्मांश्संरक्षयिष्यति॥ १३॥ ॥ अगस्त्यउवाच॥ ॥ इतिपुत्रवचःश्रुत्वाहिमवान्शि
वपूजकः॥ पुत्रंप्रत्याहवचनंसर्वदुःखविनाशकं॥ १४॥ ॥ हिमवानुवाच॥ ॥ दुःखंमाकुरुपुत्रत्वंत्यजवज्रोद्भवंभयं॥ सर्वदुःखनिवृत्त्यर्थंशंकरंशर
णंव्रज॥ १५॥ कथंवज्राद्भयंभावि शिवार्चनपरस्यते॥ नभयंशिवभक्तानांस्वप्नेपिप्रलयेपिवा॥ १६॥ वयंशिवैकशरणास्ततोस्माकंसदाशिवः॥ शुभप्रदः
शुभाकारोदास्यत्येवशुभानिनः॥ १७॥ कभयंशांभवानांनोवज्रिणश्चक्रिणोथवा॥ कालमृत्युरपिभयंनास्माकंविद्यतेसुत॥ १८॥ शरणंयांतियेनित्यंमहा
देवमुमापतिं॥ दुःखानिनभविष्यंतितेषांस्वप्नेपिसर्वथा॥ १९॥ तावदेवहि दुःखानिविविधानिशरीरिणं॥ यावन्नाराध्यतेभक्त्याभगवानंबिकापतिः॥ २०॥
यःपूजयतिगौरीशंसावधानेनसादरं॥ सदुःखीनभवत्येवप्रलयेपिनसंशयः॥ २१॥ पूजयित्वापिगौरीशंयदि दुःखमवाप्यते॥ वेदाःप्रमाणमितिधीःप्र
मारूपातदाकथं॥ २२॥ यद्यस्ताद्राबुदेत्यर्कस्तदापिशिवपूजकः॥ नप्राप्नोत्येवदुःखानिस्वप्नेपीतिमतिर्मम॥ २३॥ लोकेशिवार्चनादन्यंनास्तिशोक
विनाशकं॥ सत्यमेतत्पुनःसत्यंमुत्धृत्यभुजमुच्यते॥ २४॥ शोकःपापकृतःपापंविनस्यतिशिवार्चनात्॥ नष्टेपापेकुतःशोकोनानापातकहेतुकः॥ २५॥
नभविष्यतिविश्वासोयेषांमीश्वरपूजने॥ तेषांबहूनिदुःखानिभविष्यंतिनसंशयः॥ २६॥ येषामीश्वरपूजायांविश्वासः सततंभवेत्॥ सदातेषांभ
विष्यंतिशोभनानिसुखानिच॥ २७॥ अतएवमहादेवंसर्वयत्नःकोवातन्मैवदाधुना॥ लोकमहेश्वरं॥ पूजयंत्यतियत्नेनमुनयोदुःखनाशकं॥ २८॥ हृदि
क्षणंक्षणार्धंवाध्यायेद्यःपार्वतीपतिं॥ सनाप्नोत्येवदुःखानिकदाचिदपिसर्वथा॥ २९॥ महेशध्यानममलंदुःखारण्यदवानलः॥ सत्यमेतत्पुनःसत्यं
सत्यमेवनसंशयः॥ महेशस्मृतिमात्रेणमहापातककोटयः॥ नश्यंतिदुःखदाःसद्यःशलभाइववन्हिगाः॥ ३१॥ महाप्रलयकालेवाघोरायांवाम
हापदि॥ नप्राप्नुवंतिदुःखानिशिवार्चनपराःसुत॥ ३२॥ कर्मणामनसावाचाशिवमभ्यर्च्चयंतिये॥ तेषांशुभप्रदःसद्यःप्रसीदतिमहेश्वरः॥ ३३॥ य
मादपिनभीस्तेषांयेषांभक्तिर्महेश्वरे॥ भक्तिर्माहेश्वरीयस्मात्सर्वसौभाग्यदायिनी॥ ३४॥ धन्यास्तेकृतपुण्यातेकृतार्थास्तेसदापिये॥ स्तुवंतिपार्व
तीनाथंपूजयंतिचसादरं॥ ३५॥ येपूजयंतिविधिवत्कीर्त्तयंतिचशंकरं॥ तेषांहृदिमहादेवःशुभदस्तिष्ठतिध्रुवं॥ ३६॥ त्वमप्यत्यंतयत्नेनलिंगमृ

र्त्तिमहेश्वरं॥सर्वदुःखविनाशार्थंपूजयस्वाविधानतः॥३७॥कुरुष्वमृन्मयंलिंगंतस्मिन्पूजयशंकरं॥तत्रसंपूजितःशंभुःसद्यस्तुष्टोभविष्य
ष्यति॥३८॥ससंतुष्टोमहादेवोददात्येवसुखंसदा॥अदेयंशिवभक्तायमहेशस्यनविद्यते॥३९॥विष्णुत्वंयोददौविष्णोर्विष्णुनेत्रार्चितःशि
वः॥ससर्वदासुखंतुभ्यंपूजितःसंप्रयच्छति॥४०॥ब्रह्मणायोर्चितःसांबोब्रह्मत्वंब्रह्मणेददौ॥ससर्वदा०॥४१॥इंद्रार्चितोयइंद्रायददविंद्रत्व-
मीश्वरः॥ससर्वदा०॥४२॥ऋषिभिःपूजितःशंभुस्तेभ्योमोक्षंददौशिवः॥ससर्वदासुखंतुभ्यंपूजितःसंप्रयच्छति॥४३॥अपारकरुणासिंधु
र्जगदापन्निवारकः॥नहरिष्यतिकिंशोकंतवपुत्रस्यशंकरः॥४४॥ ॥दधीचिरुवाच॥ ॥इत्युक्तंतद्वचःश्रुत्वामैनाकःप्रीतमानसः॥कृतांज
लिपुटोभूत्वापितरंप्राहभूपते॥४५॥मृत्तिकालिंगपूजायासद्यःप्रसीदतिमहेश्वरः॥४६॥किंवापूजोपकरणंकोवामंत्रःसमर्चने॥अर्चकस्या
पिनियमःकोवातन्मेवदाधुना॥४७॥इतितद्वचनंश्रुत्वाहिमवानपिहृष्टधीः॥मृत्तिकालिंगपूजायाविधानंवक्तुमारभे॥४८॥ ॥हिमवानुवाच॥
कृत्वाशौचादिकंसम्यगुषसिस्नानमाचरेत्॥निमज्जांभसिगौरीशस्मरणंचसमाचरेत्॥४९॥सद्योजातादिमंत्राणांसमाप्तिर्यावदाभवेत्॥
तावत्स्मृत्वैवतान्मंत्रान्स्मर्तव्यःपार्वतीपतिः॥५०॥परिधायततोवस्त्रंकृत्वाचोद्धूलनंततः॥त्रिपुंड्रधारणंकृत्वाकार्यंरुद्राक्षधारणं॥५१॥अं
गप्रत्यंगभागेषुभस्मयोगोयथातथा॥उद्धूलनंप्रयत्नेनकर्तव्यंशिवपूजकैः॥५२॥ततःसंध्यांविधायैवशुद्धक्षेत्रेनिवेश्यच॥ऊर्ध्वाधःसंस्कृत
कुशासंविशेद्व्याघ्रचर्मणि॥ततःशंभोराज्ञयेतिसंकल्पंचसमाचरेत्॥विधेयश्चससंकल्पःप्राणायामपुरःसरं॥५४॥पंचाक्षरेणमंत्रेणवै
दिकैःश्रुतितत्परैः॥मृत्तिकाहरणादीनिकर्त्तव्यानिप्रयत्नतः॥५५॥पंचाक्षरेणमंत्रेणमृदंसंगृह्यपाणिना॥पात्रेसंस्थापनीयासामृतेनम
नुनासुत॥५६॥पंचाक्षरंसमुच्चार्यगृहीत्वाजलमुत्तमं॥सामृत्तिकाप्रोक्षणीयातेनैवमनुनाद्विजैः॥कार्यंपंचाक्षरेणैवमृन्मयंलिंगमुत्तमं॥
लिंगपीठंतुकर्त्तव्यंसद्योजातादिभिःसुत॥५८॥सुवर्तुलंवृत्तकंठमनुन्नतमनावृतं॥कूर्मपीठसमंचैवलिंगपीठंश्रुतिश्रुतं॥५९॥विद्युद्रो
मुखवत्पीठमेवंकृत्वाप्रयत्नतः॥शिवलिंगंयोजनीयंतस्मिंस्तन्मंत्रपूर्वकं॥६०॥सद्योजातादिभिर्मंत्रैःशिवपंचाक्षरेणच॥प्रतिष्ठातत्रकर्त
व्याशिवलिंगस्यवैदिकैः॥सद्योजातादिभिर्मंत्रैर्ध्यात्वादेवंमहेश्वरं॥तैरेवावाहनंकार्यंतस्मिन्लिंगेशिवात्मके॥६२॥आसनाद्युपचारा
श्चतैरेवमुनिभिःसुत॥पंचाक्षरान्वितैःकार्यावैदिकैःसावधानतः॥६३॥पूजातुशिवलिंगस्यपंचाक्षरपुरःसरं॥नमःसोमेतिमंत्रेणस्नानंतेनसमा
चरेत्॥६४॥पंचाक्षरःस्वतःशुद्धःसर्ववेदशिरोमणिः॥ततस्तेनसमोमेनकर्त्तव्यंशिवपूजनं॥पंचाक्षरेणशुद्धेनयोर्चयेद्गिरिजापतिं॥सतीर्त्वा

घोरसंसारंशिवसायुज्यमाप्नुयात् ॥ ६६ ॥ अभिषिच्य महादेवंरुद्रंध्यायेनसादरं ॥ ससोमशिवमंत्रेणपूजनीयो महेश्वरः ॥ ६७ ॥ पंचाक्षरेणसं
पूज्य बिल्वपत्रेणशंकरं ॥ अघोरागाधपापाब्धिंतरत्येवन संशयः ॥ ६८ ॥ संपूज्यगिरिजानाथमखंडैर्बिल्वपत्रकैः ॥ कोटिजन्मार्जितैः पापैः सद्योमु
क्तोभवद्द्विजः ॥ ६९ ॥ दूर्वांकुरैर्जलापुष्पैर्धत्तूरकुसुमान्वितैः ॥ सद्रोणकुसुमैर्भक्त्या पार्थिवंलिंगमर्चय ॥ ७० ॥ बृहतीकुसुमैर्नवैः यस्तुमृन्मयंलिंग-
मर्चयेत् ॥ समहात्ऋणबंधेभ्योमुच्यतेनात्रसंशयः ॥ ७१ ॥ वत्सरंमृन्मयंलिंगं बृहतीकुसुमैर्नवैः ॥ संपूज्यकपिलाज्येननैवेद्यंदेयमादरात् ॥ ७२ ॥
पुष्पाणिचप्रदेयानिनित्यंसार्धशतत्रयं ॥ एवंयः पूजयेद्भक्त्यासकथंऋणकोभवेत् ॥ ७३ ॥ सवृंतैरन्यकुसुमैः पूजनीयोमहेश्वरः ॥ वृंतहीनैः पूज
नीयोबृहतीकुसुमैः शिवः ॥ नीलोत्पलैःसमभ्यर्च्यमृन्मयंलिंगमुत्तमं ॥ महानिधिपतिर्भूत्वामुक्तोभवतिबंधनात् ॥ ७५ ॥ जपापुष्पैः समभ्यर्च्य
शिवलिंगंतुपार्थिवं ॥ महाव्याधिविनिर्मुक्तोदीर्घायुर्जायतेनरः ॥ ७६ ॥ एकविंशतिलिंगानिपार्थिवानिप्रयत्नतः ॥ नित्यंलक्षजपापुष्पैर्मासमेकं
प्रपूजयेत् ॥ ७७ ॥ श्वेतगोघृतदीपाश्चदेयाः शतचतुष्टयं ॥ सघृतक्षीरनैवेद्यंक्षीरान्नंचप्रकल्पयेत् ॥ ७८ ॥ भोजनीयाः शतंविप्राः स्वाद्वन्नैः
सुरसायनैः ॥ सुवर्णदक्षिणादेयायद्वाकृष्णलकंसुत ॥ ७९ ॥ एवंयः पार्थिवंलिंगेपूजांकुर्यात्प्रयत्नतः ॥ समहारोगकोटिभ्योमुक्तोभवति
सर्वथा ॥ ८० ॥ योर्चयेन्मृन्मयंलिंगंनवबिल्वदलैः सदा ॥ ससर्वभुवनाधीशो भवत्येव नसंशयः ॥ ८१ ॥ मृन्मयंलिंगमभ्यर्च्यसत्यलोका
धिपत्यतां ॥ संप्राप्यशिवसायुज्यंप्राप्नोत्येवनसंशयः ॥ ८२ ॥ मृन्मयंलिंगमभ्यर्च्ययुद्धार्थंयोगमिष्यति ॥ सशत्रुसैन्यंहत्वैववीरश्रियम
वाप्नुयात् ॥ ८३ ॥ योर्चयेत्पार्थिवंलिंगंभक्त्यानित्यंप्रयत्नतः ॥ सद्यः संपादयत्येवसदरिद्रोदरिद्रतां ॥ ८४ ॥ योर्चयेत्पार्थिवंलिंगंनित्यंदूर्वासह



स्रतः ॥ ससर्वविद्यासंपन्नोगुरुजिच्च भविष्यति ॥ मृन्मयंलिंगमभ्यर्च्यकामंयंयमभीप्सते ॥ तंतंकाममवाप्नोतिसर्वथासत्यमुच्यते ॥
कृत्वामृन्मयलिंगस्यपूजांभक्तिपुरःसरं ॥ प्रार्थयेदंजलिंकृत्वामूर्ध्निभक्तिपुरःसरं ॥ प्रसीदगिरिजानाथकरुणारसवारिधे ॥ ८८ ॥
अनाथनाथदेवेशशरणागतवत्सल ॥ तारयस्वमहादेवसंसाराब्धेरगाधतः ॥ ८९ ॥ कृपानिधानसर्वज्ञसर्वदेवशिखामणे ॥ त्वदीयोहंमहादेव
त्वदन्यंनभजाम्यहं ॥ ९० ॥ त्वदन्यंनवदामीशत्वदन्यंननमाम्यहं ॥ पितात्वमेवगौरीशमाताभ्राताचमेप्रभो ॥ ९१ ॥ सर्वंत्वमेवसर्वस्वंत्वमेवपरमे
श्वर ॥ शृणोमित्वत्कथामेवशंभोसर्वश्रुतिश्रुतां ॥ ९२ ॥ तवैवनामवक्ष्यामिभुक्तिमुक्तिप्रदायकं ॥ [redacted]पूजयामिसदाशिव ॥ ९३ ॥

१ भवंतमेवसततं

त्वदन्यंनार्चयिष्यामिस्वप्नेपिपरमेश्वर ॥ त्वत्पादपद्मप्रणतंचित्तमस्तुममप्रभो ॥९४॥ त्वदन्यचिंतनाच्चित्तंपरावृत्तंशिवास्तुमे ॥ त्वय्येवसर्वभावेनचित्तम
स्तुमहेश्वर ॥ नान्यत्रयायान्मच्चित्तंत्वदन्यत्रमहेश्वर ॥ इतिसंप्रार्थ्यदेवेशंजप्यः पंचाक्षरस्ततः ॥९६॥ कार्यः पंचाक्षरेणैवन्यासः पंचाक्षरस्यतु ॥ अंगप्रत्यंग
देशेषुन्यासः पंचाक्षराद्द्विजैः ॥९७॥ कार्यस्ततः प्रयत्नेनपंचाक्षरजपेश्रद्धांविधायस्वगुरुंस्मरन् ॥ अष्टोत्तरसहस्रंतुकार्यः पूजोत्तरंजपः ॥ पंचाक्षर
समोमंत्रोनास्तिवेदेषुसर्वथा ॥९९॥ पंचाक्षरजपेश्रद्धाबहुपुण्यतपःफलं ॥ वेदात्मकःकाररूपोयंशैवः पंचाक्षरः स्मृतः ॥१००॥ ततस्तस्यजपेश्रद्धाना
त्मस्यतपसःफलं ॥ पुरोंकारमुनेपुत्रोवेदसारइतिश्रुतः ॥१॥ समहादेवमेवैकंपूजयामाससादरं ॥ शिवनामांकितानेववेदभागान्स्वयत्नतः ॥२॥
सदृष्ट्वासर्वभावेनमहेशंशरणंगतः ॥ अक्षराभ्यासकालेपिशिवपंचाक्षरेतरे ॥३॥ वर्णानोच्चरितास्तेनशिक्षितोध्यापकैरपि ॥ सदाशिवशि
वेत्येवसवदन्संस्थितोमुदा ॥४॥ शिवनामविहायान्यंनोक्तंनामतुतेनहि ॥ अनुक्षणंबिल्वपत्रैरच्छिद्रैः कोमलैर्नवैः ॥५॥ सशिवंपू
जयामासपंचाक्षरपुरःसरं ॥ स्नानकालादिकालेषुसर्वेष्वपिप्रयत्नतः ॥६॥ शिवेत्युच्चार्यकर्माणिनिवेदयतिशंकरे ॥ कदापिलौकि
कीवार्त्तानकृतातेनसर्वथा ॥७॥ शिवपूजांविनात्तेननकदापिस्थितंसुत ॥ पूजयित्वामहादेवंसबिल्वैरतिकोमलैः ॥८॥ ननर्त्तशंक
रस्याग्रेशिवनामवदन्मुदा ॥ नारीनवीक्षितातेनपश्यतासादरंशिवं ॥९॥ शिवान्यस्तेननध्यातः प्रमादेनापिसर्वथा ॥ संश्रुतंशिवनामैव
तेनयत्नपुरःसरं ॥१०॥ शिवनामान्यनामानिनशुश्रावससर्वथा ॥ उद्धूलनत्रिपुंड्राभ्यांरुद्राक्षैश्चविभूषितः ॥११॥ शिवनामजपंकु
र्वन्सर्वदापिससंस्थितः ॥ तंदृष्ट्वैवसुराःसर्वेविष्णुब्रह्मपुरोगमाः ॥१२॥ प्रणमंत्यतियत्नेनपूजयंतिचशांभवं ॥ तंदृष्ट्वाऋषयःशैवंप्रण
मंतिस्तुवंतिच ॥१३॥ ससर्ववंद्यःसमभूच्छ्रीमहादेवपूजया ॥ सतुमृन्मयलिंगानिनित्यमेकादशादरात् ॥१४॥ पूजयामासबिल्वाद्यैस्त
तःपूज्योबभूवसः ॥ महादेवार्चनपरःकोवायातिनपूज्यतां ॥१५॥ कोवानमुक्तःसंसारादसारादघसागरात् ॥ संसारतरणोपायःशिवा
राधनमुच्यते ॥१६॥ सत्यमेतत्सत्यमेतद्विश्वस्यार्चयशंकरं ॥ यःश्रद्धयामहादेवमाराधयतिसादरं ॥१७॥ सर्वपापविनिर्मुक्तोमुक्तोभ
वतिसंसृतेः ॥ शिवार्चकःसयेषांतेषामपिनपापधीः ॥१८॥ साक्षाच्छिवार्चकानांतुकुतःपापभयंभवेत् ॥ शिवार्चकोवसेद्यत्रततोद्वादश
योजनं ॥१९॥ मुक्तिक्षेत्रमितिज्ञेयंवेदवादरतैर्द्विजैः ॥ यथाशिवार्चनान्मुक्तिनतथाऽन्येनकर्मणा ॥२०॥ सत्यमेतत्सत्यंसत्यमेतदितिजाबा

वादिनः॥शिवःसर्वप्रयत्नेनसर्वदासर्वथाद्विजैः॥२१॥ पूजनीयःसावधानंभुक्तिमुक्तिप्रदायकः॥भुक्तिमुक्तिप्रदंदेवंमहादेवमुमापतिं॥पूजयंत्यति
यत्नेनधन्यावेदार्थवादिनः॥महेशपूजनान्मुक्तिरनायासेनलभ्यते॥२३॥ मोक्षहेतुतयान्यत्तुनश्रुतंश्रुतिषुध्रुवं॥किमन्यद्बहुनोक्तेनकेवलंशिव
पूजया॥२४॥नश्यंतिपापगिरयःसंसाराब्धिश्चशुष्यति॥ ॥दधीचि०॥ ॥इत्युक्तःसतुमैनाकःशुचिर्भूतस्तदाज्ञया॥तदामृन्मयलिंगस्य
पूजांकर्तुंसमारभे॥२५॥विधायमृन्मयंलिंगंविधिवद्भक्तिपूर्वकं॥पूजयामासयत्नेनबिल्वपत्रादिसाधनैः॥२६॥तदानीमागतंवज्रमिंद्रेणप्रेषि
तंनृप॥आगत्यतंपुनःप्रापमैनाकेनप्रधर्षितं॥२७॥तदाशचीपतिर्वज्रंनिस्तेजस्कंविलोकयन्॥दुःखसंकुलितःप्राहगुरुंनत्वाकृतांजलिः॥गुरो
वज्रायुधंतीक्ष्णमस्यशक्तिर्गरीयसी॥ईदृशंचेदमधुनामैनाकेकुंठितंकथं॥२९॥अनेनैवहतःक्रूरःपुरावृत्रासुरोमया॥वृत्रासुरसमोनास्तिर्मम
शत्रुर्दुरासदः॥३०॥विंध्यादिशैलपक्षाणांछेदोनेनकृतोगुरो॥अनेनैवासुराःपूर्वंबहवोनिहतामया॥३१॥यदासुदर्शनंपूर्वंशिवःस्वांगुलिरेखया॥
ससर्जसूर्यसंकाशंतदेदंचससर्जहि॥३२॥ ततःशिवोदेवदेवोविष्णुनेत्रसमर्चितः॥सुदर्शनंददौतुष्टोविष्णवेकरुणानिधिः॥३३॥ततोमांक्लि
न्नवदनंवृत्रासुरतिरस्कृतं॥विलोक्यकृपयामह्यंददौवज्रमिदंशिवः॥३४॥ततोनेनैववज्रेणहतोवृत्रासुरोगुरो॥तदेवंखल्विदंवज्रंयेनवज्री
भवाम्यहं॥३५॥सुदर्शनस्यसामर्थ्यंयादृशंतादृशंगुरो॥अस्यास्यस्त्येवसामर्थ्यमत्रनास्त्येवसंशयः॥३६॥तथाचसतिसामर्थ्यमस्यासीत्कुं
ठितंकथं॥अस्यचेत्कुंठिताशक्तिःकुंठिताशक्तिरद्यमे॥३७॥ यस्मादेतदधीनंमेजीवनंशिवकल्पितं॥अस्यचेत्कुंठिताशक्तिर्जीवनंमेक
थंभवेत्॥३८॥ इतितद्वचनंश्रुत्वागुरुरर्चितशंकरः॥ ज्ञातमैनाकवृत्तांतःशचीनाथमुवाचसः॥३९॥ ॥बृहस्पतिरुवाच॥ ॥मैनाकः
शोकनाशार्थंसर्वशोकनिवारकं॥शंकरंहिमवद्वाक्यादाराधयतिसादरं॥४०॥सकृत्वामृन्मयंलिंगंसमर्चयतिशंकरं॥ततस्तस्मिन्निदं
वज्रमभवत्कुंठितंध्रुवं॥४१॥शिवार्चकेषुवज्रस्यशक्तिर्नप्रसरिष्यति॥वज्रमेतद्यतःशैवंततःशैवेनकुप्यति॥४२॥ततःसुदर्शना
दीनांमहास्त्राणामपिप्रभो॥नप्रधृष्यतिशैवेंद्रानिंद्रेदंकिंपुनर्वद॥४३॥सुदर्शनादीन्यस्त्राणिप्रयुक्तान्यपिशांकरे॥प्रसूनानीवशैवेषु
दुःखायनभविष्यति॥४४॥ यवसोन्नयनेवायुःसमर्थइतिपर्वतान्॥किमुन्नेतुंसमर्थःस्यात्तद्वदस्वशचीपते॥ सुदर्शनादीनिशस्त्रा
णिशैवान्यास्त्रन्स्वशक्तितः॥नाशयिष्यंतुसमर्थोनभविष्यति॥४७॥गृध्रोयदिसमर्थःस्यान्नागनायकभक्षणे॥तदासुदर्शना

हीनिचालयंतुशिवार्चकान् ॥४८॥ अपान पवनोविंध्यमुल्मये द्यदिसत्वरं ॥ तदासुदर्शनादीनिचालयंतुशिवार्चकान् ॥४९॥ राजलोतिकृशःश्री
घ्रंगरुडंयदिभक्षयेत् ॥ तदासु० ॥५०॥ अस्वल्पहरिणीशावोमृगेंद्रंयदिभक्षयेत् ॥ तदासु० ॥ ५१॥ यदिभानुंग्रसेद्रात्रौसंहिकेयोविधोसति ॥ त
दासु० ॥ ५२॥ चंद्रंयदिग्रसेत्केतुर्मध्यान्हेसंस्थितेरवौ ॥ तदासु० ॥ ५३॥ सांसिद्धिकद्रवत्वाधिकरणेयंपृथिवीयदि ॥ तदासु० ॥ ५४॥ नैमित्तिक
द्रवत्वाधिकरणंस्याज्जलंयदि ॥ तदासु० ॥ ५५॥ शीतस्पर्शाधिकरणंतेजोमात्रंभवेद्यदि ॥ तदासु० ॥ ५६॥ चित्ररूपाधिकरणंवायुमात्रंभवेद्यदि ॥
तदासु० ॥५७॥ अंगुलीयोगसंभूतोयद्याकाशोभविष्यति ॥ तदासु० ॥ ५८॥ विश्वासपवनोत्पन्नोमहाकालोभवेद्यदि ॥ तदासु० ॥ ५९॥ दिशोयदिसमु
त्पन्नादिग्भ्यएवकदाचन ॥ तदासु० ॥ ६०॥ जन्येविनश्वरश्चायंयद्यात्मास्यात्कदाचन ॥ तदासु० ॥ ६१॥ शीतरश्मिर्यदिभवेदुष्णरश्मिरयंसदा ॥
तदासु० ॥ ६२॥ उष्णरश्मिर्यदिभवेच्छीतरश्मिरयंसदा ॥ तदासु० ॥ ६३॥ स्वसुतायहितायापिजननीविषदायदि ॥ तदासु० ॥ ६४॥ सुतायाधि
कविद्यायपितायदिरिपुर्भवेत् ॥ तदासु० ॥ ६५॥ वंध्यायदिसुतंसूतेयदिसूतेमुनीवृकं ॥ तदासुदर्शनादीनिचालयंतुशिवार्चकान् ॥ ६६॥ शै
वेवज्रप्रयोगोयमज्ञात्वैवत्वयाकृतः ॥ शैवेशस्त्रप्रयोगस्तुकेनापिनकृतःपुरा ॥ ६७॥ शैवानांदुःखदानार्थमुद्योगंयःकरिष्यति ॥ सयाति
नरकंघोरंयावदाचंद्रतारकं ॥ ६८॥ नबिभेत्यशनेःशैवःकालाग्नेःप्रलयादपि ॥ सतादृशःशिवरतोवज्रादस्माद्बिभेतिकिं ॥ ६९॥ सस
मर्थोवज्रमेतच्चूर्णीकर्तुंतथापिसः ॥ नचूर्णीकृतवानिंद्रकृपयैवहिकेवलं ॥ ७०॥ विष्णुमैनाकयोःपूर्वंहिमवद्गिरिगव्हरे ॥ वृत्तोवा
क्कलहस्तेनवैरवृधिरभूत्तयोः ॥ ७१॥ विष्णुनोक्तमहंश्रेष्ठोमदन्योनेतिमोहतः ॥ उत्कृष्टःशिवएवेतिमैनाकःसतदाब्रवीत् ॥ ७२॥
तदाविष्णुर्महामोहवशगोविवशोब्रवीत् ॥ अधिकोहंनाधिकोन्यःसत्यमेतदितिभ्रमात् ॥ ७३॥ तदैवासहमानस्तंतदुत्कर्षंशिवार्चकः
क्रोधकिंशुकतुल्याक्षोबभाषेतंजनार्दनं ॥ ७५॥ ॥ मैनाकउवाच ॥ ॥ यस्त्र्यक्षःश्रीमहादेवःसर्वदेवशिखामणिः ॥ तद्भृत्यभृत्यतु
ल्योपिननूनंत्वंजनार्दन ॥ ७६॥ गणनाकुत्रतेविष्णोगणनीयोसिकिंभवान् ॥ त्वादृशागिरिशद्वास्थैःकतिवानहताहरे ॥ ७७॥ महे
शान्नत्वमुत्कृष्टोमहेशेनसमोपिन ॥ महेशभृत्यतुल्योपिनतत्तुल्यःकथंभवान् ॥ ७८॥ यदिसिंहेनतुल्यस्याद्घुनकोमलभक्षकः ॥ तथा
पिश्रीमहेशेननतुल्यस्त्वंजनार्दन ॥ ७९॥ यदिमत्तेभतुल्यस्यान्मलाशीग्रामसूकरः ॥ तथापि० ॥ ८०॥ यदिभूपालतुल्यस्याद्दरिद्रश्च

पचाधमः ॥ तथा० ॥ ८१ ॥ यदिपीयूषतुल्यस्याद्दुग्धं मूत्रं मलान्वितं ॥ तथापि० ॥ ८२ ॥ यदिदिव्यास्यतुल्यं स्यादपानं मलदूषितं ॥ तथा० ॥ ८३ ॥ यद्य
त्युत्तमरत्नेन काचस्तुल्यो भविष्यति ॥ तथापि० ॥ ८४ ॥ यदि क्षीराब्धितुल्यस्यान्मूत्रकूपो मलाविलः ॥ तथा० ॥ ८५ ॥ यदिस्यान्मेरुणा तुल्यो मलरा
शिः कृमिभिः श्रितः ॥ तथापि० ॥ ८६ ॥ यदि रंभासमानस्याच्चंडाली छिन्ननासिका ॥ तथापि० ॥ ८७ ॥ यदि किंनरगानेन समस्याद्रर्दभस्वनः ॥ तथा० ॥
॥ ८८ ॥ यदि सोमपतुल्यः स्यान्मद्यपो मांसभक्षकः ॥ तथा० ॥ ८९ ॥ यदि यागीयपशुहा ब्रह्महंतृसमो भवेत् ॥ तथापि श्रीमहेशेन न तुल्यस्त्वं जनार्द
नः ॥ ९० ॥ यदि काचो भवेच्छ्रेष्ठो मणेरत्युत्तमोत्तमात् ॥ तथापि त्वं महादेवादधिको न जनार्दन ॥ ९१ ॥ यदि रेतो भवेच्छ्रेष्ठं पीयूषादुत्तमोत्तमात् ॥
तथापि त्वं० ॥ ९२ ॥ यद्यमेध्यं भवेच्छ्रेष्ठं नवनीतान्मनोरमात् ॥ तथा० ॥ ९३ ॥ यदि श्रेष्ठो भवेत्कुष्ठी मन्मथान्मुनिमोहनात् ॥ तथा० ॥ ९४ ॥ यदिस्या
त्सेचकः श्रेष्ठो रम्यादैरावतादपि ॥ तथा० ॥ ९५ ॥ यदिस्याद्रासभः श्रेष्ठो देवाश्वादपि शोभनात् ॥ तथा० ॥ ९६ ॥ अणोरणीयान्महतो महीयान्
त्रिपुरांतकः ॥ तादृशाच्छ्रीमहादेवादधिकस्त्वं कथं हरे ॥ परमाणुर्यथाल्पोल्पो वस्तुतो मेरुमपेक्षया ॥ तथा जनार्दनाल्पोसि त्वमुमापत्यपेक्षया ॥
९८ ॥ ॥ गुरुरुवाच ॥ ॥ स मैनाकस्तमुक्त्वैवं विष्णुं स्वोत्कर्षवादिनं ॥ पातयित्वा भुवि क्रोधाद्धर्षयामास पादतः ॥ ९९ ॥ तस्माद्धर्षणेनैव विष्णुः
कृष्णत्वमागतः ॥ तदाप्रभृति तं प्राहुः कृष्ण इत्यखिला जनाः ॥ १०० ॥ मैनाकपादयोगेन गतमोहो जनार्दनः ॥ मैनाकं सत्वरं नत्वा तमाह विनयानतः ॥
॥ १ ॥ ॥ विष्णुरुवाच ॥ ॥ उत्कृष्टः शिव एवेति त्वयोक्तं हि मवस्तुतः ॥ तत्तथैव न संदेहो विरोध्याहं तथा यतः ॥ २ ॥ वेदैर्विश्वाधिकत्वेन श्रीरुद्रः प्रति
पादितः ॥ यतो विश्वाधिको रुद्र इति वाक्यं श्रुतिश्रुतं ॥ ३ ॥ श्रीमहादेवदुग्धाब्धौ विष्णुब्रह्मादयः सुराः ॥ शीकरा इति जाबालो वदत्येव मुहुर्मुहुः ॥ ४ ॥ मया श्रीशिव
द्यभ्रांतचित्तेन मय्युत्कृष्टत्वमीरितं ॥ न मया प्रकृतिस्थेन मय्युत्कृष्टत्वमीरितं ॥ ५ ॥ मय्यद्य याकृता शिक्षा त्वया मैनाक शांभव ॥ सा शिक्षा वस्तुनो जाता ५८
ममैवाद्य हितावहा ॥ ६ ॥ यथा सुतं पिता मत्तं शिक्षयत्यक्षकादिभिः ॥ तथाधुना भ्रांतचित्ते मयि शिक्षा कृता त्वया ॥ ७ ॥ मैनाक त्वत्पदद्वंद्वयो
गेनैव ममाधुना ॥ भ्रांतिर्गतान्यथा भ्रांतिः कथं त्यक्ष्यति मां कृते ॥ ८ ॥ सर्वगोद्बलनाद्भस्मसंगतं चरणद्वये ॥ ताभ्यां च संगमान्मोहो ममाद्ये
ह गतो ध्रुवं ॥ ९ ॥ महान्ममोपकारोयं मैनाकाद्य त्वया कृतः ॥ नास्ति प्रत्युपकारोस्य वस्तुतः सत्यमुच्यते ॥ १० ॥ भ्रांत्या यदि शिवोत्कर्षं न व
रु दिष्याम्यहं तदा ॥ शिक्षां कुरु ममैव त्वं वरोयं मम शांभव ॥ ११ ॥ अन्यथा भ्रांतचित्तेन मयाद्योद्बलनं कृते ॥ तदा ग्रैया तना घोरा भविष्यति

त

ममध्रुवं॥१२॥प्रायश्चित्तंसुनिर्वृत्तमघलक्तनशिक्षया॥अतःपरंमदुक्तर्यवादजंपात्तकंनमे॥१३॥गुरुरुवाच॥ ॥इत्युक्त्वाशांभवश्रेष्ठंमैनाकेशंकर
प्रियं॥मंदारपुष्पैःसंपूज्ययथौनलाजर्दनः॥१४॥इंद्रातस्ताद्दशेशक्तेमैनाकेशांभवोत्तमे॥त्वत्तेरितमिदंवज्रंलगिष्यतिकथंवद॥१५॥वज्रंकिमितितेनेदं
नैवचूर्णीकृतंतदा॥नजानेसयतःक्रूरःपादघर्षितमाधवः॥१६॥शक्तिःशांभवमात्रस्याप्यत्तैवैताद्दशीसह॥शक्तिरस्तीतितस्मिन्मैनाकइतिनाद्भुतं
माधवंप्रणतंदृष्ट्वासमैनाकःकृपानिधिः॥तंत्यांजान्यथासद्यस्तंहन्यादेवमाधवं॥१८॥नत्यक्षत्येवमैनाकोभवंतंमत्तमीदृशं॥त्वयातद्धननंकर्तुंवज्रं
संप्रेषितंयतः॥१९॥अन्यादृशंनजानीहिमैनाकंशांभवोत्तमं॥सतादृशोनमैनाकोयस्तूष्णींस्थातुमिच्छति॥२०॥बलेतेनमहत्प्राप्तंमृत्तिकालिंगपूज
या॥सचेत्क्रुधोजगत्सर्वंनाशयिष्यतिसत्वरं॥२१॥यस्मादघर्षणात्सद्योविष्णुःकृष्णत्वमाप्तवान्॥समैनाकोतिदुर्धर्षेनभविष्यतिकिंवद॥२२॥शिवा
र्चनप्रसंगेनसतिष्ठत्यधुनाध्रुवं॥तस्मिन्समाप्तेमैनाकस्त्वशिक्षांकरिष्यति॥२३॥इंद्राधुनैवमैनाकंशरणंयासिचेत्तदा॥समेनाकःकृपासिंधुर्भवं
तंरक्षयिष्यति॥२४॥अन्यथाद्यैवमैनाकोभवंतमतिवीर्यवान्॥हत्वान्यस्मैस्वर्गलोकंदापयिष्यतिशंकरात्॥२५॥ ॥अगस्त्यउवाच॥ ॥इतीं
द्रस्तद्वचःश्रुत्वामैनाकंशरणंगतः॥पालयामाससमैनाकस्तमिंद्रंशरणागतं॥२६॥मैनाकेनेदृशीशक्तिःप्राप्तामृल्लिंगपूजया॥मृल्लिंगपूजयस्मात्सर्वा
भीष्टप्रदायकं॥२७॥मृल्लिंगपूजनात्पूर्वंबहवोब्रह्मवादिनः॥तत्वज्ञानंपरंप्राप्यशिवंप्रापुःशिवाज्ञया॥२८॥सर्वश्रुतिश्रुतंपुण्यंसर्वसंपद्विवर्धकं॥
आरोग्यदंपुष्टिदंचधन्यंमृल्लिंगपूजनं॥२९॥मृल्लिंगपूजनादन्यंनास्तिसर्वेप्सितार्थदं॥सत्यमित्याहभगवान्नंदिकेशायशंकरः॥३०॥मृल्लिंग
पूजनंश्रौतंसदास्वाभीप्सितार्थदं॥सत्यंसत्यमितिप्राहमंगलापिसुमंगला॥३१॥रत्नलिंगादपिश्रेष्ठंमृन्मयंलिंगमुत्तमं॥ततोधिकं
नार्मदंस्याद्रसजंचततोधिकं॥३२॥पुरारेवातटेरम्येमौद्गल्योमुनिपुंगवः॥जाबालश्रुतितत्वज्ञःशिवपूजापुरःस्थितः॥३३॥उद्धूल
नत्रिपुंड्राभ्यांरुद्राक्षैश्चविभूषितः॥श्रीरुद्रजपसंसक्तःपंचाक्षरजपप्रियः॥३४॥सदाशिवकथामेवसदाशृण्वन्विलोकयन्॥शिवलिंगं
समभ्यर्च्यमोदमानःस्थितःसदा॥३५॥तंतादृशंशिवरतंदृष्ट्वारेवानिवासिनः॥प्रणम्यविनयान्नम्राप्रपच्छुर्धर्मसंहितं॥३६॥ ॥
ऋषयउवाच॥ ॥मौद्गल्यमुनिशार्दूलवेदतत्वज्ञसत्तमं॥भुक्तिमुक्तिप्रदान्धर्मान्वदकारुणिकोत्तम॥३७॥क्ववामहेशःसान्निध्यंविशेषे
णाधितिष्ठति॥क्ववामहेश्वरोनित्यंपूजितोभुक्तिमुक्तिदः॥३८॥किंवामहेशपूजायांसाधनंश्रुतिसंमतं॥एतत्सर्वंविशेषेणवद
हेश्व

 मौनिशिरोमणे॥३९॥ ॥मौद्गल्य उवाच॥ ॥धन्या यूयं धर्मनिष्ठा भूतिभूषितविग्रहाः॥ रेवायां लिंगरूपिण्यां भवद्भिः स्थीयते यतः॥ 
 ॥४०॥ शिवलिंगमयी रेवा महेशस्यापरा तनुः॥ शिवो नार्मदलिंगेषु सर्वदाप्यधितिष्ठति॥४१॥ लिंगरूपी महादेवः शिवलिंगे समर्चितः॥
ददाति महदैश्वर्यं मोक्षं चांते द्विजोत्तमाः॥४२॥ नानाविधानि लिंगानि तान्युच्यंते मयाधुना॥ गोमेधिकाख्यमस्त्येकं लिंगं शंकरसंमतं॥
॥४३॥ पुष्परागाख्यमस्त्येकं लिंगं शंकरसंमतं॥ इंद्रनीलमयं लिंगं मौक्तिकं लिंगमेव च॥४४॥ वैद्रुमं लिंगमस्त्येकं पद्मरागमयं तथा॥ व
ज्रवैडूर्यलिंगानि तथा धातुमयानि च॥४५॥ काश्मीरलिंगमस्त्येकं स्फाटिकं लिंगमस्ति च॥ अन्नलिंगं धान्यलिंगं लिंगं गोमयनिर्मितं॥४६॥
लावणं लिंगमस्त्येकं फलदारुमयं तथा॥ भस्मनार्चितं लिंगं मृन्मयं लिंगमस्ति च॥४७॥ नर्मदाजलसंभूतं लिंगमेकं मुनीश्वराः॥ शिलाज
न्यं रसोत्पन्नं लिंगं जाबालचोदितं॥४८॥ लिंगेष्वेतेषु सर्वेषु लिंगत्रयमनुत्तमं॥ तत्र संपूजितः शंभुः प्रसीदति न संशयः॥४९॥ मृद्बाणरसलिंगानि
श्रेष्ठान्येतेषु वस्तुतः॥ त्रिष्वाद्याद्बाणमुत्कृष्टं रसलिंगं ततोधिकं॥५०॥ विद्युद्दोमुखवल्कार्ये मृन्मयं लिंगमुत्तमं॥ एवमन्यानि लिंगानि कर्त्त
व्यानि मनीषिभिः॥५१॥ वक्ष्येहं बाणलिंगस्य लक्षणं श्रुतिचोदितं॥ बाणलिंगं श्रुतिप्रोक्तं तल्लक्षणमपि द्विजाः॥५२॥ त्रिपंचसप्तधा यत्तु तुला तु
लितमास्तिकाः॥ नयाति समतां तत्तु बाणलिंगमिति श्रुतं॥५३॥ सपीठमस्त्वपीठं वा बाणलिंगं शिवात्मकं पूजनीयं प्रयत्नेन भुक्तिमुक्तिफलेप्सु
भिः॥५४॥ न प्रतिष्ठाद्यपेक्षापि बाणलिंगस्य वस्तुतः॥ यतः कुतश्चिदानीय बाणलिंगं प्रपूजयेत्॥५५॥ नर्मदे नर्मदालिंगे निवसाम्यहमन्व
हे॥ संदेहं माकुरुष्वेति प्राह शंभुर्यतः पुरा॥५६॥ शिवलिंगसहस्राणां पूजया यत्फलं लभेत्॥ ततः शतगुणं पुण्यं लिंगे रत्नादिसमुद्भवे॥५७॥
तेभ्यः शतगुणं पुण्यं रत्नलिंगस्य पूजने॥ गोमेदकादिलिंगानि रत्नलिंगानि सुव्रताः॥ रत्नलिंगसहस्राणां पूजया यत्फलं लभेत्॥ ततः शत
गुणं पुण्यं धातुलिंगस्य पूजने॥५९॥ धातुलिंगेष्वपि श्रेष्ठं हेमलिंगं श्रुतिश्रुतं॥ तत्र संपूजितः शंभुः प्रसादति न संशयः॥६०॥ धातुलिंग 
सहस्राणां पूजया यत्फलं लभेत्॥ ततः शतगुणं पुण्यं मृत्तिकालिंगपूजने॥६१॥ मृल्लिंगानां सहस्रस्य पूजया यत्फलं लभेत्॥ ततः श
तगुणं पुण्यं बाणलिंगस्य पूजने॥ अनंतबाणलिंगानां पूजया यत्फलं लभेत्॥ ततोनंतगुणं पुण्यं रसलिंगस्य पूजने॥६३॥ रसलिंगसमं

लिंगंनास्तिनश्रूयतेपिच।।रसलिंगंशिवःसाक्षात्सच्चिदानंदलक्षणः।। ६४।।रसलिंगस्यमाहात्म्यंजानातिभगवान्छिवः।।तदन्येनविजानंतिसत्यंसत्यं
नसंशयः।।६५।।बहवोमुनयःपूर्वंरसलिंगार्चनाद्द्विजाः।। मोक्षंप्रापुरनायासाद्विनायागादिकर्मभिः।। ६६।।शिवास्स्वयमुमाकांतंरसलिंगस्वरूपि
णं।।पूजयामासतेनैवप्रसन्नोभून्महेश्वरः।। ६७।। रसःसाक्षान्महादेवोरसोवैसइतिश्रुतिः।।अतोरसात्मकंलिंगंजाबालेबहुधाश्रुतं।। ६८।।रसःस्र
ष्टोमहेशेनभक्तानुग्रहकांक्षया।।तत्कृतंलिंगमुत्कृष्टंसर्वाभीष्टफलप्रदं।। ६९।। यंयंकामयतेकामंरसलिंगस्यपूजया।।तंतमाप्नोतिविप्रेंद्राःस
त्यंसत्यंनसंशयः।।७०।।सर्वलिंगोत्तमंलिंगंरसलिंगमनुत्तमं।।ततस्तत्पूजयाशंभुःसाक्षात्संपूजितोभवेत्।।७१।। रसलिंगार्चनंश्रेष्ठंसर्वलिंगार्च
नादपि।।ततस्तदेवयत्नेनपूजनीयंमनीषिभिः।।७२।।रसलिंगंयदिभवेत्पूजनीयंतदन्वहं।।तदभावेपूजनीयंबाणलिंगंप्रयत्नतः।।७३।।बाणलिं
गंयदिगृहेनभविष्यतिसर्वथा।।पूजनीयंप्रयत्नेनमृत्तिकालिंगमास्तिकैः।।७४।।तदभावेपूजनीयंधातुलिंगंप्रयत्नतः।।तदभावेपूजनीयंप्रय रत्नलिंगं
त्नतः।।७५।।काश्मीरलिंगमभ्यर्च्यंतदभावेप्रयत्नतः।।स्फाटिकंलिंगमभ्यर्च्यंतदभावेप्रयत्नतः।।७६।।तदभावेपूजनीयंशिलालिंगं
प्रयत्नतः।।तदभावेपूजनीयंदारुलिंगंप्रयत्नतः।।७७।।तदभावेपूजनीयंअन्नलिंगंप्रयत्नतः।।तदभावेतुभूत्यादिलिंगान्यर्च्या
प्रयत्नतः।।७८।।यादृशंतादृशंवास्तुशिवलिंगंशिवात्मकं।।पूजनीयंप्रयत्नेनद्विजैर्वेदोक्तमार्गतः।।७९।।शैवःपंचाक्षरोमंत्रोयःसर्वश्रुतिसंश्रुतः।।
तेनैवमंत्रराजेनपूजनीयोमहेश्वरः।।८०।।श्रीमत्पंचाक्षरेणैवपूजितःश्रीमहेश्वरः।।ददातिपरमामृद्धिंमोक्षंचांतनसंशय।।८१।।श्रीमहादेवमाराध्ये
लिंगरूपिणमव्ययं।।पंचाक्षरेणसंपूज्यमुक्ताःपूर्वमनंतशः।।८२।।श्रौतेनमनुनाकार्यंश्रौतंलिंगार्चनंद्विजाः।।श्रौतोमनुर्मंत्रराजःशैवःपंचाक्षरःस्मृ
तः।।८३।।वैदिकैर्यत्नतःकार्यंवैदिकंलिंगपूजनं।।अन्यथारौरवंयांतियावदार्चंद्रतारकं।।८४।।लिंगंपूजैवकर्त्तव्यावैदिकैर्वेदमंत्रतः।।शिवलिं
गान्यपूजायांवैदिकानाधिकारिणः।।८५।।द्विजाःकलौकरिष्यंतिशिवलिंगान्यपूजनं।।तेरौरवंप्रयास्यंतिसत्यंसत्यंनसंशयः।।८६।।याव
त्कलिरायातितावद्यूयंप्रयत्नतः।।शिवलिंगार्चनंकृत्वालभध्वंमुक्तिमास्तिकाः।।८७।।श्रौतंशिवार्चनंयस्मात्कर्त्तव्यंमुक्तिकांक्षिभिः।।श्रौत
लिंगार्चनत्यागेपतंतिनरकेध्रुवं।।८८।।चरलिंगानिपूज्यानिस्थावराण्यपियत्नतः।।त्रिकालंस्थावरंलिंगंपूजनीयंप्रयत्नतः।।८९।।कृत्वास्था
वरलिंगार्चाचरलिंगार्चनंविना।।भोक्तव्यंस्थावरार्चांतुविनाभुंजीतनद्विजाः।।९०।।स्थावरलिंगमभ्यर्च्यस्पृष्ट्वाचलंहृदिद्विजैः।।भोक्तव्यमन्यथाया

तिनरकंसूतकंविना॥९१॥ नयत्रस्थावरंलिंगंतत्रस्थातव्यमेवन॥ यतःस्थावरलिंगस्यपूजानित्यंद्विजन्मनां॥९२॥ सर्वथास्थावरंलिंगंय
दिनस्यात्तदाद्विजैः॥ चरलिंगमुपस्पृश्यजप्योरुद्रोष्टधाद्विजैः॥९३॥ अथवानार्मदंलिंगमनुलिप्ते ऽवनीतले॥ स्थापयित्वापूजनीयंशैवेनमनु
नाद्विजैः॥९४॥ पूजांतेतत्पुनर्ग्राह्यंनार्मदंलिंगमास्तिकैः॥ नीत्वान्यत्रापिसंस्थाप्यपूजनीयंपुनःपुनः॥९५॥ यदिनार्मदलिंगस्याप्यभावःस्या
त्तदाद्विजैः॥ सपूज्यंपार्थिवंलिंगंस्थापयित्वा ऽवनीतले॥९६॥ मृल्लिंगार्चनमात्रेणस्थावरंलिंगमर्चितं॥ स्थावरत्वंचमृल्लिंगेस्थावरत्वस्य
कल्पनात्॥९७॥ सद्योजातादिभिर्मंत्रैःस्थापयित्वास्थिरोभव॥ गृहाणपूजामितिचस्थावरत्वंप्रकल्पयेत्॥९८॥ नित्यंबिल्वदलैःकार्यंभस्म
नाचशिवार्चनं॥ धूपदीपादिकंसर्वंकल्पनीयंस्वशक्तितः॥९९॥ शिवलिंगार्चनंपुण्यंभुक्तिदंमुक्तिदंतथा॥ काशीप्राप्तिकरंचैतत्किंनिर्वा
णंनयच्छति॥१००॥ शिवलिंगार्चनाद्विप्राःकाशीतत्वंचबुध्यते॥ तादृशंतद्भुक्तिदंचमुक्तिदंचभविष्यति॥१॥ पुराणपुण्यनि
धिर्नामब्राह्मणोवेदवित्तमःशिवार्चकः॥ स्थितस्तस्यमाहात्म्यंवेद्म्यहंद्विजाः॥२॥ सबिल्वदलपुष्पाद्यैःभस्मनाचमहेश्वरं॥ र
सलिंगात्मकंनित्यंपूजयामाससादरं॥३॥ सनित्यंपूजयामासबाणलिंगानिसादरं॥ पार्थिवान्यपिलिंगानिपूजयामासभ
क्तितः॥४॥ शिवव्रतानिसर्वाणिसचकारयथाविधि॥ शिवक्षेत्राणिसर्वाणिसददर्शास्तिकोनमः॥५॥ शिवार्चनोत्पन्नपुण्या
त्सतुपुण्यनिधिर्द्विजः॥ शिवक्षेत्राणिसर्वाणिदृष्ट्वाकाशीमवापच॥६॥ काश्यांततःस्थितिंचक्रेशैवधर्मपरायणः॥ विश्वे
श्वरंवेदवेद्यंपूजयामाससंततं॥७॥ तत्रांतर्गृहयात्रादिकर्मकृत्वायथाक्रमं॥ वायमात्राशनोभूत्वाविश्वेशार्चापरोभवत्॥ 
॥८॥ एवंस्थितंपुण्यनिधिंभृगुःसंपूज्यसादरं॥ काशीप्रभावममलंवदस्वेत्यब्रवीद्द्विज॥९॥ इतितद्वचनंश्रुत्वापुण्यःपुण्य
विधिःततः॥ काशीप्रभावममलंज्ञात्वावक्तुंसमारभे॥१०॥ ॥पुण्यनिधिरुवाच॥ ॥काशीत्यस्यमहामतेःश्रुतिशिरो
रत्नस्यतत्वंमयानज्ञातंमुनिभिःसुरैरपिपरिज्ञातंमुकुंदादिभिः॥ नज्ञातंश्रुतिभिश्चनैवविदितंसिद्धैश्चवेदेश्वरःस्तत्वंत
च्छिवतत्ववत्तदितरैर्ज्ञेयंकथंतद्भवेत्॥११॥ याकाशीहृदियस्यदीपकलिकेवाभातितस्यैवसाविज्ञेयाभवतिस्फुटंतदि

तरैर्नज्ञायतेसर्वथा॥ साम्रात्येवतथामहेशहृदयेविज्ञायतेसाततस्तेनेशेनपरात्परेणविभुनाविश्वाधिकेनध्रुवं॥१२॥ यस्यामंतकभीतिलेशरहिताः कार्त्तांत
वार्त्ताविनानिःशंकंनिवसंतिसंततमुमाकांतार्चकाःशांकराः॥ सेयंपाशुपतस्थली मुनिवरैराराधितासंस्तुतावेदांतैःशिवरूपिणीतिसततंकाशीतिका
शीतिच॥१३॥यस्यांदेहविसर्जनेसतिमहादेवःपरंतारकंव्याचष्टेशिवतत्परायविलुठत्संसारविच्छित्तये॥तद्रूपेभगवानवेतिभगवानरुद्रस्तदन्योन
वायोवैरुद्रइतिश्रुतिःतदितरंनैवाभिवक्तिध्रुवं॥१४॥विश्वेशाभिधलिंगरूपममलंधृत्वाविमुक्तेसदाशैवांतारयितुंमहाघनिचयान्संसारतो
पीश्वरः॥ मायाजालविशोधनायसततंसांबोंबयासंस्थितः काशीतत्वविदुत्तमःशिवतमःसर्वोत्तमःशंकरः।।१५॥काशीनामसुधा
निधिःसुरगणैःसंसेवितःसादरंजाबालादिसमस्तवेदनिकरैःसमावस्तुतःसंततं॥ नानातीर्थसमन्वितःश्रुतिमतोलिंगैरनेकैर्वृ
तोदृष्टोहंतिसमस्तपातकगणाःध्यातस्तुनिर्वाणदः॥१६॥ काशीत्येवमहामनुःश्रुतिपथंप्राप्तोखिलापद्गणान् दूरीकृत्यनरंकरोतिविम
लंमुक्तिंददातिस्वतः॥ वेदांतैरखिलैस्तुतः सतुमनुःशैवस्ततस्तंमनुंवेदोवेदशिवोथवातदितरोनोवेदसत्यंध्रुवं॥१७॥ काशीवीथिषु
संचरन्प्रतिपदंयागायुतानांफलंसंप्राप्नोतिनराःधर्मोपिकिमुतःस्वस्थःशिवाराधकः॥ तस्मादादरतोनिशांशिवपुरीसेव्यामृडानी
पतिःसेव्यःसंततमंतकांतकमहादेवेतिसंवादिभिः॥१८॥ संसाराद्भुतसागरेषुपतितताःक्लिश्यंतियेसंततंतेकाशींतरीमाश्रुशंभुकृप
यासंप्राप्यतीर्त्वेवतान्॥ यातायातपरिश्रमैर्बहुतरैःदुस्तारसंसारजैर्निर्मुक्ताःशिवमेवसांबमनघाःसंप्राप्नुवंतिध्रुवं॥१९॥ बद्धःता
वदनेकदुष्कृतचयैःसंसारपाशैर्नरोनानादुःखयुतैरनुक्षणमभेद्यापत्समूहैरपि॥ यावन्नाप्यमहेशसांद्रकृपयाकाशींमहेशाश्र
यांकाशींप्राप्यतुमुच्यतेदृढतरैःसंसारपाशैर्नरः॥२०॥ मर्त्यास्तावदिहभ्रमंतिसततंसंसारघोरेह्रदेपापावर्त्तसमन्विते दुरित
भिरिंगत्तरंगावृते॥ यावद्विश्वपतिःप्रियसुरनताकाशीनसंप्राप्यतेकाशींप्राप्यतुनभ्रमंतिमनुजाःसंसारघोरेह्रदे॥२१॥ काशींप्राप्य
कुयोनिचक्रकुहरंनप्राप्नुवंतिध्रुवंसत्यंसत्यमिहोच्यतेभुजयुगंसम्यक्समुद्धृत्यच॥ वेदास्तत्रतुसाक्षिणःश्रुतिशिरोवेद्योथसा
क्षीशिवः॥विष्णुब्रह्मपुरोगमाःसुरगणायेचात्रतेसाक्षिणः॥२२॥ काशीमाश्रुसमाश्रितःशिवमनात्वंतंभवेद्यःसदासानंदंच
समस्तदुःखनिकरंसंहृत्यशुद्धःशिवं॥ संप्राप्नोतिनसंशयःश्रुतिरियंकाशींसमाश्रीयतां। विश्वेशःसमुपास्यतामितियतोडिंडीरवो

 

वैदिकः ॥२३॥ घोरापद्यपिशांभवैः श्रुतिमता काशी सुराराधिता। नित्या ज्यान्त्रिपुरारिराजनगरी काशी यतो मुक्तिदा ॥ त्यक्त्वा सा यदि
मोहतः श्रुतिमता काशी तदा दुर्लभा ॥ मुक्तिः सत्यमितिश्रुतिश्रुतिरियं मान्या सदा वैदिकैः ॥२४॥ श्रीविश्वेश्वरमप्रमेयममलं वेदांतवेद्यं
प्रभुं लिंगाकारमुपाश्रितं श्रुतिमतं काश्यां तदा संस्थितं ॥ यः संत्यज्य दिगंतरं प्रतिगतो माहात्म्यमुक्त्यंगना ॥ पादाग्रेण हतः पतत्यनुदिनं सं
सारकूपे ध्रुवं ॥२५॥ तं मन्ये पुरुषाधमं नरखरं संसारदुःखाश्रयं ॥ निर्भाग्यं परदुःखदाननिरतं पापौघमोहाश्रयं ॥ यः काशीं न निवेव
ते शिवमुमाकांतं न संसेवते ॥ संसारार्णवतारकं प्रभुमनाद्यंतं भवानीपतिं ॥२६॥ तं मन्ये पुरुषोत्तमं शिवमतं निर्मूलिताघद्रुमं ॥
वेदांतार्थविचारपारगहितं सौभाग्यवंतं सदा ॥ यः काशीं समुपासते शिवमनाद्यंतं भजेत्संततं ॥ भस्मालंकृतविग्रहः शिवमहादेवेति मं
त्रं जपन् ॥२७॥ काश्येका जगतीतले श्रुतिमता मुक्तिप्रपेति श्रुता गौरीशंकरसंमता मुनिवरैः वेदैश्च नित्यं स्तुता ॥ काशीतो धिकमन्यतीर्थम
भितो वेदेषु नश्रूयते तीर्थानामधिदेवतेयमनघा काशी महेशप्रिया ॥२८॥ काश्यां विर्णपिता शिवः परतरं पंचाक्षरं तारकं ॥ तच्छैव प्रणवा
न्वितं श्रुतिशिरोरत्नं तदित्यादरात् ॥ दूर्वासादिसमस्तमौनिनिकरैः काशी समाराधिता सेयं शंभुसमाश्रिता शिवपुरी मुक्त्यंगना संश्रया ॥
॥२९॥ काशीवीथिषु मुक्तिरूपवनिता विश्वेश्वरप्रेरिता संचारं समुदं करोति परितः संवीक्ष्य शैवोत्तमान् ॥ एते मामभियांतु सत्वरमिह प्र
ध्वस्तदुःखाब्धयः श्रीविश्वेशकृपावशादिति सदा वेदांतवाक्यस्तुता ॥३०॥ एतद्वेद रहस्यमाहुरभितो वेदांतवाक्यैर्यतो निश्चित्योक्तमने
कवेदहृदयं प्रागेव मे चोदितं ॥ देवीषण्मुखनंदिभृंगिरिटिभिः संसेविते नादरादाराध्येन महेश्वरेण जगतामीशेन सत्यं ध्रुवं ॥३१॥ ॥
मौद्गल्य उवाच ॥ ॥ इति तद्वचनं श्रुत्वा भृगुः काश्यामुवास सः ॥ काशीप्रभावो विज्ञातस्तेन लिंगार्चनान्मुने ॥३२॥ शिवालिंगार्चनफलं मया 
वक्तुं न शक्यते ॥ शिवलिंगार्चनफलं भगवान्वेद शंकरः ॥३३॥ शिवलिंगार्चनं दानं शिवलिंगार्चनं तपः ॥ शिवलिंगार्चनं ध्यानं शिवलिंगा 
र्चनं जपः ॥३४॥ ॥ अगस्त्य उवाच ॥ ॥ इति तद्वचनं श्रुत्वा मुनयस्ते ततः परं ॥ शिवार्चनपरा जाता भस्मोद्धूलितविग्रहाः ॥ ३५॥ शिव
लिंगार्चनं नित्यं तदकृत्वैव यो वसेत् ॥ स याति नरकं घोरं कल्पांतेपि विमुच्यते ॥३६॥ पुरा वशिष्ठो मोहेन त्यक्त्वा भस्मानुलेपनं ॥ त्यक्त्वा लिंगार्च
नं शिष्यं विलोक्याहाति दुःखितः ॥३७॥ ॥ वशिष्ठ उवाच ॥ ॥ हाहा शिष्यं कथं त्यक्त्वं विभूत्युद्धूलनं त्वया ॥ कथं शिवार्चनं त्यक्तं वेदवे

रांतबाधितं ॥ ३८ ॥ त्यक्तलिंगार्चनैर्विप्रैस्त्यक्तभस्मानुलेपनैः ॥ प्राप्यते यातना घोरा सततं कल्पकोटिषु ॥ ३९ ॥ येन त्यक्तो भस्मयोगो ये
न त्यक्तं शिवार्चनं ॥ तस्य कल्पशतांतेपि मुक्तिरत्यंत दुर्लभाः ॥ ४० ॥ भूतिलिंगार्चने त्यक्त्वा करोत्युग्रे तपो निशं ॥ तथापि तत्तपस्तस्य फलदं
न भविष्यति ॥ ४१ ॥ ॥ अगस्त्य उवाच ॥ ॥ इत्युक्त्वा शिष्यसंयुक्तो वसिष्ठो वेदवित्तमः ॥ ययौ यमसभां सद्यः शिवनामानि कीर्त्तय
न् ॥ ४२ ॥ स सभासद्यमः श्रुत्वा शिवनामानुकीर्त्तनं ॥ अभ्युत्थाय वसिष्ठं तं पूजयामास सादरं ॥ ४३ ॥ ततः प्रहृष्टहृदयो वशिष्ठो यम
पूजितः ॥ विधाय कुशलप्रश्नमन्यदप्याह सादरं ॥ ४४ ॥ ॥ वसिष्ठ उवाच ॥ ॥ यमात्रा ऽगणिताः संति नरकेष्वति दुःखिताः ॥ पच्य
माना काथ्यमाना दह्यमानाश्च किंकरैः ॥ ४५ ॥ एतैः किं किं कृतं पापं पुरा नरकसाधनं ॥ कीदृशैर्भुज्यते पापैर्घोरा नरकयातना ॥ ४६ ॥ यमे
दं मह्यमखिलं विचार्य वद सादरं ॥ येन पापान्निवृत्तिस्स्यात् यातनासाधनान्मम ॥ ४७ ॥ ॥ अगस्त्य उवाच ॥ ॥ इति तद्वचनं श्रुत्वा द्द
ष्ट्वा सनरकस्थितान् ॥ दह्यमानान्पच्यमानानुवाच वचनं तदा ॥ ४८ ॥ ॥ यम उवाच ॥ ॥ सर्वकामप्रदं श्रौतं सुलभं लिंगपूजनं ॥
पुरा त्यक्तं दुराचारै रेतैर्नरकवासिभिः ॥ ४९ ॥ त्यक्त्वा लिंगार्चनं श्रौतं पतिता नरकालये ॥ नैतेषां ब्रह्मकल्पांतेप्यस्यान्मोक्षो न दृश्य
ते ॥ ५० ॥ मोक्षोस्ति ब्रह्महादीनां कल्पांते ब्रह्मणा सह ॥ त्यक्तलिंगार्चनानां तु मोक्षो नास्त्येव सर्वथा ॥ ५१ ॥ त्यक्तलिंगार्चनानां चेन्नरकान्नि
र्गमो भवेत् ॥ तदा समुद्रे विंध्याद्रिः प्लवेत्काष्ठकरं उवत् ॥ ५२ ॥ त्यक्तलिंगार्चनानां चेन्नरकान्निर्गमो भवेत् ॥ तदोत्तमाश्वो जायेत गा
र्दभादतिकोमलात् ॥ ५३ ॥ त्यक्तलिंगार्चनानां चेन्नरकान्निर्गमो भवेत् ॥ तदा मृगेंद्रो जायेत हरिणीशावकादपि ॥ ५४ ॥ त्यक्तलिं
गार्चनानां चेन्नरकान्निर्गमो भवेत् ॥ तदा चांडालकन्यायां जायते ब्राह्मणोत्तमः ॥ ५६ ॥ त्यक्तलिंगार्चनानां चेन्नरकान्निर्गमो भवेत् ॥
तदा नराणां भक्ष्यं स्यात्सुरीमांसघृतान्नवत् ॥ ५७ ॥ त्यक्तलिंगार्चनानां चेन्नरकान्निर्गमो भवेत् ॥ तदा मुखान्निः सरेयुर्मला मूत्र
समन्विताः ॥ ५८ ॥ त्यक्तलिंगार्चनानां चेन्नरकान्निर्गमो भवेत् ॥ तदा शृंगाणि जायेरन्नराणां नेत्रगोलकात् ॥ त्यक्तलिंगार्चना
नां चेन्नरकान्निर्गमो भवेत् ॥ तदोत्पत्तिः शिलायां स्यादंकुराणां मृदं विना ॥ ६० ॥ त्यक्तलिंगार्चनानां चेन्नरकान्निर्गमो भवेत् ॥ तदा
घ्राणेन गृह्येत विना श्रोत्रं गजध्वनिः ॥ ६१ ॥ त्यक्तलिंगार्चनानां चेन्नरकान्निर्गमो भवेत् ॥ तदा श्रोत्रेण गृह्येत घटादिर्नयनं विना ॥

४ १३ तदा गजेंद्रो जायेत सूकरादपि कोमलात् ॥ ५५ ॥ त्यक्तलिंगार्चनानां चेन्नरकान्निर्गमो भवेत् ॥

सां० ॥ ६२ ॥ त्यक्तलिंगार्चनानां चेन्नरकान्निर्गमो भवेत् ॥ तदा नेत्रेण गृह्णेत गंधो घ्राणेंद्रियं विना ॥ ६३ ॥ त्यक्तलिंगार्चनानां चेन्नरकान्निर्गमो भवेत् ॥ उ-स-पू-
६२ तदा घ्राणेन गृह्णेत रसो जिह्वेंद्रियं विना ॥ ६४ ॥ त्यक्तलिंगार्चनानां चेन्नरकान्निर्गमो भवेत् ॥ तदा स्पर्शोपि गृह्णेत रसनेन त्वचं विना ॥ ६५ ॥
त्यक्तलिंगार्चनानां चेन्नरकान्निर्गमो भवेत् ॥ तदा त्वचैव गृह्णेत बुध्या धारो विना मनः ॥ ६५ ॥ तस्मात्त्यक्तशिवार्चानां निष्कृतिर्नरकालयात्
नास्त्येव ब्रह्मकल्पांते प्येतत्सत्यं न संशयः ॥ ६६ ॥ येतिष्ठंति भ्रमेणापि विहाय शिवपूजनं ॥ ते कल्पांतेपि नत्याज्या नरकेभ्यो न संशयः ॥ ६७ ॥
भस्मानुलेपनं त्यक्त्वा येतिष्ठंति नराधमाः ॥ ते कल्पांतेपि नत्याज्या नरकेभ्यो न संशयः ॥ ६८ ॥ रुद्राक्षधारणं त्यक्त्वा येतिष्ठंति नराधिमाः ॥ ते कल्पां० ॥
येन कुर्वंति यत्नेन श्रीमहादेवचिंतनं ॥ ते कल्पां० ॥ ७२ ॥ येन कुर्वंति यत्नेन महादेवस्तुतिं मुदा ॥ ते कल्पां० ॥ ७३ ॥ येन कुर्वंति यत्नेन श्रीमहादेव
वीक्षणं ॥ ते कल्पांते० ॥ ७४ ॥ श्रीमहादेवनैवेद्यमन्वहं येन भुंजते ॥ ते कल्पां० ॥ ७५ ॥ शिवाभिषेकपानीयमन्वहं न पिबंति ये ॥ ते कल्पांतेपि न
त्याज्या नरकेभ्यो न संशयः ॥ ७६ ॥ शिवभक्तविहीना ये ते दंड्या मम सर्वदा ॥ तदन्ये शिवभक्ता ये ते पूज्या मम सर्वदा ॥ ७७ ॥ अनंतब्रह्मक
ल्पांतेप्यशैवानां महामुने ॥ न निवृत्तिरघोरेभ्यो नरकेभ्यो न संशयः ॥ ७८ ॥ ऊर्ध्वपुंड्रं धृतं पूर्वमेतैः श्रुतितिरस्कृतं ॥ अत एते तदाकारशस्त्र
कुंडे निपातिताः ॥ ७९ ॥ लिंगाकारशिलाभिन्ना शिलार्चा यैः कृता पुरा ॥ अतस्त तप्तशिलापृष्ठे तिष्ठंत्यग्निहतप्रभाः ॥ ८० ॥ महेश्वरार्चनं पूर्वं एतै
र्नकृतमादरात् ॥ अतस्तप्तकटाहेषु पातिताः संति सर्वदा ॥ ८१ ॥ प्रणामा न कृता दुष्टैरेतैस्त्रिपुरघातिनः ॥ अतस्तप्तायसस्तंभांस्तिष्ठंत्या
श्लिष्य सर्वदा ॥ ८२ ॥ भस्मानुलेपनं त्यक्त्वा स्थितमेतैः पुरातनैः ॥ विष्ठानुलेपनं कृत्वा तिष्ठंति भटताडिताः ॥ ८३ ॥ प्रदोषेषु महादेवो नैतैः
संसेवितो मुदा ॥ अत एव भ्राष्ट्रमध्ये भर्जते बहुधा सदा ॥ ८४ ॥ एतैर्गिरिशनैवेद्यं न भुक्तमपि पावनं ॥ अतो विष्ठां क्रिमिपूर्णां भक्षयंति
मुहुर्मुहुः ॥ ८५ ॥ एतैर्न पीतं यत्नेन शिवतीर्थमघापहं ॥ अत एते पिबंत्यत्र लालाश्वानकवक्त्रजां ॥ ८६ ॥ एतैर्महेशनिर्माल्यं नाघ्रातमति श्रीशिव
यत्नतः ॥ अत एवामेध्यगंधं तिष्ठंत्याघ्राय सर्वदा ॥ शिवरात्रिव्रतं त्यक्त्वा स्थितमेतैर्दुरात्मभिः ॥ अत एव महाघोरे कुंभीपाके निपातिताः ६२
॥ ८८ ॥ एतैर्भुक्तं दिवा पूर्वं स्वेच्छया सोमवासरे ॥ अत एवातिसंतप्ते विषकुंडे निपातिताः ॥ ८९ ॥ कालाष्टमीव्रतं त्यक्तमेतैः पूर्वं दुरात्मभिः ॥
मूत्र अत एवातिसंतप्ते विषकुंडे निपातिताः ॥ ९० ॥ कालाष्टमीव्रतं त्यक्तमेतैः पूर्वं दुरात्मभिः ॥ अत एवातिसंतप्ते मूत्रकुंडे निपातिताः ॥
एतैरुक्ता देवदेवे शिवे विष्ण्वादिसाम्यता ॥ निपीड्यंते शरोत्करैः ॥ ९१ ॥

साधारणत्वेनयः शिवंमनुतेप्रभुं ॥ ससंततंतप्तशस्त्रैः पीडितोनाधितिष्ठति ॥ ९२ ॥ एतादृशान्दुराचारान् अनंतान्नरकेऽस्थितान् ॥
दृष्ट्वाहमपिक्लिश्यामिकदाचिन्मुनिसत्तम ॥ ९३ ॥ संतिबिल्वानिहस्तेनप्राप्यानिशिवपूजने ॥ नैवासीन्मतिरेतेषांस्थितानोनरकाल
ये ॥ ९४ ॥ जलमस्त्यमलंलिंगेदातुंशक्तिरपिस्थिता ॥ तथापितत्परित्यागात्पतंतिनरकेजनाः ॥ ९५ ॥ यथेष्टंभुविभस्मास्तिसर्वपातकशो
धकं ॥ तथापित० ॥ ९६ ॥ महादेवस्तुतिंकर्त्तुंवागस्तिवशवर्त्तिनी ॥ तथा० ॥ ९७ ॥ शिवप्रदक्षिणंकर्त्तुंस्ववशौचरणौस्थितौ ॥ तथापि० ॥
॥ ९८ ॥ शिवायप्रणतिंकर्त्तुंशरीरंस्ववशंस्थितं ॥ तथा० ॥ ९९ ॥ महेशकीर्त्तनंकर्त्तुंरसनास्ववशास्थिता ॥ तथा० ॥ १०० ॥ महेशस्म
रणंकर्त्तुंस्वांतंचस्ववशेस्थितं ॥ तथा० ॥ १ ॥ हाहात्यक्तशिवाचारानराःसर्वेपिपामराः ॥ कथंपतंतिनरकेशलभाइवपावके ॥ शैवा
र चारविहीनानामेतेषांनंकालयात् ॥ नकदापिमुनिश्रेष्ठनिष्कृतिःसत्यमुच्यते ॥ ३ ॥ विष्णुरस्त्वथवाब्रह्माशैवधर्मविवर्जितः ॥ त-
स्यापिनरकाद्घोरान्निष्कृतिर्नमुनेध्रुवं ॥ ४ ॥ शैवधर्मरतामर्त्याभित्वांतस्सूर्यमंडलं ॥ प्रयांतिशिवसायुज्यंस्वेष्टबंधुसमन्विताः ॥ ५ ॥
मुनेचरमदेहानांशैवाचाररताऽत्मनां ॥ महेश्वरप्रसादेनमुक्तिर्भवतिवस्तुतः ॥ ६ ॥ मृल्लिंगपूजनंश्रौतंमोक्षदंसुलभंमुने ॥ कृतंयेनप्रयत्ने
नसमुक्तोभवतिध्रुवं ॥ ७ ॥ मृल्लिंगपूजनंश्रौतंसर्वकामप्रदंमुने ॥ कृतंयेनप्रयत्नेनसमुक्तोभवतिध्रुवं ॥ ८ ॥ मृल्लिंगपूजामात्रेणसद्य
स्तुष्यतिशंकरः ॥ संतुष्टःसद्दात्येवभुक्तिंमुक्तिंचवस्तुतः ॥ ९ ॥ मृल्लिंगपूजनंश्रौतंराज्यस्वर्गापवर्गदं ॥ तत्कल्पलतिकेवेष्टंकिंकिंनै
वप्रयच्छति ॥ १० ॥ शिवैकशरणाःशैवाःशिवलिंगार्चनप्रियाः ॥ भुक्त्वास्वाभीप्सितान्भोगानंतेमुक्ताभवंतिच ॥ शैवेभ्यएवदास्यामिमुक्ति
मित्याहशंकरः ॥ अतोमुनेतदन्यानांमुक्तिरत्यंतदुर्लभा ॥ १२ ॥ येनचीर्णंप्रयत्नेनश्रौतंपाशुपतंव्रतं ॥ तेनलब्धामुक्तिकांतामहादेवप्र
सादतः ॥ १३ ॥ येनपंचाक्षरोजप्तोभस्मोद्धूलनपूर्वकं ॥ तेनल० ॥ १४ ॥ येनार्चितोमहादेवोभस्मोद्धूलनपूर्वकं ॥ तेनल० ॥ १५ ॥ येनस्मृतो
महादेवोभस्मोद्धूलनपूर्वकं ॥ तेनल० ॥ १६ ॥ येनध्यातोमहादेवोभस्मोद्धूलनपूर्वकं ॥ तेन० ॥ १७ ॥ बहुनोक्तेनकिंवाक्यंसत्यमेतन्मुनेश्रुणु ॥
सर्वान्देवान्परित्यज्यशिवःपूज्योमुमुक्षुभिः ॥ १८ ॥ ॥ अगस्त्यउवाच ॥ ॥ इत्युक्तंतद्वचःश्रुत्वावसिष्ठोहृष्टमानसः ॥ सशिष्यः
स्वाश्रमाभ्यासंयमेनप्रेरितोययौ ॥ १९ ॥ ततःपरंयमेनोक्तंवचःश्रुत्वाखिलार्थदं ॥ वसिष्ठशिष्यशश्वंतोलिंगपूजापरोभवत् ॥ २० ॥

 सकृत्वामृन्मयंलिंगंसर्वाभीष्टप्रदायकं॥ बिल्वपत्रैर्भस्मनाच पूजयामासभक्तितः॥२१॥ ततोमृन्मयलिंगस्यपूजांकृत्वाशिवंस्मरन्॥ त्य 
क्त्वादेहंशिवंप्रापसर्वदेवशिखामणि॥ अतोमृन्मयलिंगस्यपूजनंसर्वकामदं॥ तुष्टोभवतिगौरीशोयतोमृल्लिंगपूजया॥२३॥ संपूज्यमृ
न्मयंलिंगंयोनित्यमनुमोदते॥ तद्वारिमत्तमातंगास्तिष्ठंत्येवामितामुने॥२४॥ मुनेपार्थिवलिंगस्यपूजनंशंकरप्रियं॥ धर्मार्थकाममो
क्षाणामचिरेणैवदायकं॥२५॥ भस्मगोमयवार्क्षादिलिंगान्यपिसनातन॥ पूजनीयानियत्नेनधनधान्यादिवांछिभिः॥२६॥ मुने
भस्मादिलिंगानिमोक्षदान्यपिवस्तुतः॥ भवंतिभक्त्यतुष्ट्यर्थंधनधान्यान्नदान्यपि॥२७॥ एकैकमपितल्लिंगंधनधान्यप्रदंमुने॥
मोक्षदंचतथाप्युक्तफलंभवतितत्क्षणे॥२८॥ मुनेशिवार्चनंयस्माच्चतुर्वर्गफलप्रदं॥ तस्मादवश्यंतत्कार्यंचतुर्वर्गफलार्थिभिः॥
॥२९॥ शिवोददातिविष्णुत्वंसंतुष्टोलिंगपूजया॥ तथाब्रह्मत्वमिंद्रत्वंददात्येवमहेश्वरः॥३०॥ विनातपोभिर्दानैश्चकेवलंशिवपू
जया॥ मुनेभवंत्यभीष्टानिश्रीमहेशप्रसादतः॥ यत्पादपद्ममभ्यर्च्यस्वनेत्राब्जेनकेशवः॥ चक्रंप्रापसगौरीशः पूजनीयोमु
मुक्षुभिः॥३२॥ स्तुवंतियंसदावेदवेदांताश्चससंहिताः॥ सदेवदेवोगौरीशः पूजनीयः प्रयत्नतः॥३३॥ ॥ ॥ ॥
यमाहुर्जनकं यमाहुर्विष्णुर्जनैकैर्विधेः॥ सदेव०॥३४॥ यमाहुर्गिरिजानाथंयमाहुर्मदनांतकं॥ सदे०॥३५॥ यमाहुस्कंदजनकंयमाहुःसर्वगंप्रभुं॥ स
देव०॥३६॥ मुनेविश्वाधिकंरुद्रंयमाहुःश्रुतयोखिलाः॥ सदेवदेवोगौरीशः पूजनीयःप्रयत्नतः॥३७॥ मुनेविश्वाधिकंरुद्रमभ्यर्च्यस
र्वकामदं॥ परित्यज्यार्चयेत्यन्यानमरान्यामरानराः॥३८॥ कोनुविश्वाधिकारुद्रादन्यंपूजयतिभ्रमात्॥ कृतेमहापातकीनंपापिष्ठंन
रकाश्रयं॥३९॥ सर्वदेवोत्तमंसांबंयोनार्चयतिसंततं॥ सदुरात्मासपापिष्ठः ससुरापीसपुल्कसः॥४०॥ योन्यामरसमत्वेनजा 
नातिशिवमीश्वरं॥ सदुरात्मा०॥४१॥ शिवेनसहयोमोहात्सुरमन्यंप्रपूजयेत्॥ सदुरा०॥४२॥ शिवपीठेशिवादन्यंयःस्थापयतिमोह 
तः॥ सदुरात्मासपापिष्ठःससुरापीसपुल्कसः॥४३॥ विष्ण्वादिसुरतुल्यत्वंयेवदंतिमहेश्वरे॥ तेसर्वेजारजाएवतज्जनन्यश्चजा
रजाः॥४४॥ देवोत्तमंमहादेवमन्यथाप्रवदंतिये॥ तेसर्वे०॥४५॥ उत्धूलनंत्रिपुंड्रंचनधृतंयैर्दुरात्मभिः॥ तेसर्वे०॥४६॥ रुद्राक्षान
धृतायैश्चरुद्राध्यायपरानये॥ तेसर्वे०॥४७॥ शिवलिंगार्चनेप्रीतिनयेषांकलुषात्मनां॥ तेसर्वेजारजाएवतज्जनन्यश्चजारजाः

शिवार्चकैस्तेन पराधन्यामान्याः पुण्यैकमूर्त्तयः॥ यतोनंततपोरूपशिवाचाररताः स्मृताः॥ ५०॥ भाग्यभाजोमहादेवंभजंतिभवभीरवः॥ भजतांश्रीमहादे
वंभवबन्धोनसर्वथा॥ ५१॥ जन्ममृत्युजरारोगानश्यंतिशिवपूजया॥ तस्मादृतिप्रयत्नेनकर्त्तव्यंशिवपूजनं॥ ५२॥ शिवार्चनपरोमर्त्योनबिभेतियमो
दपि॥ किंपुनर्जन्ममरणजरारोगादिभिर्मुने॥ ५३॥ यतश्चरमदेहानांशिवेभक्तिप्रजायते॥ ततोजन्मजरादिभ्योनबिभेतिशिवार्चकः॥ ५४॥ मह
द्भाग्यंशांभवानांशंभुसंसक्तचेतसां॥ यतः पुनर्नजन्मादिभयंतेषांमहात्मनां॥ ५५॥ यस्यशैवोभवामीतिबुद्धिर्भवतिभाग्यतः॥ सधन्यः कृतकृ
त्यश्चमान्यः सर्वामरैरपि॥ ५६॥ धन्यानांशिवभक्तानांमतिर्निर्मलदेहिनां॥ यद्भाग्यंतादृशंभाग्यममरैरप्यपेक्षितं॥ ५७॥ पुराऽत्रैवार्भकः क
श्चिद्दरिद्रोव्याधिपीडितः॥ समयेवोपदिष्टोत्रचक्रेमृल्लिंगपूजनं॥ ५८॥ सततोव्याधिनिर्मुक्तोययौरत्नधनेश्वरं॥ तेनसंपूजितोराज्ञास
एवशिवपूजकः॥ ५९॥ तस्यरत्नधनेशस्यज्येष्ठपुत्रोविशारदः॥ नानारोगसमाक्रांतोदुःखितः संस्थितोमुने॥ ६०॥ सराजातादृशंपुत्रंस्मृत्वा
स्मृत्वापुनः पुनः॥ दुःखसंविग्नहृदयः सबाष्पोभूत्तदामुने॥ ६१॥ तंतादृशंविलोक्याहसएवशिवपूजकः॥ किंक्लिश्यसेनृपश्रेष्ठकिमासीदितिसादरं
॥ ६२॥ इतितद्वचनंश्रुत्वासराजागद्गदध्वनिः॥ मुंचन्बाष्पाणिबहुधातमाहशिवपूजकं॥ ६३॥ ॥ शैवोत्तमममास्त्वेकः पुत्रोज्येष्ठोविशारदः॥ सनाना
रोगसंक्रांतस्तिष्ठतिप्रियकृत्तमः॥ ६४॥ सपूर्वमभवत्सुनः सर्वशत्रुनिबर्हणः॥ तमद्यराजयक्ष्मादिनानारोगाः समावृताः॥ ६५॥ दत्तानिसुरवैद्याभ्यामो
षधानिसहस्रशः॥ तथापितस्यतेरोगाननश्यंतिदुःखदाः॥ ६६॥ धन्वंतरिः समागत्यददावोषधमादरात्॥ तथापितस्यतेरोगावृद्धिंयांतिक्षणेक्षणे
॥ ६७॥ यावंतिसंत्योषधानिपातालादिजगत्त्रये॥ तावंतिभक्षितान्येवतथापिनसुखीसुतः॥ ६८॥ दिनेदिनेतनुक्षीणाजायतेतस्यशांभव॥ तद्दुःखि
तोस्म्यहमीदृशः॥ ६९॥ सूर्यादयोग्रहाः सर्वेजपहोमादिभिः पुरा॥ सम्यगाराधिताएवतथापिनसुखीसुतः॥ ७०॥ आयुर्दानादिदानानिबहुधा
मया॥ तथापिनामयाः शांतास्ततोनससुखीसुतः॥ ७१॥ अधुनावादिनांतेवामरिष्यतिविशारदः॥ तस्मिन्मृतेपुत्रशोकात्ततुल्यस्त्वाम्यहं
ध्रुवं॥ ७२॥ विशारदसमः पुत्रोनभूतोनभविष्यति॥ तस्मिन्मृतेममप्राणागमिष्यंत्येवतत्क्षणे॥ ७३॥ तस्मिन्मृतेशत्रवोमेप्रबलामदविह्वलाः॥ स
सैन्यंमांहनिष्यंतिहरिष्यंतिचमद्धनं॥ ७४॥ ॥ अगस्त्यउवाच॥ ॥ एवंब्रुवाणंराजानमुदशंसशिवार्चकः॥ प्राहधैर्यंसमाश्रित्यमाभैषीरि
चैक तिसादरं॥ ७५॥ ॥ शिवउवाच॥ ॥ राजन्तद्रोगशांत्यर्थंकुरुमृल्लिंगपूजनं॥ सवाकरोतुयत्नेनभक्त्यामृल्लिंगपूजनं॥ ७६॥ लक्षंमृ-

श्रीशिवर०७ यलिंगानांयदिकुर्यात्सपूजनं॥ तदाससर्वरोगेभ्योमुच्यतेनात्रसंशयः॥७७॥ किमौषधैर्जपैर्होमैः किंदानैः किंग्रहार्चनैः॥ किमन्यैरप्युपा उ॰स॰पू॰
६४ यैश्चविनामृत्युंजयार्चनं॥७८॥ सद्यःसिध्यंत्यभीष्टानिकृतेमृत्युंजयार्चने नासाध्यंनकिंचिदपिभूपते॥७९॥ मृत्युंतरंतियेमर्त्याःयेमृत्युं
जयपूजकाः॥ मर्त्यामृत्युवशंयातित्यक्तमृत्युंजयार्चनाः॥८०॥ मृत्युंजयमनभ्यर्च्ययोमृत्युंतर्तुमिच्छति॥ समूर्खइतिविज्ञेयःसत्यंसत्यंनसं
शयः॥८१॥ दीर्घायुषोभविष्यंतिकृतमृत्युंजयार्चनाः॥ अल्पायुषोभविष्यंतित्यक्तमृत्युजयार्चनाः॥८२॥ मृत्युंजयार्चनंकार्यंमृल्लिंगेसर्वकाम
दे॥ तत्रसंपूजितःशंभुःप्रसीदतिनसंशयः॥८३॥ राजन्नायुष्यमारोग्यमैश्वर्यमतुलंबलं॥ ज्ञानंनिर्वाणमप्यंतेप्राप्यंमृल्लिंगपूजया॥८४॥ मृल्लिं
गपूजनंराजन्करोत्वद्यसुतस्तव॥ अद्यैवरोगनिर्मुक्तोभविष्यतिनसंशयः॥८७॥ विनश्यंत्यामयाराजन्मृत्तिकालिंगपूजया विश्वासंकुरुमद्वा
क्येनाहमास्मिप्रतारकः॥८८॥ मृल्लिंगपूजनंकृत्वाप्ययंचेद्रोगवान्भवेत्॥ तदाकथंप्रमाणंस्युर्वेदास्तद्वद्भूपते॥८९॥ ॥अगस्त्यउवाच॥ ॥
इतितद्वचनंश्रुत्वासभूपोहृष्टमानसः॥ उपवेश्यसुतंयत्नाद्भस्मस्नानमकारयेत्॥ लक्षंमृन्मयलिंगानांकारयामाससादरं॥ शिवपूजनसामग्रीं
ससंपाद्यैवभूपतिः॥९१॥ व्याघ्राजिनेसंन्निवेश्यतमशक्तंसुतंतदा॥ उद्धूलनत्रिपुंड्राभ्यांरुद्राक्षैश्चविभूषितं॥९२॥ उपवेश्यमशक्तंतेपुत्रंधृ
त्वासपार्श्वतः॥ पुत्रेणकारयामासमृत्तिकालिंगपूजनं॥९३॥ सकोमलैर्बिल्वपत्रैरमितैरतिशोभनैः॥ पुष्पैर्नानाविधैरीशंमृल्लिंगेषुसमर्चयत्॥९४॥
धूपयामाससगौरीशंसततोगरुराशिभिः॥ दीपयामाससततःशिवंकर्पूरराशिभिः॥९५॥ नैवेद्यंचददौशंभोःक्षीरान्नापूपराशिभिः॥ पुनःसुवर्णपुष्पा
द्यैःपूजयामासशंकरं॥९६॥ ततःपूर्वमशक्तोपिमरणायोन्मुखोपिसः॥ तदासत्वरमुत्थायचक्रेशंभोःप्रदक्षिणान्॥९७॥ प्रणनामततःशंभुंबहु
वारंसयत्नतः॥ मूर्धन्यंजलिमादायदध्यौचसमहेश्वरं॥९८॥ कृतःप्रणाममीशायसुतंरत्नधनेश्वरः॥ विलोक्यहर्षसंपन्नश्चंद्रोदयइवांबुधिः
॥९९॥ मृल्लिंगपूजयासद्योमुक्तरोगोविशारदः॥ पुनःसंपूज्यंजयामासबिल्वपत्रादिभिःशिवं॥१००॥ विशारदंसमालिंग्यरत्नकोशध श्रीशिव
नेश्वरः॥ आघ्रायाघ्रायमूर्धानमानंदाश्रूण्यमुंचत॥ विशारदस्यजननीसुतमालिंग्यसादरं॥ संतोषंपरमंप्रापजातःपुत्रोधुनेतिसा॥ ६४
॥२॥ सुहृदःसुखिनोजाताः सर्वेवैशारदैस्तदा॥ शत्रवोदुःखिनोजातास्तदावैशारदामुने॥३॥ यदाशिवप्रणामार्थमुत्थितःसविशारदः॥ तदा
शत्रुकिरीटानिपतितानिसभास्थले॥४॥ तदाशत्रुसभास्थानंजज्वालाभौमवन्हिना॥ छिन्नानिकंठसूत्राणितच्छत्रुस्त्रीगलेघतः॥५॥ तदासा

मंतभूपालामुक्तरोगंविशारदं॥ गजरत्नाश्वरत्नौघैरुपतस्थुर्यथोचितं॥६॥ ॥अगस्त्यउवाच॥ ॥इत्थंपार्थिवलिंगानांपूजयासविशारदः॥ मु
क्तरोगोबलंतेजःसौभाग्यंचापसत्वरं॥७॥ विनैवौषधपथ्याभ्यांकेवलंशिवपूजया॥ मुक्तरोगंसुतंवीक्ष्यतातस्ताभूत्प्रहर्षितः॥८॥ ततःसौ
भाग्यसंपन्नस्तुष्टोरत्नधनेश्वरः॥ ददावगणितंद्रव्यंतस्मैशैवायसादरं॥९॥ ददौगजानुत्तमाश्वान्ददौग्रामांश्चकोटिशः॥ रत्नान्यपिददौभक्त्या
पुत्रदस्त्वमितिस्तुवन्॥ तदाप्रभृतियत्नेनपिप्रासहविशारदः॥ नित्यंपार्थिवलिंगानांसहस्रंसमपूजयेत्॥११॥ विशारदःसमृद्धिंगपूजयैव
दिनेदिने॥ प्रवृद्धकांतिरभवन्मुनेनक्षत्रराडिव॥१२॥ निहताःशत्रुनिचयास्तेनैवबलिनातथांतः॥ शत्रुराष्ट्राणिसर्वाणितेनाक्रांतानितेजसा
॥१३॥ ततःसकारयामासभक्त्यारत्नशिवालयं॥ सप्रासादंमणिप्रख्यंसप्राकारंसगोपुरं॥१४॥ तत्रसंस्थापयामासरत्नलिंगमनुत्तमं॥ तत्रो
त्सार्हंस्वयत्नेनकारयामाससंततं॥१५॥ शिवभक्तिःप्रवृत्थासीत्तदाप्रभृतिभूपते॥ तयाभक्त्यामहादेवंपूजयामाससंततं॥१६॥ यथायथाप्रवृ
द्धासीत्तस्यभक्तिर्महेश्वरे॥ तथातथाप्रवृद्धोभूत्ससंपद्भिर्बलेनच॥१७॥ दिनेदिनेकलावृद्धिर्यथाचंद्रस्यजायते॥ तथातस्याभवद्राज्ञःशिवभ
क्तिःशिवप्रदा॥१८॥ शत्रूणामप्रधृष्योभूत्सौम्योभूत्स्वजनस्यसः॥ बलैश्वर्यसमृद्धोपिविनयेनास्थितःसदा॥१९॥ अतोयंकाममुद्दिश्ययःशिवंपूज
यिष्यति॥ सतंकाममवाप्नोतिततोधिकमपिध्रुवं॥२०॥ येर्चयंतिमहादेवंसावधानेनसंततं॥ तेसमृध्याभवंत्येवपुरदारधनादिभिः॥२१॥ अप्राप्यं
नास्तिशैवेंद्रश्रीमहादेवपूजया॥ श्रीमहादेवमाराध्यकोवानसुखमेधते॥२२॥ नित्यमव्यभिचारिण्याभक्त्यापूज्योमहेश्वरः॥ दुर्लभातादृशी
भक्तिर्यतःसर्वार्थदायिनी॥२३॥ किंकामधेनुभिर्विप्रकिंकल्पतरुकोटिभिः॥ यदिभक्तिर्महादेवेनित्यमव्यभिचारिणी॥२४॥ तदेंद्रोपेंद्रचं
द्रायागणनीयानसर्वथा॥ संप्राप्यशांभवींभक्तिंगणयिष्यतिकःसुरान्॥२५॥ शिवेतरामराःसर्वेयतःशंकरकिंकराः॥ देवोत्तमंमहादेवमाश्रि
त्याप्यन्यदैवतं॥२६॥ कःसमाराधयेत्प्राज्ञोधनीवनिधनंनरं॥ येभिवांछंतिसततंऐहिकामुष्मिकंफलं॥२७॥ तेषांसदाशिवादन्यःपूज्योन
भवतिध्रुवं॥ ॥दधीचिरुवाच॥ ॥एवमुक्त्वास्थितोगस्त्यःसनातनमुनिंप्रति॥ इतितद्वचनंश्रुत्वाससंतुष्टोभवन्नृप॥२८॥ अतःसदाशि
वोनित्यंसर्वभावेनसज्जनैः॥ पूजनीयोभुक्तिमुक्तिफलकांक्षिभिरादरात्॥२९॥ ॥श्रीसदाशिवउवाच॥ ॥एवमुक्त्वास्थितेदेवेद
धीचोनृपतिंप्रति॥ एतस्मिन्नंतरेभानुरस्ताद्रिंसमुपागतः॥३०॥ प्रदोषपूजारत चित्तवृत्तिर्दधीचिरार्यैःसकलामरेशं॥ समर्चयामा

सनिशामुखेमामध्यार्जुनेशंनृपतिश्चसादरं ॥३१॥ इतिश्रीशिवउग्राख्येसप्तमांशेपूर्वार्धेमध्यार्जुनमाहिमानुवर्णनंनामसप्तविंशोध्यायः ॥२७॥ 
॥श्रीउग्रायनमः॥ ॥श्रीपार्वत्युवाच॥ ॥प्रदोषपूजनंकृत्वासभूपालः प्रभोततः॥ किंचकारदधीचिश्चकिंचकार वदस्वमे॥१॥ ॥सदाशिवउवा
च॥ ॥प्रदोषपूजनंकृत्वादधीचिर्मुनिपुंगवः॥ स्वाश्रमंगंतुमुद्युक्तस्तदातंप्राहभूपतिः॥२॥ ॥राजोवाच॥ ॥अगस्त्यवचनंश्रुत्वाकिंचकार
सनातनः॥ सत्सर्वमविशेषेणवदशंभोवसत्तम॥३॥ इतितद्वचनंश्रुत्वादधीचिर्मुनिपुंगवः॥ सनातनस्यवृत्तांतंपुनर्वक्तुंसमारभे॥४॥ ॥दधीचि
रुवाच॥ ॥श्रुत्वागस्त्यवचःसम्यक्प्रहृष्टःससनातनः॥ कृतांजलिपुटोभूत्वाप्राहागस्त्यंततोनृप॥५॥ ॥सनातनउवाच॥ ॥संश्रुतंशिवलिं
गानांमाहात्म्यंभुक्तिंमुक्तिदं॥ पुनश्चश्रोतुमिच्छामिश्रीमहादेववैभवं॥६॥ ॥दधीचिरुवाच॥ ॥इतितद्वचनंश्रुत्वाहृष्टोगस्त्यःततःपरं॥ शिवार्चन
स्यमाहात्म्यंमुदावक्तुंसमारभे॥ अगस्त्यउवाच॥ ॥सर्वभावेनसततंपूजनीयोमहेश्वरः॥ ददातिपूजितःशंभुःभुक्तिमुक्तिंचसर्वथा॥७॥ शि
वलिंगेसदाभक्त्यापूजितःश्रीमहेश्वरः॥ प्रसीदतिप्रसन्नःसन्नभीष्टानिप्रयच्छति॥९॥ महादेवेसुराधीशेप्रसन्नेसातिशंकरे॥ इंद्रोपेंद्रादिदेवानां
मर्त्योप्यर्च्योभविष्यति॥१०॥ सर्वसंपत्प्रवृध्यर्थंदुःखनाशायचान्वहं॥ कर्तव्यमतियत्नेनमहेशस्यैवपूजनं॥११॥ पुरागजासुरोनामराक्षसोलो
ककंटकः॥ चकारसर्वलोकानांपीडामत्यंतदारुणां॥१२॥ शरीरमभवत्तस्ययोजनार्बुदमायतं॥ तस्यसर्वादिलोकेषुसर्वत्राप्यहतागतिः॥१३॥ 
कदाचिद्यातिसःस्वर्गंसत्यलोकंकदाचन॥ कदाचिद्यातिवैकुंठंवैकुंठादिभयप्रदः॥१४॥ कदाचिद्दुर्मदोदुष्टोलीलयासगजासुरः॥ गत्वावैकुंठमन
घंददर्शकमलापतिं॥१५॥ ततःसमागतंवीक्ष्यकंपयन्कमलापतिः॥ गदांजग्राहबलवांस्तन्निवर्तयितुंतदा॥१६॥ गदापाणिंसमालोक्यकुपितः
सगजासुरः॥ विष्णुंजग्राहतुंडेनसगदंकमलान्वितंसचक्रंभ्रामयित्वातंहरिंगगनांतरे॥ पातयामासभूपृष्ठेदारुणेप्रस्तरान्विते॥१८॥ ततो 
ब्रह्मादिदेवांश्चपातयामासकोपतः॥ ततःसुखेनवैकुंठेकियत्कालंससंस्थितः॥१९॥ ततोविष्णुमुखाःसर्वेदेवाःसंक्षुब्धमानसाः॥ चुक्रुशुः 
स्तत्रचान्योन्यंगजासुरपराहताः॥२०॥ तदागोरूपमासाद्यभूश्चभूभारकर्शिता॥ दृष्ट्वोपेंद्रादिदेवांस्तांश्चुक्रोशाश्रुसमावृता॥२१॥ अ
श्रुसंकीर्णनयनारुदतीखिन्ननिःस्वना॥ उपेंद्रेंद्रादिकान्देवान्गोरुवाचततःपरं॥२२॥ ॥भूमिरुवाच॥ ॥अवस्थेयमियंदेवाभव
तामपिदुःखदा॥ दुःखसागरमग्नायाःकावार्त्तातःपरंमम॥२३॥ क्वकर्त्तव्यंहरींद्राद्यामयादुःखनिवेदनं॥ नदृश्यतेमयाकोपिसुखीदुःख

प्रशामकः ॥२४॥ भवत्सु दुःखितेष्वेव कृते दुःखनिवेदने ॥ दुःखशांतिः कथं भूयात् दुःखवार्त्तायाममाधुना ॥२५॥ उपस्थितोधुना देवा विघ्नमः
कालईदृशः ॥ नलभ्यते सुखी कोपि यतो दुःखं निवेदितुं ॥२६॥ शिवोऽस्ति परमानंदः सदा सच्चिदानंदलक्षणः ॥ न दृश्यते स सर्वेषां भक्ता
नां दुःखशामकः ॥२७॥ भवद्भिरपराधो ह्यकः कृतः श्रीमन्महेश्वरे ॥ येनैकदैव भवतामधिकारागताः सुरः ॥२८॥ प्रायशः श्रीमहादेवो भ
वत्स्वद्य पराङ्मुखः ॥ अन्यथा दुःखस्थेयमेकदा भवतां कथं ॥२९॥ अशुभं जायते तेषां येषामीशः पराङ्मुखः ॥ शुभानि तेषामेषां स्यात्व सन्नः
श्रीमहेश्वरः ॥ ३०॥ अधिकाराः पुरा प्राप्ता भवद्भिर्यत्प्रसादतः ॥ तमेव सर्वभावेन भजध्वं श्रीमहेश्वरं ॥ ३१॥ किमर्थं क्रियते दुःखं शरण्ये स
तिशंकरे ॥ स सच्चिदानंदघनः कृपानिधिरुदारधीः ॥३२॥ ॥ अगस्त्य उवाच ॥ ॥ इति तद्वचनं श्रुत्वा सर्वदुःखविनाशकं ॥ विष्णुब्रह्मा
दयो देवा हिमवंतं ययुस्तदा ॥३३॥ विष्ण्वादीन्हिमवान्दृष्ट्वा कृत्वार्घ्यादिकमादरात् ॥ व्यग्रचित्तान्स पप्रच्छ वैयग्र्यं किमभूदिति ॥३४॥
देवा ऊचुः ॥ ॥ वयं सर्वेप्येकदैव गजासुरपराहताः ॥ अस्माकमधिकाराश्च हृतास्तेनैकदैव हि ॥३५॥ कथं वा पुनरस्माकमधिकारा
न्महेश्वरः ॥ कृत्वा पूर्ववदेवास्मान्पालयिष्यति तद्वद ॥३६॥ कथं वा श्रीमहादेवः शीघ्रं सिद्धिं प्रयच्छति ॥ सर्वसिद्धिकरो धर्मः को वा त
द्वदसादरं ॥३७॥ ॥ अगस्त्य उवाच ॥ ॥ इति तद्वचनं श्रुत्वा हिमवानत्शंकरप्रियः ॥ सर्वसिद्धिकरं धर्मं मुने वक्तुं समारभे ॥३८॥ ॥
हिमवानुवाच ॥ ॥ भो विष्णुप्रमुखा देवा भवंतः पार्वतीपतिं ॥ पूजयध्वं प्रयत्नेन शिवलिंगस्वरूपिणं ॥३९॥ पूजितः श्रीमहादेवः शिवलिंगे
शिवात्मके ॥ दास्यत्यभीष्टानखिलान् भवद्भ्यो भगवान् शिवः ॥४०॥ श्रोतानि शिवलिंगानि संति नानाविधानि तु ॥ तथापि तेषु मृल्लिंगं शीघ्र
सर्वार्थसिद्धिदं ॥ ४१॥ ततो भवंतो यत्नेन मृल्लिंगं भक्तिपूर्वकं ॥ पूजयध्वं विधानेन भस्मस्नानपुरःसरं ॥४२॥ कुर्वंत्वष्टांगुलं लिंगमथवा द्वाद
शांगुलं ॥ द्वात्रिंशदंगुलं वापि शुद्धशोधितमृत्स्नया ॥४३॥ लिंगं षडंगुलान्न्यूनं न कर्त्तव्यं कदाचन ॥ ततोधिकं तु कर्त्तव्यं स्वस्वशक्त्यनु
रोधतः ॥४४॥ अखंडबिल्वपत्राणि कोमलानि नवान्यपि ॥ संपाद्य श्रीमहादेवं पूजयध्वं प्रयत्नतः ॥४५॥ अनन्यशरणाः संतः पू
जयध्वं महेश्वरं ॥ भस्मरुद्राक्षपूतांगाः शिवनाम्नैव सादरं ॥४६॥ अनन्याः श्रीमहादेवं ये र्चयंति प्रयत्नतः ॥ तेषामभीष्टानखि

लान्नयच्छतिसदाशिवः॥ अतोनन्याभवंतोपिभजध्वंश्रीमहेश्वरं॥ भवतामपिसुप्रीतोभविष्यतिमहेश्वरः॥४८॥ ॥अगस्त्यउवाच॥ ॥इतितद्व
चनंश्रुत्वाविष्णुब्रह्मपुरोगमाः॥ प्रहृष्टहृदयाः प्राहुर्हिमवंतंशिवार्चकं॥४९॥ ॥देवाऊचुः॥ ॥अस्माकंश्रीमहेशान्यः पूज्योस्तीत्यास्तिकिंमतिः
॥भवामोयेननानन्याः शिवान्योच्योस्तिकःसुरैः॥५०॥ अस्माकमापदुत्थार्त्तासंपद्दात्ताचशंकरः॥ कःशिवान्योस्मदाराध्योदुराराध्योदुरात्म
नां॥५१॥ अस्माकंप्रभुराराध्यःपितामातासखासुहृत्॥ भ्राताचभगवानेकोभवानीप्राणवल्लभः॥५२॥ महापदुःखमत्तेभकुंभनिर्भेदन
क्षमः॥ भगवान्छंभुरेवैकस्तदन्योच्येनसर्वथा॥५३॥ ॥अगस्त्यउवाच॥ ॥इत्युक्त्वातेसुराःसर्वेतत्रैवगिरिगह्वरे॥ मुनेपार्थिवलिंगा
नांपूजाकर्त्तुंसमुद्यताः॥५४॥ ततःपार्थिवलिंगानिकृत्वाविधिवदादरात्॥ बिल्वपत्रप्रसूनाद्यैश्चक्रुःपूजांयथाक्रमं॥५५॥ एवमेवसुराः
सर्वेत्रिकालंवत्सरावधि॥ पूजांकृत्वास्थितास्तत्रकृतपाशुपतव्रताः॥५६॥ तत्रश्रीमान्महादेवोब्रह्मविष्ण्वादिपूजितः॥ कृतव्रतानांदे
वानांप्रत्यक्षोभूत्कृपानिधिः॥५७॥ देवदेवमुमाकांतंनानाभरणभूषितं॥ अचिंत्यविभवंशुद्धमनिर्देश्यमनामयं॥५८॥ सोमसूर्याग्निनयन
मनंतगुणसेवितं॥ अनंतसोमसूर्याग्निप्रभाधिकमहाप्रभं॥५९॥ कर्पूरगिरिसंकाशमहावृषभसंस्थितं॥ कर्पूरगौरंसर्वेशंविष्ण्वाद्याः
ददृशुःशिवं॥६०॥ ततःप्रणम्यबहुधापूजयित्वाचशंकरं॥ स्तोतुमारेभिरेभक्त्याविष्णुब्रह्मादयःसुराः॥६१॥ ॥देवाऊचुः॥ ॥
जयजयशंभोगिरिजाबंधोजयजयशंभोभूपते॥ गिरिशमहापज्जलधेरस्मानुद्धरधीरकृपाजलधे॥ नामैवोत्तमतवहरविमलंमं
गलदायकमंगलदं॥ गिरिशमहा०॥६३॥ शिवसुरनायकमंगलविग्रहकुरुकुरुमंगलमाशुविभो॥ गिरिशम०॥६४॥ शरणंयामश्चरणद्वंद्वंत
वकमलामलमनुवेलं॥ गिरिशम०॥६५॥ तवपदकमलात्स्मलादन्यच्चिंतितमपिनहिचेतसिशंभो॥ गिरिशम०॥६६॥ शिववयमाशिवंनभ
जामस्त्वयिसतिसशिवेशिवमूर्त्ते॥ गिरिशम०॥६७॥ भगवन्भवताभवतापहृतानहृतंदुरितंकिंनुकृतं॥ गिरिशम०॥६८॥ सकृदपितव
हरनामस्मरणंकृतमघकुलहरमतिशुभदं॥ गिरिशम०॥६९॥ स्मृतमपिहरतवचरणद्वंद्वंहरतिविषादंकिमुदृष्टं॥ गिरिशम०॥७०॥
भवभवदीयानस्माननिशंकुरुगतदुःखानतिदुःखान्॥ गिरिशम०॥७१॥ हरयद्यस्मत्कृतमपराधंविविधंकृपयाहरसितदा॥ गिरिशम०॥
॥७२॥ सुतमपराधिनमपिकृतशिक्षंजनकःपालयतीशतथा॥ गिरिशम०॥७३॥ नसुतावयमपितवकिंशंभोजनकःसभवानस्मा

श्रीशिव र॰ ७ के।।गिरिशमहापज्जलधेरस्मानुध्दर धीरकृपाजलधे।।७४।। जगतामेकोजनकस्त्वमतोवयमपिजगतोनहिभिन्नाः।।गिरिशमहा॰।। ७५।।
भवतासृष्टाः सकलालोकावयमपितद्वध्दरसृष्टाः।। गिरिशम॰।। ७६।।भवतासृष्टंजगदिवस्त्वानस्मानपिभव पालयनित्यं।।गिरिशम॰।।
।।७७।।देवगजासुरपरिहृतविभवानभयदसभयानवसदयं।।गिरिशम॰।। ७८।। निरुपाधिककरुणापारावारस्त्वमतोहरसुरदुःखं।।गिरि
शम॰।।७९।। शरणंभवभयशरणंभवभवशरणंभवभवकरुणाब्धे।।गिरिशम॰।। ८०।।भवभवदन्यंनवयंयामः सकृदपिशरणंमरणेवा।।गि
रिशम॰।। ८१।। नहिजानीमोभवभवदन्यंशंकरधीरंपालारं।।गिरिशम॰।। ८२।। ।।अगस्त्यउवाच।। ।। इतिस्तुतोमहादेवोविष्णुब्रह्मपुरो
गमैः।।प्रसन्नस्तानुवाचैवंघनगंभीरयागिरा।।८३।। ।। महादेवउवाच।। ।। जानामिभवतांदुःखंविष्णुब्रह्मपुरोगमाः।।गजासुरंहनि
ष्यामिपश्यंत्वद्याधुनाद्भुतं।।८४।। भवद्भिर्याकृतापूजास्तुतिश्चैवयंचयाकृता।। एताभ्यांस्तुतिपूजाभ्यांतुष्टोस्म्यहमुमापतिः।।८५।।भव
त्कृतेनस्तोत्रेणयोमांस्तोष्यतिसादरं।।सदुःखसागरंतीव्रंतरिष्यतिनसंशयः।।८६।। ।।अगस्त्यउवाच।। इत्युक्त्वामरवृंदेषुपश्यत्स्वे
वमहेश्वरः।।शूलंगजासुरंहंतुंप्रेषयामाससत्वरं।।८७।। ततोगजासुरंमत्तंशूलंवैकुंठवासिनं।। प्रविश्यपातयामासभूमौशैलमिवो
न्नतं।। ८८।। गजासुरस्ततोभूमौपपातोन्नतशैलवत्।। तदाचकंपेवसुधासशैलवनकानना।। ८९।।गजासुरोयदाभूमौअपतद्घू
लसंहतः।।गर्त्तोमहानभूद्भूमौसमुद्राः सप्तसंयुताः।।९०।। मुवमेकार्णवंदृष्ट्वाभीतांश्चविबुधान्हरः।।शूलात्तमसुरंभित्वादधार
गगनोत्तरे।।९१।।तदासार्द्रोभवत्कृत्तिः क्षणंवस्त्रवदीश्वरे।।तदातच्छायसर्वासच्छायाभूरभून्मुने।।९२।। ततःसमाभवद्भूमिस्ततःछि
त्वागजासुरं।।खंडशश्चततः कृत्वाप्रतिदिक्षुविनिक्षिपत्।।९३।।ततोविष्ण्वादयोदेवाः कृतांजलिपुटाःशिवं।।तुष्टुवुर्हृष्टहृदयाः
मोगिरिशायगिरिशायनमोनमः।।नमोनमःशरण्यायवरेण्यायनमोनमः।। नमोनमोमहेशायमहेष्वासायतेनमः।।९५।।न
नादायसनादायनमोनमः।।९७।।नमोनमोहमायेशमोहमायनमोनमः।।नमोनमस्तापसायतापसायनमोनमः।।९८।। नमोनमोस्तु मौंजाय
मौंजायास्तुनमोनमः।।नमोनमस्तेसोम्यायसोम्यायास्तुनमोनमः।।९९।। नमोनमस्तेपारायसुरापायनमोनमः।। नमोस्तुतेमहापार पारविदा

यतेनमः ॥१००॥ नमोनमस्तेरुद्राय चेकितानायतेनमः॥ नमोनमः परेशाय परमेशायतेनमः॥१॥ नमोनमः शंकराय वृषारूढायतेनमः॥ न
मोनमोग्रशस्त्राय शूलहस्तायतेनमः॥२॥ नमः कर्पूरगौराय नमोनंतेंदुतेजसे॥ नमो डमरुहस्ताय मृगहस्तायतेनमः॥३॥ नमोदेवाधिदेवाय दे
वाधीशायतेनमः॥ नमोभस्मविभूषाय सर्पभूषायतेनमः॥४॥ नमोनिष्कलरूपाय निर्गुणायनमोनमः॥ नमोमेयस्वरूपाय मानातीतायतेनमः॥
॥५॥ नमः शांतस्वरूपाय वेदवेद्यायतेनमः॥ नमः कल्याणरूपाय कल्याणायनमोनमः॥६॥ नमोनमोमिताक्षाय मिताक्षायनमोनमः॥ नमो
नमः समाक्षाय विरूपाक्षायतेनमः॥७॥ नमः शिवासमेताय शिवरूपायतेनमः॥ नमः शिवाय शुद्धाय नमः शिवतराय च॥८॥ ॥अगस्त्यउवाच॥ ॥
इतिस्तुत्वा महादेवं प्रणम्य च मुहुर्मुहुः॥ पुष्पाद्यैः पूजयामासुर्ब्रह्मविष्णुपुरोगमाः॥९॥ दैवतासार्वभौमेन महादेवेन ते सुराः॥ निरीक्षिताः सानुमोदं तु
ष्टुवुः पुनरीश्वरं॥१०॥ ॥देवाऊचुः॥ ॥सर्वेप्यनुगृहीतास्मो वयमीश त्वयाधुना॥ कटाक्षवीक्षणेनेश वीक्षितास्मो यतो वयं॥११॥ धन्याः कृता वयं सर्वे त्व
या देवोत्तम प्रभो॥ यतस्त्वया वयं सर्वे सानुमोदं निरीक्षिता॥१२॥ दिने ष्वनन्यशरणेष्वस्मासु गिरिजापते॥ कृतमद्य त्वया शंभो सानुमोदं निरीक्षणं॥
॥१३॥ जाताः कृतार्था मुनयस्त्वया ये ये निरीक्षिताः॥ जाताः कृतार्था वयमप्यतस्तव निरीक्षणात्॥१४॥ अनेन श्री विरूपाक्षवीक्षणेनैव सर्वदा॥ अग्रेपि क्षे
ममस्माकं भविष्यति न संशयः॥१५॥ क्षेममूर्ते विरूपाक्ष मोक्षदानविचक्षण॥ प्राप्तव्यं क्षेममेवाग्रे श्रीविरूपाक्षकीर्त्तनात्॥१६॥ ॥अगस्त्यउवाच॥ ॥
इत्युक्त्वा प्रणता देवा श्रीमहादेवपादुके॥ रत्नैः संपूजयामासुः सादरं शिवपादुके॥१७॥ दिव्यरत्नसमाकीर्णे श्रीमहादेवपादुके॥ रत्नैः संपूजयामासुः
सादरं शिवपादुके॥१७॥ दिव्यरत्नसमाकीर्णे श्रीमहादेवपादुके॥ देवाः स्वस्वकिरीटेषु निधाय ननृतुर्मुदा॥१८॥ विष्णुः स्वनेत्रे संपूज्य श्रीमहेश्वरपादु
के॥ ततः किरीटे संयोज्य ननर्त्तादौ प्रहर्षितः॥ ततो ब्रह्मादयो देवाः नेत्रे संयोज्य पादुके॥ ततः किरीटे संयोज्य ननृतुस्ते यथाक्रमं॥२०॥ ततः प
रं महादेवो विष्ण्वादिभ्यो यथाक्रमं॥ दत्वाधिकारान्प्रणतान्प्रेषयामास तान्सुरान्॥२१॥ ततः स्वयमुमायुक्तो युक्तो नानाविधैर्गणैः॥ सुप्रापं श्री श्रीशिव
पर्वं कैलासमप्राप्यमितरासुरैः॥२२॥ ततो विष्ण्वादयः सर्वे कीर्त्तयंतो महेश्वरं॥ शिवप्रसादलब्धानि स्वस्वस्थानानि संययुः॥२३॥ देवैर्मृन्मय ६७
लिंगानि पूजितानि यतो मुने॥ ततः शिवप्रसन्नो भूद्बभूवुश्च हतारयः॥२४॥ ततः प्राप्तपदाश्चासन्महादेवप्रसादतः॥ ददृशुश्च महादेवं देवा मृल्लिं
गपूजया॥२५॥ मृल्लिंगपूजनं धन्यं यशस्यं भुक्तिमुक्तिदं॥ सर्ववेदश्रुतं पुण्यं महापातकनाशकं॥२६॥ महादेवार्चनस्थानान्यनेकानि महेश्वर॥
तेषु श्रेष्ठतमं स्थानं शिवलिंगं शिवार्चने॥२७॥ अलाभे शिवलिंगस्य शांकरं शंकरार्चनं॥ कर्त्तव्यं तदभावे तु पृथिव्यां पावकेऽप्सु वा॥ पूर्वं

पूर्वस्थानलाभेतत्रैवशिवमर्चयेत्।। पूर्वपूर्वतमंस्थानंयतोमृत्युंजयंप्रियं।।२९।।आपोनपरिचक्षीततत्रकृत्वाशिवार्चनं।।कर्तव्यमतियत्नेनव
त्सरांतमिदंव्रतं।।वत्सरांतेरौद्रमंत्रैस्तिलैःकार्यंशिवार्चनं।। तिलहोमोपिकर्तव्यः सहस्रत्रयमास्तिकैः।। ३१।।शांकरेष्वपिविप्रेश्चेल्लभ्यतेशंक
रार्चने।।तत्रैवकार्यंयत्नेनश्रीमहादेवपूजनं।। ३२।। तदभावेक्षत्रियाद्याःशांकराःशिवसंमताः।। पूजास्थानानिविप्रेंद्रसांबस्यपरमात्मनः
।। ३३।।शांकरेषुकृतापूजाशंकरस्यैवपूजनं।।यस्माद्प्रियतमाविप्रशांकराःशंकरस्यते।। ३४।।शांकरेयत्धनंदत्तंतद्दत्तंशंकरेमुने।।शांक
रेमुने।।शांकरेपूजितेसाक्षात्पूजितःशंकरोयतः।। ३५।। शिवप्रेमास्पदंस्थानंशिवभक्तोयतोमुने।। ततस्तत्रकृतापूजाशिवपूजेतिमन्महे।। ३६।।
पुराविष्णुःसुरैःसाकंमुरशत्रुभयार्दितैः।। ययौश्वरंसुरंहंतुंप्राप्तचक्रोमहेश्वरात्।।३७।। ततोगच्छन्पथिप्राप्तःशिवलिंगस्यपूजकः।।शिवलिंगम
लब्ध्वांतदुःखितोभूत्सुरैःसह।।३८।।तदादैववशात्कश्चिच्छांकरोभस्मभूषणः।।शिवलिंगांकिततनुर्दृष्टोविष्ण्वादिभिःसुरैः।।३९।।संतोषंपर
मंजग्मुस्ततोविष्ण्वादयःसुराः।।तंदृष्ट्वाशांकरंविष्णुःप्रणम्यमुहुरादरात्।।४०।।शांकरंपूजयामासशिवलिंगधियातदा।।तमर्चयित्वाविधिवच्छां
करंहरिरब्रवीत्।।४१।। ।।विष्णुरुवाच।। ।।कुतःसमागतःशैवःकुत्रवागंतुमुद्यमः।।भूतिभूषितदेहस्यरुद्राक्षाभरणस्यते।।४२।।दर्शनंजा
तमस्माकंसर्वमंगलदायकं।।प्रयाणकालेशैवस्यदर्शनंदुर्लभंयतः।।४३।।प्रयाणकालेयःपश्येद्भूतिरुद्राक्षभूषणं तस्यसिध्यंतिकार्याणि
मंगलंचपदेपदे।।४४।।यदेतच्छकुनंजातंशैवत्वद्दर्शनात्मकं।।तदेवबलमस्माकंमुरवैरिनिबर्हणे।।४५।।विनाभाग्येनमहताशैवानोदर्शनंकु
तः।।भाग्येनास्माकमभवत्तवशैवस्यदर्शनं।।४६।।यस्मिन्समर्चितेशैवेतुष्टोभवतिशंकरः।।सशैवस्त्वंपुण्यमूर्तिर्भूतिरुद्राक्षभूषणः।।४७।।
रुद्राक्षवलयोयस्माद्भूतिमान्साशिवालयः।।तस्मिन्दृष्टेमंगलानिभविष्यंतिपदेपदे।।४८।।धन्याःकृतावयंशैवत्वयादर्शनदानतः।।शकुनं
चत्वयादत्तमद्यदर्शनदानतः।।४९।। ।।शैवउवाच।। ।।भक्तोसिदेवदेवस्यमहादेवस्यकेशव।।शिवपूजायतोनित्यंक्रियतेसावधानतः।।
।।५०।।अतःपदेपदेविष्णोविजयस्तेभविष्यति।।जयोनदुर्लभोविष्णोशिवैकशरणस्यते।।५१।।विजयीभवसर्वत्रशिवपूजापरोभव।।
शिवैकशरणानांतुविजयोनैवदुर्लभः।।५२।।शिवैकशरणानांचेद्जयःस्यात्तदाहरे।।शिवप्रसादलभ्योयंजयःकस्यभविष्यति।।
।।५३।।यःशिवानुग्रहीतःस्यात्तस्यैवविजयोहरे।।शिवाननुग्रहीतानांभवत्यपजयोध्रुवं।।५४।।शिवप्रसादलब्धेनचक्रेणानेनके
शव।।कुरुशत्रुक्षयंशीघ्रंलभस्वविजयंततः।।शिवभक्तामलमतेशिवभक्तार्चनप्रिय।।शिवार्चनव्रतश्रीशविजयीभवकेशव।। ५६।।

।।अगस्त्यउवाच।। ।। इत्युक्त्वाशांभवोभूयः पूजितोविष्णुनाततः।। इंद्रादिभिश्चयत्नेनपूजितःप्रययौमुने।।५७।। तस्मात्सर्वप्रयत्नेनशिवपूजाद्वि
जातिभिः।।कर्तव्यैवाप्रमादेनप्रमादात्पतितोभवेत्।।५८।।शिवलिंगार्चनंश्रौतंमनसापिनलंघयेत्।।श्रुत्याविधीयतेयस्मात्तत्त्यागीपतितोभवे
त्।।५९।।रुद्राक्षधारणंश्रौतंमनसापिनलंघयेत्।।श्रुत्याविधीयतेयस्मात्तत्त्यागीपतितोभवेत्।।पंचाक्षरजपंश्रौतंमनसापिनलंघये
त्।।श्रुत्यावि०।।६१।।रुद्राध्यायजपंश्रौतंमनसापिनलंघयेत्।।श्रुत्या०।।६२।।द्विजानांशिवपूजैवकर्त्तव्यायत्नपूर्वकं।।सर्वश्रुतिश्रु
तानित्यासायतःसर्वकामदा।।६३।।त्यक्त्वाशिवार्चनंमोहाच्छिवान्यंयोर्चयिष्यति।।सघोरनरकावासंलभतेपितृभिःसह।।६४।।
श्रुतंचसामशाखायांरुद्रोब्राह्मणदेवतं।।त्वंदेवेषुब्राह्मणोसिरुद्रोब्राह्मणदैवतं।।६५।।रुद्रमेवोपधावेतब्राह्मणोब्राह्मणप्रियं।।रुद्रमेवोपधावेत
रुद्रान्यंनोपधावंती।।६६।।स्वांदेवतामतिक्रम्यरुद्रान्यंचयजेतयः।।सपापीस्यात्परांसिद्धिंनलभत्येवसर्वथा।।६७।।पुराकश्चिदभूद्रा
जापुण्यमूर्त्तिरितिश्रुतः।।अर्थतोपिननाम्नैवपुण्यमूर्त्तिःसभूपतिः।।६८।।तस्मिन्छाशतिभूलोकेसर्वपुण्यवतोजनाः।।सर्वेस्वधर्मनिर
ताबभूवुःसर्वदामुने।।सपुण्यमूर्त्तिरालोड्यवेदशास्त्राणिसर्वदा।।शैवधर्मरतोजातःपूर्वजन्मतपोबलात्।।७०।।स्वयमुद्धूल्यस
र्वांगंकृत्वारुद्राक्षधारणं।।शिवलिंगार्चनंकृत्वातिष्ठत्यासायमन्वहं।।७१।।प्रदोषकालेगौरीशंशिवलिंगस्वरूपिणं।।संपूज्यविधि
वद्रात्रौभुंक्तेनित्यंसभूपतिः।।७२।।शिवलिंगार्चनंकुर्वन्शृण्वन्छिवकथाःशुभाः।।भूपतिःक्षुत्पिपासाभ्यामनाक्रांतोबभूवसः।।
।।७३।।शिवनामान्यनामानिसनसुश्रावभूपतिः।।शिवलिंगान्यपूजापिनकृतातेनसर्वथा।।७४।।शतंपत्न्यःस्थितास्तस्यरूपलाव
ण्यशोभनाः।।ताभिःसकारयामासनृत्यंनृत्यंशिवांगणे।।७५।।सरत्नैःकारयामासशिवस्थानंमनोहरं।।सतत्रस्थापयामासरत्नलिंगं
मनोहरं।।७६।।सरत्नैरमितैःपुष्पैर्बिल्वपत्रैश्चकोमलैः।।तद्रत्नलिंगमभ्यर्च्यधूपाद्यैश्चसमर्चयत्।।७७।।शिवपूजारतोभूत्वासया
वत्संस्थितोभुवि।।तावन्नाभूद्भुविभयंदुर्भिक्षादिकृतंमुने।।७८।।पित्रानपुत्रमरणंदृष्टंतस्मिन्सतिद्विज।।नारीनविधवाजातातस्मिन्छा
सतिभूतले।।७९।।तस्मिन्नेवस्थितेभूपेकश्चित्षोडशवार्षिकः।।मृतःसत्येवपितरीसर्वविद्याविशारदः।।८०।।ततस्तंपुत्रमादायमृतमेव
हितत्सितः।।तस्यैवनृपतेर्द्वारिसकुटुंबोरुदन्स्थितः।।८१।।ततस्तद्रोदनंश्रुत्वापुण्यमूर्त्तिःकृपानिधिः।।तमुक्त्वामारुदस्वेतिक्षणंचिंताप
रोभवत्।।८२।।ततःसभूपतिःक्रुद्धोयमंसस्मारतत्क्षणे।।सयमोपिभयग्रस्तस्तत्रप्रापन्नृपतिमुने।।तमागतंकंपमानंयमंसंप्रेक्ष्यभूपतिः।।

कुटिलालकतान्नाक्षीयममा होप्रशासनः॥ ८४॥ राजोवाच॥ ॥ पुत्रः पितरिसत्येवकथंबाल्ये मृतोयम॥ एतस्य मरणे हेतुः कोवातद्वदसत्वरं
॥ ८५॥ त्वयास्यमरणंकालनेज्ञातमितिनध्रुवं॥ अकालेकालबालोयंकथंनीतस्त्वयावद॥ ८६॥ मत्प्रजास्त्वेवमन्यायेप्रवृत्तिर्यदिर्नेयम॥ तदा
तवाधिकारोयंनस्थास्यत्येवसर्वथा॥ ८७॥ कालमृत्युंचजेष्यामिश्रीमृत्युंजयपूजया॥ अकालमृत्युंजेष्यामीत्यत्र कालकिमद्भुतं॥ अधुना
पार्थिवंलिंगंसमभ्यर्च्ययथाविधि॥ यमसाक्षात्करिष्येहं मृत्युंजयमुमापतिं॥ ८९॥ मृत्युंजयमुमाकांतंप्रत्यक्षीकृत्यसत्वरं॥ तवाधिकारमन्यस्मैदा
पयिष्याम्यहंयम॥ ९०॥ मामन्यतुल्यंमत्वात्वंयमान्यायंकरोषिकिं॥ ज्ञातएवनकिंकालप्रभावःशांकरस्यमे॥ ९१॥ बहुभिःशांकरैःपूर्वमुपेंद्रादिदिवौक
सां॥ अधिकाराःक्षणार्धेनक्रूरैर्दूरीकृतायम॥ ९२॥ शांकराणामशक्यार्थोनास्तिलोकत्रयेप्यतः॥ यमाधिकारव्यत्यासंकरिष्येतवसर्वथा॥ ९३॥ म
मोपेंद्रादयोप्यत्रागणनीयानवस्तुतः॥ एतादृशस्यमेकालगणनीयोसिकिंभवान्॥ ९४॥ ॥ अगस्त्यउवाच॥ ॥ इतितद्वचनंश्रुत्वाकृतांतःकंप
ज मावहन्॥ कृतांजलिपुटोभूत्वाप्राहवाचंविचक्षणः॥ यमउवाच॥ ॥ पुण्यमूर्तेत्वयोक्तंयत्तत्सर्वंसत्यमेवहि॥ शांकराणामशक्यार्थोनभविष्यतिस
र्वथा॥ मया मरणमेतस्यज्ञायतेनात्रसंशयः॥ मरणेहेतुरप्यस्यज्ञायतेसमयोच्यते॥ ९७॥ भूपास्मिन्नगरेविप्रःकश्चिदासीद्दशोकरः॥ सशिवान्यार्चनरतोऽ
द्येवभ्रमावृत्तः॥ ९८॥ ऊर्ध्वपुंड्रंमृदाकृत्वाश्रौतधर्मविवर्जितः॥ तिष्ठत्यत्रातएवात्रजातोधर्मविपर्ययः॥ ९९॥ यस्मिन्देशेभवेद्विप्रःश्रौतधर्मविवर्जितः
॥ तस्मिन्देशेमरिष्यंतिपुत्राःपितरिसत्यपि॥ १००॥ अन्यान्यपिभयान्येवंश्रौतधर्मविपर्यये॥ भविष्यंतिनसंदेहोदुर्भिक्षादीन्यपिप्रभो॥ १॥ यस्मिन्दे
शेभवेद्रूपश्रौतधर्मविपर्ययः॥ तद्देशनाशोबहुधाभवत्येवनसंशयः॥ २॥ व्याधिवृद्धिरनारोग्यंप्रजापीडाप्रजाक्षयः॥ क्षतिश्चजायतेराजन्श्रौ
तधर्मविपर्यये॥ ३॥ तद्देशनाशोबहुधाभवत्येवनसंशयः॥ व्याधिवृद्धिरनारोग्यंप्रजापीडाप्रजाक्षयः॥ क्षतिश्चजायतेराजन्श्रौतधर्मविपर्य
ये॥ अल्पायुष्यमनावृष्टिश्चोरवृद्धिधनक्षयः॥ हानिश्चभवतिस्वामिन्शैवधर्मविपर्यये॥ ४॥ अशैवैःसहसंवासंयेकरिष्यंमोहतः॥ ते
षांभवत्यनायुष्यंपापवृद्धिश्चभूपते॥ पापमूर्तेरशैवस्यदर्शनस्पर्शनादिकं॥ येकरिष्यंतिमोहेनतेषामापद्भविष्यति॥ ६॥ वरंमद्यपसं
सर्गोवरंमंत्यजसंगमः॥ शैवधर्मपरिभ्रष्टसंगमोनवरंनृप॥ वरंपितृघ्नसंसर्गोवरंमातृघ्नसंगमः॥ शैवधर्मपरिभ्रष्टसंगमोनवरं
नृप॥ वरंपितृघ्नसंसर्गोवरंमातृघ्नसंगमः॥ शैवधर्मपरिभ्रष्टसंगमोनवरंनृप॥ अशैवःपापिनांश्रेष्ठोनद्रष्टव्यःकदाचन॥ दैवाद्दृष्टेय

 दितदासचैलंस्नानमाचरेत् ॥ ९ ॥ अशैवाद्युत्तमो ज्ञेयश्श्वपचोपिनसंशयः ॥ चंडाल दर्शनेयस्मात्स्नानंनविहितंनृप ॥ १० ॥ यदिच्छसिप्रजाक्षेमं 
स्वस्यापिक्षेममन्वहं ॥ अशैवमतियत्नेन हनशीघ्रंनराधिप ॥ अशैवोयदिशस्त्रेण खंडशः छिद्यतेतदा ॥ अस्यद्विज शिशोः प्राणाः समायास्यं
तिसत्वरं ॥ १२ ॥ शैवोयं बालकोराजन्नशैव निधनेकृते ॥ उत्थास्यतिनसंदेहः शपथः क्रियतेशिवे ॥ १३ ॥ ॥ अगस्त्य उवाच ॥ ॥ इतितद्वचनंश्रु
त्वासराजा दृढनिश्चयः ॥ तदैवानाययामासभटैस्ताडनपूर्वकं ॥ १४ ॥ अशैवंतंतदाभूपोयमेपश्यतिसत्वरं ॥ अशैवं छेदयामासखंडशः कलु
षाकृतिं ॥ अशैवः शस्त्रसंछिन्नोयदेवाभूत्तदामुने ॥ सप्राणः समभूच्छीघ्रंसएवद्विजबालकः ॥ १६ ॥ ततः प्रधानमाहूयसराजाधर्मतत्परः ॥
कृतांतेश्रृण्वतितदाप्राहलोकहितंवचः ॥ १७ ॥ राजोवाच ॥ भविष्यंत्यत्रयेकेचिदूर्ध्वपुंड्रधरानराः ॥ तेषांशिरांसितत्पार्श्वैः छेदनीयानियत्नतः ॥ १८ ॥
भविष्यंत्यत्रयेकेचित्त्रिपुंड्रांकिताद्विजाः ॥ तेषां० ॥ १९ ॥ भविष्यंत्यत्रयेकेचिद्रुद्धूलनविवर्जिताः ॥ तेषांसि० ॥ २० ॥ भविष्यंत्यत्रयेकेचिद्रुद्राक्षा
नंकिताद्विजाः ॥ तेषांशिरांसितत्पार्श्वैः छेदनीयानियत्नतः ॥ २१ ॥ भविष्यंत्यत्रयेकेचिच्छिवान्यालोकनप्रियाः ॥ सुरपूजकाः ॥ तेषांशिरांसितत्पा-
र्श्वैः छेदनीयानियत्नतः ॥ २२ ॥ भविष्यंत्यत्रयेकेचिच्छिवान्याराधनप्रियाः ॥ तेषांशि० ॥ २३ ॥ भविष्यंत्यत्रयेकेचिच्छिवान्यालोकनप्रियाः ॥ तेषां० ॥
॥ २४ ॥ भविष्यंत्यत्रयेकेचिच्छिवान्यस्मरणप्रियाः ॥ तेषांशि० ॥ २५ ॥ भविष्यंत्यत्रयेकेचित्यक्तलिंगार्चनाद्विजाः ॥ तेषांशि० ॥ २६ ॥ भविष्यंत्य
त्रयेकेचिद्रुद्राध्ययनवर्जिताः ॥ तेषांशि० ॥ २७ ॥ भविष्यंत्यत्रयेकेचिच्छ्रीरुद्रजपवर्जिताः ॥ तेषां० ॥ २८ ॥ भविष्यंत्यत्रयेकेचित्पंचाक्षरपरा
ङ्मुखाः ॥ तेषां० ॥ २९ ॥ अन्येषुशैवधर्मेषुयेषांचित्तंपराङ्मुखं ॥ तेषांशिरांसितत्पार्श्वैः छेदनीयानियत्नतः ॥ अशैवानामवस्थानंमास्तुभू
मंडलांतरे ॥ यदितेषामवस्थानंतदादंडयोभवान्मम ॥ ३१ ॥ येकरिष्यंतिमोहेनशिवान्यसुरपूजनं ॥ तेषांकार्यः शिरः छेदो देहछेदपुरःस 
रं ॥ ३२ ॥ येकरिष्यंतिमोहेनशिवान्यसुरकीर्तनं ॥ तेषांकाय० ॥ ३३ ॥ इयमाज्ञामयादत्तायश्चैनांलंघयिष्यति ॥ तदातवशिरछेदंकरिष्येनात्र
संशयः ॥ ३४ ॥ अशैववार्त्तांभूलोके यदिसंश्रूयतेमया ॥ तदातवशिरः छेदंकरिष्येनात्रसंशयः ॥ ३५ ॥ ॥ अगस्त्य उवाच ॥ ॥ एवंप्रधा
नमाज्ञाप्यशैववध्यायसंततं ॥ पूजयामासनृपतिः शैवधर्मपरायणः ॥ ३६ ॥ शैवोत्तमंनृपंमत्वा यमोपिनृपतिंततः ॥ पूजयामासपुष्पाद्यैः
शैवोयमितिसादरं ॥ ३७ ॥ पुनः संपूजितस्तेननृपेणसयमोमुने ॥ ययौप्रहृष्टवदनः समृत्योनिजमंदिरं ॥ ३८ ॥ गत्वाराजहतंशीघ्रमशैवं
दुष्टशिक्षकः ॥ अघोरयातनामध्येपातयामासतंयमः ॥ ३९ ॥ पातयामासनरकेयमस्तस्यपितॄनपि ॥ अघोरनरकस्थानेसतस्थौपि
तृभिः सह ॥ ४० ॥ अतोन्वहंप्रयत्नेनकर्तव्यंशिवपूजनं ॥ सर्वार्थदायकंयस्माच्छ्रीमहादेवपूजनं ॥ ४१ ॥ शिवमेवप्रयत्नेनपूजयंतिमनीषि

णः॥ शिवंमोक्षप्रदंमत्वावेदांतैरखिलैरपि॥ ४२॥ वेदवेदांतवेद्यस्यमहादेवस्यपूजनं॥ येकरिष्यंतियत्नेनतेधन्याइतिमन्महे॥ ४३॥ अनन्यापू
जयंतीशंयेसंततमुमापतिं॥ तएवधन्यामान्याश्चपूजनीयाश्चयत्नतः॥ ४४॥ सर्वोत्तमःसर्वहेतुःसर्वाशास्योमहेश्वरः॥ अतएवसयत्नेनपू
जनीयोमनीषिभिः॥ यमर्चयंतुत्युमाकांतमिंद्रोपेंद्रादयःसुराः॥ सएवपूज्योदेवेषुदेवदेवोत्तमःशिवः॥ ४६॥ अत्यंतश्रद्धयानित्यंयोर्चयेत्
त्पार्वतीपतिं॥ सपूज्यइतिवेदोपिवदत्येवसनातनः॥ ४७॥ अतिपुण्यतामेवश्रद्धाभवतिशंकरे॥ अतिपुण्यविहीनानांनश्रद्धापार्वतिप्रभौ॥
॥ ४८॥ अत्यंतश्रद्धयाविष्णुःस्वनेत्राब्जेनशंकरं॥ पूजयामाससापूजाजाताविष्णुत्वदायिनी॥ ४९॥ अतोतिश्रद्धयानित्यंयेर्चयंतिमहे
श्वरं॥ तेषामायुष्यमारोग्यमपवर्गश्चजायते॥ ५०॥ येपूजयंत्युमाकांतंनित्यमव्यभिचारतः॥ तेषांपुण्यवतांपुंसांनित्यमेवनमोनमः॥
॥ ५१॥ पुण्याशिवाशिवःपुण्यःपुण्यंतिर्यक्त्रिपुंड्रकं॥ शिवलिंगार्चनंपुण्यंपुण्यमानंदकाननं॥ ५२॥ एतत्प्रातःसमुत्थायस्मर्त्तव्यंपुण्यपं
चकं॥ स्मरणेनास्यसततंजायतेपुण्यवान्नरः॥ ५३॥ उमासहायमित्यादिवेदमंत्रैःशिवःप्रगे॥ स्मर्त्तव्यंसततंविप्रैःसर्वसिध्यर्थमा
दरात्॥ ५४॥ शिवशंकरगौरीशविश्वनाथमहेश्वर॥ देवोत्तमेतिनामानिप्रातर्जप्यानिसत्तमैः॥ ५५॥ भवानीस्कंदजननीगौरीशंकरव
ल्लभा॥ शिवेतिप्रातरुत्थायस्मर्त्तव्याजगदंबिका॥ ५६॥ प्रातःकालान्यकालेपिशिवशंभोमहेश्वर॥ माहादेवेतिनामानिजपनीयानिसज्ज
नैः॥ ५७॥ स्मर्त्तव्यःकीर्तनीयश्चजपनीयश्चशंकरः॥ यतस्तत्स्मरणादीनिमुक्तिदानिमहामुने॥ ५८॥ तन्मनोयेनमनसास्मर्यतेपार्वतीप
तिः॥ साजिव्हाकीर्त्यतेसांबःसततंजिव्हयायथा॥ ५९॥ सहस्तोयेनहस्तेनबिल्वैःसंपूज्यतेशिवः॥ तच्छिरोयेनशिरसाप्रणामःक्रियतेशि
वे॥ ६०॥ तौपादौयौशिवक्षेत्रेभक्त्यापर्यटतोमुदा॥ सपुण्योयेनवाकाश्यांस्वशरीरसमर्पितं॥ ६१॥ पद्भ्यांप्रदक्षिणाःकार्याःसावधानंशिवाल
ये॥ हस्ताभ्यामतियत्नेनकर्त्तव्यंशंकरार्चनं॥ ६२॥ प्रणामाःस्वशरीरेणकर्त्तव्याःपार्वतीप्रभोः॥ श्रोत्राभ्यामतियत्नेनश्रोतव्याःशांकराः
कथाः॥ ६३॥ नेत्राभ्यामतियत्नेनद्रष्टव्यःपूजितःशिवः॥ घ्राणेनाघ्रेयममलंबिल्वपत्रंशिवार्पितं॥ ६४॥ जिव्हयाश्रीमहादेवःकीर्त
नीयःप्रयत्नतः॥ स्पृष्टव्यमतियत्नेनशिवलिंगंसमर्चितं॥ ६५॥ ध्यातव्योमनसानित्यमुमादेहार्धविग्रहः॥ वेदवेदांतसंवेद्यःसर्वदा
श्रीसदाशिवः॥ ६६॥ स्वाधीनेनयनेप्राप्ययदिनद्रक्ष्यतेशिवं॥ तदासकिंजन्मनांधोबंध्यनेत्रोयतःसदा॥ ६७॥ संप्राप्यहस्तौस्वाधीनौयो
र्च नर्यातिशिवालयं॥ शंकरं॥ सदग्धहस्तोविज्ञेयःछिन्नोहस्तोथवाध्रुवं॥ ६८॥ संप्राप्यपादौस्वाधीनौयोनयातिशिवालयं॥ सद

श्रीशिवर०७ ग्धजिकोथवाध्रुवं।।७०।। श्रोत्रेलब्ध्वाशिवकथांयोनश्रोष्यतिसादरं।। सविश्रोत्र इतिज्ञेयोदग्धश्रोत्रोथवाध्रुवं।। ७१।। स्वाधीनंमानसंप्राप्ययो उ॰स॰पू॰
७० नचिंतयतेशिवं।। सविचित्तइतिज्ञेयोदग्धचित्तोथवाध्रुवं।।७२।। इंद्रियैःषड्भिरप्यार्यास्तत्तदिंद्रियकर्मभिः।।शिवमेवातियत्नेनप्राप्नुवं
तिमुमुक्षवः।।७३।।यजंतिविविधैर्यज्ञैःशिवमेवाहियाज्विनः।। यतोदेवाधिदेवोयंयज्ञकर्मफलप्रदः।। चिंतयंतिमहादेवंयोगिनोयुक्तमा
नसाः।। यतोदेवाधिदेवोयंयोगकर्मफलप्रदः।।७४।। शिवात्परतरंनेतियेभजंतिमहेश्वरं।। तेधन्यास्तेसदाचारास्तेपूज्योधर्ममूर्तयः।। ७५।।
शिवनाममणिंकंठेसदाधृत्वावसंतिये।। तेधन्या०।। धृत्वावसंति येशुद्धंत्रिपुंड्रंशिवभूषणं।। तेधन्या०।।७७।। धृत्वावसंतियेकंठेरुद्राक्षान्शि
वभूषणान्।।तेध०।।अनन्यशरणानित्यंयेर्चयंतिमहेश्वरं।। तेधन्या०।।७९।। येषांचित्तमनापत्याशिवचिंतनतत्परं।।तेधन्या०।। ८०।। येषां
नित्यमनापत्याशिवैकशरणंमनः।। तेधन्या०।।८१।। येषांदेवगणाधीशोमहेशःकुलदैवतं।। तेधन्या०।।८२।। येषांसर्वार्थदंनित्यंव्रतंशंकरपू
जनं।। तेधन्या०।। ८३।। येषांशिवार्चनादन्यद्व्रतंनास्त्येवसर्वथा।। तेधन्यास्ते०।। ८४।। येषांशिवान्यदेवेषुशिवभक्तत्वधीःसदा।। तेधन्या०।।
।। ८५।। येषांमहेश्वरेसांबेसर्वदेवोत्तमत्वधीः।। तेधन्यास्ते०।। ८६।। येषांचित्तंपरावृत्तंमहादेवान्यपूजनात्।। ध्ंतेधन्या०।। ८७।।येषांचित्तं
परावृत्तंमहादेवान्यवंदनात्।। तेधन्यास्ते०।। ८८।। येषांचित्तंपरावृत्तंमहादेवान्यदर्शनात्।। तेधन्या०।। ८९।। येषांचित्तंपरावृत्तंमहादेवान्यनंद
नात्।। तेधन्या०।।९०।।येषांचित्तंपरावृत्तंमहादेवान्यचिंतनात्।। तेधन्यास्तेसदाचारास्तेपूज्याधर्ममूर्त्तयः।। ९१।। येषांप्रीतिःक्षीरपानेयथात श्रीसांब
द्वच्छिवार्चने।। तेधन्या०।।९२।। येषांप्रीतिःकलत्रादौयथातद्वच्छिवार्चने।। तेधन्या०।। ९३।। येषांप्रीतिःसुवर्णादौयथातद्वच्छिवार्चने।। तेध ७०
न्या०।।९४।। येषांप्रीतिःस्वर्गभोगेयथातद्वच्छिवार्चने।। तेधन्या०।। ९५।। महादेवार्चनेप्रीतिर्नृणामत्यंतदुर्लभा।। सुलभायदिसानॄणांतदामु
क्ताहितेनराः।।९६।। यदितप्तंतपोरंसर्वदाजन्मकोटिभिः।। तदाप्रीतिर्महादेवपूजनेभवतिध्रुवं।।९७।। यदिदेवोत्तमत्वेनज्ञात्वादेवोत्तमंशिवं।।
समर्चयतियत्नेन तदामुक्तिर्नदुर्लभा।।९८।। कर्मणामनसावाचानित्यमव्यभिचारतः।। यःपूजयेन्महारुद्रंसमोक्षमधिगच्छति।। ९९।। मुनेशिवा
र्चनादन्योमोक्षापायोनविद्यते।। ततःसर्वप्रयत्नेनपूजनीयःसदाशिवः।।१००।। सर्वात्मकोपिभगवान्लिंगरूपीसदाशिवः।। पूजनीयःप्र
यत्नेनमुनेस्वर्गापवर्गदः।।१।। ध्यातव्यःपूजनीयश्चलिंगरूपीसदाशिवः।।यतोध्यातःपूजितश्चसर्वाभीष्टान्प्रयच्छति।।२।।स्वाभीप्सितार्थ

दोदेवःशिवान्योनास्तिसर्वथा ॥ सत्यमेतत्पुनः सत्यमुध्दृत्यभुजमुच्यते ॥ ३ ॥ नाशिवान्यः पूजनीयोन ध्यातव्यो मुमुक्षुभिः ॥ सत्यमेत० ॥ ४ ॥
नशिवान्यः कीर्त्तनीयोनस्तोतव्योमुमुक्षुभिः ॥ सत्यमेतत्पुनसत्यमुध्दृत्यभुजमुच्यते ॥ ५ ॥ पूजनं कीर्तनं ध्यानं वंदनंतुशिवापतेः ॥ आयु
रारोग्यसंपत्तिशुभस्वर्गापवर्गदं ॥ ६ ॥ प्रत्येकं पूजनादीनिसर्वाभीष्ट प्रदान्यतः ॥ पूजनादीनिकार्याणिमहादेवायसर्वदा ॥ ७ ॥ मुनेधन्यास्तए
वेतिज्ञेयाः स्वप्नेपियेसदा ॥ पूजयंति महादेवंशिवान्यार्चापराङ्मुखाः ॥ ८ ॥ मुने धन्यास्त एवेतिज्ञेयाः स्वप्नेपियेसदा ॥ श्रीमहादेवयात्रार्थ
मत्युद्युक्ताः प्रहर्षिताः ॥ ९ ॥ मुनेधन्यास्त एवेतिज्ञेयाः स्वप्नेपियेसदा ॥ शिवयात्रान्ययात्रायामत्यंतं पंगुवृत्तयः ॥ मुनेधन्या ॥ १० ॥ शिवान्यना
मश्रवणेमहाबधिरवृत्तयः ॥ मुनेध० ॥ ११ ॥ शिवान्यकीर्त्तनेस्तोत्रेप्येउमूकैकवृत्तयः ॥ मुनेध० ॥ १२ ॥ महादेवार्चनंत्यक्त्वा योर्चयेदन्यदैवतं ॥ त
स्यजन्म वृथैवेतिविज्ञेयं मुनिसत्तम ॥ १३ ॥ श्रोतव्यः प्रेक्षणीयश्च कीर्त्तनीयश्च शंकरः ॥ तदन्यस्तुनसंपूज्योनेक्षणीयश्च सर्वथा ॥ १४ ॥ यः पू-
ज्यंश्रीमहादेवमनभ्यर्च्यान्यमर्चयेत् ॥ सनित्यभ्रांत एवेतिविज्ञेयोनात्रसंशयः ॥ १५ ॥ यः शिवाराधनंत्यक्त्वाकरोत्यन्यसुरार्चनं ॥ सकरोति नरोमो
हाद्वृथैवस्वायुषः क्षयं ॥ १६ ॥ यावत्स्वस्वांतमभ्रांतंयावन्नैवायुषः क्षयः ॥ तावद्देवोत्तमः सांबः पूजनीयः स्वशक्तितः ॥ १७ ॥ मुनेयेशिवम
ज्ञात्वाकुर्वंतीशान्यपूजनं ॥ ततुकालभटैर्नीतारुदंतिचपुनः पुनः ॥ १८ ॥ शिवान्यपूजकायेच येचत्यक्तत्रिपुंड्रकाः ॥ तेसर्वेपिपतंत्येव नरकेषु
पुनः पुनः ॥ १९ ॥ नित्यंशिवार्चनंत्यक्त्वाशिवान्यं येर्चयंतितान् ॥ नरकेपातयत्येवकृतांतः क्रूरशासनः ॥ २० ॥ शिवध्यानंविहायान्यमभिध्यायंति
येचतान् ॥ नरके० ॥ २१ ॥ नित्यंशिवस्तुतिंत्यक्त्वायेशिवान्यंस्तुवंतितान् ॥ नरके० ॥ २२ ॥ अशैवधर्ममाश्रित्ययेतिष्ठंतिद्विजादयः ॥ नरकेपात
यत्येवकृतांतः क्रूरशासनः ॥ २३ ॥ शिवधर्मान्श्रुतिप्रोक्तान् नाचरिष्यंति येद्विजाः ॥ तेमृत्युपाशसंबध्दाः स्थास्यंतिनरकालये ॥ २४ ॥
अतोदयंयमंज्ञात्वाशैवोभूत्वातियत्नतः ॥ यः पूजयति गौरीशंसमोक्षमधिगच्छति ॥ २५ ॥ कुर्वंतुकोटिशोनित्यंमहेशान्यसुरार्चनं ॥
तथापि दुर्लभोमोक्षोविनाशंकरपूजया ॥ २६ ॥ कुर्वंतुकोटिशोयागान् धर्मांश्चान्यान्सनातन ॥ तथापिश्रीविरूपाक्षपूजांमोक्ष
स्त्वपेक्षते ॥ २७ ॥ सकृतामितपुण्योपिविनाशंकरपूजया ॥ नमुक्तिकांतांलभतेसत्यंसत्यंनसंशयः ॥ २८ ॥ यः पूजितस्तुतोयातो
वंदितोमेशविग्रहः ॥ सएवलभतेधन्योमुक्तिकांताकरग्रहं ॥ २९ ॥ विलोकयंतिसततंमुक्तिकांतांशिवार्चकाः सापिपश्यन्तिसोत्सा

हंशिवाराधनतत्परान् ॥ ३० ॥ मुक्त्यंगनाविलोक्यैवशिवाराधनतत्परं ॥ नृत्यत्यत्यंतसंतुष्टावल्लभोयंममेतिसा ॥ ३१ ॥ यएवसततंध्यातपा
र्वतीप्राणवल्लभाः ॥ सएवशैवःश्रुत्वात्माजायतेमुक्तिवल्लभः ॥ यएवातिप्रयत्नेनसमाराधितशंकरः ॥ सएववस्तुतोलोकेमुक्तिकांता
मनोहरः ॥ ३३ ॥ महेश्वरमुमाकांतंकालांतकमनामयं ॥ यःपूजयतितस्यैवमुक्तिर्नान्यस्यसर्वथा ॥ ३४ ॥ स्नात्वादौभस्मनादेहमुद्धूल्या
पादमस्तकं ॥ पूजनीयोमहादेवोलिंगरूपीमुमुक्षुभिः ॥ ३५ ॥ एवमव्यभिचारेणनित्यमभ्यर्चितःशिवः ॥ ददातिभुक्तिंमुक्तिंचसत्यंसत्यंनसं
शयः ॥ ३६ ॥ ऐश्वर्यमतुलंभुक्त्वाशिवलिंगार्चनान्मुने ॥ प्रयांतिशिवसायुज्यंनिर्दग्धाखिलकल्मषाः ॥ ३७ ॥ कोटिशःकृतपापोपिसकृद
र्चितशंकरः ॥ प्रयातिशिवसायुज्यमुत्सृत्यभुजमुच्यते ॥ ३८ ॥ शिवपूजाग्निसंदग्धमहापातकपर्वताः ॥ पीतामृताःश्रुचिर्भूताःशिवयां
तिशिवाहृताः ॥ ३९ ॥ समभ्यर्च्यमहादेवंसकृदप्यहिताशयाः ॥ लब्ध्वोपेंद्रत्वमिंद्रत्वंब्रह्मत्वंचशिवंययुः ॥ ४० ॥ पुराद्विजाधमःकश्चित्यक्तब्रा
ह्मणलक्षणः ॥ शूद्रवृत्तिंसमाश्रित्यस्थितःस्वकुलनिंदितः ॥ ४१ ॥ सततश्चोरधर्मेणधनंसंप्राप्यकोटिशः ॥ सदावेश्यापरोजातोमधु
मांसाशनःसदा ॥ ४२ ॥ सवेश्याभुक्तशिष्टाशीवेश्यासंसक्तमानसः ॥ उवासमदनाक्रांतोवेश्ययासहसर्वदा ॥ ४३ ॥ सगतःस्वोपभो
गार्थेपुष्पाण्यानेतुमुद्यतः ॥ प्रविवेशचयत्नेनमनोज्ञांपुष्पवाटिकां ॥ ४४ ॥ ततःसंपाद्यपुष्पाणिसुगंधानिबहूनिच ॥ अंधकारेचसं
प्राप्तेमध्येमार्गमुपागतः ॥ ४५ ॥ तदासमुत्थितोवायुःसमेघोवृक्षघातुकः ॥ ततोबभूववृष्टिश्चघनगर्जत्समन्विता ॥ ४६ ॥ ततःपरंस
पुष्पाणित्यक्त्वावृष्टिजलाप्लुतः ॥ ममारबाल्ययात्म्नकोमलांगसनातन ॥ ४७ ॥ तत्त्यक्तानिप्रसूनानिपेतुर्लिंगस्यमूर्धनि ॥ ततोवृष्टि
रभूच्छांताततःशांताश्चवायवः ॥ ४८ ॥ ततस्तंमृतमालोक्यतमापुर्यमकिंकराः ॥ नीतश्चतैःसुदुर्वृत्तःतदैवयमसंनिधिं ॥ ४९ ॥ तत
स्तमागतंदृष्ट्वायमोधर्मविचक्षणः ॥ चित्रगुप्तंविलोक्याहधर्माधर्मविचारकं ॥ ५० ॥ ॥ यमउवाच ॥ किमनेनकृतंकर्मकोयंकिंकु
लसंभवः ॥ किमेतस्याद्यकर्त्तव्यंशासनंतद्वदस्वमे ॥ ५१ ॥ ॥ अगस्त्यउवाच ॥ ॥ इतितद्वचनंश्रुत्वाचित्रगुप्तःकृतांजलिः ॥ धर्माध
र्मविदित्यैवतत्कृतंप्राहतंयमं ॥ ५२ ॥ ॥ चित्रगुप्तउवाच ॥ ॥ अयंद्विजकुलोत्पन्नोद्विजधर्मविवर्जितः ॥ वेश्योच्छिष्टभुगुद्वृत्तोनाना
पातकसंश्रयः ॥ ५३ ॥ अनेनकृतंकर्मस्वर्गभोगादिसाधनं ॥ एतत्कृतानांपापानांसंख्याकर्त्तुंनशक्यते ॥ ५४ ॥ बहुधायातनानेनभोक्त

व्यानात्रसंशयः ।। अनेनैतादृशेनापिलिंगेपुष्पाणिभाग्यतः ।। मरणात्पूर्वमज्ञानात्पातितान्ययुततत्रं ।। स्वभोगार्थंसुगंधीनिमल्लिकाकुसुमान्य
यं ।। नीलास्थितस्ततोवृष्ट्यावात्याभिश्चप्रपीडितः ।। पीडितः पातयामासतानिपुष्पाण्ययंद्विजः ।। ५७ ।। तानिपेतुर्दैवयोगाच्छिवलिंगस्य
मूर्धनि ।। ततः परमयंकालमृत एवहिपीडयः ।। ५८ ।। ततः परंयमभटैरानीतोयंतवांतिकं ।। इतो धिकंपुरानेननकृतंसुकृतार्जनं ।। ५९ ।। अ
नेनसुकृतेनैवमुक्तिरस्यभविष्यति ।। ।। अगस्त्यउवाच ।। ।। इतितद्वचनंश्रुत्वा यमः संतुष्टमानसः ।। तंतदाऽत्यंतयत्नेन पूजयामाससादरं ।।
पूज्यमानंतमालोक्यतदा यमसभासदः ।। ६१ ।। यममूचुःप्रयत्नेनकृतांजलिपुटा मुने ।। ।। सभासद ऊचुः ।। ।। यमानेन कृतंपुण्यंन
किंचिदपिदृश्यते ।। लिंगपूजा तुयत्नेनकृता मंत्रपूर्वकं ।। ६२ ।। एतादृशस्य दुष्टस्यक्रियतेपूजनंत्वया ।। कथंधर्मस्त्वयाज्ञातो धर्मवि
त्वंकथंत्वयि ।। ६३ ।। ।। यमउवाच ।। ।। दैवाद्वायत्नतोवापिशिवलिंगस्यमूर्धनि ।। पातितानि प्रसूनानिभवंत्येवहिमुक्तये ।। ६४ ।। सुधं
यस्मात येत्पुष्पमेकंवाशिवमूर्धनि ।। सतरत्येवहि संसार मंतकाले शिवंव्रजेत् ।। ६५ ।। विवशेनापि संस्पृष्टो यथा दहति पावकः ।। तथै
वविवशोपीशंसंपूज्यांतेशिवंव्रजेत् ।। ६६ ।। प्रसूनमेकमेवास्मात्पतितंशिव मूर्धनि ।। एतत्कृताघसंघानिनाशयामास तत्क्षणे ।।
।। ६७ ।। यान्यन्यानिप्रसूनानि पातितानिशिवोपरि ।। तान्यस्यमुक्तिंदास्यंतिब्रह्मादीनां पदान्यपि ।। ६८ ।। अतः परमयंभूपोभाविभूमावयो
निजः ।। नवखंडात्मिकांभूमिंपालयिष्यतिधर्मतः ।। ६९ ।। अस्यपुत्राभविष्यंति दशलक्षं महौजसः ।। शिवस्थानान्ययंभूपः कारयिष्य
तिभूरिशः ।। ७० ।। शिवलिंगान्ययंतेषुस्थापयिष्यतिसादरं ।। शिवार्चनपरोभूत्वाशैवानभ्यर्चयिष्यति ।। ७१ ।। अयंततः परंराज्यंपुत्रे
षुस्थापयिष्यति ।। ततस्तेनैवदेहेन देवेंद्रोपिभविष्यति ।। ७२ ।। ततः परमयंब्रह्मास्वयमेवभविष्यति ।। स्थास्यत्ययंविधिर्भूत्वा बहुका
लमनाकुल ।। ७३ ।। ततोविष्णुत्वमासाद्यलक्ष्मीन्मथोभविष्यति ।। अनेन सहसोल्लासंलक्ष्मीर्क्रीडां करिष्यति ।। ७४ ।। गरुडाद्यैः सेवि
तोयंबहुकालमनाकुलः ।। स्वेच्छंस्थास्यतिवैकुंठे वैकुंठेशत्वलाभतः ।। ७५ ।। गाणापत्यंचलब्ध्वायंततः शंकरपूजया ।। लब्ध्वाशिवप्रसा
दंचशिवेलीनोभविष्यति ।। ७६ ।। मरणात्पूर्वसमयेश्रीमहादेवमूर्धनि ।। पुष्पाणिपातयित्वापिमुक्तोभवतिमानवः ।। मरणात्पूर्वसमयेशि
वंसंपूज्ययत्नतः ।। व्यवधानंविनामर्त्यः शिवेलीनोभविष्यति ।। ७८ ।। अंतकालेबिल्वपत्रेपातितेशिवमूर्धनि ।। तदात्वव्यवधानेनशिवे

 ।लीनोभविष्यति॥७९॥ मरणात्पूर्वसमयेबिल्वपत्रेणशंकरं॥ यःपूजयतियत्नेनसशिवोभवतिध्रुवं॥८०॥ विनायज्ञैर्विनादानैस्तपोभि 
श्चविनाशिवं॥संपूज्यबिल्वपत्रेणप्राप्नानंताःशिवंध्रुवं॥८१॥अनंतान्यपिपापानिनश्यंतिशिवपूजया॥ततःप्रयांतिचाशिवंतथैवाशिव
पूजया॥ ततःप्रयांतिचाशिवंतथैवशिवपूजया॥८२॥अनंतोत्तमगोदानभूदानानांचयत्फलं॥ततोनंतगुणंपुण्यंशिवपूजाविधेःफलं॥
॥८३॥अनंतमत्तमातंगदानानामपियत्फलं॥ततोनं०॥८४॥अनंतकन्यारत्नादिदानानामपियत्फलं॥ ततोनं०॥८५॥अनंतवाजपे
यादियागानामपियत्फलं॥ततोनं०॥८६॥शिवपूजाकल्पवृक्षःस्वेष्टानंतफलप्रदः॥ ततःसासर्वदाकार्याशिवपूजामुमुक्षुभिः॥८७॥
शिवार्चनफलंयावत्तावत्फलमनेकधा॥ कृतैरप्यमितैर्धर्मैर्नैवसंप्राप्यतेध्रुवं॥८८॥ विष्णुत्वादिपदप्राप्तिर्यदर्चनविधेःफलं॥ मुक्ति
श्चयत्फलेनान्यत्कथंस्यात्सदृशंफलं॥८९॥ विष्णुत्वादिपदप्राप्तिर्मुक्तिश्चाशिवपूजया॥जाताबहूनामेवातोनान्यतुल्यफलप्रदा॥९०॥
विनापियज्ञदानाद्यैःकेवलंशिवपूजया॥ मुक्ताभवंतिमनुजास्त्यक्तपातकपंजराः॥९१॥ पापिनोपिशिवंयांतिनूनंकृताशिवार्चनाः॥९२॥
वृथातपोवृथादानंधर्माश्चविविधावृथाः॥ किंत्वेकसाधकंश्रौतंश्रीमहादेवपूजनं॥९३॥शिवेदत्तमयत्नेनाप्येकंबिल्वदलंनवं॥बिना
धर्मांतरापेक्षांमोक्षदंभवतिध्रुवं॥९४॥संप्राप्यमहदैश्वर्यमिंद्रत्वादिपदान्यपि॥ बहुभिःशिवसायुज्यंप्राप्तंशंकरपूजया॥९५॥
सकृदप्यर्चितोभक्त्यामहेशःकरुणानिधिः॥ ददात्यतुलमैश्वर्यंस्वसायुज्यंचसादरं॥९६॥ सुतेपितेवतनुतेप्रीतिमीशःस्वपूजके॥
ततोददातिसुप्रीतःशिवस्तद्वांछितंफलं॥९७॥तोयेनबिल्वपत्रेणपूतेनैकेनवाशिवं॥ यःपूजयतियत्नेनतस्यमुक्तिरदूरतः॥९८॥ 
बिल्वपत्रादिभिर्नित्यंयःपूजयतिशंकरं॥ सविष्णुप्रमुखैर्देवैःपूज्यतेनात्रसंशयः॥९९॥शांकराःसंतियावंतस्तेसर्वेकेशवादिभिः 
॥ पूज्यंतेसादरंनित्यमहृष्टाश्चचिविग्रहैः॥१००॥यथाशिवःसदापूज्योविष्ण्वादीनांप्रयत्नतः॥ तथैवसर्वदापूज्यास्तेषांशंकरपूज
काः॥१॥ महद्भाग्यंमहद्भाग्यंशिवपूजारतात्मनां॥ यतस्तेबिधिविष्ण्वाद्यैःपूजनीयाःप्रयत्नतः॥२॥ कःसमर्थोभवेद्दृष्टुंक्रूरदृष्ट्या
शिवार्चकान्॥विष्ण्वादिवंद्यपादाब्जान्घोरंनारकिनंबिना॥३॥यःपश्येत्क्रूरयादृष्ट्याशैवंमोहवशादपि॥ सतिष्ठत्येवंरौरवेयावदा न
चंद्रतारकं॥४॥ धन्याःशैवजनामान्याःपूजनीयाःसुरादिभिः॥अतएवहितेसर्वैःपूजनीयाःप्रयत्नतः॥५॥ धन्यंधन्यंमहादेवंपूज

कस्यैवजीवनं॥ यतोजीवन्नपिसुरैः पूजितोशिवपूजकः॥६॥ तस्यैवजनकोमान्योयस्यपुत्रःशिवार्चकः॥ तस्यैवजननीमान्यासुषुवेया
शिवार्चकं॥७॥ तस्यधन्यतरोवंशोयस्यवंशेशिवार्चकः॥ तद्वंशजन्याधन्याहियद्वंशेशंकरार्चकः॥८॥ यस्यवंशेसमुत्पन्नःशंकरा
र्चनतत्परः॥ तद्वंशजन्याःसर्वेपिपूजनीयाःसुरैःसदा॥९॥ नृत्यंतिपितरस्तस्ययस्यवंशेशिवार्चकः॥ रुदंतिपितरस्तस्यनयद्वंशेशि
वार्चकः॥१०॥ कदाचिदपिगौरीशंपयसायोभिषिंचति॥ सपुनस्तन्यपयसास्वोदरंनाभिषिंचति॥११॥ सएवधन्यःपूतात्माकृतकृत्यःसएव
हि,योभिषिंचमहादेवंबिल्वाद्यैःपूजयिष्यति॥ नराभवंतिनिष्पापादृष्ट्वापिशिवपूजकं॥ अतःशिवार्चकोधन्योभाग्यवांश्चनसंशयः॥१३॥
उपेंद्रादिकृतांपूजांयदिवांछतिमानवः॥ तदाभक्त्यातियत्नेनकर्त्तव्यंशिवपूजनं॥१४॥ शिवार्चनेनयल्लभ्यंतल्लभ्यंनान्यधर्मतः॥ यदन्य
धर्मैर्लभ्यंस्यात्तल्लभ्यंशिवपूजया॥१५॥ नराभवंतिभूपालाःशंकरस्यैवपूजया॥ तएवलब्ध्वाविष्णुत्वंप्रयांतिशिवरूपतां॥१६॥ शि
वार्चनप्रभावोयःसकेनज्ञायतेयतः॥ वेदैरपिनविज्ञातःसप्रभावोखिलार्थदः॥१७॥ शिवार्चकास्त्रिपुंड्रांकाःशिवपारिषदामलाः॥
उपेंद्रादिशिरोरत्नरंजितामलपादुकाः॥१८॥ नमोनमःशांभवेभ्यःशांभवेभ्योनमोनमः॥ नमोनमःशांभवेभ्यःपुनर्भूयोनमोनमः॥
॥१९॥ भुव्यंतरिक्षेपातालेयेभविष्यंतिशांभवाः॥ तेभ्योनमोनमोनमोनित्यंनमोनित्यंनमोनमः॥२०॥ अस्माभिरेतेदृश्यंतेभाग्येनशिवपू
जकाः॥ भूरिभाग्यंविनास्माकंकुतःशांभवदर्शनं॥२१॥ यंदृष्ट्वाशांकरंदेवाविष्णुब्रह्मादयोमुदा॥ प्रणमंत्यतियत्नेनसएषःशांकरोत्तमः
॥२२॥ यस्यशांकरवर्यस्यपादांबुजरजःकणान्॥ दधातिशिरसाविष्णुःसएषःशांकरोत्तमः॥२३॥ अनंतजन्मपर्यंतयैतपोदानतत्परः॥
तैरंत्यतनुभिर्भक्त्याक्रियतेशिवपूजनं॥२४॥ अनंतदानधर्माणामनंततपसामपि॥ फलंश्रुतिश्रुतंसाक्षाद्दंतकालेशिवार्चनं॥२५॥ ये
नकेनापिरूपेणयस्यकस्यापिदेहिनः॥ यद्यंतेशिवपूजस्यात्समुक्तोभवतिध्रुवं॥२६॥ ॥अगस्त्यउवाच॥ ॥इतितद्वचनंश्रुत्वा
तदायमसभासदः॥ तंप्रणम्यातियत्नेनचक्रुःपूजांविधानतः॥ ततःसजातोभूपालोभूत्वेंद्रादिपदान्यपि॥ संप्रापशिवसायुज्यंशि
वपूजाप्रभावतः॥२८॥ अतोन्वहंप्रयत्नेनकर्त्तव्यंशिवपूजनं॥ स्मर्त्तव्यश्चमहादेवःसावधानेनसंततं॥२९॥ ॥दधीचिरुवाच॥ ॥
इत्यगस्त्यवचःश्रुत्वातमगस्त्यंसनातनः॥ प्रणम्यविधिवत्तस्मैचकाराभ्यर्चनंमुदा॥३०॥ सततस्तदनुज्ञातोश्रीमध्यार्जुननायक॥

इष्टुंययौबिल्वपाणिर्हृष्टचित्तोनृपोत्तम॥ ३१॥ ततःसनातनोभक्त्याचकारोग्रंतपोनय॥ उद्धूलनत्रिपुंड्राभ्यांभूषितशिव पूजकः॥ ३२॥
ततःप्रसन्नोभगवान्तस्मैदेवोत्तमःशिवः॥ प्रसन्नेसतिगौरीशेनुष्टावाभ्यर्च्यशंकरं॥ ३३॥ वरंययाचेतदनुकाशींप्रापयशंकर॥ वरोयमुत्तमः
शंभोनाहंयाचेवरांतरं॥ ३४॥ इत्युक्तमतिभक्तस्यश्रुत्वावचनमीश्वरः॥ तथास्त्वितितिमुक्त्वेशः तत्रैवांतर्दधेनृप॥ ३५॥ ततःसनातनः प्रापका
शींविश्वेश्वराश्रयां॥ संप्राप्यमुक्तस्तत्रैवविश्वेशानुग्रहान्नृप॥ ३६॥ सबालकोप्यगस्त्यस्यश्रुत्वावचनमादरात्॥ चकारतदनुज्ञातोमृत्ति
कालिंगपूजनं॥ ३७॥ सतुवत्सरपर्यंतंकृत्वामृल्लिंगपूजनं॥ महदैश्वर्यमप्राप्यदुःखितोरण्यमाश्रितः॥ ३८॥ तत्रगत्वारुरोदोच्चैः क्षुत्पिपा
सातुरोर्भकः॥ तदातमाहन्मातातत्रगत्वाविवेकिनी॥ ३९॥ रे रे बालकमारोदीर्धैर्यमावहपौरुषं॥ अधैर्येणकृतेदुःखेप्यर्थसिद्धिर्नसर्वथा॥
॥ ४०॥ इतितद्वचनंश्रुत्वाबालस्तामाह दुःखितः॥ कृतलिंगार्चनस्यापिसौभाग्यंनममाभवत्॥ ४१॥ अगस्त्यवचनंश्रुत्वामयायत्नेनसादरं॥ शि
वपूजाकृतामातःसानासीद्भाग्यदायिनी॥ ४२॥ सौभाग्यमेवनप्राप्तंकृतयाशिवपूजया मुक्तिरंतेकथंप्राप्तासादुर्लभतरायतः॥ ४३॥
अदाहतोग्नितूलस्यकिंमहागिरिदाहकः॥ दारिद्र्यादाहकापूजाकसंसारंदहिष्यति॥ ४४॥ ॥ दधीचिरुवाच॥ ॥ इत्युक्तवंतंमोहे
नतंबालंभ्रांतचेतसं॥ भ्रांतबालवचःश्रुत्वातमाहजननीतदा॥ ॥ सुदती उवाच॥ ॥ रे रे बालक दुर्वृत्तकथमेवंत्वयोच्यते॥
एवंनैवोच्यतेलोकेकेनापिद्विजजन्मना॥ ४६॥ बालकोसियतोभ्रांतस्ततएवंत्वयोच्यते॥ अन्येतुनवदंत्येवंधीराविगतकल्मषाः
॥ अवश्यंप्राप्यतेभीष्टंशिवलिंगार्चनात्सुत॥ अस्मिन्नर्थेश्रुतिर्मानामत्रनास्त्येवसंशयः॥ धर्मान्कुर्वंतिविविधान्श्रुति प्रामाण्यवादि
नः॥ श्रुतिरेवयतःसाक्षात्स्वयंधर्मप्रवर्त्तिका॥ ४९॥ प्रवर्त्तयतिधर्मेषुश्रुतिधर्मपरायणान्॥ निवर्त्तयत्यधर्मेभ्यःसैवाधर्मपराङ्मु
खान्॥ ५०॥ श्रुत्युक्तंकर्मकर्त्तव्यंश्रुतिप्रामाण्यवादिभिः श्रुत्युक्तकर्मकालेनफलंदास्यत्यसंशयः॥ ५१॥ श्रुत्युक्तंकर्मशुचिनायदिसां
गंकृतंभवेत्॥ तदासद्यःफलत्येवतत्कर्मश्रुतिचोदितं॥ ५२॥ व्यंगंयदिभवेत्कर्मतदानफलदायकं॥ सांगमेवकृतंकर्मश्रौतंयस्मा
त्फलप्रदं॥ ५३॥ फलंभवत्यवश्यंहिसांगेनश्रौतकर्मणा॥ अस्मिन्नर्थेनसंदेहस्तत्रमानंश्रुतिर्यतः॥ ५४॥ अतःशिवार्चनंश्रौतंसां
गंचेत्क्रियतेतदा॥ सद्यःसमस्तस्वाभीष्टफलदंतद्भविष्यति॥ ५५॥ नियमाःसंतिबहवःशिवलिंगार्चनेशिशो॥ तेशिश्रुत्वात्व

याकर्त्तुंनशक्यंतेनसंशयः॥५६॥विदित्वानियमान्सर्वान् विधानंचशिवार्चने॥शिवार्चनंकुरुष्वाद्यशिवस्तुष्टोभविष्यति॥५७॥व्यंगा
पिशिवपूजासाकालेनफलदाध्रुवं॥सांगाचेच्छिवपूजासासद्यःसर्वफलप्रदा॥५८॥सांगंयःकुरुतेभक्त्याशिवलिंगार्चनंशिशो॥स
धर्मादिफलाध्यक्षोभवत्येवनसंशयः॥५९॥यःपूजयतिगौरीशंलिंगरूपिणमास्तिकः॥तमेवातिप्रयत्नेनसौभाग्यमनुधावति॥६०॥॥
पुराशिवार्चनेनैवविष्णुनामिततेजसा॥लक्ष्मीप्राप्तातयाविष्णुःसुखीतिष्ठतिसर्वदा॥६०॥विष्णोःशिवप्रसादेनमोक्षोप्यग्रेभविष्यति॥यतः
शिवार्चनफलंभुक्तिर्मुक्तिश्चशाश्वती॥६१॥सर्वदेवोत्तमःसांबोभुक्तिमुक्तिप्रदःशिवः॥अपारकरुणासिंधुर्दीनबंधुस्तमर्चय॥६२॥
कालत्रयेपिदुःखानिनशिवासक्तचेतसां॥अतोविधिवदाराध्यमाराधयमहेश्वरं॥६३॥महेश्वरश्चेद्दुःखानिननाशयतितेतदा॥कःसमर्थ
स्तदन्यस्मात्तवदुःखनिवारणे॥६४॥सर्वेषामपिदुःखानिविनाशयतिशंकरः॥सकिंत्वदीयदुःखानिननाशयतिशंकरः॥६५॥शंकरःशं
करोयस्मात्ततःशंतेप्रयच्छति॥शंकरंसावधानेनसमाराधयसादरं॥६६॥उपेंद्रेंद्रादयःपूर्वंसमभ्यर्च्यमहेश्वरं॥जाताःकृतार्थास्त्वंभक्त्या
पूजयस्वमहेश्वरं॥६७॥गर्भवासानिदुःखानियान्यनंतानितानिच॥कदापिनभविष्यंतिश्रीमृत्युंजयपूजया॥६८॥विश्वासंकुरुविध्युक्तशि
वलिंगार्चनेसुत॥कुरुविश्वस्यसततंशिवलिंगार्चनंमुदा॥६९॥विश्वस्यभाविताभावाःशंभुंभक्त्यार्चयंतिये॥प्राप्नुवंतिनतेभूयोयोनिचक्रं
दुरासदं॥७०॥जाबालविद्भिःसहृत्त्रैर्ज्ञातोथोयंमयापुरा॥अतःसुतमदुक्तार्थेःश्रुत्युक्तार्थेनसंशयः॥७१॥गतश्चेत्तवविश्वासःशिव
लिंगार्चनेसुत॥दुःखंप्राप्स्यस्यसंदेहमिहामुत्रापिसर्वथा॥७२॥शिवलिंगार्चनेनित्येस्वेष्टदेश्रुतिचोदिते॥विश्वासोनभवेद्यस्यसम
हापातकीध्रुवं॥७३॥महापातकयुक्तानांनष्टानांदुष्टचेतसां॥नभविष्यतिविश्वासःश्रुत्युक्तेलिंगपूजने॥७४॥यस्यग्रहाःस्युःस
ततंप्रतिकूलादुराग्रहाः॥तस्यनश्यतिविश्वासःशिवलिंगार्चनेध्रुवं॥७५॥शिवलिंगार्चनेयस्यविश्वासोनभविष्यति॥तस्यस्या
न्नरकावासस्तद्दशक्षयपूर्वकं॥७६॥शिवलिंगार्चचनेयस्यविश्वासःश्रुतिचोदिते॥ससवंशोभुक्तभोगःप्रयातिशिवसंन्नि
धिं॥७७॥अनुकूलाग्रहायस्यानुग्रहोगिरिजापतेः॥तस्यैवशिवपूजायांविश्वासोऽन्यस्यनध्रुवं॥७८॥दुर्मेधयाश्रद्धयाचमूत्नि

श्रीशिवर०७ कालिंगपूजने॥ नभविष्यतिविश्वासः सुतरांसत्यमुच्यते॥७९॥ ॥दधीचिरुवाच॥ ॥इतितद्वचनंश्रुत्वाज्ञात्वाचनियमान्मुने॥ विधिवत्पूज उ० स० पू०
७४ यामासशिवंमृल्लिंगरूपिणं॥ ८०॥ बिल्वपत्रैश्चप्रसूनैश्चतरुगुल्मलतोद्भवैः॥ कुशकाशद्रोणपुष्पैःपूजयामासशंकरं॥ ८१॥ दूर्वाबृहत्यर्क
शमीफुल्लनीलोत्पलैरपि॥ करवीरैरपामार्गैः पूजयामासशंकरं॥ ततः प्रसन्नोगिरिशोनानागणनिषेवितः॥ प्रसन्नंपूजयामाससबालः
पार्वतीपतिं॥ ८३॥ ततस्तुष्टावरुद्रेणनीलरुद्रेणचेश्वरं॥ त्वरितेनापिरुद्रेणरुद्रसूक्तैश्चशंकरं॥ स्तोत्रैश्चविविधैःस्तुत्वाप्रसीदेतिवदन्मु
हुः॥ प्रणतःशिवपादाब्जेब्रह्मविष्ण्वादिपूजिते॥ ८५॥ ततः कृतांजलिपुटः पुष्पैरभ्यर्च्यशंकरं॥ ययाचेमहदैश्वर्यंमुक्तिंचप्रणतःपुनः॥
तद्याचितंददौशंभुर्वरद्वयमपिप्रभुः॥ ददावाकल्पमायुष्यमारोग्यंचमहेश्वरः॥ ८७॥ यतःसांबोमहादेवोवांछितार्थाधिकप्रदः॥ ततस्तद्या
चितंदत्वाददावन्यदपिप्रभुः॥ ८८॥ ततस्तत्रैवसगणोमहेशोंतर्दधेनृप॥ सोपिबालोतिसंतुष्टः स्थितस्तत्रातिविस्मितः॥ ८९॥ सजगा
मततोमात्रेप्रसादंश्रीमहेशितुः॥ सापितद्वचनंश्रुत्वाहृष्टाजातानराधिप॥ ९०॥ ततः परंचसंतुष्टः समृल्लिंगंशिवात्मकं॥ पूजयामा
सपुष्पाद्यैःश्रद्धाभक्तिपुरःसरं॥ ९१॥ तदानीमागतस्तत्रजितारिरितिभूपतिः॥ सतंशिवार्चकंबालंददर्शोत्तमवर्चसं॥ ९२॥ भस्मोद्धूलित
सर्वांगंत्रिपुंड्रांकितमस्तकं॥ रुद्राक्षमालाभरणंतंदृष्ट्वाविस्मितोभवत्॥ ९३॥ ततस्तंशिवचिह्नांकबालकंशिवपूजकं॥ दृष्ट्वासनृपति
र्भक्त्यापूजयामासभूपते॥ ९४॥ ततस्तस्मैददौराजाराज्यंसिंहासनंविना॥ ततोराजाययौभूपवैरिदेशजिगीषया॥ ९५॥ ततः सरा
जाजित्वारीनूजित्वातद्राज्यमंजसा॥ पालयामाससततंसिंहासनमनाकुलः॥ ९६॥ सबालोमहदैश्वर्यंसंप्राप्यमुदितःसदा॥ तदाशि
वंप्रयत्नेनपूजयामाससादरं॥ ९७॥ सबालकःश्रद्धयैवसहस्रघटपूरितैः॥ पंचामृतैर्लिंगरूपमभिषिंचन्महेश्वरं॥ ९८॥ बिल्व श्रीशिव
पत्रैरतिस्वच्छैःप्रसूनैर्विविधैरपि॥ सशिवंपूजयामासभक्तिश्रद्धासमन्वितः॥ ९९॥ शांकरान्भोजयामासक्षारान्नेनसकोटिशः॥ ७४
शांकरेभ्योददौभक्त्यारत्नान्यत्युत्तमानिच॥ १००॥ सबालःकारयामासशिवालयमनुत्तमं॥ तत्रलिंगप्रतिष्ठांचसचकारविधा
नतः॥ १॥ उत्सवान्कारयामाससनित्यंशंकरालये॥ चकाररत्नैर्विविधैःश्रीमहादेवपूजनं॥ २॥ नित्यंपार्थिवलिंगानांसहस्रंपूजयन्स्थि
तः॥ पुत्रपौत्रादिवृद्धिश्चसमभूत्तस्यभूपते॥ ३॥ सएवकल्पपर्यंतंशिवंसंपूज्यसादरं॥ नित्यंशिवकथांशृण्वन्संतोषेणस्थितोनृप॥ ४॥ ततः

६ अयमेवपरोधर्मोद्विजानांनृपसत्तम॥१४॥द्विजःसन्यस्यजेन्मोहाच्छिवलिंगादिपंचकं॥

साशिवमभ्यर्च्यशिवस्मरणपूर्वकं॥ वदन्छिवशिवेत्येवनिजहौप्राणान्नराधिप॥५॥ ततोमहेशकृपयासंप्राप्यशिवसन्निधिं॥श्रीमहादेवकृपयाशि
वेलीनोबभूवसः॥६॥एवमेवपुराराजन्बहवःशांकराःशिवं॥संपूज्यापुर्महादेवंभुक्त्वैश्वर्यंयथेच्छया॥७॥शिवपूजाप्रभावेननिरातंका
निरामयाः॥प्रयांत्येवाशिवंसांबंभुक्तभोगःशिवार्चकाः॥८॥शिवसंसक्तचित्तानांशिवव्रतरतात्मनां॥इहामूत्रापिभूपालनदुःखंसत्यमु
च्यते॥९॥राजन्छिवव्रतेश्रद्धादुर्लभादेहधारिणां॥साभवेद्यदिभाग्येनतदामुक्तिरदूरतः॥१०॥शिवार्चनैरुद्रजपेभस्मरुद्राक्षधा
रणे॥यस्यश्रद्धाभवेन्नित्यंसनिर्वाणांगनापतिः॥११॥शिवलिंगंबिल्वपत्रंरुद्राक्षश्रौतभस्मच॥शैवत्वंचेतिपंचैतेयत्नतस्त्वनपापभीः
॥१२॥साक्षान्मुक्तिप्रदंधन्यंशिवलिंगादिपंचकं॥दृष्ट्वैवविलयंयांतिपातकानिसहस्रशः॥१३॥संपादनीयंयत्नेनशिवलिंगादिपंचकं
॥सदूरतःपरित्याज्यश्वचांडालइवसर्वदा॥१५॥निधानरूपंसंप्राप्यशिवलिंगादिपंचकं॥यस्त्यजेन्मोहसंक्रांतःससंक्रांतोहिपातकैः॥
॥१६॥पंचवल्कप्रियतमंशिवलिंगादिपंचकं॥यत्नदृष्ट्वंततोयांतिदूरतोयमकिंकरा॥१७॥महादेवप्रियतरंशिवलिंगादिपंचकं॥
यास्मिन्पश्यंतिविष्ण्वाद्यास्तेनमंत्यर्चयंतिच॥१८॥यास्मिन्भवतिभाग्येनशिवलिंगादिपंचकं॥सभुक्त्वस्वेष्टविभवःप्रयातिशिव
रूपतां॥१९॥एकैकमस्तियत्तत्रशिवलिंगादिपंचकं॥तन्मात्रमपिभूपालहेतुःस्वर्गापवर्गयोः॥२०॥शैवधर्मंमनाश्रित्ययोमुक्तिम
भिवांछति॥तस्यदूरतरामुक्तिःस्वप्नेपिनृपसत्तम्॥२१॥शैवधर्मविनिर्मुक्ताःकालपाशनियंत्रिताः॥प्रयातिकालसदनंकेवलंस्व
कुलान्विताः॥२२॥शैवधर्मसमाक्रांताशिवपूजारतात्मनां॥येकुर्वंत्यानुकूल्यंतेमुच्यंतेपापसंचयात्॥२३॥शैवधर्मरतान्दृष्ट्वायोभिनंद
तिसादरं॥सभक्तोदेवदेवस्यमहेशस्येतिमन्महे॥२४॥यास्मिन्देशेभविष्यंतिशैवधर्मरताद्विजाः॥सपावनोधन्योधन्यस्तद्देशपाल
कः॥२५॥भवानप्यतिधन्योसिशैवधर्माभिरक्षकः॥त्वदधीनौयतोभूपधर्माधर्मौविनिश्चितौ॥२६॥अशैवश्चेद्भवेद्राजातद्वातद्देशवा
सिनः॥अशैवाएवबहुधाभविष्यंतिनसंशयः॥२७॥अशैवेननरेंद्रेणपालितायाःप्रजाःसदा॥तायांतिनरकंघोरमशैवनृपसंयुताः
॥२८॥अतोभवान्प्रयत्नेनशैवधर्मरतोनिशं॥शैवान्पालयभूपालधर्मोयंतवमुक्तिदः॥२९॥आस्थांमाकुरुभूपालदेहेस्मिन्नध्रुवेध्रु
वं॥सर्वदाप्यतियत्नेनपूजयस्वमहेश्वरं॥३०॥गर्भवासादिदुःखानिस्मृत्वास्मृत्वापुनःपुनः॥तद्दुःखनाशकंनित्यंशंकरंशरणंव्रज
॥३१॥विनामहेश्वरादन्यःसंसारभयनाशकः॥नास्त्यतोत्यंतयत्नेनपूजयस्वमहेश्वरं॥३२॥वांछांमाकुरुविष्णुत्वेब्रह्मत्वेनान्नरा

धिप॥किंतुवांछययत्नेनशिवसायुज्यमास्तिक॥३३॥राजन्पुरात्वयाप्राप्तंविष्णुत्वंशिवपूजया॥ब्रह्मत्वेचततस्तत्त्ववांछांमाकुरुसर्वथा॥३४॥अनादिभू
तेसंसारेकिंनप्राप्तंत्वयानृप॥विष्णुत्वादौततोवांछांमाकुरुष्वकदाचन॥३५॥विष्णुत्वप्रापकेधर्मेक्षीणेसतिनृपोत्तम॥विष्णुत्वरहितोभूमौपु
नर्मर्त्योभविष्यति॥३६॥एवंसतिनृपाधीशब्रह्मत्वादिपदेष्वपि॥विनश्वरेष्वतस्तेषुवांछांत्यजविवेकितः॥३७॥यंप्राप्यभूरितपसाधर्मैर्नाना
नाविधैरपि॥भूयोनैवनिवर्त्तंतेतमर्चयमहेश्वरं॥३८॥निवृत्तंनभवत्येवयथावह्निगतंहविः॥तथाशिवेवकंप्राप्यमानवोननिवर्त्तते॥३९॥
सतांगतिर्महादेवःशाश्वतोभक्तवत्सलः॥प्राप्यःप्रयत्नैर्विविधैस्तदन्यस्तुनतादृशः॥४०॥प्रसन्नेश्रीमहादेवेपशुपाशविमोचिके॥मुक्ता
भवंतिपशवोब्रह्मविष्ण्वादयोनृप॥४१॥ब्रह्मविष्ण्वादयःसर्वेपशवःपरिकीर्तिताः॥तस्मात्तैःश्रीमहादेवःपशुपाशविमोचकः॥४२॥शिवःसं
सारपाशेनविष्णुब्रह्मादिकान्पशून्॥बध्वाकदाचित्कृपयामोचयत्यपितान्पशून्॥४३॥पशून्स्पृष्ट्वाविष्ण्वादीन्पालयत्यपितान्पशून्॥संहरीष्य
तिचांतेतान्पशून्पशुपतिःशिवः॥४४॥एतादृशंपशुपतिंनित्यमानंदरूपिणं॥शरणंयाहिभूपालशरण्यंसुकृतात्मनां॥४५॥भवंतिपशवोनित्यंयम
ज्ञात्वामहेश्वरं॥तमाराधयभूपालविधिवद्विधिबोधितं॥४६॥हृदिध्यात्वामहादेवंसकृदप्यमलाशयाः॥नगर्भनरकादीनिप्राप्नुवंति
ध्रुवंध्रुवं॥४७॥गर्भवासादिदुःखानितावद्देवनराधिप॥यावन्नमनसाध्यातःपार्वतीप्राणवल्लभः॥४८॥पार्वतीनाथविश्वेशमहेशेतिजप
ंतिये॥तानंतेमोचयत्येवशिवःसंसारपाशतः॥४९॥संसारंदुस्तरंज्ञात्वाज्ञात्वाजन्मचदुःखदं॥भजंतिश्रीमहादेवंमुनयोवीतकल्मषाः॥
॥५०॥भजशंकरमाराध्यंयजशंकरमन्वहं॥जपनामानिशैवानिभस्मोद्धूलनपूर्वकं॥५१॥अयमेवोपदेशस्तेकर्त्तव्योस्माभिरादरात्॥यतः
शैवोभवान्राजन्मोक्षार्थीशिवतत्परः॥५२॥अशांकरायोपदेशोनेदृशःक्रियतेनृप॥ततोधर्मोपदेशार्हस्त्वादृशोनहिवस्तुतः॥५३॥सुक्षेत्रोप्तं
यथाबीजंफलतिस्वानुरूपतः॥तथाधर्मोपदेशोपिशैवेफलतिवस्तुतः॥५४॥यथोप्तमूखरक्षेत्रेबीजंनफलदायकं॥तथाधर्मोपदेशोयंशैवा
न्येनफलप्रदः॥५५॥अशैवान्सावधानेनशिक्षयस्वनराधिप॥शिवानत्यंतयत्नेनपालयस्वस्वशक्तितः॥५६॥अस्मिन्मध्यार्जुनक्षेत्रेकृतंधर्मानुपा
लनं॥कृतामध्यार्जुनेशस्यपूजापिप्रतिवासरं॥५७॥अस्मिन्मध्यार्जुनेवासोदेवानामपिदुर्लभः॥क्षेत्रमेतन्नृपश्रेष्ठशिवलिंगात्मकंयतः॥५८॥
उषित्वैकदिनंवात्रदृष्ट्वामध्यार्जुनेश्वरं॥संपूज्यचयथाशक्त्याप्रयांत्येवशिवंजनाः॥५९॥पुरावासःकृतोभूपाशीवस्त्वनेपुभूरिशः॥तद्द
सफलतोवासस्त्वयाप्राप्तोत्रभूपते॥६०॥नीतान्यनेकजन्मानित्वयात्युग्रतपांसिच॥कृतानिकाशीप्राप्त्यर्थंशिवपूजापुरःसरं॥६१॥अतःपरंभुंक्ष्व

भोगः काशीं व्रजविधानतः ॥ ममापिगम्यते काशीं श्वः परश्वोथवानृप ॥ ६२ ॥ ॥ सदाशीवउवाच ॥ ॥ इतिपीयूषसदृशं दधीचिवचनं शिवे
॥ श्रुत्वास धर्ममूर्तिस्तं प्रणम्याह कृतांजलिः ॥ ६३ ॥ ॥ धर्ममूर्त्तिरुवाच ॥ ॥ कृतार्थोस्मिमुनिश्रेष्ठ कृपामयिकृतात्वया ॥ यतः सर्वार्थदा
पुण्या श्राविताशांकरीकथा ॥ ६४ ॥ मुनेभवादृशाः शैवायतोदीनदयालवः ॥ श्राविताकथमेवाद्यकथापापौघहारिणी ॥ ६५ ॥ भवतांदर्शनेनैवन
ष्टंपापवनंमम ॥ पुण्याशिवकथैषातुमह्यंमोक्षंप्रयच्छति ॥ ६६ ॥ कदावागम्यतेकाश्यांज्ञापयित्वाप्रयांतुवः ॥ सत्संगतिमवाप्याहंयास्याम्यत्र
नसंशयः ॥ ६७ ॥ ॥ सदाशिवउवाच ॥ ॥ इत्युक्त्वासनृपोभूपः शांभवान्मुनिसत्तमान् ॥ पूजयामासयत्नेनभक्तिश्रद्धापुरस्सरं ॥ ६८ ॥ दधी
चिप्रमुखाः सर्वेतेनभूपेनपूजिताः ॥ ययुः स्वस्वाश्रमंदेविस्मरंतोमामजंविभुं ॥ ६९ ॥ दधीच्याद्याः कियत्कालंनिद्रांकृत्वाततः परं ॥ काशींगं
तुंसमुद्युक्ताः प्रातः स्नात्वायथाविधि ॥ ७० ॥ ततः श्राद्धादिकंकृत्वायथाशास्त्रंयथाक्रमं ॥ प्रतस्थिरेततः काशींराजधानीममप्रिये ॥ ७१ ॥
राजापिराज्यंविन्यस्यपुत्रेषुविधिवत्ततः ॥ सहैवऋषिभिः काशींसंप्रापविधिवच्छिवे ॥ ७२ ॥ काशींसंप्राप्यतेसर्वेप्रापुरानंदमक्षयं ॥ ज्ञानवा
प्यांततः सर्वेस्नानंचक्रुर्यथाविधि ॥ ७३ ॥ ज्ञानेशादींस्ततोभ्यर्च्यविश्वेश्वरमुमापतिं ॥ जलबिल्वप्रसूनाद्यैः पूजयामासुरंबिके ॥ ७४ ॥
पूजयंतस्थितामांतेबहुकालंवरानने ॥ सर्वेमुक्तास्ततोदेविमत्प्रसादादकल्मषाः ॥ ७५ ॥ इदंलिंगमुपाश्रित्यकोयातिमरणंविना ॥ मृत्युंवां
छतिधन्योलंशैवंगुरुमिवप्रियं ॥ ७६ ॥ योयातिकाशींसंप्राप्याप्यधमः पापकृच्छिवे ॥ तस्यमुक्तिः कथंभूयान्महाकल्पशतैरपि ॥ ७७ ॥
मध्यार्जुनेशंसंप्राप्यधमः पापकृच्छिवे ॥ तस्यमुक्तिः कथंभूयान्ममध्यार्जुनेशंमदनुग्रहेणमायाविमुक्तामयिसक्तचित्ताः ॥ संप्राप्यसंसा
रदवाग्निशांत्यैसंपूज्यतिष्ठंतिशिवेशुभानने ॥ ७९ ॥ ॥ इतिश्रीशिवरहस्येउग्राख्येसप्तमांशेशिवगौरीसंवादेमध्यार्जुनमहिमानु
वर्णनंनामाष्टाविंशोध्यायः ॥ २८ ॥ ॥ श्रीउग्रायनमः ॥ ॥ शिवउवाच ॥ ॥ शिवेमध्यार्जुनादीनिसंतितीर्थानिकोटिशः ॥ तेषांप्रभा
वः केनापिनज्ञातुंशक्यतेध्रुवं ॥ १ ॥ पृथिव्यांसंतितीर्थानिकोटिशः कमलानने ॥ तानिसर्वाणितीर्थानिकाशीप्राप्तिकराणिहि ॥ २ ॥ पाताला
दिषुलोकेषुसंतितीर्थानियानिच ॥ तानिसर्वाणितीर्थानिका० ॥ ३ ॥ भुवरादिषुलोकेषुसंतितीर्थानियानिच ॥ तानि० श्रीकाशीक्षेत्रभिन्ना
निसंतितीर्थानिकोटिशः ॥ तेषुतप्तेतपस्येषाकाशीसंप्राप्यतेशिवे ॥ ५ ॥ यावंतिसंतितीर्थानिसर्वलोकेषुशैलजे ॥ तावतामपितीर्थ
र्थानांकाशीप्राप्तिः फलंशिवे ॥ ६ ॥ एकैकस्मिन्स्थिचक्षेत्रेकाशीभिन्नेसहस्रधा ॥ येनतप्तंतपस्तेनकाशीसंप्राप्यतेशिवे ॥ ७ ॥ अनंतजन्म

श्रीशिवर०७ प्रियेर्येनकृताधर्माःसहस्रधा।।तेनैवलभ्यतेकाशीमद्रूपामुक्तिदायिनी।।८।।काशीतोप्यधिकंतीर्थंनकुत्रापिवरानने।।सत्यंसत्यंपुनःसत्यमुद्धृत्य उ-स-पू:
७५ भुजमुच्यते।।९।।काशीतोप्यधिकंतीर्थमन्यदस्तीतियोवदेत्।।सवेदबाह्यइत्येवज्ञातव्योवेदवादिभिः।।१०।।नास्तिकाशीसमंक्षेत्रंलोकेषु
७६ कापिवस्तुतः।।नास्तिमत्सदृशोदेवोविष्ण्वादिष्वखिलेष्वपि।।११।।यदेतद्विमलंलिंगंदृश्यतेधाममदात्मकं।।एतल्लिंगसमंलिंगंनकुत्रापिव
रानने।।१२।।इदमेवपरंज्योतिरिदमेवपरात्परं।।इदमेवमहाकारमनंतमिदमेवहि।।१३।।अनंतवेदवेदांतसारःसर्वोवरानने।।पिंडीभूया
त्रसतत्तंलिंगाकारेणतिष्ठति।।१४।।निर्विकारंपरंब्रह्मलिंगमेतन्मनोरमे।।निष्कलंनिर्गुणंशांतमिदमेवनसंशयः।।१५।।शैवमेतन्महः
साक्षादक्षयंलिंगमुत्तमं।।इदंलिंगमनाद्यंतंसच्चिदानंदलक्षणं।।१६।।सर्वपुण्यफलाकारमविकारंनिरंजनं।।लिंगमेतन्ममोंकारंमोक्षा
कारमनाकरं।।१७।।गिरिजेपश्यपश्येदंलिंगंमंगलदायकं।।कथमेतत्प्राकृदोदिशीविश्रम्यगच्छति।।१८।।वेदास्तुवंतिबहुधालिंगस्यास्ये
वसर्वदा।।माहात्म्यंमोक्षदंपुण्यंस्वस्वशक्त्यावरानने।।१९।।यावदस्यास्तिमाहात्म्यंशिवलिंगस्यवस्तुतः।।तावन्माहात्म्यममलेवेदै
रपिनबुध्यते।।२०।।अस्यलिंगस्यमाहात्म्यंब्रह्मविष्ण्वादिभिःसुरैः।।नज्ञायतेमुनींद्रैश्चसिद्धैश्चान्यैश्चवस्तुतः।।२१।।सर्वज्ञेनम
यैकेनलिंगस्यास्यवरानने।।माहात्म्यंज्ञायतेसम्यगन्यैस्तुनसर्वथा।।२२।।कृतधर्माःपूतचित्ताःयेतपोमूर्त्तयोजनाः।।तेषामेवा
स्यलिंगस्यदर्शनंभवतिप्रिये।।२३।।उक्तक्षेत्रेषुसर्वेषुतदन्येष्वपिकोटिशः।।तप्तंयेनतपस्तेनदृश्यतेलिंगमीदृशं।।२४।।तुलादा श्रीशिव
नादिदानानिकोटिशोविधिपूर्वकं।।कृतानियेनतेनैवदृश्यतेलिंगमीदृशं।।२५।।कदाचिदपियेनेदंलिंगंदृष्टंममप्रिये।।तेनगर्भा ७५
दिदुःखानीनप्राप्यंतेनसंशयः।।२६।।अस्मिंल्लिंगेमहाकारेममविश्वेश्वराभिधे।।यस्यभक्तिर्दृढातस्मैमुक्तिंदास्येवरानने।।२७।।येन ७६
ध्यातमिदंलिंगंममविश्वेश्वराभिधं।।समुक्तिकांतांलभतेविनायत्नेनशोभने।।२८।।अस्मिंल्लिंगेमुदादत्तंयेनबिल्वदलंप्रिये।।तेनदत्ता
निरत्नानिकोटिशोनात्रसंशयः।।२९।।अस्मिंलिंगेमुदादत्तंजलमल्पंममप्रिये।।ससागरनदीतोयंदत्तंतेनाखिलंप्रिये।।३०।।येना
न्नफलमन्नंवादत्तंलिंगेमदात्मके।।तेनमेरुसमान्नानिदत्तान्येवनसंशयः।।३१।।एकोपिदत्तोयेनात्रदीपस्तेनतुकोटिशः।।नित्यमत्युज्ज्व
लादीपदत्ताएवनसंशयः।।३२।।एकंवापिकृतंयेनलिंगस्यास्यप्रदक्षिणं।।प्रदक्षिणीकृतातेनक्षोणीसर्वानसंशयः।।३४।।लिंगमे

तत्क्षणार्धंवायेनध्यातंमहात्मकं॥ तेनध्यातोस्म्यहंसाक्षाद्बहुकालंवरानने॥ ३५॥ तिलैर्लक्षैर्यवकैर्नाम्नो येनैकाहुतिर्हुता॥ कोटिहोमाःकृ
तास्तेन कोटिशोविधिपूर्वकं॥ ३६॥ येनैकवारंजप्तोत्रशैवःपंचाक्षरःपरः॥ तेनतप्तंतपोघोरंकल्पकोट्ययुतंशिवे॥ ३७॥ येनैकवार
मत्रांबेरुद्रपारायणंकृतं॥ वेदपारायणंतेनकल्पकोट्ययुतंकृतं॥ ३८॥ येनकाश्यांस्थितंभक्त्याक्षणार्धमपिशोभने॥ पंचाग्निमध्ये
तेनैवस्थितंकल्पार्बुदाष्टकं॥ ३९॥ येनेदंपूजितंलिंगंजलपुष्पदलादिभिः॥ तेनाहंपूजितःसाक्षाद्ब्रह्मविष्णवादिपूजितःसाक्षाद्ब्र
ह्मविष्णवादिपूजितः॥ ४०॥ दृष्टंयेनेदममलंलिंगंविश्वेश्वराभिधं॥ तेनसाक्षादहंदृष्टःपरमानंदलक्षणः॥ ४१॥ येनेदंप्रणतंलिंगंमम
विश्वेश्वराभिदं॥ तेनसाक्षादहंभक्त्याप्रणतःसुरवंदित॥ ४२॥ निमज्यज्ञानवाप्यांमामेतल्लिंगस्वरूपिणं॥ यःस्मरेत्तस्सवंशस्सन्मा
मेत्येववरानने॥ ४३॥ येनस्तुतमिदंलिंगंममविश्वेश्वराभिधं॥ तेनसाक्षादहंदेविस्तुतएवनसंशयः॥ ४४॥ येनस्पृष्टमिदंलिंगंममवि
श्वेश्वराभिधं॥ तेनसाक्षादहंदेविस्पृष्टएवनसंशयः॥ ४५॥ पूजितोहंमहादेवोदृष्टस्पृष्टस्ततोनतः॥ दास्याम्यैश्वर्यमतुलंमुक्तिंचकम
लानने॥ ४६॥ लिंगानिसंत्यनंतानिकाश्यांयद्यपिशोभने॥ तथाप्येतत्ममलिंगेनातोत्रप्रीतिरत्तिमे॥ ४७॥ श्रीकाशीलिंगतुल्या
निलिंगानिनजगत्त्रये॥ काशीलिंगेष्वपिशिवेलिंगमेतद्विलक्षणं॥ ४८॥ शिवेकाश्यन्यलिंगेभ्यःकाशीलिंगानिवस्तुतः॥ श्रेष्ठानिते
षुलिंगेषुश्रेष्ठंलिंगमिदंमम॥ ४९॥ येनदृष्टमिदंलिंगंममविश्वेश्वराभिधं॥ तेनदृष्टानिलिंगानिनानादेशस्थितान्यपि॥ ५०॥ येनार्चित
मिदंलिंगंममविश्वेश्वराभिधं॥ तेनार्चितानिलिंगानिनानादेशस्थितान्यपि॥ ५१॥ येनस्पृष्टमिदंलिंगंममविश्वेश्वराभिधं॥ तेनस्पृष्टानि
लिंगानिनानादेशस्थितान्यपि॥ ५२॥ येनस्तुतमिदंलिंगंममवि०॥ तेनस्तुतानिलिंगानिनानादेशस्तुतान्यपि॥ ५३॥ येनध्यातमिदं
लिंगंम०॥ तेनध्यातानिलिंगानिनानादेशस्थितान्यपि॥ ५४॥ येनश्रुतमिदंलिंगंमम०॥ तेनश्रुतानिलिंगानिनानादेशस्थितान्यपि॥
मौनीविभूतिपूतांगोयोलिंगमिदमर्चयेत्॥ सोनंतराजसूयादिनानायागफलंलभेत्॥ ५६॥ एतल्लिंगार्चनंकर्तुंप्रयतःप्रस्थि
तोनरः॥ पदेपदेश्वमेधानांफलंप्राप्नोतिशैलजे॥ ५७॥ येनार्चितमिदंलिंगंमद्भक्तेनप्रयत्नतः॥ तेनार्चितोहंसगणःसर्व
दापिवरानने॥ ५८॥ यःपूजयतियत्नेनममेदंलिंगमुत्तमं॥ तंपूजयंतियत्नेनब्रह्मविष्णवादयःसुराः॥ ५९॥ लिंगमेत

त्प्रयत्नेनयोनमेन्ममशोभने॥ तंनमंत्यतियत्नेनब्रह्मविष्ण्वादयःसुराः॥ ६०॥ लिंगमेतत्प्रयत्नेनयस्तौतिकमलानने॥ स्तुवंतितंप्र
यत्नेनब्रह्मविष्ण्वादयःसुराः॥ ६१॥ शिवेकाश्यांप्रयत्नेनयेमदर्चनतत्पराः॥ तेमद्रूपइतिज्ञात्वातान्नमंतिसुराःसदा॥ ६२॥ मल्लिंगपूजानिरताभ
स्मरुद्राक्षभूषणाः॥ मदीयाइतिविज्ञायसुरास्तानर्चयंतिच॥ ६३॥ भूतिरुद्राक्षपूतांगामल्लिंगाराधनप्रियाः॥ ममप्रियाःप्रियेतस्माद्देवाअप्य
र्चयंतितान्॥ ६४॥ यावंतःसंतिकाशीस्थभस्मरुद्राक्षभूषणाः॥ तावंतश्चंचलापांगिभक्ताःपारिषदाभम॥ ६५॥ काशींमुक्तिप्रपांप्राप्य
संसारग्रीष्मतापिताः॥ शिवेनान्यत्नगच्छंतिकदाचिदपिमत्प्रियाः॥ ६६॥ उपसर्गसहस्राणिसोढ्वाकाश्यांवसंतिये॥ तानंतकालेसंसारात्तारया
मिवरानने॥ ६७॥ धैर्यंविज्ञातुमेवेहपुराकाशीनिवासिनां॥ उपसर्गाःपुरासृष्टामयानंताःक्षणेक्षणे॥ ६८॥ तदाऋषीणांसर्वेषांशिवकाशि
निवासिनां॥ उद्वेगाबहवोजाताबहुधैवक्षणेक्षणे॥ ६९॥ छायार्थंवृक्षमूलेषुऋषयोयेषुसंस्थिताः॥ तेवृक्षाःपत्रसंपन्नाःसर्वेशुष्कीकृ
तामया॥ ७०॥ स्थिताःपर्णगृहायेषांतेषांपर्णगृहामया॥ भस्मीकृताःक्षणार्धेनवह्न्यातपनिवारकाः॥ ७१॥ जलंचशोषितंसर्वंकाशीती
र्थस्थितंशिवे॥ ततोविनाशितान्यन्नान्यमलानिफलानिच॥ ७२॥ ततःसृष्टाज्वराःक्रूराःव्याधयोन्येपिदुःखदाः॥ तद्व्याधिसंयुताःसर्वेदुःखंप्रापुर्मुनीश्व
राः॥ ७३॥ विषज्वरसमाक्रांतास्तृषिताःशुष्कतालुकाः॥ सर्वेपिजलमप्राप्यदुःखंप्रापुर्मुनीश्वराः॥ ७४॥ केचिद्विषज्वराक्रांताकेचिच्छीतज्वरा
न्विताः॥ केचिद्रोगांतराक्रांताजाताःसर्वेपिचेकदा॥ ७५॥ दुःस्वप्नादर्शितास्तेभ्यःकोटिशोभयदायकाः॥ अद्भुतान्यपिचिन्हानिदर्शितानिम
याशिवे॥ ७६॥ तदानींयमिनांश्रेष्ठंजैगीषव्यंमहामुनिं॥ संप्रापुर्मुनयोदिग्भ्योमहाव्याधिसमाकुलाः॥ ७७॥ कोटिनामयुतंप्रापमुनी
नांपूर्वतोमुनिं॥ ततःशतगुणंप्रापदक्षिणातोमुनीश्वरं॥ ७८॥ ततःकोटिगुणंप्रापपश्चिमात्तोमुनीश्वरं॥ ततोर्बुदगुणंप्रापमुनिमुत्तरतःशिवे श्रीशिव
॥ ७९॥ एतावंतोमुनिवराःसर्वेप्यागत्यतंमुनिं॥ प्रणम्योचुःशुष्ककंठाज्वरदाहादिपीडिताः॥ ८०॥ ॥ऋषयऊचुः॥ ॥नानाव्याधिकृतंदुः ७६
खंसर्वैरप्यनुभूयते॥ सर्वथास्मासुकस्यापिस्वास्थ्यंनास्त्येवसर्वदा॥ ८१॥ अन्यान्यपिचदुःखानिप्राप्यंतेसर्वदामुने॥ इयत्तानास्तिदुःखा ७७
नांवस्तुतोनानृतंध्रुवं॥ ८२॥ दग्धाःपर्णगृहाःसर्वेजाताःशुष्काश्चभूरुहाः॥ फलान्यन्नानिदग्धानिवल्कलानिचभूरिशः॥ ८३॥ जलंनलभ्य
तेक्वापिपानार्थमपिवस्तुतः॥ किमुतान्नफलादीनितद्रूपमपिनेक्षितं॥ ८४॥ पंचक्रोशात्मकेक्षेत्रेसर्वेप्येतेह्युपद्रवाः॥ पंचक्रोशाद्बहिः
सर्वेतिष्ठंतिसुखिनोजनाः॥ ८५॥ अतोतःपरमस्माभिःकाश्यांस्थातुंनशक्यते॥ शीघ्रंनिर्गत्यगंतव्यमिदानीमेवसर्वथा॥ ८६॥ तीर्थानि

सोंतिभूपृष्ठेनर्मदादीनिभूरिशः॥ तेषुस्थातव्यमनिशंशिवक्षेत्राणितान्यपि॥ ८७॥ जीवनंचेद्भवेदग्रेधर्मसिधिर्भविष्यति॥ गतेषुजीवनेंधर्मं
कथंसाध्योभविष्यति॥ ८८॥ यदिप्राणागमिष्यंतिशीघ्रमत्रतदामुने॥ मोक्षोभविष्यत्यधुनातेगमिष्यंतिनःकथं॥ ८९॥ इतितेषांवचःश्रुत्वामु
नीनामार्त्तचेतसां॥ जैगीषव्योदुःखितोपिप्राहतान्धैर्यमुद्वहन्॥ ९०॥ ॥जैगीषव्यउवाच॥ ॥प्राप्यंतएवदुःखानिसर्वैर्नात्रास्तिनसंशयः॥
उपसर्गाःसमुत्पन्नादैवयोगेनभूरिशः॥ ९१॥ उपसर्गाभविष्यंतिकाश्यांयेयेयदायदा॥ तेतेसर्वेःपिसोढव्याःसर्वदापितदातदा॥ ९२॥ उपसर्गा
न्तृणीकृत्ययःकाश्यांस्थातुमिच्छति॥ तस्मैमुक्तिमयत्नेनकाशीनाथःप्रयच्छति॥ ९३॥ द्विवारंनैवमर्त्तव्यंकिंतुमर्त्तव्यमेकदा॥ तदद्याद्वायुतां
तेवामरणंनोभविष्यति॥ ९४॥ त्याज्यैवयत्नकुत्रापिप्राप्तेयंतनुरेकदा॥ त्याज्यासातनुरन्यैवत्याज्यायत्नपुरःसरं॥ ९५॥ प्राणेषूत्क्रममाणे
षुजंतोरत्रमहेश्वरः॥ शैवमेवोपदिशतिमोक्षार्थंतारकंमनुं॥ ९६॥ महेशांकेसमारुह्यमहेशेनैवचोदितः॥ प्राप्तव्यस्तारकोमंत्रः शिवपंचा
क्षराभिधः॥ ९७॥ गृहीताःपूर्वमस्माभिरनंतास्तनवोवृथा॥ त्यक्ताश्चताःकीटकादौनानानरकसाधनाः॥ ९८॥ यावद्भुक्तंपुरादुःखंनरकेषुसह
स्रधा॥ तावद्दुःखमिदानींकिंभवद्भिर्भुजतेद्विजाः॥ ९९॥ यावद्दुःखंगर्भवासेभवद्भिर्भुक्तमेकदा॥ तावद्दुःख०॥ १००॥ यावद्दुःखंपुराभुक्तंजननीयो
निनिर्गमे॥ तावद्दु०॥ १॥ यावद्दुःखंपुराभुक्तंजननीजठराग्निना॥ तावद्दु०॥ २॥ शूकरश्वारासभादिनानाकुत्सितयोनिषु॥ बहुधोत्पत्तिरभवद्बहुदुः
खप्रदायिनी॥ ३॥ तानिदुःखानिसर्वाणिस्मर्त्तव्यानिपुनःपुनः॥ बहुधैवानुभूतानिविस्मृतानिनतानितु॥ ४॥ किंचानंतैस्तपोदानधर्मैश्चवि
धिवत्कृतैः॥ प्राप्तेयंपुण्यनिलयाकथंत्याज्यामनीषिभिः॥ ५॥ काशीप्राप्ताधर्मसंघैरनंतैःकालसाधितैः॥ सर्वपुण्यमयीधन्याकाशीत्याज्याकथं
भवेत्॥ ६॥ काशीप्राप्त्यर्थमस्माभिर्बहुधैवकृतंतपः॥ तपःपुण्यफलावाप्ताकाशीत्याज्यानसर्वथा॥ ७॥ अनायासेननप्राप्तापरंत्वायासको
टिभिः॥ प्राप्तेयंमुक्तिदाकाशीत्याज्यास्याज्जीवताकथं॥ ८॥ कदाचिन्निधयस्त्याज्याःपुत्राद्याश्चमुनीश्वराः॥ इयंकाशीकथंत्याज्यासर्वमुक्ति
प्रदायिनी॥ ९॥ त्यागार्थमेवकिंप्राप्ताकाशीयंतपसापुरा॥ त्याज्यैवचेदेतदर्थंतपस्तप्तंपुराकथं॥ १०॥ तीर्थांतरेषुगंतव्यंतेषुस्थातव्यमित्य
पि॥ भवद्भिरुक्तंमोहेननवक्तव्यंतथाद्विजाः॥ ११॥ निधानकलशंत्यक्त्वाकःकुर्याद्त्यजार्जवं॥ एवंकाशीमिमांत्यक्त्वाकोवातीर्थांतरेव्रजेत्॥
॥ १२॥ यःतीर्थांतरमुद्दिश्यकाशींत्यक्त्वागमिष्यति॥ समहापातकाक्रांतोभविष्यतिपदेपदे॥ १३॥ काश्यांस्थित्वाजिगमिषांकुर्वंतीर्थांतरेन
रः॥ नानापातकसंक्रांतोभवत्येवनसंशयः॥ १४॥ काशींत्यक्त्वान्यतीर्थानिगंतुमिच्छंतियेयदा॥ तदातेभ्यःपरावृत्तामुक्तिर्वार्त्तापिमुक्ति

हा॥ येकाशींत्यक्तुमिछंतिरत्नसिंहासनानिते॥त्यक्कापुरीमकुंडेवुस्छातुमिछंतिवस्तुतः॥१६॥ येकाशींत्यक्तुमिछंतितेपीयूषमुखेस्थितं॥त्यक्कारेतोनि 
शंपातुमिछंत्येवनसंशयः॥१७॥येकाशींत्यक्तुमिछंतितेमहाराज्यनाथतां॥त्यक्का चंडालभृत्यत्वं प्राप्तुमिछंति दुर्भगाः॥१८॥येकाशींत्यक्तुमिछंतिस्व
र्गभोगंविहायते॥नरकावासमिछंतियावदाचंद्रतारकं॥१९॥येकाशींत्यक्तुमिछंतिरंभाभोगंविहायते॥गार्दभीयोगमिछंतिनरकावाससाधनं॥२०॥
येकाशींत्यक्तुमिछंतिवितेहायान्नमुत्तमं॥विष्ठाभक्षणमिछंतिसुहृद्वर्गसमन्विताः॥२१॥ येकाशींत्यक्तुमिछंतितेसुगंधानुलेपनं त्यक्कासुकरविष्ठानु
लेपनेछांप्रकुर्वते॥२२॥ येकाशींत्यक्तुमिछंतिनिर्वाणपददायिनीं॥तेसर्वेप्यात्महंतारस्तेषांनास्त्येनिष्कृतिः॥२३॥ शरीरेमी दृक्शीमास्थांकोवाकुर्वीत
दुर्धियः॥ काशींत्यक्काशरीराणिरक्षणीयानिकिंबुधैः॥२४॥शरीरंवस्तुतस्तुछंमूत्रामेध्यासमावृतं॥तस्मिन्नास्थांकथंविप्राभवद्भिःक्रियतेधुना॥
॥२५॥काशीत्याज्येतिसहसाजीवद्भिःकथमुच्यते॥मुक्तिवार्त्तादूरतास्तुकथंलज्जानजायते॥२५॥काशीत्याज्येतिसहसाजीवद्भिःकथमुच्यते॥मु
क्तिवार्त्तादूरतास्तुकथंलज्जानजायते॥२५॥स्रवन्मूत्रपुरीषाद्येशरीरेरक्ष्यतामतिः॥श्वेतिद्वयंदौर्भाग्यलक्षणं॥२६॥संत्यनंतानिपापानिसदाका 
श्याद्बहिर्द्विजाः॥काशीत्यागेलगिष्यंतितानियुष्मासुसर्वथा॥२७॥लग्नानितानिपापानिननश्यंतिकदाचन॥कोटिशःकृततीर्थानामपिसर्वात्म
नाध्रुवं॥२८॥अनंतपापसंघानांफलंकाशीवियोजनं॥अनंतपुण्यसंघानांकाशीवासफलंद्विजाः॥२९॥काशीप्राप्त्यर्थमस्माभिःकथंपुण्यार्जनंकृतं॥
काशीप्रापकपुण्यार्थंयत्नाश्चबहुधाकृताः॥विनायत्नैरियंकाशीलब्धास्माभिःकिमीदृशैः॥कथंत्याज्याशरीरार्थंधिक्शरीरमिदंद्विजाः॥३१॥काशीं
शरीररक्षार्थंत्यक्ष्यामोएनसायदि॥तदेनांसिहसिष्यंतिकरताडनपूर्वकं॥३२॥शरीरपीडाबहुधायदिसोढुंनशक्यते॥तदाशस्त्रैस्तनूःछित्वा
काश्यांमर्त्तव्यमुत्तमैः॥३३॥ उपोषणैर्वामर्तव्यंकाश्यांदुःखासहिष्णुभिः॥ परंतुकाशीनत्याज्यामनसापिमुमुक्षुभिः॥३४॥धन्याःकीटादयो 
प्येतेविप्राभवदपेक्षया॥ नकाशींत्यक्तुमिछंतिकदाचिदपिचेतसा॥३५॥शताब्दावधिपानीयंकाश्यां क्कापिनदृश्यते॥तथाप्येतेनत्यजं
तिकीशींकीटामुमुक्षवः॥३६॥जलप्रधानमेतेषांकीटानांजीवनंद्विजाः॥ तथापितद्विहायेतेकाश्यां तिष्ठंति धैर्यतः॥३७॥जीवनंध
न्यमेतेषांकाशीसंसक्तचेतसां॥काशींनत्यक्तुमिछंतित्यक्तजीवनसाधनाः॥३८॥एनंपश्यतुमंडूकंचर्ममात्रावशेषितं॥ काश्यांविनाजलेना
यंकथंतिष्ठतिधैर्यतः॥३९॥क्षणार्धमपिमंडूकोनतिष्ठतिजलंविना॥काश्यामेतादृशस्यास्यवासःकथमभूद्द्विजाः॥४०॥मंडूकापेक्षया
प्यतेभवंतस्त्वधमाधमाः॥ यतःकाशींविहायाद्यभवंतोगंतुमिछथ॥४१॥धिग्विद्याभवतांमूर्खाःकिंतयाविद्ययाधुना॥ यतःकाशीवि

योगार्थमुद्यतायूयमीदृशाः॥ ४२॥ प्रायोभवंतः सर्वेपिशिश्नोदरपरायणाः॥ अन्यथाभवतामद्यकाशीत्यागेमतिः कथं॥ ४३॥ भक्ष्यभोज्यादिकंकाश्यांस
मृत्थंयावदाप्यते॥ तावद्भवद्भिः कर्त्तव्यः काशीवासोन्नकांक्षिभिः॥ ४४॥ स्थितंभवद्भिः पापिष्ठैः काश्यामन्नादिकांक्षया॥ एतादृशानांभवतांधिग्धिग्धि-
ग्जीवनंवृथा॥ ४५॥ यावद्भक्ष्यादिकंकाश्यांतावत्स्थित्वाततः परं॥ काशींत्यजंतियेमूढास्तेयूयंपातकाश्रयाः॥ ४६॥ भवादृशानांदुष्टानांकाशीं
त्य सं[?]कुमिच्छतां॥ नरकेष्वनिशंवासोभविष्यतिनसंशयः॥ ४७॥ काशीत्यागरतंमोहाद्येपश्यंतिनराधमं॥ तेषामपिभवेत्पापंकिंपुनस्तादृशात्मनां॥ ४८॥
काशीत्याज्येतिबुध्यिश्चेत्तदामन्निकटेधुना॥ किमर्थमागतंयांतुश्यामंकृत्वामुखंजडाः॥ ४९॥ काशीत्यागरतैः साकंमोहाद्यायोनुभाषते॥ नतस्यानि
ष्कृतिर्दृष्टाचांद्रायणशतैरपि॥ ५०॥ अस्मिंधर्मयुगेजाताकाशीत्यागरतिः कथं॥ अधर्मः प्रायशोद्येवसंप्राप्तः कलिकालिकः॥ ५१॥ कलिकालेभविष्यंति
काशीत्यागरताजनाः॥ ततस्तेषांभविष्यंतियातनाअपिदुःसहाः॥ ५२॥ अन्यतीर्थसमत्वेनकलौज्ञास्यंतिकाशिकां॥ ततस्तेषां०॥ ५३॥ भविष्यंतिकलौ
विप्राः भूद्गालाभस्मवर्जिताः॥ ततस्ते०॥ ५४॥ शिवान्यमर्चयिष्यंतिकलौत्यक्त्वाशिवार्चनं॥ ततस्ते०॥ ५५॥ शिवान्यंकीर्त्तयिष्यंतिकलौत्यक्त्वाशि
वस्तुतिं॥ ततस्ते०॥ ५६॥ शिवान्यंसंस्मरिष्यंतिकलौत्यक्त्वाशिवस्मृतिं॥ ततस्तेषांभवि०॥ ५७॥ एतादृशानिकर्माणिपापहेतूनिभूरिशः॥ द्विजाअपिक
रिष्यंतिसंप्राप्तेतुकलौयुगे॥ ५८॥ अधुनाकथमेतानिकर्माणिदुरहृष्टयाः॥ कर्त्तुमिच्छथपापिष्ठादेहरक्षणतत्पराः॥ ५९॥ काशींगत्वासदाकाश्यांवसा
मीत्यपियोव~~घाश्रित्यास्थितस्तत्रसर्वदा~~॥ ६०॥ देत॥ सनिष्पापोभवत्येषाकाशीसंत्यज्यतेकथं॥ ६०॥ पुराविंध्याचलप्रांतेकश्चिदासीद्द्विजाधमः॥ कि
रातवृत्तिमाश्रित्यास्थितस्तत्रसर्वदा॥ ६१॥ ब्रह्महत्याकृतानंतास्तेनपातकमूर्त्तिना॥ गोहत्यावाजिहत्याश्चभ्रूणहत्याश्चकोटिशः॥ ६२॥ तेनपा
तकिनाभूरिब्रह्मस्वहरणंकृतं॥ समातृगमनीजातोभगिनीगमनीततः॥ ६३॥ सुरापानंकृतंतेनगोमांसमपिभक्षितं॥ प्रत्यहंतस्यगोमांसमशनंसम
भूद्द्विजाः॥ ६४॥ एवमेवसपापानिकुर्वन्नेवहिसंस्थितः॥ ततः कदाचिद्रोगेण पीडितोभूत्सदुष्टधीः॥ ६५॥ तदानींतस्यितावृद्धः पुत्रंसंवी-
क्ष्यपीडितं॥ रुदन्नश्रुसमाक्रांतस्तमाहसुतमुद्धतं॥ ६६॥ ब्राह्मणाज्जन्मसंप्राप्यमत्तएवभवान्सुत॥ त्यक्त्वाब्राह्मणकर्माणिकृतवानसिदुष्कृतं॥
॥ ६७॥ त्वत्कृतानांपातकानामंतोनास्त्येवसर्वथा॥ तत्पापफलभोगोग्रेभविष्यत्यतिदारुणः॥ ६८॥ कल्पांतेपिनतेमुक्तिर्भविष्यतिनसंश
यः॥ अघोरनरकावासोभविष्यतितवध्रुवं॥ ६९॥ इतितद्वचनंश्रुत्वासतंप्राहातिपीडितः॥ पापनाशकरोपायः कःसाध्योस्तिममे

तिच॥७०॥ततःसवेदतत्वज्ञोजाबालश्रुतिपारगः॥पापनाशकरोपायंप्राहतत्वविदांवरः॥७१॥पुत्राद्यत्वत्कृतापानांनाशंसाधनमुत्तमं॥अनन्यसा
धनापेक्षमेकमस्तिवदाम्यहं॥७२॥उत्थायोदङ्मुखोभूत्वातनुमुद्धूल्यभस्मना॥वदकाशींगमिष्यामीत्येकवारंप्रयत्नतः॥७३॥एतावतैवपा
पानित्वत्कृतान्यखिलान्यपि॥विनश्यन्तिभविष्यंतिसद्यएवनसंशयः॥७४॥यदिशक्तिःप्रचलितुंद्वित्राण्यपिपदानिते॥तदापुण्यसमृद्ध्यर्थं
श्रीकाश्यभिमुखंचल॥७५॥विश्वासंकुरुमद्वाक्येभ्रांतोमाभवसर्वथा॥जाबालश्रुतिरेवैषाकाशीमोक्षकरीतिया॥७६॥प्राणनिर्याणसमयेका
शीतिवचनंमुदा॥यःशृणोतिसपापेभ्योमुक्तोमुक्तोभविष्यति॥७७॥काशीतिवर्णश्रवणात्सुरामुदास्सहस्रधा॥यतोनिर्वाणदोमंत्रकाशीवर्ण
द्वयात्मकः॥७८॥फलोन्मुखानिपुण्यानियेषांभाग्यवतांनृणां॥तैःश्रूयतेमहामंत्रःकाशीतिमरणक्षणे॥वाराणसीतिकाशीतिरुद्रावासइति
स्फुटं॥वदतांपापभीतिस्तुनभविष्यतिसर्वथा॥८०॥काशीतिमंत्रसारोयंवेदसारोयमेवहि॥वेदाःसंश्रित्यतिष्ठंतिकाशीतिमनुमन्वहं॥८१॥
काशीतिमनुरेकोयंसंसारार्णवतारकः॥जपनीयःप्रयत्नेनमुमुक्षुभिरहर्निशं॥८२॥काशीतिमनुमुच्चार्ययस्त्यजेत्तनुमादरात्॥समहेशातनावे
वलीनोभवतिवस्तुतः॥८३॥काशीतिमंत्रमुच्चार्यश्रुत्वावायस्त्यजेदसून्॥सधन्यइतिविज्ञेयोमोक्षकांतासमाश्रितः॥८४॥इतितद्वचनंश्रुत्वा
सोप्युद्धूल्यतनुंततः॥प्राहकाशींगमिष्यामीत्येकवारंकृतांजलिः॥८५॥ततश्चचालद्वित्राणिपदामपिसयत्नतः॥ततःपपाततत्रैवमूर्छितःसमृतस्त
तः॥८६॥तदानीमागताःक्रूराःकोटिशोयमकिंकराः॥आगत्यबध्वातंनेतंसमुद्युक्तामदोद्धताः॥८७॥तदानींविधिविष्ण्वाद्याःकौतुकंद्रष्टुमु
द्यताः॥पुष्पकाणिसमारुह्यतंदेशंसमुपागताः॥८८॥ततस्तंभस्मपूतांगंदृष्ट्वाविष्ण्वादयःसुराः॥प्रणम्यपूजयामासुर्मंदारकुसुमैर्मुदा॥ 
॥८९॥विष्ण्वादिपूजितंदृष्ट्वातंततोयमकिंकराः॥यमायप्रेषयामासुर्दूतंवृत्तांतहारिणं॥९०॥सयमस्तन्मुखाच्छ्रुत्वावृत्तंवृत्तांतहारि
णं॥९०॥समयस्तन्मुखाच्छ्रुत्वावृत्तंवृत्तांतमादरात्॥सचित्रगुप्तस्संप्रापतंदेशंसुरसेवितं॥९१॥ततोदूराद्यमोदृष्ट्वाविष्ण्वादीनमरांस्त
दा॥प्रणम्यपूजांकृत्वाचविष्णुमाहविचक्षणं॥९२॥ ॥यमउवाच॥ ॥अयंपातकिनांश्रेष्ठोमहापापकुलाश्रयः॥कृतैतस्यकथंपूजाभ
वद्भिस्तत्वदर्शिभिः॥९३॥योजनीयःप्रयत्नेनघोरेषुनरकेष्वयं॥नैतस्यब्रह्मकल्पांतेप्यवश्यंनिष्कृतिर्हरे॥९४॥इतितद्वचनंश्रुत्वामंदहास
पुरःसरं॥यममाहतदाविष्णुश्चित्रगुप्तादिसंयुतं॥९५॥ ॥विष्णुरुवाच॥ ॥मृतंविभूतिपूतांगंपश्यैनंयमसादरं॥कथमेतादृशंनेतुं
उद्योगःक्रियतेत्वया॥९६॥शिवंप्रयांतिसहसाभूतिभूषितविग्रहाः॥एतादृशायमद्वारंनपश्यंत्येवसर्वथा॥९७॥यातनास्तुकथंप्राप्याघोराभ

४५ विभूतिरूपं दृष्ट्वास्त्वं घोरपातककाननं ॥

श्मविभूषणैः ॥ भस्मसंछन्नदेहानां यतो नास्त्येव यातना ॥ ९८ ॥ श्रौतभस्मसमाक्रांत यदंग मंगलावहं ॥ ते मंगलापतिं शीघ्रं प्रविशं
ति न संशयः ॥ ९९ ॥ भस्मपूततनूनां चेद्दारुणा यमयातना ॥ तदा भुवि न कस्यापि मोक्षो भवति सर्वथा ॥ १०० ॥ वस्तुतः संगमात्रेण य
म भस्मकणांगयोः ॥ सद्यो भवंति दग्धानि पातकानि न संशयः ॥ १ ॥ विभूतिकणरूपेण क्रूरघोरेण पर्शुना ॥ छिन्नं भवति तीव्रेण महापात
ककाननं ॥ २ ॥ कंपमावहते शीघ्रं किं कर्त्तव्यमिति ध्रुवं ॥ ३ ॥ श्रौतभस्मसमाक्रांत निष्क्रांत प्राणवायवः ॥ अनेकपुण्यसंक्रांता भवंत्येव
न संशयः ॥ ४ ॥ श्रौतं भस्म स्वतः पुण्यं श्रीमहादेवभूषणं ॥ भूषणं यस्य मरणे स निर्वाणमवाप्नुयात् ॥ ५ ॥ तस्य निर्वाणमभ्य
र्णे यस्य भूतिर्विभूषणं ॥ भूतिर्निर्वाणदा पर्णा मरणाभरणं यतः ॥ ६ ॥ अयं धन्यः कृतार्थोयं अयमान्योस्मदादिभिः ॥ यतो मरणवे
लायां विभूतिं प्राप्तवानयं ॥ ७ ॥ महेशानुगृहीतोयं भूतिभूषितविग्रहः ॥ प्राप्यानेन कथं भूतिरन्यथा मरणक्षणे ॥ ८ ॥ अनंत
जन्मभिर्येन पूजितः पार्वतीपतिः ॥ तेनैव प्राप्यते भूतिर्नान्येन यम सर्वथा ॥ ९ ॥ विभूतिकवचं येषां नाम शैवं महायुधं ॥ तेषां
क्व पातकाद्भीतिर्भवतोपि भयानकात् ॥ १० ॥ प्रालेयाचलवद्भाति मृतोयं भूतिभूषितः ॥ पश्य पश्याय मधुना शिवलोकं गमि
ष्यति ॥ ११ ॥ एतादृशस्य शैवस्य दर्शनं दुर्लभं यम ॥ गतेस्मिन् शिवलोके स्य भूयः स्याद्दर्शनं कथं ॥ १२ ॥ पापाश्रयोयमित्येषा त
व बुद्धिर्भ्रमात्मिका ॥ स्थास्यंति पातकान्यस्मिन्कथं वा भूतिभूषिते ॥ १३ ॥ यस्य भस्मकणो नूनमेकोप्यघकुलाशनिः ॥ किमु भ
स्मकणाः सांद्राः पुण्याः सर्वांगसंगिनः ॥ १४ ॥ यस्य भस्मकणेनाद्य नैकेनाप्यंगसंगिना ॥ दग्धान्यघकुलानीति भ्रमितिर्मम जायते ॥
॥ १५ ॥ कालाग्निरुद्रोपनिषज्जाबालोपनिषत्तथा ॥ अन्याश्च श्रुतयो मानं भस्मनः पापनाशने ॥ १६ ॥ श्रुत्यर्थमन्यथा कर्त्तुं नः शक्नोति सुरेष्व
पि पापापनोदकत्वेन श्रुतिभिर्भस्मकीर्त्तनं ॥ १७ ॥ पापापनोदकं पुण्यं पवित्रं भस्म पावनं ॥ धारणीयं द्विजैर्नित्यमिति वेदः श्रुतो मया ॥ १८ ॥
वेदोयमीश्वराज्ज्ञातः पालनीयः सुरासुरैः ॥ अस्माभिरीश्वरो ज्ञेय मनुलंघ्यैव सर्वथा ॥ १९ ॥ यद्येनं नेतुमुद्योगः क्रियते मोहतस्त्वया ॥ त
दा तवाधिकारोयं गमिष्यति न संशयः ॥ २० ॥ भस्मभूषितसर्वांगाः शांभवास्ते ततस्त्वया ॥ कथं नेया भविष्यंति यम भ्रांतोसि वस्तुतः
॥ २१ ॥ क्रूरदृष्ट्याप्यमुं काल यदि पश्यसि मोहतः ॥ तदा तव प्रभुता द्य भविष्यत्येव यातना ॥ २२ ॥ बलाबलेपादधुना यद्येनं नेतुमुद्यतः ॥ तदा

श्रीशिवर०७ हनिष्येचक्रेणमूर्धानंतरसातव ।।२३।। शिवद्रोहरतायेच शैवद्रोहरताश्चये ।। तेसर्वेपिमयाकाल हंतव्याश्चक्रपाणिना ।।२४।। महादेवांघ्रि उ॰स॰पू॰
८० रेखाभिः सृष्टंचक्रमिदंपुरा ।। मयामहेश्वरादेतल्लाप्तमत्यंतयत्नतः ।।२५।। एतच्चक्रंयदादत्तंमह्यमीशेनसादरं ।। तदाममाह भगवानी
श्वरोभक्तवत्सलः ।।२६।। ।।श्रीशिवउवाच।। ।। इदंचक्रंमयादत्तंतुभ्यमत्युत्तमं हरे ।। अशैवान्त्संहरानेनचक्रेणामिततेजसा ।।२७।। अशै
वाः संतियावंतोयावंतः शैवमिंदकाः ।। तानंजसातियत्नेनचक्रेणानेनशिक्षय ।।२८।। अशैववंशकाशामिराशुचक्रहुताशनः ।। अशैववं
शनाशायदत्तस्तुभ्यंमयाधुना ।।२९।। भवानशैवनाशार्थंपुरासृष्टोमयाहरे ।। अशैवानत एवाशुचक्रेणानेननाशय ।।३०।। देवतासार्वभौ
मेनमहादेवेनशूलिना ।। एवमुक्तंपुराकालमामुद्दिश्यपुरारिणा ।।३१।। अशैववंशाबहवश्चक्रेणानेननाशिताः ।। अतःपरंनाशनीयाश्चक्रेणा
नेनकोटिशः ।।३२।। नानृतंवच्म्यहंकालयथार्थमिदमुच्यते ।। कालतःसावधानेनकर्त्तव्यंकुरुसत्वरं ।।३३।। कालस्यभस्मसंबंधोमुक्तिहेतुरु
रुदीरितः ।। अन्यदप्यस्तिविश्वस्यमुक्तिहेतुद्वयंमम ।।३४।। उद्धूल्यभस्मनांगानिकाशीसन्मुखमुत्थितः ।। अहंकाशींगमिष्यामीत्युक्त्वा
नयमादरात् ।।३५।। ततःप्रचलितोभक्त्यापदानिन्नीणिसादरं ।। ततःपरंमृतोन्नैवमहारोगसमन्वितः ।।३६।। एतादृशस्यपुण्यस्ययातनास्यात्कथं
वद ।। योगिनामपिपूज्योयंपापयोगोस्यनास्त्यतः ।।३७।। घोरसंसारदावाग्निःकाशीत्येषमहामनुः ।। एतस्यवदनादद्यनिसृतःपुण्ययोगतः
।।३८।। काशीतिवर्णयुगलंगलितंयन्मुखांबुजात् ।। तस्यसंसारनिगलागलिताएवतत्क्षणे ।।३९।। विवशेनापिकाशीतियेनैवसमुदीरितं ।। तेनै
वसकलापद्मोमुच्यतेयमवस्तुतः ।।४०।। काशीतिपरमंमंत्रंसर्वमंत्राधिदैवतं ।। मुक्तिदंमुनयः सर्वेजपंत्यनुदिनंमुदा ।।४१।। काशीत्य श्रीशिव
मृतकल्लोललोलजिह्वामनीषिणः ।। प्रयांतिशिवसायुज्यमिज्यादानादिभिर्यम ।।४२।। काशीतिवर्णयुगस्यसामर्थ्यंवेदशंकरः ।। त ८०
त्सामर्थ्यंतदन्येनकथंवाज्ञायतेयम ।।४३।। काशीतिवर्णद्वंद्वंयद्द्वंद्वदुःखापहारकं ।। तद्विधूयद्वंद्वदुःखंशुद्धिमत्थाद्दधातिच ।।४४।।
काशीत्युच्चरितंयेनपरिहासेनवायम ।। तेनस्वोपार्जितानंतपापनाशःकृतोध्रुवं ।।४५।। पापकाननदाशायकाशीत्येषहुताशनः ।। प
रमेशेननिर्दिष्टः शिष्टः कष्टविनाशकः ।।४६।। जन्ममृत्युजरादुःखमहारोगौषधंपरं ।। काशीतिपरमोमंत्रः संत्रासयतिपातकं ।।४७।। सं
सारपापमत्तेभपंचाननमनामयं ।। काशीतिमंत्रमनिशंजपंतिमुनयोमुदा ।।४८।। संसारघोरगर्तस्थान्काशीत्येषोमहामनुः ।। समाकर्षंस्पृष्टं यति

नयत्यूर्ध्वमनंतरं ॥४९॥ संसारसर्वदष्टेनकाशीतिमनुमूलिका ॥ संसारविषशांत्यर्थंसेवनीयामुहुर्मुहुः ॥ ५०॥ मुक्तिकांताकर्षकोयंकाशी
तिमनुरुत्तमः ॥ नित्यमुक्तिविटैः सेव्योसमोहपटलाशनिः ॥ ५१॥ असकृद्वासकृद्वापिकाशीतिमनुमुत्तमं ॥ योजपेत्समहाघेभ्यः सद्य
एवविमुच्यते ॥ ५२॥ काशीतिनामपीयूषंयेपिबंति पुनः पुनः ॥ तेमहापापसंघेभ्योमुच्यंतेनात्रसंशयः ॥ ५३॥ यमकाशीति वाग्वल्ली
सुवर्णद्वंद्वपल्लवा ॥ स्वर्गापवर्गफलदाबल्लप्रथमनप्रिया ॥ ५४॥ काशीनामसुधांधन्यावसुधातलवासिनः ॥ पिबंतिश्रद्धयासिध्याःश
मनात्तत्तपोधनाः ॥ ५५॥ काशीतिमंत्रराजोयंपुण्यराशिसमृद्धिदः ॥ अनंताभेद्यविविधपापराशिमहाशनिः ॥ ५६॥ काशीत्यमृतमुक्तकं
सुराणामपिदुर्ल्लभं ॥ पिबंतिसाधवोभक्त्याभाललोचनपूजकाः ॥ ५७॥ पीत्वाप्यमृतमाशास्यंसुराभूत्वापुनर्नराः ॥ भवंतिनतथाकाशीनामा
मृतमनंतरं ॥ ५८॥ काशीत्येषमहामंत्रःश्रेष्ठोयममृतादपि ॥ अमृतनश्वरंयस्मादनश्वरमयंमनुः ॥ ५९॥ एतादृशोयंकाशीतिमहामंत्रोऽमृतात्मकः
अनेनोच्चारितोदेवादतोधन्योयमीदृशः ॥ ६०॥ काशीसन्मुखमुत्थायचलितोयंपदत्रयं ॥ इदमस्यापरंकालमुक्तिसाधनमुत्तमं ॥ ६१॥ अ
हंकाशींगमिष्यामित्यपीयोवाचमुच्चरेत् ॥ सोपिमुक्तोभवत्येनेत्याकुर्जाबालवादिनः ॥ ६२॥ काशीतिनामोच्चरणंसर्वांगेभूतिधारणं ॥ क
स्यवामरणेभ्यर्णेननिर्वाणंप्रयच्छति ॥ ६३॥ काशीप्रयाणंकाशीतिनामपीयूषभक्षणं ॥ विभूतिधारणंचेतित्रयंनिर्वाणदंनकिं ॥ ६४॥ ए
तेष्वेकैकमेवैतन्निर्वाणदमतोयम ॥ एतत्त्रितयसंगोस्यनकिंनिर्वाणदोवद ॥ ६५॥ किंचाधुनैवतरसायमशंकरकिंकराः ॥ आयास्यंत्ये
नमनघंनेतुंशंकरमंदिरं ॥ ६६॥ यदितान्प्रतिमोहेनप्रतिकूलंवदिष्यसि ॥ तदाभवंतंतरसातेहनिष्यंतसंशयं ॥ ६७॥ किंचैनंशांभवंमो
हाद्यदिनार्चयसेतदा ॥ शांभवानर्चनात्कालप्रत्यवायोभविष्यति ॥ ६८॥ नरकेपातिताः पूर्वंशांभवानर्चकास्त्वया ॥ कथमेतादृशोनाद्य
त्यक्तंशांभवपूजनं ॥ ६९॥ त्यजमोहंभजरतिंममशांभवमर्चय ॥ कुरुमद्वाचिविश्वासंत्यजाविश्वासमण्वपि ॥ ७०॥ इतिविष्णुवचःश्रुत्वा
तंदृष्ट्वाभूतिभूषितं ॥ यमोतिभक्त्यानत्वातंपूजयामासशांभवं ॥ ७१॥ एतस्मिन्नंतरेकालेशिवदूताःसमागताः ॥ शिवनामानिगायं
तोभूतिभूषितविग्रहाः ॥ ७२॥ ततोविष्ण्वादयःसर्वेदृष्ट्वातान्शिवकिंकरान् ॥ प्रणम्यदंडवद्भूमौचक्रुःपूजांपृथक्पृथक् ॥ ७३॥
तेविष्ण्वादिकृतांपूजांगृहीत्वाशिवकिंकराः ॥ तंगृहीत्वामृतंविप्रंययुःशंकरमंदिरं ॥ ७४॥ ततःशिवप्रसादेनगणापत्यमवाप्तवा

न॥ततःपरंविनायत्लंशिवेलीनोभूयभ्वेद्विजाः॥काशीत्युच्चारणेनापिसमुक्तःपापकृत्तमः॥ ईदृशीमुक्तिदाकाशीकथंत्याज्यामनी

षिभिः॥७६॥अविमुक्तंनमोक्तव्यमितिजाबालवादिभिः॥उंडीरवःकृतःपूर्वंवेदरूपोनिराकुलः॥७७॥अविमुक्तंमुंचमानाःश्वप
चाएवकेवलं॥सत्यमेवपुनःसत्यमुद्धृत्यभुजमुच्यते॥७८॥अविमुक्तंमहादेवोप्यनेकामरसंयुतः॥नमुंचतिततःकाशीकथंत्याज्याभवा
दृशैः॥७९॥असंसारीमहादेवःकाश्यांतिष्ठतिसांबिकः॥संसारिणोभवंतस्तुकथंवात्यक्तुमिच्छथ॥संसारवधिकाकाशीकाशीसं
सारपावकः॥पावनैःसततंसेव्यापापभीरुभिरुत्तमैः॥८१॥काशीनिवासमात्रेणघोरसंसारशृंखलाः॥सद्योभवंतिविच्छिन्नाःपर्वताइ
वभेदिताः॥८२॥काशीतिसंवदन्नित्यंकाशीनाथंसमर्चयन्॥कालभीतिंविहायात्रयोवसेत्सतुपुण्यकृत्॥८३॥त्रिनेत्राश्चंद्रचूडांकाभू
तिरुद्राक्षभूषणान्॥काशीस्थान्द्विजान्दृष्ट्वास्तुवंत्यन्वहमादरात्॥८४॥देवाःपतंतिस्वर्गस्थाःकाशीस्थातुकदाचन॥नपतंत्येव
सैवेषाकाशीत्याज्याकथंभवेत्॥८५॥ब्रह्मत्वमपिनेच्छंतिकाशीस्थाभस्मभूषणाः॥ईदृशीमुक्तिदाकाशीनत्याज्यामनसापिहि॥
॥८६॥काशीस्थःपुल्कसोप्यत्रत्रैलोक्याधिपतिंहरिं॥तृणीकृत्वात्रसततंतिष्ठत्याशाविवर्जितः॥८७॥प्राप्तंराज्यमपित्यक्त्वा
काश्यांसंसारभीरवः॥स्थातुमिच्छंतिसततंसैषाकाशीशिवात्मिका॥८८॥काशीचेत्त्यजतेमूढैर्वैस्तैरर्कक्षीरमादरात्॥पीतंगव्यं
विहायैवक्षीरमाज्यसमन्वितं॥८९॥काश्यांस्थित्वांतकालेपिकाशीनाथमुदास्मरन्॥प्रविशत्येवदेवेशेकाशीनाथेमहेश्वरे॥
॥९०॥एकैकमस्तियत्काश्यांशिवलिंगमनुत्तमं॥तन्नास्त्यन्यत्रकुत्रापिवस्तुतोमुनिसत्तमाः॥९१॥श्रीमद्विश्वेश्वरःलिंगंयत्काश्यां श्रीशिव
दृश्यतेनघ॥तत्साक्षान्मुक्तिदंलिंगंतत्त्यागोनुचितोद्विजाः॥९२॥वैश्वेश्वरंलिंगमेकंवेदाःस्तुत्वाप्यनेकधा॥नविश्रांतिंगता ८१
भूयःस्तुवंत्येवमुहुर्मुहुः॥९३॥येनवैश्वेश्वरंलिंगंदूरेस्थित्वापिसंस्मृतं॥तेनापिमुच्यतेविप्राघोरसंसारसागरात्॥९४॥लिंगा
कारामुक्तिरेवलिंगंविश्वेश्वराभिधं॥तत्स्पृष्टंयेनतेनैवमुक्तिःप्राप्तानसंशयः॥९५॥नदृष्टंयद्दिनेलिंगंश्रीमद्विश्वेश्वराभिधं॥
~~तत्स्पृष्टंयेनतेनैवमुक्तिःप्राप्तानसंशयः॥~~ तद्दिनंदुर्दिनंविप्रामेघच्छन्नंनदुर्दिनं॥९६॥पद्मपत्रसमानाभ्यांनेत्राभ्यामपिकिंवृथा॥
याभ्यांनदृष्टंतल्लिंगंश्रीमद्विश्वेश्वराभिधं॥९७॥हस्ताभ्यामपिकिंताभ्यांयाभ्यांप्रत्यहमादरात्॥नार्चितंबिल्वपत्राद्यैर्लिंगंविश्वेश्वराभिधं

॥९८॥ जीवतायेननध्यातंलिंगंविश्वेश्वराभिधं ॥ जीवतापिमृतंतेनाधिग्धिग्धिक्तस्यजीवनं ॥ जीवितव्यंतावदेवयावद्भक्तिपुरःसरं ॥
पूज्यतेध्यायतेनित्यंलिंगंविश्वेश्वराभिधं ॥१००॥ किंतेनजीवनेनापियद्धिनेसावधानतः ॥ नाराधितंविधानेनलिंगंविश्वेश्वराभिधं ॥१॥ कर्तव्या
जीवनापेक्षातावदेवमुमुक्षुभिः ॥ यावदाराध्यतेभक्त्यालिंगंविश्वेश्वराभिधं ॥२॥ वेदोपनिषदांसारोलिंगरूपमुपाश्रितः ॥ विश्वेश्वराभिधोप्राप्य
काश्यांतिष्ठतिसर्वदा ॥३॥ काश्यांवैश्वेश्वरं लिंगंसर्ववेदोपबृंहितं ॥ भुक्तिमुक्तिप्रदंपुण्यंसेवनीयंमनीषिभिः ॥४॥ विश्वेश्वरास्याजिव्हाग्रेचित्तेविश्वे
श्वरस्मृतिः ॥ विश्वेश्वरार्चनंहस्तेयस्यतस्यनयातना ॥५॥ सोत्साहमतियत्नेनकाश्यांविश्वेश्वराभिधं ॥ लिंगंयेभ्यर्च्चयिष्यंतितेषांयमभयंकुतः ॥६॥
विश्वनाथस्तुतिंकृत्वाकाश्यांतिष्ठंतियेजनाः ॥ तेतर्जयंतिपापानिघोराणिविविधान्यपि ॥७॥ विश्वेश्वरंविलासेनाप्येकदावीक्ष्यसादरं ॥ नबि
भेतियमात्कोपिकृतपापोपिसर्वथा ॥८॥ यल्लिंगंब्रह्मविष्ण्वाद्यैःपूज्यतेसावधानतः ॥ तल्लिंगंखलुविप्रेंद्रालिंगंविश्वेश्वराभिधं ॥९॥
यल्लिंगंब्रह्मविष्ण्वाद्याःसमाराध्याप्यनंतधा ॥ विरतानतदेवेदंलिंगंविश्वेश्वराभिधं ॥१०॥ यल्लिंगंविधिविष्ण्वाद्यास्तोत्रैस्तुत्वाप्य० ॥
विरतानतदेवेदं० ॥११॥ यल्लिंगंविधिविष्ण्वाद्याःसम्यग्दृष्ट्वाप्यनंतधा ॥ विरतानतदे० ॥१२॥ यल्लिंगंनियमाःसांगाःस्तुत्वास्तुत्वाप्य०
॥ विरतानतदेवेदं० ॥१३॥ यल्लिंगंयोगिनोभक्त्याध्यात्वाध्यात्वाप्य० ॥ विर० ॥१४॥ यल्लिंगंपार्वतीभक्त्याबिल्वैःसंपूज्यसंततं ॥ मुदिताभू
त्तदेवेदंलिंगंविश्वेश्वराभिधं ॥१५॥ यागदानादिधर्माणांफलंयल्लिंगदर्शनं ॥ तदेवेदंपरंज्योतिर्लिंगंविश्वेश्वराभिधं ॥१६॥ यद्विश्वेश्वर
लिंगस्यदर्शनंयमतर्जनं ॥ तद्विश्वेश्वरलिंगस्यत्यागोनमहतोमतः ॥१७॥ यद्विश्वेश्वरलिंगस्यदर्शनंपापकर्षणं ॥ तद्विश्वरलिंगस्यत्या
गो० ॥१८॥ यद्विश्वेश्वरलिंगस्यत्यागो० ॥२०॥ सएववाजपेयादिसर्वयागेषुदीक्षितः ॥ यःप्रेक्षयतिविश्वेशंचक्षुषापक्ष्मपातिना ॥२१॥ सएव
गजदानादिमहादानविचक्षणः ॥ योदद्याद्बिल्वजंपत्रंलिंगेविश्वेश्वराभिधे ॥२२॥ सएवसर्वधर्माणांतपसामपिसंश्रयः ॥ योविश्वस्य-
व्योमकेशंविश्वेशंसमुपाश्रयेत् ॥२३॥ तावद्गर्जत्यघकुलंकृतांतोपिभटैःसह ॥ यावन्नाभ्यर्चितंभक्त्यालिंगंविश्वेश्वराभिधं ॥२४॥
तावत्तिष्ठतिमर्त्येषुघोरसंसारश्रृंखला ॥ यावन्नाभ्यर्चितंभक्त्यालिंगंविश्वेश्वराभिधं ॥२५॥ तावज्जन्मजरामृत्युमत्युपाशाश्रितो
जनः ॥ यावन्नाभ्यर्चितंभक्त्या० ॥२६॥ तावद्दुःखानिसर्वाणिभुज्यंतेमनुजैःसदा ॥ यावन्ना० ॥२७॥ तावन्मरणसंत्रासस्तावज्जन्मभ
यंमहत् ॥ यावन्ना० ॥२८॥ तावद्दुर्भगतातावन्नानारोगोद्भवंभयं ॥ यावन्ना० ॥२९॥ पुराकीर्तिश्वरोनामराजाभून्नंदपालकः ॥ स्वबाल    जा

श्रीशिवर०७ श्रुतितत्वज्ञान्ददर्शाशिवपूजकान् ॥ ३० ॥ तान्दृष्ट्वातिप्रयत्नेनप्रणम्याभ्यर्च्यसादरं ॥ कृतांजलिर्मुक्त्युपायं पप्रच्छविनयान्वितः ॥ ३१ ॥ ॥ विप्राऊ ऊ·स·पू·
८२ चुः ॥ ॥ काशींविनामुक्त्युपायोनकापीतिमुनीश्वराः। वदंतिश्रुतितत्वज्ञाः जाबालार्थविचारकाः ॥ ३२ ॥ काशीशिवतनुस्तस्मात्सैवमु
क्तिप्रदानृप ॥ काशीदर्शनमेवातः कर्त्तव्यंमुक्तिकांक्षिभिः ॥ ३३ ॥ राजसूयादियागानां तपसामपिवस्तुतः ॥ काशीप्राप्तिः फलंतस्मात्काशीसेव्यामु
मुक्षुभिः ॥ ३४ ॥ राजन्काशींविनाऽन्यत्रमुक्तिर्नास्त्येवसर्वथा ॥ अतोनानाविधैर्यत्नैः काशीप्राप्यामुमुक्षुभिः ॥ ३५ ॥ काश्येकाशरणंराजन् जना
नांमोक्षमिच्छतां ॥ तदन्यच्छरणंक्वापिनास्तिनश्रूयतेपिच ॥ ३६ ॥ धर्माः क्रियंतेबहुधाकाशीप्राप्त्यर्थमादरात् ॥ वस्तुतोशेषधर्माणांकाशीप्राप्तीफ
लंयतः ॥ ३७ ॥ काशीप्राप्तिःपरामुक्तिःसानानाधर्मसाधिता ॥ सातत: सर्वयत्नेनसाधनीयामुमुक्षुभिः ॥ ३८ ॥ संसारसागरंघोरमसारंपातका
करं ॥ काशीप्राप्तितरिंप्राप्यतरंतिशिवतत्पराः ॥ ३९ ॥ सएवभाग्यवान्लोकेसएवपुरुषर्षभः ॥ यः संसारंपरित्यज्यकाशींप्राप्नोतिसादरं ॥ ४० ॥
अधुनाश्वः परश्वोवामरणंचेद्भविष्यति ॥ तदावृथागतंजन्मकाशीदर्शनवर्जितं ॥ ४१ ॥ वृथाराज्यंवृथाभोगोवृथापुत्राधनादिकं ॥ यदिनप्राप्य
तेकाशीश्रीमहेशतनुःपरा ॥ ४२ ॥ सकाशीमशकः श्रेयान्नयस्यशमनाद्भयं ॥ वयंतुशमनत्रस्तास्तस्मादप्यधमाधमाः ॥ ४३ ॥ काशीप्राप्त्यर्थमुद्यो
गः कृतोस्माभिःप्राप्यतेध्रुवं ॥ ४४ ॥ अतः परंवयंयामः श्रीशैलंप्रतिसत्वरं ॥ तत्रगत्वातपश्चर्यांकरिष्यामोयथाविधिः ॥ ४५ ॥ अस्माभिः कल्प
पर्यंतंतत्रकार्यंतपोनृप ॥ ततः कल्पद्वयंकार्यंकालहस्तीशसंनिधौ ॥ ४६ ॥ ततः कांच्यांचकर्त्तव्यंकल्पत्रयमनाकुलं ॥ ततोरुणाचलेकार्यंतपः
कल्पचतुष्टयं ॥ ४७ ॥ ततोवृद्धाचलेकार्यंकल्पपंचकमादरात् ॥ तपश्चिदंबरेकार्यंकल्पषट्कंतपोमुदा ॥ ४८ ॥ कुंभघोणेततः कार्यंकल्पसप्त
कमादरात् ॥ मध्यार्जुनेततः कार्यंतपः कल्पाष्टकंमुदा ॥ ४९ ॥ राजन्मध्यार्जुनादीनिशिवस्थानानिकोटिशः ॥ संतितेष्वपिकर्त्तव्यंतपोस्माभिः श्रीशिव
प्रयत्नतः ॥ ५० ॥ एकैकंकल्पमेकत्रस्थित्वायत्नपुरःसरं ॥ तपोघोरतरंकार्यंकाशीप्राप्त्यर्थमन्वहं ॥ ५१ ॥ पुरायागादयोधर्माः कृताः संत्येव ८२
कोटिशः ॥ अतः परंतपोमात्रंकर्त्तव्यमतियत्नतः ॥ ५२ ॥ ततोस्माभिरयत्नेनकाशीप्राप्तिर्भविष्यति ॥ काशीसंप्राप्तिमात्रेणभवामोनिर्भया
स्ततः ॥ ५३ ॥ तावदस्तिभयंराजन्यावत्काशीनलभ्यते ॥ काशीदैवाद्यदिप्राप्तागतमेवभयंतदा ॥ ५४ ॥ पुराबहूनिजन्मानिप्राप्तान्यस्मा
भिरीदृशैः अतोल्पान्निजन्मानिप्राप्तव्यानिनृपोत्तम ॥ ५५ ॥ राजन्त्वयाकृतैर्वास्तितपश्चर्याविधानतः ॥ शिवस्थानेषुसर्वेषुकाशीप्राप्त्य
र्थमादरात् ॥ ५६ ॥ श्रीकाशीप्राप्त्यर्थमुद्दिश्यविधिवद्यत्नपूर्वकं ॥ तपोभिन्नाः कृताराजन्स्त्वयाधर्माश्चकोटिशः ॥ ५७ ॥ अतः परमने

४३ काशीकठिनायतः॥६२॥ यात्रादिरतचित्तानांस्वस्वधर्मरतात्मनां॥

नैवजन्मनातवभूपते॥ काशीप्राप्तिरयत्नेनभविष्यतिनसंशयः॥५८॥ भाग्यवानसिधन्योसिकृतार्थोसिमहीपते॥ काशीप्राप्तालयायस्मादने
नैवहिजन्मना॥५९॥ संप्राप्यकाशींभूपालस्वधर्ममपरित्यजन्॥ नित्ययात्रादिकर्माणिकुरुयत्नेनसंततं॥६०॥ बहवोनियमाःसंतिराज
न्काशीनिवासिनां॥ तद्धर्माचरणंकार्यंयत्नपूर्वकमन्वहं॥६१॥ काशीप्राप्तामयाकाश्यांस्थातव्यंस्वेच्छयेतिधीः॥ नकर्त्तव्याभ्रमेणापिसा॥
काशीवासेमुक्तिहेतुनान्येषांपृथिवीपते॥६३॥ उद्धूलनत्रिपुंड्राभ्यांतथारुद्राक्षधारणात्॥ विश्वेश्वराभ्यर्च्चनाच्चमामाप्रमदभूपते॥६४॥ ज्ञान
वापीजलस्नानाज्ज्ञानेशाभ्यर्चनादपि॥ विश्वेश्वराभ्यर्चनाच्च॰॥६५॥ ढुंढीशदर्शनात्तद्वद्दंडपाणेश्चपूजनात्॥ विश्वेश्वरा॰॥६६॥ आनंदभैरवार्चातः पूजे
कुमारस्यापिपूजनात्॥ विश्वेश्वरा॰॥६७॥ अविमुक्तेश्वरार्चातस्तथानंदीशपूजनात्॥ विश्वेश्वरा॰॥६८॥ रुद्राध्यायजपात्तद्वत्पंचाक्षरजपादपि
॥ विश्वेश्वरा॰॥६९॥ भृंगीशदर्शनात्तद्वत्तारकेशस्यदर्शनात्॥ विश्वेश्वरा॰॥७०॥ भवानीदर्शनात्तद्वच्छिवाशंकरदर्शनात्॥ विश्वेश्वरा॰॥७१॥ मणिक
र्णीजलस्नानान्मणिकर्णीशपूजनात्॥ विश्वेश्वरा॰॥७२॥ वीरकुंडजलस्नानाच्छ्रीविश्वेश्वरदर्शनात्॥ विश्वेश्व॰॥७३॥ वसिष्ठेश्वरपूजातोवामदे
वस्यदर्शनात्॥ विश्वेश्वरा॰॥७४॥ चंद्रकुंडजलस्नानाच्छ्रीचंद्रेश्वरदर्शनात्॥ विश्वेश्वरा॰॥ श्रीमत्पशुपतीशस्यदर्शनात्पूजनात्तथा॥ विश्वे॰॥७६॥
आगर्द्केश्वरार्चातःपापभक्षेशपूजनात्॥ विश्वेश्व॰॥७७॥ कालकुंडजलस्नानात्कालभैरवदर्शनात्॥ विश्वेश्व॰॥७८॥ नवग्रहेशपूजातःकाले
शाभ्यर्चनादपि॥ विश्वे॰॥७८॥ नवग्रहेशपूजातःकालेशाभ्यर्चनादपि॥ विश्वे॰॥७९॥ कृत्तिवासेश्वरार्चातःश्रीरत्नेश्वरदर्शनात्॥ विश्वेश्वरा
भ्यर्चनाच्चमामाप्रमदभूपते॥८०॥ शिवगंगाजलस्नानादाग्नीध्रेश्वरदर्शनात्॥ विश्वेश्वरा॰॥ कार्कोटकुंडस्नानाच्चकार्कोटस्यचदर्शनात्॥
विश्वे॰॥८१॥ ओंकारकुंडस्नानाच्चश्रीमदोंकारदर्शनात्॥ विश्वेश्वरा॰॥८२॥ पिलिप्पिलाजलस्नानात्त्रिलोचनसमर्चनात्॥ विश्वेश्वरा॰
॥८३॥ सोमेशतीर्थस्नानाच्चतथासोमेशदर्शनात्॥ विश्वेश्व॰॥८४॥ केदारकुंडस्नानाच्चतथाकेदारदर्शनात्॥ विश्वेश्वरा॰॥८५॥ दुर्गाकुं
डजलस्नानात्तथादुर्गासमर्चनात्॥ विश्वे॰॥ सिद्धेश्वराभ्यर्चनाच्चकामाक्षीदर्शनादपि॥ विश्वे॰॥८७॥ शिवभक्तप्रणामाच्चशिवभक्तार्चना
दपि॥ विश्वेश्वराभ्यर्चनाच्चमामाप्रमदभूपते॥८८॥ सर्वदाशिवनामानिजपकाश्यांप्रयत्नतः॥ पूजयस्वमहादेवंसंततंबिल्वपल्लवैः॥
॥८९॥ भस्मनोद्धूलनंकृत्वात्रिपुंड्रंचततःपरं॥ रुद्राक्षधारणंकृत्वाजपमंत्रंशिवात्मकं॥९०॥ एतानिशिवलिंगानितत्तस्त्तल्लिंगधार
णं॥ अत्यावश्यकमन्यत्राप्यतस्तत्तुकिंपुनः॥९१॥ शिवलिंगानंकितानांकाशीवासफलंकुतः॥ शिवलिंगानंकितायेनतेतत्राधि

 कारिणः ॥ ९२ ॥ शैवा एव नृपश्रेष्ठ काशीवासाधिकारिणः ॥ नान्ये सत्यमिदं सत्यमुत्थूत्य भुजमुच्यते ॥ ९३ ॥ अशैवा यदि मोहेन काश्यां कुर्वंति संस्थितिं ॥ तदा ते यातनां घोरां प्राप्नुवंत्येव भूरिशः ॥ ९४ ॥ नित्ययात्रा पक्षयात्रा मासयात्राश्च भूरिशः ॥ तथा वार्षिकी यात्राः कर्तव्यास्तत्र सादरं ॥ ९५ ॥ पूजनीयाः प्रयत्नेन शैवाः काशीनिवासिनः ॥ नित्यं शिवकथाः श्राव्याः श्रोतव्यास्तत्र सादरं ॥ ९६ ॥ यदि मोहात्प्रमादाद्वा तत्र भस्मादिधारणे ॥ त्यजेत्स पापी बहुशो प्राप्नुयाद्यातनां ध्रुवं ॥ ९७ ॥ काश्यां शिवकथा एव श्रोतव्याः श्रद्धया द्विजैः ॥ अन्यथा भैरवी घोरा यातना भवति ध्रुवं ॥ ९८ ॥ एवमुक्तप्रकारेण नियमेनान्वहं द्विजैः ॥ काशीवासो ऽतियत्नेन कर्त्तव्यो मुक्तिकांक्षिभिः ॥ ९९ ॥ काश्यां स्थित्वान्यतीर्थेषु गंतव्यमिति धीर्नृप ॥ स्वप्नेपि नैव कर्त्तव्या सा पातनकरी यतः ॥ १०० ॥ काश्यां स्थित्वा नृपश्रेष्ठ शिवस्यैवार्चनं कुरु ॥ तथैव कार्यमन्यत्राप्यत स्तत्र तु किं पुनः ॥ १०१ ॥ शैवधर्मरतो भूत्वा काश्यां वस नराधिप ॥ स्वप्नेपि शैवधर्माणां न कुरुष्व घनं भ्रमात् ॥ २ ॥ शैवधर्मान्परित्यज्य यः काश्यां स्थातुमिच्छति ॥ स कालभैरवीं घोरां यातनां प्राप्तुमिच्छति ॥ ३ ॥ किं च काश्यां निवसतां सतामपि सहस्रधाः ॥ उपसर्गा भविष्यंति सोढव्या ते तियत्नतः ॥ ४ ॥ उपसर्गपराभूतो यः काशीं त्यक्तुमिच्छति ॥ तन्मुखस्था मुक्तिभिक्षा पतित्यवनीतले ॥ ५ ॥ उपसर्गात्कोटिशोपि संप्राप्ता न गणय्य यः ॥ काश्यां तिष्ठति यत्नेन तस्य मोक्षो भविष्यति ॥ ६ ॥ काशी चेत्त्यज्यते मोहादुपसर्गासहिष्णुना ॥ तदा तस्यापवर्गस्तु कदापि न भविष्यति ॥ ७ ॥ ये कदैवोपसर्गाश्चेत्कुर्वंत्युच्चाटनं तदा ॥ छित्वाश्मना चरणौ काश्यां स्थातव्यमास्तिकैः ॥ ८ ॥ येन केनापि रूपेण काश्यां स्थातव्यमास्तिकैः ॥ मर्त्तव्यं च प्रयत्नेन काश्यामेव मुमुक्षुभिः ॥ ९ ॥ महाश्मशानसंविष्टं कुणपं सर्वथा नरैः ॥ नान्यत्र नेयं तत्रैव भस्मसात्कार्यमादरात् ॥ महाश्मशानमरणं सुराणामपि दुर्लभं ॥ अतस्तत्र प्रयत्नेन मर्त्तव्यं मुक्तिकांक्षिभिः ॥ ११ ॥ याच्यते मरणं काश्यां ब्रह्मविष्ण्वादिभिः सुरैः ॥ किं पुनर्मादृशैर्मर्त्यैर्मर्त्यधर्मसमाश्रितैः ॥ १२ ॥ ब्रह्मविष्ण्वादिदेवानां काश्यां मरणमिच्छतां ॥ भविष्यत्येव मरणं प्रलये समुपस्थिते ॥ १३ ॥ मरणं मंगलं काश्यां केवलं मरणे ततः ॥ तदर्थं विविधा यत्नाः कर्त्तव्या मुक्तिकांक्षिभिः ॥ नृप पूर्वं शरीराणि दग्धान्यन्यत्र भूरिशः ॥ शरीरमेकदा काश्यां दाहनीयं प्रयत्नतः ॥ १५ ॥ काश्यां स्वदेहदहनोद्भूतभस्मराशिं विलोकयेत् ॥ शरीरं भस्मसात्कृत्वा काश्यां तेनैव भस्मना ॥ यः कांतिं भूषयेत्तेन संप्राप्तं शेषभूषणं ॥ १८ ॥ ये त्यक्ततनवः काश्यां त एवातनवः पुनः ॥ वामार्धवामतनवः स्वदेहदहनं यः कर्त्तुं नाभिवांछति ॥ सर्वं चिंतो महेशेन सत्यं सत्यं नराधिप ॥ १६ ॥ स काश्यां काशतिश्रीमन् महेशानुग्रहेणय ॥ 

स्वं दृष्ट्वा भवंतिच॥ देवतासार्वभौमत्वं यस्याभिलषितं भवेत्॥ तेन काश्यां तनुत्यागः कर्त्तव्यः सावधानतः॥२०॥ काश्यां शरीरमात्रस्य
त्यागेनैव महेश्वरः॥ दत्वा पंचाक्षरं शैवं स्वस्वरूपं प्रयच्छति॥२१॥ काश्यां त्यक्तशरीरेण शैवेन मदनांतकः॥ महेशो दृश्यते साक्षात्सर्वलक्ष
णसंयुतः॥२२॥ यस्य साक्षान्महादेवदर्शनं समुपेक्षितं॥ तेन काश्यां प्रयत्नेन मर्त्तव्यं मुक्तिकांक्षिणी॥२३॥ मरणाभिमुखः काश्यां यदा भव
ति मानवः॥ तदा शिवोत्तरीयेण तं वीजयति सेश्वरी॥२४॥ ततस्तत्कर्णकुहरे महेशस्तारकं परं॥ पंचाक्षरं जपत्येव शैवं संसारतारकं॥२५॥
तदा गणाः समागत्य दुंदुभिध्वनिपूर्वकं॥ चारु विंजामरकराजयशब्दान्वदंतिच॥२६॥ मुक्तिकन्यां ततस्तस्मै शिवो मंगलपूर्वकं॥ दद्या
ति मंगलाचारान्कुर्वंतिच गणास्ततः॥२७॥ मरणं मंगलं तस्मात्काश्यां भवति भूपते॥ तादृशं मंगलं क्वापि न भवत्येव सर्वथा॥२८॥
मुक्तिकन्याविवाहार्थं काश्यां मर्त्तव्यमेकदा॥ ततः परं न मरणं कदाचिदपि जायते॥२९॥ भवत्यन्यत्र मरणे बहुधा मरणव्यथा॥ न भवत्येव
मरणे काश्यां तु मरणव्यथा॥ मरणाभिमुखे शैवे काश्यां तन्मरणव्यथा दूरीकरोति कृपया महेशो मंगलस्तुतः॥ दर्शनार्थं महेशस्य शिवप्राप्त्यर्थमेव च
॥ मर्त्तव्यं मानवैर्धन्यैः काश्यां यत्नपुरःसरं॥३२॥ नमंति ऋषयः सिद्धा विष्णुब्रह्मादयोपि तं॥ अत एव प्रयत्नेन काश्यां मर्त्तव्यमेकदा॥३३॥ काश्यां
येन तनुस्त्यक्ता शैवेन शिवसन्निधौ॥ जितानि तेन दुःखानि विविधानि नराधिप॥३४॥ येन काश्यां तनुस्त्यक्ता शिववीक्षणपूर्वकं॥ न तस्माद
धिको धन्यः कोपि लोकेत्र दृश्यते॥३५॥ यद्वंशीयः समुत्पन्नः काश्यां त्यक्ष्येदसून्मुदा॥ तद्वंशजाश्च यत्नेन पूजनीयाः सुरैः ध्रुवं॥३६॥ काश्यां
तु मरणे जाते जायते यो महोत्सवः॥ महोत्सवस्तादृशस्तु दुर्लभोन्यत्र सर्वथा॥३७॥ किमुक्तेनात्र बहुना यत्नैर्नानाविधैरपि॥ मर्त्तव्यमेकदा
काश्यां मोक्षार्थं शिवसंनिधौ॥३८॥ यद्यदुक्तमिहास्माभिस्तत्तत्सर्वं श्रुतिश्रुतं॥ अतः कृत्वा श्रुतोऽर्थं गच्छ काशीं नराधिप॥३९॥ इति तद्व
चनं श्रुत्वा सकीर्तीशो नराधिपः॥ अत्यंतं तुष्टहृदयः पूजयामास तान्द्विजान्॥ ततो वस्त्राणि रत्नानि गजान्ग्रामांश्च कोटिशः॥ स ददौ शिवभक्ते
भ्यस्त्वेव प्रीतमानसः॥४०॥ ततस्तान्प्रेषयामास जाबालश्रुतिपारगान्॥ ततो राज्यं ददौ सर्वं स्वपुत्राय नराधिपः॥४१॥ जाबालोक्तप्रकारे
ण संकल्पादीनि सादरं॥ कृत्वा स निर्ययौ राजा काशीमुद्दिश्य भक्तितः॥४२॥ काशीं प्राप्य स भूपालस्त्यक्तभूपाललक्षणः॥ नियमेनैव सततं का
शीवासं चकार हि॥४३॥ नित्यमंतर्गृहादीनि कुर्वन्कर्माणि भूपतिः॥ काश्यां शिवकथां शृण्वन्नुवास विधिपूर्वकं॥४४॥ ततस्तं भूपतिं दृष्ट्वा
कदाचित्पार्वतीपतिः॥ उपसर्गान्ससर्जेशो भूपचित्तं परीक्षयन्॥४५॥ काशीत्यागरतिर्जाता तस्य भूपस्य तत्क्षणे॥ ततो गंतुं समुद्यु

ॅ १४ प्यापिनरः काशींविश्वेशंप्रत्यहंयदि।।नपूजयतियत्नेन यातनार्थंसनिर्मितः।।६६।।काश्यांपदेपदेसंतितीती

श्रीशिवर०७ क्तः सस्माद्द्विजशासनं।।४६।। इतस्ततस्ततोभूपस्तदागच्छन्पिशाचवत्।। दुःखितोभूदियंकाशीकथंत्याज्येतिभूरिशः।।४७।। तदानींस्था उ॰ स॰ पू॰
८४ तुमेकक्षणमात्रमपिस्थिरं।।नाभूत्तस्यमनोविप्रागंतुकामस्यभूपते।।४८।। ततोतिचिंतासंक्रांतःस्वशरीरंसरज्जुभिः।। बबंधातिप्रयत्ने
नतरुमूलसमन्वितं।।४९।। ततस्तत्ररुमूलेभ्योदंदशूकाविनिर्गताः।। रज्जुबद्धांततःस्थित्वाभूपस्तस्माद्विनिर्गतः।।५०।। ततःसंपाद्यकाष्ठानि
हृत्वावह्निंसभूपतिः।। वह्निंप्रदक्षिणीकृत्यप्रविष्टस्तत्रपावके।।५१।। ततःसमभवद्वृष्टिः तयानुष्टवासपावकः।।शशामसद्यःसहसामहावृष्टि
जलाप्लुतः।।५२।। ततःपरंसभूपालः किंकार्यमिति चिंतयन्।। चकारचरणछेदं स्वत एवतदाद्विजाः।।५३।। ततःपरंमहादेवोधृत्वामानुष
विग्रहं।।आरुह्यतुरगंदिव्यंतदाराजानमब्रवीत्।।५४।। ।।श्रीसदाशिव उवाच।। ।।किमर्थंचरणौछिन्नौरक्तपंकजसंनिभौ।।तवरा
जशरीरस्यदुःखमद्याभवन्महत्।।५५।। संयोजयामिचरणौयथास्थानेनराधिप।।अहंतुवैद्यविद्यायांसमर्थोस्मिनसंशयः।।५६।।राजन्तु
रगमारुह्यशीघ्रमायाहिमद्गृहे।।औषधान्यपिदिव्यानिगृहेसंतिसहस्रशः।।५७।।संतौषधानिराजेन्द्रतादृशानिमदालये।। येषांसंयोगमा
व त्रेणस्वास्थ्यंभवतितत्क्षणे।।५८।।काश्यांयात्राद्यकरणेप्रत्यवायोर्भविष्यतितत्क्षणे।।५८।।काश्यांयात्राद्यकरणेप्रत्यवायोभविष्यति।।
छिन्नपादस्यतेराजन्कथंयात्रादिकंभवेत्।।५९।। काश्यांवैश्वेश्वरंलिंगंनदृष्टंयेनयद्दिने।। तद्दिनेजलपानंचतेनकर्त्तुंनशक्यते।।६०।।विश्वे
श्वरमनभ्यर्च्यजलंवायःपिबेन्नरः।। सनरःसर्वथाराजन्नेतःपायीभवेद्ध्रुवं।।६१।।अन्नानर्चितविश्वेशान्क्रूरःश्रीकालभैरवः।।अघोरयात श्रीशिव
नायुक्तान्करोत्याचंद्रतारकं।।६२।। अत्यंतकठिनोनूनंकाशीवासोनराधिप।। सहसासुलभोनायंकाशीवासोतिदुर्घटः।।अस्यांकाश्यांनि ८४
वसतांनियमाचरणंविना।। नस्थातुंशक्यतेराजन्क्षणमात्रमपिध्रुवं।।६४।। काशीदेववशात्प्राप्तामनुष्येणत्वयानृप।।सुराणामपि
काशीयंभवत्यत्यंतदुर्लभा।।६५।। संप्राप्नुयुत्तमान्यतःतानितीर्थानियत्नेनगत्वासेव्यानिसंततं।।६७।। पांचमुद्रंमहापीठंवीरेशोयत्र
तिष्ठति।। तत्रनित्यंप्रयत्नेनगंतव्यंमुक्तिकांक्षिभिः।।६८।।कालत्रयेपिकर्त्तव्यंश्रीविश्वेश्वरदर्शनं।। नित्यंतथैवकर्त्तव्यंश्रीविश्वेश्वर
दर्शनं।।६९।।राजन्भवंतिकर्माणियन्नाक्षय्यानिसंततं।।तत्रवीरेश्वरस्थानेनगंतव्यंखलुसर्वथा।।७०।। यत्रदत्तंहुतंजप्तमनंतफल
दायकं।। अभीप्सितार्थोधिकदंतत्रकेननगम्यते।।७१।।शतकोटिसहस्राणिशतकोटिशतानिच।।लिंगानितेनदृष्टानिवीरेशोये
नविक्षितः।।७२।।सायंवीरेशलिंगस्ययेनभक्तिपुरःसरं।। दर्शनंक्रियतेतेनसर्वपापैःप्रमुच्यते।।७३।। यस्मिन्वीरेश्वरस्थानेज

प्तामंत्रंषडक्षरं ॥ भवंतिपापनिर्मुक्तास्तत्रगंतव्यमन्वहं ॥ ७४ ॥ नित्यंपशुपतीशस्यदर्शनंकार्यमादरात् ॥ तस्यदर्शनमात्रेण पुण्यवृद्धिः प्र
जायते ॥ ७५ ॥ नित्यमत्यंतयत्नेनद्रष्टव्यः कालभैरवः ॥ स्थातुंनशक्यतेकाश्यांविनाभैरवदर्शनं ॥ ७६ ॥ शास्तादेवर्षिसिद्धानांक्रूरः श्री
कालभैरवः ॥ तद्दर्शनंविनाकाश्यांस्थातुमेवनशक्यते ॥ ७७ ॥ यस्यदर्शनमात्रेण महापातककोटयः ॥ विनश्यंतिसयत्नेनद्रष्टव्यः का
लभैरवः ॥ ७८ ॥ यत्रब्रह्मशिरः छिन्नंभैरवेनपुराकृतः ॥ तत्रश्रीकृत्तिवासेशः पूजनीयोन्वहंमुदा ॥ ७९ ॥ कृत्तिवासेशलिंगादिलिंगानिनृपस
त्तम ॥ द्रष्टव्यानिप्रयत्नेनपूजनीयानिचान्वहं ॥ ८० ॥ तानितानिशिवस्थानान्यन्वहंयत्नपूर्वकं ॥ सेवनीयानिगत्वैवसेव्याः शैवाश्चसा
दरं ॥ ८१ ॥ गमनंतुविनापद्भ्यांनभवत्येवसर्वथा ॥ अतोश्वंशीघ्रमारुह्यसमायाहिमदालयं ॥ ८२ ॥ कारयिष्याम्यहंशीघ्रमश्वस्यारोहणं
नृप ॥ यतोश्वारोहणेशक्तिस्तवनास्त्यधुनाततः ॥ ८३ ॥ इतितद्वचनंश्रुत्वादुःखितोपिनराधिपः ॥ धृतधैर्योब्रवीद्वाक्यंशिवंमानुषवि
ग्रहं ॥ ८४ ॥ ॥ राजोवाच ॥ ॥ तवौषधप्रयोगेणशक्तिः प्रायोभविष्यति ॥ किंपद्भ्यांजीवनेनापिकिंदेहेनापितद्वद ॥ ८५ ॥ मरिष्याम्य
धुनैवाद्यदेहापेक्षानमध्रुवं ॥ काशीत्यागार्थमिच्छाद्यममजातासहस्रधा ॥ ८६ ॥ तादृशोच्छापीडितेनछिन्नंपादद्वयंमया ॥ विच्छिन्नचरण
स्यापिकाशीत्यागरतिर्मम ॥ ८७ ॥ अथातावाधतेसामांकाशीत्यागरतिःपुनः ॥ अनेकजन्मतपसाकाशीप्राप्तामयाधुना ॥ काशीत्यागःकथंका
र्योयत्त्यागःपापसाधनं ॥ मयाचेत्त्यज्यतेकाशीमर्तव्यंयत्रकुत्रचित् ॥ ८९ ॥ तदामरणदुःखानिसोढव्यानिकथंमया ॥ श्रीकाशीभिन्नदेशेषु
बहुधैवमृतंमया ॥ ९० ॥ ततोदुःखानिभुक्तानियमलोकेपिभूरिशः ॥ मनुष्यदेहमासाद्यपातकंक्रियतेनरैः ॥ ९१ ॥ तेनपापेनदुर्लंघ्याप्राप्य
तेयमयातना ॥ त्यज्यतेयेनकाशीवंतेननप्राप्यतेसुखं ॥ ९२ ॥ गर्भवासादिदुःखानिप्राप्तव्यानिनसंशयः ॥ नित्यानंदमयीकाशीयेन
त्यक्ताभविष्यति ॥ ९३ ॥ तेनानंदःकथंप्राप्यो नित्यंयप्राप्यमोदते ॥ विच्छिन्नचरणस्यापिममदुःखंनजायते ॥ ९४ ॥ काश्यामानंदरूपिण्यां
मयास्यांस्थीयतेयतः ॥ मयानिष्कंटकासर्वापृथिवीपालितायदा ॥ ९५ ॥ तदेदृशंसुखंनाहंयत्काशीवाससंभवं ॥ यदामयापुरारम्येरत्नसिं
हासनेस्थितं ॥ ९६ ॥ तदेदृशंसुखंनाहंयत्काशीवाससंभवं ॥ नतवैरिशिरोरत्नैर्मर्दंघ्यापूरितंयदा ॥ ९८ ॥ तदेदृशंसुखंनाहंयत्काशी
वाससंभवं ॥ रंभानिभाभिनस्त्रीभिः सेवितोहंयदामुदा ॥ ९९ ॥ तदेदृशंसुखंनाहंयत्काशीवाससंभवं ॥ ~~रंभानिभाभिनस्त्रीभिः सेवितोहं~~
एतादृशंसुखंत्यक्त्वागंतुमिच्छाप्रजायते ॥ १०० ॥ अभाग्यस्यफलंनूनमिदमत्रनसंशयः ॥ काश्यांसंत्यक्तयात्राणांघोराभैरवयात
पृ.१६५ यदासामंतभूपालैःकृतंमत्पादपूजनं ॥ ९७ ॥ तदेदृशंसुखंनाहंयत्काशीवाससंभवं ॥

ना॥१॥त्वयाभाविष्यतीत्युक्तं तत्तथैव न संशयः॥ मयात्वद्यकृतायात्रासर्वापितदनंतरं॥२॥काशीयात्रारतिर्जाता ततः छिंन्नपदद्वयं॥ अधुनो
ऽधूलनंकृत्वासंपूज्यचसदाशिवं॥३॥ततःप्राणानहंत्यक्ष्ये शिरश्छेदपुरःसरं॥ ततोमरणमात्रेणमहादेवः कृपानिधिः॥४॥शैवंपंचाक्षरंमह्यंता
रकंदास्यतिध्रुवं॥अद्यद्रक्ष्येविरूपाक्षंदाक्षायिण्यासमन्वितं॥५॥तल्लक्षणानुक्षणेमेप्रेक्ष्योमाक्ष्येभवति॥इत्युक्तोत्धूल्यसर्वांगंभस्मनाऽभ्य
र्च्यचेश्वरं॥६॥चकर्त्तचशिरोराजापश्यतिश्रीमहेश्वरे॥ततःप्रसन्नोभगवान्महादेवःकृपानिधिः॥७॥शिरःसंयोजयामासयथास्थानंद्वि
जोत्तमाः॥चरणावपिसंयुक्तौयथास्थानंततःपरं॥८॥ततोभूपतिरुत्थायददर्शगिरिजापतिं॥अनंतभानुसंकाशंचंद्रमौलिंपिनाकिनं॥९॥पार्वती
युक्तवामांगंनानाभरणभूषितं॥चारुचामरहस्तेनविष्णुनाविधिनापिच॥१०॥संसेवितंगणवरैर्विविधैश्चमहौजसं॥भासयंतंबहुविधैः
स्वप्रभाभिर्दिशोदश॥११॥प्रकाशयंतंकरुणामपारामनपायिनीं॥एतादृशंमहादेवंदृष्ट्वाभूपःपुनःपुनः॥१२॥प्रणम्याभ्यर्च्यपुष्पाद्यैस्तंतस्तो
तुंसमारभे॥ ॥राजोवाच॥ ॥श्रीमहादेवदेवेशप्रसीदकरुणानिधे॥देवतासार्वभौमेशशरणागतवत्सल॥मथ्यमानाब्धिसंभूत
कालकूटविषादन॥दृप्तगर्वपरिभ्राजन्नरसिंहनिषूदन॥सोमसूर्याग्निनयनभूषितानंदकानन॥१५॥दिग्व्याप्तनानावदनधृत
मेरुशरासन॥संभृतानंदपवनहतब्रह्मादिशासन॥१६॥दूरीकृतादिशमनमहापातकमर्दन॥दूरीकृतारिनिस्यूतशुचिभूतिविभूषित
॥१७॥स्वतएवसदापूतब्रह्मविष्ण्वादिवंदित॥निराकारनिराधारनिरीश्वरपरात्पर॥१८॥अनेकामेयकल्याणगुणसागरशंकर॥हरधी
रागमाकारनिरूपाधिकृपाकर॥१९॥धृतगुल्फपरिभ्राजदनेकमणिनूपुर॥सेवकामरमंदारशिवभक्ताभयंकर॥२०॥धृतरत्नकिरीटां
शुपरिवीतनिशाकर॥निजाकारतिरोभूतसुधापूरामरेश्वर॥२१॥स्वच्छभूसुरभूसारपारावामहेश्वर॥२१॥स्वच्छभूसुरभूसारपारावारम
हेश्वर॥परिसेवितदिक्पालकालकालामलामल॥२२॥विशालभालबिलसज्ज्वालामालाकुलामल॥इतिस्तुत्वामहादेवंसभूपालःकृतांजलिःपुनः
प्रणम्यबहुधापूजयामाससादरं॥तंतादृशंधीरचित्तंनृपंदृष्ट्वामहेश्वरः॥२४॥संतोषंजनयन्नाहमंदहासपुरःसरं॥ ॥शिवउवाच॥ ॥नृपकीर्तिध्वरे
त्येतन्नामतेसार्थकंध्रुवं॥धन्योसिकृतकृत्योसिपरलोकपरोप्यसि॥२५॥काश्यांतवेदृशीभक्तिर्याजातामुक्तिदाश्वतः॥सेदृशीनास्तिक
स्यापित्वदन्यस्याधुनानृप॥२६॥इयंयाभक्तिरुत्पन्नाकाश्यांतवनराधिप॥साभक्तिर्भूरिभाग्येनतपसाचाभवद्ध्रुवं॥२७॥राज्यभोगादि
कंसर्वंपरिभूयत्वयानृप॥शरीरंत्यक्तुमुद्युक्तंकाश्यांभूरितपोबलात्॥२८॥तृणीकृत्योपसर्गांस्त्वंकाश्यांमर्तुंसमुद्यतः॥ईदृशीमति

न्येषोदुर्लभावस्तुतोनृप॥ २९॥तवोपसर्गाभूपालनभविष्यंत्यतःपरं॥सुखेनसंवसात्रैवमदर्चनपरायणः॥३०॥नृपतेजीवनापेक्षायावत्तावदना
तुरः॥काशीवासंकुरुप्रीत्याकाशीत्यागभयंत्यज॥३१॥कदाप्यतःपरंराजन्काशीत्यागरतिस्तव॥नभविष्यतितत्सत्यंदास्याम्यभयमप्यहं
॥३२॥नित्ययात्रादिकर्माणिसर्वाणिकुरुसर्वदा॥मत्कथाश्रवणासक्तःसंतुष्टःसर्वदावस॥३३॥नभविष्यतितेराजन्कालभैरवयातना॥भवादृ
शानांशैवानांनसाभैरवयातना॥३४॥स्वेच्छयात्रतनुत्यागंकरिष्यसियदाभवान्॥तदादास्याम्यहंमुक्तिंतुभ्यमत्रनसंशयः॥३५॥राजन्न
भयहस्तोयंदीयतेतवमूर्धनि॥ तुभ्यंकाश्यांतनुत्यागेमुक्तिंदास्याम्यसंशयं॥ ३६॥ इदमेवशरीरंतेकाश्यांदग्धंभविष्यति॥दग्धेशरीरेसंसा
रःसर्वोदग्धोभविष्यति॥३७॥ यस्यदग्धातनुःकाश्यामेकदातस्यभूपते॥नभविष्यतिसंसारःसत्यंसत्यंवदाम्यहं॥३८॥संसारखेदखिनानांका
श्येकाशरणंनृप॥अयमर्थस्तुनिर्णीतोवेदैरपिसहस्रधा॥ ३९॥ यःशैवधर्मनिरतःकाश्यांदृढतरंवसेत्॥समुक्तिकांतांलभतेमत्तःसत्यंमयो
च्यते॥४०॥अतःकाश्यांवसानन्योमामेवाराधयंन्मुदा॥कुर्वन्नतिप्रयत्नेनभस्मरुद्राक्षधारणं॥४१॥कुरुवेदोक्तमार्गेणसत्कर्माण्येवसं
ततं॥तानिकर्माणिसर्वाणिमह्यमेवनिवेदय॥४२॥अहमेकोवेदवेद्यःसर्ववेदांतसंस्तुतः॥मत्तःपरतरंनास्तिसर्वदाथासत्यमुच्यते॥४३॥
तंतारयामिसंसाराद्योनन्यशरणोनिशं॥मामेवचिंतयेद्भक्त्यात्यक्तान्यामरचिंतनं॥४४॥ मामर्चयप्रयत्नेनकुरुमन्नामकीर्त्तनं॥मामेवचिंतयान
न्योमामेवशरणंव्रज॥४५॥धर्माननन्यान्परित्यज्ययःकुर्यान्ममपूजनं॥ससर्वदामदासक्तोमामेत्येवनसंशयः॥४६॥मामभ्यर्च्यनरोभक्त्याकालकाल
मनाकुलं॥कालात्कालभटेभ्योवानबिभेत्येवसर्वदा॥४७॥ दृष्ट्वाकालोपिमद्भक्तानन्वहंविनयान्वितः॥कृतांजलिपुटोभूत्वासकंपमधितिष्ठति॥४८॥
एतेविष्ण्वादयःसर्वेमद्भक्तामत्परायणाः॥मल्लिंगकान्नरान्दृष्ट्वापूजयंत्येवसादरं॥४९॥नृपविष्ण्वादिदेवानांमद्भक्तेषुनरेष्वपि॥भक्तिरस्यत एवैते
मद्भक्ताइतिविश्रुताः॥५०॥अस्मैमद्भक्तभक्तायमद्भक्तायचविष्णवे॥मयादत्तोस्तिवैकुंठोदेयामुक्तिश्चभूपते॥५१॥विष्णुनानेनबहुधामामुद्दिश्य
तपःकृतं॥अयमव्यभिचारेणकरोतिममपूजनं॥५२॥भूपतेविष्णुनानेनस्वनेत्रकमलंयतः॥उत्पाद्यतेननेत्रेणकृतंमत्पादपूजनं॥५३॥मद्भ
क्तभक्तोममभक्तिपरायणः॥नारायणोयमेतस्मैकिमदेयंनराधिप॥५४॥मद्भक्तानामदेयार्थोममनास्त्येवसर्वथा॥मद्भक्तवांछितं
सर्वंमयादेयमसंशयं॥५५॥अतोमदर्चनपरोमद्भक्तार्चनतत्परः॥काश्यांसंवसभूपालःसंतुष्टहृदयासदा॥५६॥इत्युक्त्वा
श्रीमहादेवःतत्रैवांतरधीयत॥ सभूपालोपिसंतुष्टःस्थितःकाश्यांद्विजोत्तमाः॥ ५७॥अतोधैर्येणसततंकाश्यांस्थातव्य

मास्तिके॥ मर्त्यानांत्यक्तधैर्याणांकाशीवासः कथंभवेत्॥५८॥ पुराकाश्यांमुनिवरानित्यंधर्मपरायणाः॥ नित्ययात्रादिसंसक्ताःसर्व
दाकोटिशास्थिताः॥५९॥ नित्ययात्रादिकर्मान्यत्कर्मतैर्नकृतंद्विजैः॥ सर्वदाशिवयात्रासुनिष्णाता एवतेस्थिताः॥६०॥ द्विजैस्तैः
शिववार्त्तान्यवार्त्तापिनकृताद्विजाः॥ नीतेस्तैर्बहुधाकालः सर्वदाशिववार्त्तया॥६१॥ द्विजैःशिवकथासक्तैर्जलपानंचविस्मृतं॥
तैरन्नवसनादीनित्यक्तानीतिकिमद्भुतं॥६२॥ एवंस्थितामुनिवराःशैवधर्मपरायणाः॥ कलिकालंसमायांतं ददृशुर्योगतत्पराः
॥६३॥ ततस्तेमुनयःसर्वेस्थिलाविश्वेशसन्निधौमुहुश्चुक्रुशुरत्यंतंकलिकालभियाद्विजाः॥६४॥ कलिकालःसमायातिकिंकर्त्त
व्यमतःपरं॥ कलिरायास्यतिस्वच्छंमहापापकुलाकुलः॥६५॥ भुक्तिमुक्तिप्रदानित्याःशैवधर्माःश्रुतिश्रुताः॥ घोरेकलियुगेप्राप्तेन
स्थास्यंतिनसंशयः॥ शैवधर्मेषुगच्छत्सुभुक्तिमुक्तिकथाकुतः॥ भुक्तिमुक्तिकथायस्मात्तदधीनेतिनिर्णयः॥६६॥ अशैवधर्म
निरताभविष्यंतिकलौनराः॥ अशैवधर्मनिरतागमिष्यंतियमालयं॥६७॥ अशैवधर्मनिरतान्दृष्ट्वैवयमकिंकराः॥ पातयिष्यंतिघोरे
षुनरकेषुपुनःपुनः॥६८॥ अशैवधर्मनिष्ठानांकल्पांतेपिवननिष्कृतिः॥ अशैवानांसमुद्धर्त्तानरकेभ्योनकश्चन॥६९॥ काश्यामपिमृ
तान्मर्त्यान्शैवधर्मविवर्जितान्॥ आचंद्रार्कंयातनासुपातयिष्यतिभैरवः॥७०॥ कलौसदाशिवेभक्तिर्नभविष्यतिसर्वथा॥ शिवभक्ति
विहीनानांयातनैवभविष्यति॥७१॥ कलौशिवार्चनेभक्तिर्नभविष्यतिसर्वथा॥ शिवार्चनपरित्यागेयातनैवभविष्यति॥७२॥ शिवसंस्म
रणेत्यागेयातनैवभविष्यति॥७३॥ शिवसंकीर्त्तनेभक्तिर्कलौनैवभविष्यति॥ शिवसंकीर्त्तनत्यागेयातनैवभविष्यति॥७४॥ कलावु
द्धूलनेभक्तिर्नभविष्यतिसर्वथा॥ उद्धूलनपरित्यागेयातनैवभविष्यति॥७५॥ त्रिपुंड्रधारणेश्रद्धाकलौनैवभविष्यति॥ त्रिपुंड्र
धारणत्यागेयातनैव०॥७६॥ रुद्राक्षधारणेभक्तिःकलौनैवभविष्यति॥ रुद्राक्षधारणेत्यागेयातनैव०॥७७॥ रुद्राध्यायजपेभक्तिः
कलौनैवभविष्यति॥ त्रिपुंड्रधारणत्यागिभ्यो रुद्राध्यायजपत्यागेयातनैवभवि०॥७८॥ पंचाक्षरजपेभक्तिःकलौनैवभविष्यति॥ पंचाक्षरज
पत्यागेयात०॥७९॥ कलौमहेशयात्रासुभक्तिर्नैव०॥ शिवयात्रापरित्यागेयातनैवभवि०॥८०॥ बिल्वपत्रार्जनेभक्तिःकलौनैव०॥ बिल्वा

७२ शिवसंस्मरणेभक्तिःकलौनैवभविष्यति॥

र्जनपरित्यागेयाम०॥ ८१॥ मोक्षप्रदे शिवक्षेत्रे कलौ भक्तिर्गमिष्यति॥ तस्यां गतायां मर्त्यानां यातनैव०॥ ८२॥ कलौ काश्यामवस्थाने भक्ति
नैविभ०॥ तत्र भक्तिपरित्यागे यातनैव०॥ ८३॥ कलौ कलुषचित्तानां काशीत्यागो भविष्यति॥ काशीत्यागाद्भविष्यंति प्राणायामीययातनाः॥
॥ ८४॥ अशैवानां कलौ काश्यामवस्थानं भविष्यति॥ तेषां भविष्यत्यनिशं घोराभैरवयातनाः॥ ८५॥ द्विजाः शैवा भविष्यंति कलौ काश्यां
शिवप्रियाः॥ तेषां शिवैकनिष्ठानां काश्यां भुक्तिर्भविष्यति॥ ८६॥ शैवधर्मरताः शिष्टाः कलावत्यंतदुर्लभाः॥ श्रद्धैव शैवधर्मेषु कलौ नैव भ
विष्यति॥ ८७॥ कलावपि यदि श्रद्धा शैवधर्मेषु जायते॥ तदा पुण्यस्य नांतोस्ति सा साक्षान्मोक्षदायतः॥ ८८॥ शैवधर्मरतो भूत्वा कला
वव्यभिचारतः॥ यः शिवं पूजयेन्नित्यं तस्य मुक्तिरदूरतः॥ ८९॥ महद्भाग्यवतामेव कलौ भक्तिर्महेश्वरे॥ सैव भक्तिर्यतः साक्षात्धर्मादिफल
दायिनी॥ ९०॥ कलिं प्राप्यापि काश्यां यः शैवधर्मरतो भवेत्॥ तस्य भाग्यस्य नेयत्तास एव पुरुषोत्तमः॥ ९१॥ कलौ न शैवधर्मेषु प्रीतिः कस्या
पि सर्वथा॥ कलिसंक्रांतचित्तानां प्रीतिस्तेषु कथं भवेत्॥ ९२॥ अप्राप्तकलिकालानां काश्यां यदि मृतिर्भवेत्॥ तदा भवत्यविघ्नेन मुक्तिर
त्यंतदुर्लभा॥ ९३॥ अप्राप्तकलिकालानामस्माकमपि सत्वरं॥ यदि काश्यां तनुत्यागेस्तदा मुक्तिरविघ्निता॥ ९४॥ अस्माभिः शोषणीया
नि शरीराणि प्रयत्नतः॥ नो चेत्कलियुगेस्माकं काश्यां वासोतिदुर्लभः॥ ९५॥ उपवासैः शोषितानि शरीराणि शनैः शनैः॥ काश्यामेव पतिष्यंति
तेन मुक्तिर्भविष्यति॥ ९६॥ न यावत्कलिरायाति तावत्काश्यां तनुव्ययः॥ नानाप्रयत्नैः कर्तव्यः शीघ्रं निर्विघ्नमुक्तये॥ ९७॥ इति संकल्प्य
व तेसर्वे मुनयो ब्रह्मवादिनः॥ नित्यं निरशनैर्नै[illegible]चेरुर्यत्नादितत्पराः॥ ९८॥ बलाद्दत्तमपि त्यक्त्वा जलं ते मुनिपुंगवैः॥ वल्कलं दूषयित्वेन त्यक्त्वा न्य
नि विगतत्रपैः॥ ९९॥ सर्वदोद्धूलितांगास्ते रुद्राक्षाभरणप्रियाः॥ सदाशिवकथासक्ताः सदा काश्यां स्थिता द्विजाः॥ १००॥ सर्वेप्यनशनैरेव काश्यां ते
मुनिपुंगवाः॥ १॥ अतः काश्यामनशनैस्तपोभिश्च प्रयत्नतः॥ शोषयित्वा शरीराणि मर्तव्यं मुक्तिकांक्षिभिः॥ २॥ देवादनशनं जातं भवतामधुना द्वि
जाः॥ यत्नोप्यन्नन कर्तव्यो विनाय त्नेन साधिते॥ ३॥ उपोषणैः शोषितेषु शरीरेषु शनैः शनैः॥ भविष्यत्येव मरणं काश्यां मोक्षैकसाधनं॥
॥ ४॥ काशीबहिः शरीराणि न तपंतिय थातथा॥ कर्तव्यमतियत्नेन भवद्भिर्मुक्तिकांक्षिभिः॥ ५॥ द्विजा मुक्त्यर्थिनो यूयं सोढ्वा दुःखानि सं
ततं॥ काश्यां तिष्ठंतु मुक्त्यर्थं शांता निश्चलमानसाः॥ ६॥ ईहा मूलफलत्यागः शांतिर्दांतिस्तपो बलं॥ यस्य तस्यैव विहितः काशीवासः

 

श्रुतिश्रुतः॥७॥श्रुत्युक्तशैवधर्माणामनुष्ठानंतपःश्रुतं॥शैवधर्मान्यधर्माणांत्याग एवदमःस्मृतः॥८॥ उपसर्गसहिष्णुत्वंशांतिःस्वकृत
कर्मणां॥समर्पणंमहेशायफलत्यागःश्रुतिश्रुतः॥९॥एतादृशानांसततंशिवयात्रारतात्मनां॥काशीवासस्ततोमुक्तिर्महेशानुग्रहाद्द्वि
जाः॥१०॥पुरावेदनिधिर्नामतपस्वीशिवपूजकः॥अविमुक्तमिदंक्षेत्रंसमाश्रित्यस्थितोद्विजाः॥११॥ससदाभस्मपूतांगःसदारुद्राक्षभू
षणः॥सदारुद्रजपोद्युक्तःसदागौरीप्रियार्चकः॥१२॥कर्मणामनसावाचासमहेशार्चनोत्सुकः॥अविमुक्तंसमाश्रित्यस्थितःकल्पशतंमुदा॥
॥१३॥अविमुक्तंनमुंचामीत्यतियत्नेनसंततं॥काशीमेनांसमाश्रित्यस्थितोमोक्षार्थिनांवरः॥१४॥सतेषुतेषुकालेषुसावधानेनशंकरं॥पू
जयामासपूतांगोबिल्वपत्रादिभिर्मुदा॥१५॥ससंपूज्यमहादेवंपूजांतेप्रत्यहंमुदा॥करोतिप्रार्थनामेवंकृतांजलिपुटोद्विजाः॥१६॥हर-
शंभोमहादेवनिर्यांतुप्राणवायवः॥काशीवासंप्रयच्छमे॥नरःस्नातनुरेषामेकाश्यामेवपतिष्यतु॥१७॥शिवशंभोमहेशेतिगौरीशेत्यपिसा
दरं॥वदतोमेमहादेवनिर्यांतुप्राणवायवः॥१८॥विभूतिभूषितांगस्यरुद्राक्षाभरणायने॥त्वन्मूर्त्तिंध्यायतःशंभोभूयात्काश्यांतनुव्ययः
॥१९॥शिवलिंगंपश्यतोमेबिल्वपत्रसमर्चितं॥प्राणानिर्यांतुमेशंभोसत्वरंत्वदनुग्रहात्॥२०॥एवंसंप्रार्थ्यगौरीशंदत्वापुष्पांजलिंततः॥प्रणाही
मोनिकृत्वेशंसंस्मरन्नेवसंस्थितः॥२१॥विभूतिधारणादीनिश्रौतान्येतानिवस्तुतः॥मोक्षंप्रत्यंतरंगानिःसाधनानीतिमन्महे॥२२॥
अतोमुक्त्यंतरंगानिसाधनानिमनीषिभिः॥विभूतिधारणादीनिसाधनीयानिवस्तुतः॥मुक्त्यंतरंगभूतेषुसाधनेष्वखिलेष्वपि॥श्रौतंश्रे 
ष्ठतमंपुण्यंकेवलंशिवपूजनं॥२४॥विभूतिधारणादीनिसाधनानितुवस्तुतः॥वैदिकान्युपयुज्यंतेश्रीमहादेवपूजने॥२५॥विभू
तिधारणादीनिकुर्वन्कुर्वन्शिवार्चनं॥अनंतेभ्योपिपापेभ्योनबिभेतिकदाचन॥२६॥विभूतिधारणादीनिकुर्वन्नपिविमोहितः॥य
द्यर्चयेच्छिवादन्यंसयातिनरकंध्रुवं॥२७॥अयमर्थस्तुजाबालैर्बहुधाप्रतिपादितः॥एनमर्थंविदित्वैवसशिवंशरणंगतः॥२८॥ए
वंस्थितोवेदनिधिःसायंसंपूज्यशंकरं॥पंचाक्षरंजपन्नेवचकारशयनंद्विजाः॥२९॥ततःस्वप्नःसमभवत्तस्यवेदनिधेर्द्विजाः॥जा
तस्वप्नःसमामेत्यमयिस्वप्नंन्यवेदयत्॥३०॥स्वप्नवार्त्तातदुक्ताद्यस्मृतासंस्कारयोगतः॥श्रोतव्यासावधानेनसावार्त्ताविवक्ष्य
तेधुना॥३१॥स्वप्नेकिलगतंतेनधीमतानर्मदातटे॥तत्रदृष्टास्तपोनिष्ठामुनयस्तेनशांभवाः॥३२॥दृष्ट्वातान्छांभवान्धन्यान्

शंकरार्चनतत्परान् ॥ चकारकिलसानंदंतेभ्यः पूजांयथाविधिः ॥ ३३ ॥ सपृष्टस्तैर्मुनिवरैः कुतोवाद्यसमागतं ॥ गम्यतेचक्कवेत्याद्यौवदनामेतिचादरात्
॥ ३४ ॥ इतिपृष्टः सतैः शैवैः स्वनामसमुदीरयत् ॥ ननामदंडवद्भूमौततश्चससमुत्थितः ॥ ३५ ॥ ततस्तन्नामतेश्रुत्वाविस्मिताः शैवपुंगवाः
स्तमूचुर्नतपूतांगंकृतांजलिपुटंद्विजाः ॥ ३६ ॥ ॥ मुनयऊचुः ॥ ॥ त्वयावेदनिधेपूर्वंकाश्यांस्थितमितिश्रुतं ॥ उद्धूलनत्रिपुंड्रादि
शिवाराधनपूर्वकं ॥ ३७ ॥ काश्यांत्वयातपश्चर्याक्रियतेतिश्रुतंपुरा ॥ त्वत्कृतेनोग्रतपसाप्रीतः शंकर इत्यपि ॥ ३८ ॥ इदृशेनत्वया
काशीकथंत्यक्तावद स्वनेः ॥ काशीत्यागेमतिरभूत्कथंवातवसत्तम ॥ ३९ ॥ विप्रर्वार्योद्भवस्यापितववेदः निधेद्विज ॥ कथंवासमभूत्से
यंकाशीत्यागरतिर्वद ॥ ४० ॥ भवान्वेद इतिनिधिर्नाम्नाकेवलंनेतिशुश्रुम ॥ किंत्वर्थतो पीत्यनिशंनामसंश्रूयतेतव ॥ ४१ ॥ घृतकोशातकीवल्लंनाम्ना
वेदनिधिस्तुन ॥ भवानत्थार्थनामभ्यांश्रुतोवेदनिधिर्ध्रुवं ॥ ४२ ॥ भवान्विदितवेदार्थः काशीतत्वविदप्यतः ॥ एतादृशेनभवताकाशीत्यागः कथंकृतः ॥
॥ ४३ ॥ प्रायशोविस्मृतावेदावेदार्थेविस्मृतस्ततः ॥ काशीत्यागः कृतोनूनंत्वयादुष्पथगामिना ॥ ४४ ॥ वेदविस्मरणेजातेवेदार्थेविस्मृतेततः ॥ वेदार्थ
स्याननुष्ठानेप्रयोतिनरकंद्विजाः ॥ ४५ ॥ जाबालप्रमुखैर्वेदैर्याकाशीप्रतिपादिता ॥ साकाशी दुर्लभाप्राप्ताकथंत्यक्तात्वयाद्विज ॥ ४६ ॥ यत्का
शीवासजंसौख्यंघुसदामपिदुर्लभं ॥ तत्सौख्यंजीवताविप्रकथंत्यक्तंत्वयावद ॥ ४७ ॥ याकाशीतपसाप्राप्ताभूयसाशिवसेवया ॥ साका
शीमुक्तिदाविप्रसंत्यक्तोहेलयाकथं ॥ ४८ ॥ काशींयांप्राप्तुमिच्छंतिस्वर्गंत्यक्त्वापिदेवताः ॥ सकाशीमुक्तिदाविप्रसंत्यक्ताहेलयाकथं ॥ स
त्यलोकंविहायापियांप्राप्तुंविधिरुद्यतः ॥ साकाशी० ॥ ५० ॥ विष्णुस्त्यक्त्वापिवैकुंठंयः काशींप्राप्तुमुद्यतः ॥ साकाशीमु० ॥ ५१ ॥ यस्यांपा
तभयंनास्तियस्यांजन्मभयंतथा ॥ साकाशी० ॥ ५२ ॥ यस्यांयमभयंनास्तिमहापातकिनामपि ॥ साकाशी० ॥ यस्यांमृत्युभयंनास्तिम
रणासन्नदेहिनां ॥ साकाशी० ॥ ५४ ॥ यस्यांकाश्यांप्रविष्टायेतेप्रविष्टाः शिवोदरे ॥ साकाशी० ॥ ५५ ॥ याकाशीसंस्मृतापुंसांस्यनिशंनाश
यिष्यति ॥ साकाशी० ॥ ५६ ॥ याकाशीसंश्रुतापुंसांविविधांपूरयिष्यति ॥ साकाशी० ॥ ५७ ॥ याकाशीसंस्तुतापुण्यैर्विविधैर्योजयिष्यति ॥
साकाशी० ॥ ५८ ॥ याकाशीसर्ववेदानांस्तुत्यासमभवन्मुने ॥ साकाशी० ॥ ५९ ॥ यादृशीपांकरस्यापिजातानाम्रियतुमासदा ॥ साका० ॥ ६० ॥

श्रीशिवर०७ याकाशीसर्वदेवानामासीत्सज्यतमासदा॥ साकाशीमुक्तिदाविप्रसंत्यक्ताहेलयाकथं॥ ६१॥ याकाशीब्रह्मसाकारंसच्चिदानंदलक्षणं॥ सा उ·स·पू·
८८ काशी०॥ ६२॥ याकाशीब्रह्मविज्ञानमानंदंपरमंपदं॥ साकाशी०॥ ६३॥ याकाशीनिष्कलंब्रह्मशिवमद्वयमुच्यते॥ साकाशी०॥ ६४॥ ॥
याकाशीपावनीसाक्षात्पावनानांचपावनी॥ साकाशी०॥ ६५॥ याकाशीपरमंज्योतिरनाद्यंतासनातना॥ साकाशी०॥ ६६॥ याकाशीमो
क्षवनिताविलासविलसस्थली॥ साकाशी०॥ ६६॥ याकाशीपरयाभक्त्यासदासेव्यतमास्मृता॥ साकाशी०॥ ६७॥ याकाशीगणना·
थाद्यैर्गणवृंदैरुपाश्रिता॥ साकाशी०॥ ६८॥ याकाशीकालकालेनभैरवेणसमाश्रिता॥ साकाशी०॥ ६९॥ याकाशीविघ्ननाथेन
सांबेनसमुपाश्रिता॥ साकाशी०॥ ७०॥ याकाशीविविधैर्देवैर्मूर्त्तिमद्भिरुपाश्रिता॥ साकाशी०॥ ७१॥ याकाशीविविधैस्तीर्थैर्मूर्त्ति
मद्भिरुपासिता॥ साकाशी०॥ ७२॥ याकाशीविविधैर्देवैर्मूर्त्तिमद्भिरुपाश्रिता॥ साकाशी०॥ ७३॥ याकाशीविश्वनाथेनस्वात्मवद्दृ
श्यतेसदा॥ साकाशी०॥ ७४॥ याकाशीगिरिजाबंधोर्विलाससदनंविभोः॥ साकाशी०॥ ७५॥ याकाशीभूरिपुण्याब्धिब्रह्मानंदप्रव
र्धिनी॥ साकाशी०॥ ७६॥ याकाशीशंकराकाराडुष्प्रापातपसामपि॥ साकाशी०॥ ७७॥ याकाशीकामधुक्दृष्टामुक्तिदुग्धप्रदायि
नी॥ साकाशी०॥ ७८॥ याकाशीसुरमंदारोमुक्तिपुष्पफलप्रदा॥ साकाशी०॥ ७९॥ याकाशीजलमुक्पापदावानलविनाशिनी॥ साकाशी० श्रीशिव
॥ ८०॥ यस्यांकाश्यांस्थितामर्त्यानमस्यंतेदिवौकसैः॥ साकाशी०॥ ८१॥ यस्यांकाश्यांस्थितामर्त्यानिवसंतिनिराकुलाः॥ साकाशी०॥ ॥ ८८
॥ ८२॥ यस्यांकाश्यांस्थितामर्त्याःस्वर्गेनेछंतितेजसा॥ साकाशी०॥ ८३॥ यस्यांकाश्यांस्थितामर्त्याधिक्कुर्वंतिहरेःपदं॥ साकाशी०॥
॥ ८४॥ यस्यांकाश्यांस्थितामर्त्याधिक्कुर्वंतिविधेःपदं॥ साकाशी०॥ ८५॥ यस्यांकाश्यांस्थितामर्त्याधिक्कुर्वंतिशचीपतिं॥ साकाशी०॥
॥ ८६॥ यस्यांकाश्यांस्थितामर्त्यानशोचंतिकदाचन॥ साकाशी०॥ ८७॥ यस्यांकाश्यांगृहकृतंदुःखंनैवापिजायते॥ साकाशीमुक्तिदा॰
विप्रसंत्यक्ताहेलयाकथं॥ ८८॥ यस्यांकाश्यामजंरजोप्यमरैरादराद्धृतं॥ साकाशी०॥ ८९॥ यस्यांकाश्यांसुराशास्यरवरसंमार्जनीरजः॥ सा
काशीमुक्तिदाविप्रसंत्यक्ताहेलयाकथं॥ ९०॥ ईदृशीपरमाकाशीयेनसंत्यज्यतेभ्रमात्॥ नतेनसदृशःपापीलोकेक्वापीतिदृश्यते॥ ९१॥
वानरेणयथारत्नंनविज्ञातंतथानरैः॥ काशीतत्त्वंनविज्ञातंसत्यंसत्यंनसंशयः॥ ९२॥ हीरकंनवराकाणांयथाग्रीयकरंतथा॥ काशीमलि

नचित्तानां नैव प्रियकरा ध्रुवं ॥ न माति भुवनका स्वास्ये नारिकेलफलं यथा ॥ तथा न माति काशी सा हृदये दुष्कृतात्मनां ॥९३॥ काशी न सुलभा पुंसां वस
नारीन चेतसां ॥ विहितानेकसंयासां विकृतानेकमानसा ॥९४॥ सुलभा यदि काशी स्यात्तदा सर्वेपि जंतवः ॥ मुक्ताः स्युरत एवैषा काशी न सुलभा·
ध्रुवं ॥९५॥ येन लब्धा न काशी सा स पापी वस्तुतस्तथा ॥ येन प्राप्तापि संत्यक्ता काशी पापी ततोपि सः ॥९६॥ अलब्धनिधिवत्पापी लब्धत्यक्तनिधि
नरः ॥ तथा पापी भवत्येव काशीत्यागी नरो ध्रुवं ॥९७॥ काशीवियोगजं दुःखं पुमांसं येन बाधते ॥ स वस्तुतस्तु पाषाणश्चैतन्यानाश्रितो ध्रुवं ॥९८॥
काशीरत्नं परित्यज्य दुर्भगाः पापमूर्तयः ॥ यतंते काचमन्वेष्टुमंगुल्याभरणायते ॥९९॥ अनंतोग्रतपोलब्धा काशी पाशुपतस्थली ॥ येन त्यक्ता त
तोप्यन्यो नास्ति मूर्खतरो भुवि ॥१००॥ यः त्यक्तुं यतते मोहात्काशीमानंदमंजरीं ॥ प्रज्ञानफलसंछन्नां पुण्यवृंतसमन्वितां ॥१॥ बहुभिर्जन्म
भिः पूर्वमस्माभिस्तु तपः कृतं ॥ तथाप्यस्माभिरद्यापि सा काशी नैव लभ्यते ॥२॥ नरकेषु विचित्रेषु लुठित्वा संस्थितं पुरा ॥ पुनः पुनश्च
तेष्वेव लुठनं भावि भूरिशः ॥३॥ भूरिशो गर्भनरकैः पीडिता वयमीदृशाः ॥ पुनश्च तेषु बहुधा पीडा संभाविता ध्रुवं ॥४॥ कदा परात्परतरः करु
णासागरो हरः ॥ अस्मासु करुणामार्द्रां वितरिष्यति सादरं ॥५॥ अनंतपातकाकारोयः संसारदवानलः ॥ स महेशकृपासारादन्येन विनश्य
ति ॥६॥ हा हरामरमंदारक दयाकरुरसैः ॥ संप्लावयिष्यस्यस्मांस्त्वं काशीं संप्रापयिष्यसि ॥७॥ अपारकरुणाकारस्त्वमतो हर शंकर ॥ भू
रिपुण्यतपोराशिं काशीं विश्राणयाशु नः ॥८॥ ॥ जैगीषव्य उवाच ॥ ॥ इत्युक्त्वा तद्वचः श्रुत्वा तदा वेदनिधिर्द्विजाः ॥ हा काशी विश्वनाथेति
प्रललाप मुहुर्मुहुः ॥९॥ महादेव महादेव काशीतः पुण्यराशितः ॥ श्रौतधर्मस्य समावीतः कथं निष्कासितोस्म्यहं ॥१०॥ हा काशीश महेशान किं स्म्य
कृतं पातकं मया ॥ काशीबहिः पातितेयं कथं मम तनुः प्रभो ॥११॥ प्रायशस्तनुरेषा मे काश्यामेव पतिष्यति ॥ मुक्तिर्भविष्यतीत्येषा प्रत्याशा भूय
सी स्थिता ॥१२॥ काश्यां कृताघसंघस्य मम श्रीकालभैरवः ॥ शास्तिं करिष्यतीत्येषा प्रत्याशा भूयसी स्थिता ॥१३॥ यातनास्तंभसंबंधः काश्यां
मम भविष्यति ॥ तत्र नश्यंत्यघानीति प्रत्याशा भूयसी स्थिता ॥१४॥ यातनासमये चाहं साक्षाद्द्रक्ष्यामि भैरवं ॥ तेन मुक्तो भवामीति प्रत्याशा भूय
सी स्थिता ॥ यातनांते महादेवं चंद्रचूडमुमापतिं ॥ द्रक्ष्यामि सर्वथैवेति प्रत्याशा भूयसी स्थिता ॥१६॥ यातनांते महादेवः शैवं पंचाक्षरं परं ॥
मह्यं प्रदास्यतीत्येषा प्रत्याशा भूयसी स्थिता ॥१७॥ यातनांते शिवः स्वीयमुत्तरीयं चलं मयि ॥ प्रचालयिष्यतीत्येषा प्रत्याशा भूयसी स्थिता ॥

७५ काशीवियोगजंदुःखंसोढुमेवनशक्यते॥काश्यांमयाजीवतापिब्रह्मानंदमनामयं॥
पुरानुभूतमधुनादुःखंदुःसहमाप्यते॥ ३०॥

श्रीशिवर०७ यातनांतेमहेशांकेदुकूलसमलंकृते॥क्षणमात्रंशयामीतिप्रत्याशाभूयसीस्थिता॥१९॥यातनांतेमहादेवोविभूतिंस्वकरास्थितो॥मह्यंप्रदास्यती उ. स. पू.
८९ त्येषाप्रत्याशाभूयसीस्थिता॥ २०॥यातनांतेमहादेवोमुक्तिंकांतामयत्नतः॥ मह्यंप्रदास्यतीत्येषाप्रत्याशाभूयसीस्थिता॥ २१॥ मुक्तिप्रदानसमये
ब्रह्मविष्णुपुरोगमैः॥ पूजितोहंभवामीतिप्रत्याशाभूयसीस्थिता॥ २२॥ मुक्तिप्रदानसमयेसुरविंजामरैरहं॥ सवीजितोभवामीति प्रत्याशा
भूयसीस्थिता॥ २३॥ मुक्तिप्रदानसमयेदेवदुंदुभिवादनं॥ श्रोष्यामिसर्वथैवेति प्रत्याशाभूयसीस्थिता॥ २४॥ यापूर्वमीदृशीवृत्ताप्रत्याशा
साममाधुना॥विमलासभूच्छंभोकिंकर्त्तव्यमतःपरं॥ २५॥ दुर्लभाप्यधुनाकाशीसुलभाभून्ममेत्यहं॥ प्रहर्षेणस्थितःपूर्वंप्रहर्षःसगतोधुना
॥२६॥ पापौघपरिपाकेनकाशीत्यागोममाभवत्॥अतःपरमहंनिस्वोहाहतोस्मिमहेश्वर॥ २७॥ ममकाशीवियोगेनयोबभूवाद्यवेदना॥ ई
दृशीवदनापूर्वंनानुभूताकदाचन॥ २८॥ अनेकनरकावासःशक्यतेसोढुमन्वहं॥ काशीवियोगसंभूतदुःखस्यास्यनिवारकः॥ नशंकरंवि
नान्यस्तुश्रुतिषुश्रूयतेध्रुवं॥ ३१॥ भूरिपुण्यतपोलब्धाकाशीत्यक्तामयाधुना॥ अंतःपरंपुनःकाशीकथंप्राप्यामयाभवेत्॥३२॥सदुग्धाज्यांसि
तांत्यक्त्वामलाशनइवाधुना॥विहायमोक्षदांकाशींवसाम्यत्रपिशाचवत्॥ ३३॥ ममेदंजीवनंधिग्धिग्धिग्धिग्धिकाशीपराङ्मुखं॥काशी
वियोगेसंभूतजीवनेनापिकिंमम॥ ३४॥ काशीवियुक्तमेतन्मेशरीरमधुनामम॥भारायतेवृथायस्माच्छरीरस्यास्यधारणं॥वरंदुःखाब्धिसंबं
धोवरंनरकयातना॥ काशीवियोगोनवरंसत्यंसत्यंनसंशयः॥३६॥श्रीमद्विश्वेश्वरंलिंगंनदृष्टंयद्दिनेमुदा॥तद्दिनेजीवनंव्यर्थमनर्थानांच नार्चितं
साधनं॥ ३७॥ श्रीमद्विश्वेश्वरंलिंगंयद्दिनेनार्चितंमुदा॥तद्दिनेजीवनंयस्यसजीवन्मृतउच्यते॥ ३८॥ श्रीमद्विश्वेश्वरंलिंगंयद्दिनेपूजितंमुदा श्रीशिव
॥तद्दिनेजीवनंयस्यसजीवन्मृतउच्यते॥३ नंसुदिनंधन्यंजीवितंचसुजीवितं॥ ३९॥ काशीवियोगेजातेपिपुनर्जीवाम्यहंजडः॥ अतोहंदुर्भगो ८९
दुष्टःपापिष्ठश्चनसंशयः॥४०॥काशीवियुक्तंमेतन्मेशरीरंचशरीरवत्॥ परित्याज्यंनसंदेहोमलमूत्रादिदूषितं॥४१॥ एवंस्वप्नदशांप्राप्यविलप्यचस
मुत्थितः॥ मह्यंनिवेदयामासस्वप्नवृतांतमादितः॥ ४२॥ ततःपरमुवाचेदंसवेदनिधिमादरात्॥ इदंशरीरमधुनात्यक्षामेवनसंशयः॥४३॥ आयास्यति
कथंकालःकदाकाशीशिवालिका॥त्याज्याभविष्यत्यमलातन्नजानेहिसर्वथा॥ ४४॥ अधुनैवशरीरंचेत्काश्यांत्यक्तंमयातदा॥मुक्तिःप्राप्या
नसंदेहःश्रीमहेशकृपावशात्॥ सकालोयमितोन्यस्तुकालोतिकठिणोभवेत्॥ अतएवाधुनादेहःकाश्यांत्याज्योनसंशयः॥४६॥ काशीवियोगो

योजातस्वप्नेतेनापिमेधुना ।। बहुदुःखसमुत्पन्नंकंपमावहतेतनुः ।।४७।। यदिजाग्रदवस्थायांकाशीत्यागोभविष्यति ।। तदाभूयांसिदुःखानिभविष्यंति
नसंशयः ।।४८।। अतःकाश्यांप्रयत्नेनतनुमुद्धूल्यभस्मना ।। समभ्यर्च्यचविश्वेशंत्यक्ष्याम्येवतनुंध्रुवं ।।४९।। भवदादिषुपश्यत्सुशैवधर्मेषुसादरं ।। य
दित्यक्ष्याम्यहंदेहंतदाधन्योभवाम्यहं ।। काशीत्यागोममाभूद्यःस्वप्नेतज्जन्यपातकं ।। नाशयिष्यामियत्नेनश्रीपंचक्रोशयात्रया ।।५१।। इत्युक्त्वास
त्वरं विप्रोज्ञानवाप्यांप्रयत्नतः ।। स्नात्वाजग्राहविधिवत्पंचगव्यंसमाहितः ।।५२।। ततःस्नात्वाविधानेनकृत्वोद्धूलनमादरात् ।। त्रिपुंड्रधारणं
चक्रेततोरुद्राक्षधारणं ।।५३।। ततःसमर्चयामासज्ञानेशंयत्नपूर्वकं ।। ततःसमर्चयामासदंडनायकमादरात् ।।५४।। ततःसमर्चयामासमोदा
दीन्गणनायकान् ।। ततःसमर्चयामासढुंढिंसर्वार्थदायकं ।।५५।। आनंदभैरवंनत्वाततःषण्मुखमेवच ।। ततःसमर्चयामासनंदिकेशंशिवाग्रतः ।।५६।।
ततप्रदक्षिणीकृत्यश्रीमद्विश्वेश्वरालयं ।। ततःसमर्चयामासविष्ण्वादीन्द्वारपालकान् ।।५७।। ततोनत्वादेहलीशंकृतांजलिपुटस्ततः ।। प्रणनामसुरा
धीशंश्रीमद्विश्वेश्वरंमुदा ।। ततोवेदांतसंवेद्यंज्योतिरूपमुमापतिं ।। ध्यात्वाविश्वेश्वरंदेवंविश्वेशाभिमुखंस्थितः ।।५९।। ततोविश्वेश्वरंलिंगमभिषि
च्यशुभोदकैः ।। भस्मनाबिल्वपत्रैश्चपूजयामाससादरं ।।६०।। ततःप्रदक्षिणीकृत्यनत्वास्तुत्वाचशंकरं ।। मुक्तिमंडपमासाद्यदध्यौगौरीमनोहरं ।।६१।।
ततोरुद्रजपंकृत्वापंचाक्षरजपंतथाततः ।। अंतर्गृहस्ययात्रांचचकारविधिपूर्वकं ।।६२।। ततःपरंकृतांयात्रांश्रीमद्विश्वेश्वरंमुदा ।। निवेद्यश्रीमहादेवंपुन
र्दध्यौयथाविधिः ।।६३।। ततःपरंनित्ययात्रांकृत्वातदनुसादरं ।। यात्रांनिवेदयामासविश्वेशाययथाविधि ।। ततोवीरेश्वरादीनिदृष्ट्वालिंगानिसाद
रं ।। पूजयामासयत्नेनबिल्वपत्रफलादिभिः ।।६५।। ततोदर्शयत्नेनशीघ्रंश्रीकालभैरवं ।। पूजयामासपुष्पाद्यैर्भैरवंभीमविक्रमं ।।६६।। ततःपुनः
समागत्यश्रीमद्विश्वेश्वरालयं ।। पूजयामासविश्वेशंबिल्वपत्रैरनेकधा ।।६७।। श्रीमद्विश्वेश्वरंलिंगंसमालिंग्यप्रणम्यच ।। तुष्टावरुद्रसूक्तेनरुद्रमंत्रैः
तथापरैः ।।६८।। पुनःप्रणम्यसंपूज्यपुनर्नत्वामहेश्वरं ।। पुनःसमर्चयामासबिल्वपत्रैःसहस्रधा ।।६९।। ततःप्रदक्षिणीकृत्यनत्वाविश्वेश्वरंततः ।।
मध्यान्हकालेसंप्राप्तेमणिकर्णीतटंययौ ।।७०।। मणिकर्णीजलेस्नात्वाकृत्वाचोद्धूलनंततः ।। त्रिपुंड्रधारणंचक्रेततोरुद्राक्षधारणं ।।७१।। ततःसम
र्चयामासमृन्मयंलिंगमुत्तमं ।। ततोजजापयत्नेनशैवंपंचाक्षरंद्विजाः ।।७२।। ततःप्रदक्षिणीकृत्यप्रणम्यचमुहुर्मुहुः ।। तुष्टावगिरिजानाथंरुद्रसू
क्तैरनेकधा ।।७३।। ततःपंचाक्षरंशैवंजपन्नेवसतारकं ।। जहौप्राणान्प्रयत्नेनयोगमार्गमुपाश्रितः ।।७४।। ततोदुंदुभयोनेदुःपुष्पवृ
ष्टिरभूत्तदा ।। ततःप्रसन्नोभगवानुमाकांतःकृपानिधिः ।।७५।। ततोवेदनिधिंशंभुःस्वांकेसंवेश्यसादरं ।। दत्वाविभूतिंरुद्राक्षा

श्रीशिवर०७ न्यूतात्मानंचकारसः॥७६॥विश्वेशस्तारकंब्रह्मव्याचष्टेतदनंतरं॥येनासावमृतीभूत्वामोक्षीभवतिशांकरः॥७७॥अविमुक्तं उ॰स॰पू॰
९० निषेवेततस्माद्यत्नैर्द्विजोत्तमाः॥अविमुक्तंनमोक्तव्यंनमोक्तव्यंकदाचन॥७८॥व्याचष्टेतारकंब्रह्मयदाविश्वेश्वरःस्वयं॥तदावि
ष्णुमुखादेवाःप्रणेमुस्तंद्विजोत्तमं॥७९॥ततोददौमहादेवःकिरीटंचंद्रसंयुतं॥सशेषाभरणंभव्यललाटेलोचनंतथा॥८०॥
ततःपरंमहादेवेसच्चिदानंदविग्रहे॥लीनोवेदनिधिर्विप्रामहेशानुग्रहात्तदा॥८१॥प्राप्तंतेनेदृशंभाग्यंकाश्यांमरणमात्रतः॥ईदृ
शंभाग्यमन्यत्रनास्तिनश्रूयतेपिच॥८२॥ईदृशीमुक्तिदाकाशीनत्याज्यासाधुकर्मभिः॥नूनंस्वप्नेपिनत्याज्यानत्याज्यासर्वथा
द्विजैः॥८३॥हितमेवोच्यतेविप्रानाहितंवच्मिसर्वथा॥इत्थंकाशीनमोक्तव्यानमोक्तव्यैवमुक्तिदा॥८४॥भवतांशांभवानांचेत्का
शीत्यागरतिर्भवेत्॥काशीत्यागरतात्मानोभवंतःशांभवाःकथं॥८५॥काश्यांस्थातव्यमनिशंविश्वेशाराधनोत्सुकैः॥मर्त्तव्यंनप्र
यत्नेनकाश्यामेवमुमुक्षुभिः॥८६॥पुराकेदारमासाद्यदधीचिर्मुनिपुंगवः॥उद्धूलितांगोदेवेशंमहेशंपूजयन्स्छिवः॥८७॥तदा
ब्रह्मादयोदेवास्तंदृष्ट्वामुनिपुंगवं॥प्रणम्यदंडवद्भूमौपप्रच्छुःप्रीतमानसं॥८८॥ ॥देवाऊचुः॥ ॥मुनिपुंगवसर्वांगभस्मरुद्राक्ष
भूषण॥सर्वदाप्रीतचित्तेनस्थीयतेत्रकथंत्वया॥८९॥फलानिनैवभक्ष्यंतेशुष्कपर्णान्यपिद्विज॥नपीयतेजलंचात्रतृप्तिर्भवतितेक श्रीशिव
थं॥९०॥आहारेणविनैवात्रबहुकालंप्रयत्नतः॥क्रियतेदेवदेवस्यमहेशस्यार्चनंत्वया॥९१॥शरीरंमानुषंप्राप्यत्यक्ताहारोचनीतले ९०
॥नकोपिदृश्यतेस्माभिर्भवानेकोनतादृशः॥९२॥सर्वदाप्रीतहृदयोभुक्तान्नइवतिष्ठसि॥किंप्रीतिमूलंविप्रेन्द्रतन्नोवदविशेषतः
॥९३॥यद्युच्यतेतदास्मास्यत्कैवामृतमन्वहं॥शक्यतेस्थातुमत्रैवत्वत्प्रसादान्नसंशयः॥९४॥निराहारेणगौरीशंपूजयामोमहेश्वरं
॥तुष्टोभवतिगौरीशोनिराहारेणपूजने॥९५॥अस्मभ्यमुपकारोयंकर्त्तव्योद्यत्वयामुने॥यतोदीनदयालुस्त्वंरागद्वेषादिवर्जितः॥
ष्टस्त ॥९६॥इतिपृष्टस्तदादेवैर्दधीचिर्मुनिसत्तमः॥समाप्यनियमंस्वीयंदेवानाहविचक्षणः॥९७॥ ॥दधीचिरुवाच॥ ॥पुराकैलास
शिखरेसमासीनंमहेश्वरं॥नत्वासंपूज्यनंदीशःकृतांजलिरभाषत॥९८॥ ॥नंदीशउवाच॥ ॥देवदेवमहादेवसर्वदेवोत्तमप्र

भो॥ आहारेणविनातृप्तिः कथंभवतितद्वद॥९९॥ इतितद्वचनंश्रुत्वामहादेवः कृपानिधिः॥ नंदिकेशंविलोक्याहसादरंभक्तवत्सलः॥१००॥ ॥
श्रीशिवउवाच॥ ॥ अस्त्येकमन्नपूर्णायाःनाम्नामष्टोत्तरंशतं॥ तदावृत्याविनाहारंतृप्तिर्भवतिसर्वदा॥१॥ धनधान्यादिवृध्दिश्चतदावृत्याभवि
ष्यति आयुरारोग्यवृध्दिश्चजायतेनात्रसंशयः॥ २॥ तन्नामानिप्रयत्नेनशुचिर्भूत्वेनसादरं॥ अन्नपूर्णालयेस्थित्वाजपनीयानिभक्तितः॥३॥
तन्नामावर्तनात्पूर्वमुद्धूल्यांगानिभस्मना॥ रुद्राक्षधारणंकृत्वाध्यातव्यापरमेश्वरी॥ ४॥ ॥ ध्यानं॥ ॥ दुकूलपरिवीतांगींनानाभरणशोभि
तां॥ स्मितसंपूर्णवदनांध्यात्वाकार्योजपस्ततः॥१॥ ॐनमस्तेअन्नपूर्णायैश्रीरूपिण्यैनमोनमः॥ ॐनमस्तेन्नपूर्णायैधीरूपिण्यैनमोनमः॥
॥१॥ ओंनमस्तेन्नपूर्णायैजगद्धात्र्यैनमोनमः॥ ॐनमस्तेन्नपूर्णायैह्रीरूपिण्यैनमोनमः॥२॥ ॐम्नमस्तेन्नपूर्णायैविद्याधात्र्यैनमोनमः॥
ओम्नमस्तेन्नपूर्णायैलक्ष्मीधात्र्यैनमोनमः॥ ओम्नमस्तेन्नपूर्णायैब्रह्मधात्र्यैनमोनमः॥ ओंनमस्तेन्नपूर्णायैविष्णुधात्र्यैनमोनमः॥
३॥ ओंनमस्तेन्नपूर्णायैवेदधात्र्यैनमोनमः॥ ४॥ ॐनमस्तेन्नपूर्णायैपृथ्वीधात्र्यैनमोनमः॥ ॐनमस्तेन्नपूर्णायैशैलधात्र्यैनमोनमः॥५॥
ॐनमस्तेन्नपूर्णायैवनधात्र्यैनमोनमः॥ ओंनमस्तेन्नपूर्णायैनदीधात्र्यैनमोनमः॥६॥ ओंनमस्तेन्नपूर्णायैअब्धिधात्र्यैनमोनमः॥ ॐ
नमस्तेन्नपूर्णायैद्वीपधात्र्यैनमोनमः॥७॥ ओंनमस्तेन्नपूर्णायैअन्नधात्र्यैनमोनमः॥ एवंस्तुत्वाहृदिध्यात्वाब्रह्मविष्ण्वादिसेवितां॥ ८॥
अन्नपूर्णाप्रयत्नेनजपःकार्यःसमाहितैः॥ ॥ अस्यश्रीअन्नपूर्णाष्टोत्तरशतनाममंत्रस्यानुष्टुप्छंदः॥ परमात्मासदाशिवोहंऋषिः॥ श्री
अन्नपूर्णादेवता॥ स्वाहाशक्तिः॥ स्वधाबीजं ह्रींकीलकं॥ सर्वाभीष्टसिध्दिःफलं॥ श्रीअन्नपूर्णाप्रीत्यर्थेजपेविनियोगः॥ ॥ॐ अन्न
पूर्णाशिवादेवीभीमापुष्टिःसरस्वती॥ सर्वज्ञापार्वतीदुर्गाशिवानीशिववल्लभा॥ १॥ वेदविद्यामहाविद्याविद्याधात्रीविशारदा॥ कुमा
रीयुवतीबालालक्ष्मीःश्रीर्भयहारिणी॥ २॥ भवानीविष्णुजननीब्रह्मादिजननीपरा॥ गणेशजननीशक्तिःकुमारजननीशुभा॥ ३॥ भाग्या
श्रयाभगवतीभक्ताभीष्टप्रदायिनी॥ भवरोगहराभव्याशुभ्रःपरममंगला॥ ४॥ शर्वाणीचंचलापांगीचारुचंद्रकलाधरा॥ विशाला
क्षीविश्वमाताविश्ववंद्याविलासिनी॥ ५॥ आर्याकल्याणनिलयारुद्राणीकमलासना॥ शुभप्रदाशुभावार्त्तावृत्तपीनपयो
धरा॥ ६॥ अंबासंसारमथनीमृडानीसर्वमंगला॥ विष्णुसंसेविता शुध्दाब्रह्मादिसुरसेविता॥७॥ परमानंददाशांतिःपरमानंद
रूपिणी॥ परमानंदजननीपरमान्नप्रदायिनी॥ परोपकारनिरतापरमाभक्तवत्सला॥ पूर्णचन्द्राभवदनापूर्णचंद्रनिभांशुका॥ ९॥

शुभलक्षणसंपन्नाशुभानंतगुणार्णवा ॥ शुभसौभाग्यनिलयाशुभाचाररतप्रिया ॥१०॥ चंडिका चन्द्रमथनीचण्डदर्पनिवारिणी ॥ चण्डमा उ-स-पू-
र्तण्डनयनाचन्द्राग्निनयनासती ॥ पुण्डरीककरापुण्यापुण्यदापुण्यरूपिणी ॥ पुण्यज्ञेयापुण्यवेद्यापुण्यमूर्त्तिःपुरातना ॥१२॥ अनवद्या
वेदवेद्यावेदवेदांतरूपिणी ॥ मायातीतासृष्टमायाशिष्टधर्मालिवंदिता ॥१३॥ असृष्टासंगरहितासृष्टिहेतुःकपर्दिनी ॥ वृषारूढायं
चंचलापांगीसर्वदासर्वदेहिनां ॥ भुक्तिमुक्तिप्रदानस्मात्सेर्वेतिष्ठंति सर्वदा ॥ सर्वदुःखप्रशमनीसर्वसौभाग्यदायिनी ॥ काश्येवातःप्रयत्नेनसेव
नीयामनीषिभिः ॥ ५६ ॥ यस्यां काश्यामहं देवो विधिविष्ण्वादिसेवितः ॥ तस्यामस्यां शिवे काश्यां दुःखंनास्त्येवसर्वथा ॥ ५७ ॥ येवसंत्यत्र
विश्वस्यकाश्यांमुक्त्यर्थिनोनराः ते मदीयाः शिवे तेभ्यो मुक्तिं दास्याम्यसंशयं ॥ ५८ ॥ मुक्तिकांतां प्रयच्छामि यस्यां काश्यामहं शिवे ॥
तस्यांनस्थातुमिच्छंतिकेवामुक्त्यर्थिनोजनाः ॥ ५९ ॥ मामेवाभ्यर्चयंतोत्र काश्यांतिष्ठंतियेशिवे ॥ तेभ्योमुक्तिंप्रयच्छामिसत्यंसत्यंनसं
शयः ॥ ६० ॥ कर्मणा मनसा वाचा काश्यांमयिचयेरताः ॥ तेभ्यो मुक्तिप्रदानार्थं प्रभुश्च प्रतिभूरहं ॥ ६१ ॥ पश्यैतान्शांतहृदयान्शिवेमोक्षार्थ
मुत्सुकान् ॥ भस्मोद्धूलितसर्वांगान् त्रिपुंड्रांकितमस्तकान् ॥ ६२ ॥ रुद्राक्षमालाभरणान्मन्नामजपतत्परान् ॥ मल्लिंगपूजनासक्तान्मत्क
थाश्रवणप्रियान् ॥ ६३ ॥ एतादृशानांधन्यानांनित्यंमद्गतचेतसां ॥ मुक्तिर्भवतिनिर्विघ्नं मत्प्रसादाद्वरानने ॥ ६४ ॥ पश्यैवं जयगीषव्यं मदर्चनप
रायणं ॥ मदर्चनार्थमायातिपूजासाधनपूर्वकं ॥ अतिवृद्धोयममले नित्यंकालत्रयेपिमां ॥ समर्चयतीबिल्वाद्यैः शिवलिंगस्वरूपिणं ॥ ६६ ॥ श्रीशिव
कल्पकोटिसहस्राणिकल्पकोटिशतानिच ॥ जातान्येतस्यमत्पूजानिरतस्यवरानने ॥ ६७ ॥ कदाप्यनेनकृतं मदन्याराधनंशिवे ॥ नित्यंमदर्चने ९१
नैवपूतमस्यकरद्वयं ॥ ६८ ॥ शिवेकदापिनध्यातोमदन्योनेनसादरं ॥ मदन्योनेक्षितोनेनकदाचिदपियत्नतः ॥ ६९ ॥ प्रणामोनकृतोयेनम
दन्यस्यवरानने ॥ मत्कथान्यकथानेननश्रुताभक्तिपूर्वकं ॥ श्रुतंनानेननामापिमदन्यस्यप्रयत्नतः ॥ जिह्वैतस्यातिविमलानान्यनामानुवा
दिनी ॥ ७१ ॥ सर्वदाशिवकाशीशमहेशमृडशंकर ॥ विश्वनाथेतिनामानिजपत्ययमनाकुलः ॥ एतानिपंचनामानिममदिव्यानिशैल
जे ॥ विश्वनाथेतिनाम्नापियुक्तानिश्रुतिमान्यपः ॥ ७३ ॥ जपनीयानियत्नेनमुक्तिकांक्षिभिरादरात् ॥ प्रियाणिममनामानिनिर्मितानिमयापुरा ॥

यत्नपश्यतितन्नायंसदामामेवपश्यति।। मदन्यंगिरिजेक्कापिभ्रमेणापिनपश्यति ।।७५।।रुद्राध्यायजपोऽनेनकृतस्तावान्प्रयत्नतः।।यावानन्येननकृतो
गणनाविषयोपिन ।।७६।।पंचाक्षरजपोऽनेनकृतस्तावान्प्रयत्नतः।।यावानन्येननकृतोगणनाविषयोपिन ।।७७।।काश्यामनेनलिंगानियथा
विधि।।एतत्स्थापितलिंगानांसंख्याकर्तुंनशक्यते ।।७८।।काश्यांकृतान्यनेनैवलिंगदानानिकोटिशः।।शैवानाहूयविधिवच्छैवेभ्योभक्तिपूर्वकं।।
।।७९।। ।।पार्वत्युवाच।। ।।देवदेवमहादेवलिंगदानविधिंवद।।लिंगदानफलंचापिवदमह्यंकृपानिधे।।८०।। ।।सदाशिवउवाच।। ।।काश्मीर
कांचनादीनिलिंगानिविविधान्यपि।।देयान्यनंतयत्नेनमत्प्रीत्यर्थंमुमुक्षुभिः।। ८१।।शैवेभ्यएवदेयानिसर्वदानानितेयतः।।दानयोग्यास्तदन्येतुदानयोग्या
नवस्तुतः।।८२।।नान्यत्रदत्तमक्षय्यंपरंतुक्षय्यमेवतत्।। दत्तंदानमशैवेभ्योवृथाभवतिसर्वथा।।८३।।ज्वलंतमग्निमुत्सृज्यनहिभस्मनिहूयते।।त
थाशैवंपरित्यज्यदानंनान्यत्रदीयते ।।८४।।अल्पमप्यपिदत्तंयद्यस्मिन्नक्षय्यमंबिके।। तादृशःशैवएवातोदानंशैवायदीयते।। ८५।।शिवरात्रौसोम
वारेग्रहणेचन्द्रसूर्ययोः।। संक्रांतिष्वपिकर्तव्यंलिंगदानंमुमुक्षुभिः।।८६।। उपोष्यपूर्वदिवसेशैवान्संपूज्यसादरं।।प्रार्थनीयास्तदाशैवालिंगदानार्थ
मादरात्।।८७।।ततोदेयानिलिंगानिक्षीराज्यैर्विधिपूर्वकैः।।अभिषिच्यार्चनीयानिबिल्वपत्रादिभिःशिवे।। ८८।। सौवर्णेराजतेवापिताम्रेवाभाजनेवने।। नववस्त्रस
मास्तीर्णेशिवलिंगंनिवेशयेत्।। ८९।।ततःपुनःप्रयत्नेनभस्मबिल्वदलादिभिः।। संपूज्यक्षीरपक्कान्नैर्नैवेद्यानिसमर्पयेत्।।९०।।रात्रौजागरणंकार्यंभक्तिःश्र
द्धापुरःसरं।। कथामदीयाश्रोतव्यामन्मूर्तिध्यानपूर्वकं।।९१।।प्रतिक्षणेपिकर्तव्यंबिल्वपत्रैर्मदर्चनं।। नैवेद्यंदेयममलंमह्यंयामचतुष्टये।।९२।।ततःप्रातः
समुत्थायकृत्वास्नानादिकंततः।।शैवानांपूजनंकार्यंमधुपर्कपुरःसरं।।९३।।ततःसुवर्णसहितंवस्त्रयुग्मसमन्वितं।।ग्राह्यंसपात्रंहस्तेनशिवलिंगंमदात्मकं।।
।।९४।।ततःपरमयंमंत्रोमन्मूर्तिध्यानपूर्वकं।।देशकालादिसंकीर्त्यपठनीयोमनीषिभिः।।९५।।शिवलिंगेशिवाकारेभुवनानिचतुर्दश।।तस्माद्दस्यप्रदानेनप्रीयतां
भगवान्शिवः।।९६।। इतिमंत्रंसमुच्चार्यैशिवलिंगंमदात्मकं।।मद्भक्तायप्रदातव्यंजलस्रानपुरःसरं।।९७।। देवस्यत्वेतिराजात्वावेतिमंत्रास्ततःपरं।। प्रतिग्रही
त्रायत्नेनपठनीयायथाक्रमं।।९८।। दक्षिणातावतीदेयातृप्तिर्भवतियावता।।सुवर्णानांसहस्रंवायद्वादेयास्वशक्तितः।।९९।। दशदानानिकार्याणिततःशक्त्य
नुसारतः।। ततःकार्यंकृतंकर्मशिवेसर्वंमदर्पणं।।१००।। एवंयःकुरुतेभक्त्यालिंगदानंयथाविधि।।समहापापसंघेभ्यःसद्यएवप्रमुच्यते।।१।। यंयमर्थंसमुद्दि
श्यलिंगदानंकरोतियः।। सततमथमाप्नोतिमत्प्रसादान्मनोरमे ।। २।।लिंगदानंसमंदानंनास्तिकुत्रापिशैलजे।।लिंगदानेसमंमहादानंनास्तिकुत्रापिशैलजे।।लिं
गदानंसर्वदानोत्तमोत्तमं।।३।।लिंगदानंमहादानंमदनुग्रहकारणं।।यःकरोतिविधानेनसममातिप्रियःशिवे।।४।।पुराचक्रपुराधीशोराजापरपुरंजयः।।श्री

 क्षणाच्छ्रुत्वतत्त्वज्ञान्प्रणम्याह कृतांजलिः॥५॥ ॥राजोवाच॥ ॥धनमस्ति यथेच्छं मे मम दित्सापि जायते॥ कथं द्रव्यव्ययः कार्यो दानपात्रं च कीदृशं॥६॥ 
 इतितद्वचनंश्रुत्वाधर्मज्ञावीतमत्सराः॥श्रुतितत्वंविचार्याहुर्द्रव्यलोभपराङ्मुखाः॥७॥ ॥ब्राह्मणाऊचुः॥ ॥बहूनिसंतिदानानितेषुदानेषुव
स्तुतः॥लिंगदानंपरंदानंतत्तुसर्वार्थसाधकं॥८॥ लिंगदानेनभगवान्यथातुष्यतिशंकरः॥ तथानान्येनदानेनतुष्टोभवतिशंकरः॥९॥सर्वकामप्र
दंदानंलिंगदानमितिश्रुते॥लिंगदानेततःकार्यंविधिवद्यत्नपूर्वकं॥१०॥तुलादानानिदानानिसर्वाण्यपिनराधिप॥शिवलिंगप्रदानस्यकलांनार्हंति
षोडशीं॥११॥ प्राप्तव्यंलिंगदानेनधर्माद्यर्थचतुष्टयं॥लिंगदानसमंदानमत एवनदृश्यते॥ सुवर्णममितंशुल्कं यस्यदानस्यदक्षिणा॥तादृशंदानमु
त्कृष्टंलिंगदानंश्रुतिश्रुतं॥१३॥ शिवलिंगप्रदोवंशान्मातृतःपितृतःशतं॥ गृहीत्वायातिसंतुष्टःश्रीमहादेवसंनिधिं॥१४॥शैवेभ्यएवदातव्यंलिंगदानंप्रय
त्नतः॥अशैवेभ्योभ्रमेणापिनदातव्यंमनीषिभिः॥१५॥लिंगदानान्यदानानामपिपात्रंशिवार्चकाः॥किंपुनर्लिंगदानस्यशैवाःपात्रंततोनृप॥१६॥शिवपा
रिषदाःशैवाःपूजनीयाःसुरैरपि॥अतोऽवश्यंलिंगदानंशैवेभ्योदेयमास्तिकैः॥१७॥लिंगदानमशैवाययोदद्यान्मोहसंगतः॥सतद्दानंफलंराजन्नप्राप्नोत्ये तेभ्यः
वसर्वथा॥१८॥मुखावलोकनंवापिशैवान्यानांनराधिप॥नकर्त्तव्यंततस्तेभ्योदानंदेयंकथंभवेत्॥१९॥पुरादानरपैर्लिंगदानानिकेवलं॥ कृतानिबहु
धाराजन्शिवसन्निधिकांक्षिभिः॥२०॥नकृतंयेनविधिवल्लिंगदानंप्रयत्नतः॥तज्जन्मनिष्फलंज्ञेयंतज्जीवनमपिध्रुवं॥केवलंलिंगदानेनयत्पुण्यंलभतेन
रः॥तत्पुण्यमन्यदानानांकोटिभिश्चनलभ्यते॥२२॥लिंगदानफलंवक्तुंब्रह्मणापिनशक्यते॥परंतुतत्फलंवक्तुंसमर्थःपार्वतीपतिः॥२३॥अतःकुरुनृपश्रेष्ठ
लिंगदानंप्रयत्नतः॥लिंगदानेनसुप्रीतोभविष्यतिमहेश्वरः॥२४॥इतितद्वचनंश्रुत्वासराजाविधिपूर्वकं॥चकारलिंगदानानिमत्प्रीत्यर्थसहस्रशः॥२५॥
शैवानाहूयशैवानांयावद्द्रव्यमपेक्षितं॥तावद्दत्वाददौतेभ्यःशिवलिंगानिभूपतिः॥२६॥नयावद्द्रव्यमभवत्कुबेरस्यापिशोभने॥तावद्द्रव्यमभूत्तस्यभू 
पतेर्न्यायसंचितं॥२७॥तत्सर्वंविविधंद्रव्यंलिंगदानपुरःसरं॥शैवेभ्यःप्रददौभूपोमत्प्रीत्यर्थंवरानने॥२८॥सवंशकोटिसंयुक्तोमातृतःपितृतोनृप॥म 
त्संनिधिमवापांतेगाणपत्यंचलब्धवान्॥२९॥लिंगदानेनबहुभिर्गाणपत्यमुपागतं॥मत्सायुज्यंचसंप्राप्तंततोयत्नंविनाशिवे॥३०॥एतस्यैवप्रसादेन
बहूनांभवितात्मनां॥काशीवासोभवत्सर्वंसाक्षान्मुक्तिप्रदायकः॥३१॥पश्यपाशुपतान्वृद्धान्समायांत्यर्घ्यपाणयः॥एतेमदर्चनपरामदेकशरणाःशि
वे॥३२॥एतादृशैःपशुपतेःपाशुपतैःकाशीवाप्यावरानने॥एतेमदेकमनसोमदेकशरणाःशिवे॥३३॥एतेपाशुपताःशुद्धाःकाशींपाशुपतस्थलीं॥
महापद्यपिघोरायांनत्यजिष्यंतिसुव्रताः॥३४॥कोट्यर्बुदसहस्राणिशतकोट्यर्बुदानिच॥कोट्यर्बुदार्बुदंसंतिकाश्यांपाशुपताःशिवे॥३५॥एतेस

वैंपिसततंमल्लिंगार्चनतत्पराः॥ ममैवाराधनं कृत्वातिष्ठंत्यत्र मुमुक्षवः॥३६॥ पश्यैतान्भस्मदिग्धांगान्रुद्राक्षाभरणप्रियान्॥अनःघ्यार्घ्यकरान् धन्या
न्मन्नामस्मरणोत्सुकान्॥३७॥ महादेवेति मामुच्चैर्वदंतः प्रीतिपूर्वकं॥कथमेते समायांति पश्यपश्यवरानने॥३८॥ एतदुच्चरितःश्राव्योमहादेवेत्ययं
ध्वनिः॥ अमृतामृतभूतोयंशिवेरुचिकरोमम॥३९॥ महादेवेतिपीयूषंपिबंत्येव पुनः पुनः॥ पश्य पश्य पुनःप्रीत्यामहादेवेतिवादिनः॥४०॥ नानादि
ग्भ्यः समायांति पश्यपाशुपतोत्तमान्॥अर्घ्यहस्तान्महादेवेत्युच्चैरुच्चरतोमुदा॥४१॥ कथंभांतिशुचिर्भूताभस्मभासितविग्रहाः॥सर्वेप्येतेभस्म
कालाममपारिषदाःशिवे॥४२॥ मदर्चनंविनैतेषामन्यत्कार्यंनदृश्यते॥ एतेकालत्रयेप्येवमागत्याभ्यर्चयंतिमांशिवे पश्यमहाशैवान्मुक्तिमंडपसंस्थि
तान्॥ पंचाक्षरजपासक्तान्मृल्लिंगालोकनोत्सुकान्॥४४॥ रुद्राध्यायजपासक्तान्पश्यशैवान्गिरींद्रजे॥ध्यायंतिमामजंनित्यंपश्यैतान्छैव पुंगवान्
॥४५॥ एतेनृत्यंतिशैवेंद्रामामभ्यर्च्ययथाविधि॥साष्टांगंप्रणमंत्येतेशतधापश्यतान्छिवे॥४६॥ कर्पूरदीपान्धृत्वैतें[illegible]निरेनामानिशुभदानिमे॥गा
येत्येतेगानलोलंबिदित्वामामजंशिवे॥४७॥ सर्वेप्येतेनित्यतृप्तानित्यानंदानिरामयाः॥ ध्यायंतिसच्चिदानंदंमामेवैतेसदामुदा॥४८॥ मत्कथाकर्णना
सक्तानिर्वाणपदवांछया॥ तिष्ठंत्यत्रानिशंदेविमामेवशरणंगताः॥४९॥ पश्यपश्य गणान्देविभैरवादीन् विलोकय॥ सेवंतेमामजंनित्यमनंतविजयान्विताः
॥५०॥ पश्यैनंविष्णुममलंकृतांजलिपुटंसदा॥ ध्यायंतंमामजंनित्यंसर्वदेवशिखामणिं॥५१॥ जातोयंममवामांगाद्विष्णुर्लक्ष्मीसमन्वितः॥ मद्द्वारपालको
भूत्वातिष्ठत्यत्रमदर्चकः॥५२॥ अयंविष्णुर्मदासक्तोनित्यंमत्पादपूजकः॥ शिवेमद्द्वारमाश्रित्यतिष्ठत्येषकृतांजलिः॥५३॥ सुयशापतिमाश्रित्यतेनविष्णु
र्नियंत्रितः॥ कदापिनजहात्येवद्वारंवेत्रसमन्वितः॥५४॥ द्वारपालकनाथोयंसुयशापतिरंबिके॥ अतस्तमनुसृत्यायंद्वारमाश्रित्यतिष्ठति॥५५॥ शिवेच
तुर्मुखंपश्यविनयावनतंसदा॥ पंचाक्षरजपासक्तः कृतांजलिपुटोमुदा॥५६॥ पश्यप्रजावतींदेविमैनाकेनसमन्वितां॥ पश्यपश्यनगाधीशंमदर्चनपरा
यणं॥५७॥ पश्यसूर्यंपश्यचंद्रमिंद्रादीनपिपश्यतान्॥ गंधर्वान्पश्ययक्षांश्चकिंनरांश्चमदर्चकान्॥५८॥ पन्नगान्पश्यसुभगेपश्यशेषादिकानपि
॥पशौलागाननिपुणामनोज्ञानागकन्यकाः॥५९॥ वेदान्मूर्त्तिधरान्पश्यमुक्तिमंडपसंस्थितान्॥ एतेसर्वेपिसततंपूजयंत्यत्रमांविभुं॥६०॥ शिवे
कालत्रयेप्येतेसर्वेप्यर्घ्यकरामुदा॥ मामर्चयंतिगायंतिनृत्यंतिप्रणमंतिच॥६१॥ पुरात्रकार्त्तिकेमासिचतुर्दश्यांसुराःशिवे॥ सायंकालेसमागत्य
पूजांकृत्वास्थितामुदा॥६२॥ तदादधीचिरर्घ्याद्यैर्मामभ्यर्च्यप्रयत्नतः॥ सत्वरंगंतुमुद्युक्तः संमर्द्दमसहंस्तदा॥६३॥ तदात्तुमुनयः सर्वेबह
वस्तेनसंगताः॥ गंतुंसमुद्यतादेविसंमर्दोभूत्तदाबहु॥६४॥ तंदावेत्रंसमादायविष्णुरेषः प्रयत्नतः॥ सत्वरंभ्रामयामासवेत्रमेचलकांचनं॥६५॥

तदादधीचिः संक्रुद्धो गृहीत्वा विष्णुमुद्धतं ॥ द्वारान्निष्कासयामास पश्यत्स्वचवगणेष्वपि ॥ ६६ ॥ तदा युद्धमभूद्घोरं तयोरन्योन्यमं
बिके ॥ तदा पाशुपतास्त्रेण बबन्ध स जनार्दनं ॥ ६७ ॥ तदा नंदिः समागत्य प्रसाद्य मुनिपुंगवं ॥ अपराधान्क्षमस्वास्य विष्णोरित्या
ह सादरं ॥ ६८ ॥ ततस्तं मोचयित्वैनं नंदिकेशमुनीश्वरः ॥ समाश्रित्य पुनः पूजां चकार मम सादरं ॥ ६९ ॥ ततः परं ऋषिगणाः सर्वे
पि मदनुग्रहात् ॥ संपूज्य निशीयत्नेन चक्रु जागरणं शिवे ॥ ७० ॥ कार्तिकस्य चतुर्दश्यां बिल्वैश्च कनकाह्वयैः ॥ द्रोणपुष्पैश्च ते पूजां
चक्रुर्मयि महेश्वरे ॥ ७१ ॥ तिलैः ससर्षपैः शुक्लैश्चक्रुः पूजां मयि प्रिये ॥ कृष्णगोघृतदीपानां महस्रसार्धशतत्रयं ॥ ७२ ॥ दत्तं क्षीरान्न
माज्याक्तं दत्तं मह्यं वरानने ॥ धूपदीपौ पुनर्दत्तौ दत्तः पुष्पांजलिस्ततः ॥ ७३ ॥ प्रदक्षिणनमस्कारान्कृत्वा च तदनंतरं ॥ रात्रिर्नीता प्रय
त्नेन मत्कथाश्रवणादिभिः ॥ ७४ ॥ ततोऽरुणोदये जाते स्नात्वा स्नात्वा च भस्मना ॥ त्रिपुंड्रधारणं कृत्वा कृत्वा रुद्राक्षधारणं ॥ ७५ ॥
संध्यां समाप्य विश्वेशं मामभ्यर्च्य यथाविधि ॥ मद्भक्तान्भोजयामासुऋषयो बुभुजस्ततः ॥ ७६ ॥ यश्च शुक्लोर्जचतुर्दश्यामुपोष्य प्रयतः
शिवे ॥ मामर्चयति विश्वेशं स मुक्तो भवति ध्रुवं ॥ ७७ ॥ मल्लिंगपूजनं पुण्यं सर्वदा सर्वकामदं ॥ ऊर्जशुक्लचतुर्दश्यामर्चितं बहुपुण्यदं ॥ ७८ ॥
कार्तिकस्य चतुर्दश्यां सितायां मां प्रयत्नतः ॥ यः पूजयति पुण्यात्मा स मुक्तो नात्र संशयः ॥ ७९ ॥ इदं वैश्वेश्वरं लिंगं साक्षान्मद्रूपमुत्तमं ॥
को जानाति प्रयत्नेन समाराधति प्रिये ॥ ८० ॥ अस्य लिंगस्य माहात्म्यं वेदैर्न ज्ञायते शिवे ॥ न विष्णुना ब्रह्मणा वा किंतु तज्ज्ञायते मया ॥ ८१ ॥
माहात्म्यं ज्ञातुमेतस्य वेदैस्तप्तं तपः पुरा ॥ विष्णुनापि तपस्तप्तं ब्रह्मणापि वरानने ॥ ८२ ॥ एतैस्तप्त्वा तपो घोरं बहुकालं प्रयत्नतः ॥ श्रीशिव
ततस्तत्त्वमविज्ञाय विरतास्तपसः शिवे ॥ ८३ ॥ एतादृशमिदं लिंगं सर्ववेदान्तसंस्तुतं ॥ सुरासुरार्चितं लिंगं नानामुनिवरार्चितं ॥ ८४ ॥ ९३
मम लिंगमिदं देवि पूजितं भुक्तिमुक्तिदं ॥ पूजयस्वाद्य यत्नेन नवबिल्वदलादिभिः ॥ ८५ ॥ अभिषेचय मल्लिंगं क्षीराद्यैर्भक्तिपूर्वकं ॥ ततो
स्य कुरु लिंगस्य कर्पूराद्यनुलेपनं ॥ ८६ ॥ ततो मंदारकुसुमैर्बिल्वपत्रैश्च कोटिशः ॥ संपूज्य कुरु नैवेद्यं सघृतं क्षीरमुत्तमं ॥ ८७ ॥
कृत्वा प्रदक्षिणादीनि लिंगध्यानं कुरुष्व मे ॥ नित्यमेतस्य लिंगस्य भक्तिं कुरु मनोरमे ॥ ८८ ॥ दृष्ट्वेदं लिंगममलं सर्वे प्यभ्य

र्च्यं यत्नतः ॥ प्रियेत्वमपियत्नेन कुरु मल्लिंग पूजनं ॥ ८९ ॥ ममापि जायते भक्तिर्मल्लिंगाभ्यर्चने शिवे ॥ दृष्ट्वेदं लिंगममलं कोवानाभ्यर्च
यिष्यति ॥ ९० ॥ ममप्रियतरं लिंगं सर्ववेदस्तुतं प्रिये ॥ इदमेव न चैतस्मादन्यात्प्रियतरं मम ॥ ९१ ॥ इदं लिंगं स्वप्रकाशमेतद्भासैव केवलं ॥
विभाति सर्वमेतद्य दृश्यते सचराचरं ॥ ९२ ॥ नेदं प्रभासयत्यर्को न भासयति चंद्रमाः ॥ न तारका भासयंति विद्युतोपि कुतोनलः ॥ ९३ ॥
एतादृशमिदं लिंगमविकारमदात्मकं ॥ द्रष्टव्यमर्चनीयं च ध्यातव्यं च प्रयत्नतः ॥ ९४ ॥ सर्वोपि पुण्यकालोत्र काश्यां मल्लिंग पूजने ॥
व्यतीपातादयो योगाः सर्वदापि वरानने ॥ ९५ ॥ सर्वदा ग्रहणान्यत्र सर्वदाप्ययनादिकं ॥ सर्वदा पुण्यऋक्षाणि सर्वदा विषुवादिकं ॥ ९६ ॥
यदेदं पूज्यते लिंगं मद्भक्तैर्भक्तिपूर्वकं ॥ तदैवायांति सुभगे पुण्यकालाः सहस्रशः ॥ ९७ ॥ अस्मिन्नेतादृशे लिंगे प्रविश्य सततं शि
वे ॥ सादरं प्रतिगृह्णामि मद्भक्तकृत पूजनं ॥ ९८ ॥ ॥ सूत उवाच ॥ ॥ इति श्रीविश्वनाथस्य श्रुत्वा वचनमंबिका ॥ भक्त्या वैश्वेश्वरं लिं
गं पूजयामास चेश्वरी ॥ ९९ ॥ ततस्तस्मिन्महालिंगे सर्वदेवशिखामणिः ॥ उमया सहसंप्रीतश्चकार वसतिं शिवः ॥ १०० ॥ तदेव लिं
गमधुना ब्रह्मविष्ण्वादिभिः सुरैः ॥ सर्वदा पूज्यते भक्त्या श्रीमहेशगणैरपि ॥ १ ॥ श्रीमद्विश्वेश्वरं लिंगमानंदघनमद्वयं ॥ श्रुतं स्मृतं वा दृष्टं
वा भुक्तिमुक्तिप्रदं ध्रुवं ॥ २ ॥ श्रीमद्विश्वेश्वरं लिंगमानंदघनमद्वयं ॥ ~~श्रुतं स्मृतं वा दृष्टं वा~~ प्रसंगादपि संश्रुतं ॥ चतुर्वर्ग प्रदं विप्राः सत्यं
सत्यं मयोच्यते ॥ ३ ॥ सकलभुवनदेवं देवतासार्वभौमं विविधनिगमवेद्यं ब्रह्मविष्ण्वादिवंद्यं ॥ भजत मुहुरनंतं शंभुमाद्यंतशून्यं सुभद
मनिशमीशं सावधानेन विप्राः ॥ ४ ॥ पिबत शैवरहस्यरसावृतं शिवरहस्यकथामृतमुत्तमं ॥ भजत शंकरमेव सदा मुदा लभत मुक्ति
मुमापतिसेवया ॥ ५ ॥ चंद्रचूडचरणौ रमणीयौ मुक्तिबीजकरणौ वरणीयौ ॥ भूरिपुण्यगुणवर्णनीयावादराद हरहः स्मरणी
यौ ॥ १०६ ॥ ॥ इति श्रीशिवरहस्ये उग्राख्ये पूर्वार्धे सप्तमांशे श्रीशिवगौरीसंवादे काशीप्रभावकथनं नाम एकोनत्रिं
शोध्यायः ॥ २९ ॥ ॥ श्रीसांबसदाशिवार्पणमस्तु ॥ श्रीशिवायनमः ॥ श्रीशिवायनमः ॥ श्रीसांबसदाशिवायनमः ॥